UNIVERSITY OF DELHI



D U.P. 342—7-99—10,000

ARTS LIBR
(DELHI UNIVERSITY L
Cl. No. 015.2 DCG 2
Ac. No. 81595

This book should be returned on or b
below. An overdue charge of Rup
each day the book is kept overtime.
(Authority : E.C. Res. 200 dated 27

THE

KASHI SANSKRIT SERIES

87

(Nataka Section, No. 1)

THE

NĀGANANDA

OF

SRĪ HARSADEVA

Edited with the

BHĀVĀRTHA DĪPIKĀ SANSKRIT, HINDĪ

Commentries, Notes etc.

By

Shahityāchārya

PT. BALADEVA UPADHYĀYA M. A.

PROFESSOR, B. H. U.

PUBLISHED BY

JAYA KRISHNA DAS HARIDAS GUPTA

The Chowkhamba Sanskrit Series Office,

BANARAS CITY

All Rights Reserved by the Publishers.

PUBLISHED BY

JAYA KRISHNA DAS HARIDAS GUPTA,

CHOWKHAMBA SANSKRIT SERIES OFFICE.

BANARAS.

Printed at the Vidya Vilas Press, Banaras.

1948.

॥ श्रीः ॥

काशी-संस्कृत-सीरिज-पुस्तकमालायाः

८७.

(नाटकविभागे (१) प्रथमं पुष्पम्)

श्रीहर्षदेवप्रणीतं

नागानन्दं नाटकम्

गोहिश्वविद्यालयाध्यापकेन एम. ए., साहित्याचार्येतिपदवीविभूषितेन

पण्डितबलदेवोपाध्यायेन स्वप्रणीतया भावार्थदीपिकया

व्याख्यया समलङ्कृत्य भूमिकानुवादादिभिः

सनाथीकृत्य सम्पादितम्

प्रकाशकः

जयकृष्णदास हरिदास गुप्तः,

चौखम्बा संस्कृत सीरिज आफिस

विद्याविलास प्रेस, बनारस सिटी ।

द्वितीयं संस्करणम्] [सं० २००

[अस्य सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः]

* श्रीः *

उपोद्घातः

उपक्रमः

विदितमेव विश्वेषां विदुषां यदियं देववाणी सर्वासां वाणीनां शीर्षस्थानीयतां भजत इति। समस्तेऽस्मिन् जगति नान्या कापि भाषा विद्यते याऽस्माकं संस्कृतभाषायास्तुलामप्यारोढुं क्षमा स्यात्। तत्र प्राचीनतैव सर्वप्रधानं कारणम्। संस्कृतभाषैव भवति निखिलेऽस्मिन् भूमण्डले अखिलास्वेव भाषासु प्राचीनतमेति विभाति सर्वेषां मारतीयानां तदितरदेशीयानाञ्च पण्डितानामभिमतं मतम्। विहायेदं कारणमन्यदपि भवति तस्याः प्राधान्ये बीजम्। संस्कृतभाषायामस्यां सर्वेषामाध्यात्मप्रतिपादकानामधिभूतनिदर्शकाणा च विषयाणां समुल्लसति समुचितः सन्निवेशः। साक्षात्कृतधर्मभिर्ऋषिभिर्दृष्टैर्मन्त्रराशिभिः संवलिता अस्यामेव गीर्वाणवाण्यां जगतां कल्याणाय समुदिता विद्यन्ते भगवन्तश्चत्वारो वेदाः। अस्यामेव वाण्यां समाहितसूक्ष्ममतिभिर्विभाव्यानि प्रकटतां भजन्ते औपनिषदिकानि तत्त्वानि। संस्कृतभाषयैव विकाशं भजमानानि दर्शनतत्त्वानि विश्वेषां तत्त्वज्ञानामद्याप्याश्चर्यं समुपजनयन्ति। किं बहुना नास्ति कोऽप्यैहिक आमुष्मिको वा विषयो यस्य प्रतिपादनं सुचारुतयाऽस्माकं संस्कृतभाषायां विहितं नास्तीति निपुणं वक्तु शक्यतेऽस्माभिः।

अस्यामेव भाषायां निबद्ध एकोऽपरोऽस्ति सकललोकसंमतो विषयः, यस्य कांचन समतामपि धारयितुं न पारयन्त्यन्यभाषानिबद्धानि साहित्यानि किमु कमप्युत्कर्षम्। तत् खलु जनानां श्रवणपुटेषु सुधाधारां वमत्, सहृदयानां मनसि कमप्यानन्दोल्लासं वितरत्, कामपि परां निर्वृतिं सद्यो विदधत्, सकलजनमनोज्ञं काव्यं नाम। सन्तीतरभाषानिबद्धेष्वपि साहित्यनिचयेषु सरसानि काव्यानीत्यत्र नास्ति कस्यापि विदुषो विमतिः, परन्तु या खलु संस्कृतकाव्ये शब्देषु कापि कमनीया 'शय्या' समुपलभ्यते, अर्थेषु च भावपुरःसरं रसानर्भरं च कमप्यनिर्वचनाह्लादमुपदधानं सहृदयहृदयवेद्यं च यत् गोचरीक्रियते, तत्तु अन्यभाषाविलिखितेषु काव्यग्रन्थेषु नितान्तमभावरूपेण परिणमतीति केषां नैष संस्कृतकाव्यपरिशीलनशीलानां विवेचकानामभिनन्दनीया सम्मतिः। दिष्ट्या तत्सं-

स्कृतकाव्यान्तर्गतं ग्रन्थमेकमुद्दिश्याऽऽलोचनाया अद्य सुभगोऽयमवसरः। तदत्र तद्ग्रन्थमभिलक्ष्य वयं नातिविस्तरं किमप्यालोचयामः।

नाटकविचारः

अथ 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति पण्डितराजजगन्नाथसम्मतं काव्यसामान्यलक्षणम्। काव्यं च दृश्यश्रव्यभेदेन द्विविधं भवति। "दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्" इति साहित्यदर्पणे विश्वनाथोक्तेः। तयोर्मध्ये प्राधान्येन श्रवणपदवीं समुपेत्य सहृदयहृदयावर्जकं काव्यं श्रव्यमित्यभिधीयते। दर्शकानां नयनावर्जनं विधाय तद्द्वारा हृदयाकर्षकं काव्यं दृश्यमिति नाम्ना व्यपदिश्यते। अप्रस्तुतत्वात् श्रव्यकाव्यं नात्र वर्ण्यते।

तत्र दृश्यकाव्यमेव नाटचमिति कथ्यते। अवस्थानुकृतिरेव नाटयं भवति। काव्योपनिबद्धधीरोदात्ताद्यवस्थानुकारश्चतुर्विधाभिनयेन,तादात्म्यापत्तिर्हि तन्नाटयं नाम। नटेऽभिनेयरामाद्यवस्थारोपेण वर्तमानत्वात् तदेव नाटयं रूपकाख्ययाऽभिधीयते, "रूपकं तत्समारोपात्" इति दशरूपके धनञ्जयवचनात्। रसाश्रयस्य तस्यैव रूपकस्य प्राधान्येन दश भेदा भवन्ति। ते च यथा—नाटयशास्त्रे

नाटकं सप्रकरणमङ्को व्यायोग एव च।
भाणः समवकारश्च वीथी प्रहसनं डिमः।
ईहामृगं च विज्ञेयं दशमं नाटयलक्षणम्॥

यथा च दशरूपके—

नाटकं सप्रकरणं भाणः प्रहसनं डिमः।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति॥

अनुकारात्मकत्वेनाभेदेऽपि रूपकाणां भेदे वस्तु नेता रसश्च हेतुत्वं भजन्ते। 'वस्तु नेता रसस्तेषां भेदकः' इति धनञ्जयवचनात्। सर्वेष्वेव रूपकेषु वस्तुनो नेतुः रसस्य चापि स्फुटमेव पार्यक्यं भवति।

तत्र दशविधेषु रूपकेषु समधिकभाहात्म्यात् नाटकमेव प्राधान्यं भजते सहृदयहृदयावर्जनं च सातिशयं तनुते। भावार्थदीपिकयोद्भासितार्थजातं प्रस्तुतमिदं नागानन्दं नाम रूपकाणां मध्ये नाटकपदवीमेव समश्नुते इति नाटकलक्षणविदुषां सामान्यतो ग्रन्थमिममालोचयता न केषां विपश्चितां नचिरादेव स्फुटीभवति। तदेव नाटकलक्षणमित्थं प्रतिपादितं दर्पणे विश्वनाथेन—

नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्।
विलासद्ध्यादिगुणवद्युक्तं नानाविभूतिभिः॥
सुखदुःखसमुद्भूति नानारसनिरन्तरम्।
पञ्चादिका दशपरास्तन्नाङ्काः परिकीर्तिताः॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः॥
एक एव भवेदङ्गी शृङ्गारो वीर एव वा।
अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः॥
चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः।
गोपुच्छाग्रसमाङ्कं तु बन्धनं तस्य कीर्तितम्॥

तत्र नाटकीयस्य वस्तुनः परीक्षणे प्रस्तुते सति, कीदृशस्य तस्य नाटके ऽवतारः समुचित इति तावत् विचारणीयम्। प्रसिद्धस्य पुराणेतिहासादौ उताहो कविकल्पनाप्रसूतस्याप्रख्यातस्य वस्तुनः समुपन्यासो नाटके निबन्धनीयः? प्रख्यातवस्तुविषयं नाटकं लक्षयता श्रीभरतमुनिना नाटकीयवस्तुनः प्रख्यातता तु स्फुटमेवाभिधया स्वीकृता। तन्मतमेवानुसृत्य 'तत् प्रख्यातं विधातव्यं वृत्तमत्राधिकारिकम्' इति दशरूपके धनञ्जयेन, 'नाटकं ख्यातवृत्तं स्यात्' इति च दर्पणे विश्वनाथेन च, नाटकीयवृत्तस्य ख्यातत्वं व्यलेखि। अतो नाटके ख्यातमेव वृत्तमुपनिबध्यते। रामायणमहाभारतादौ प्रसिद्धस्येव कथावस्तुनः समुपन्यासो नाटके समुचित इत्यत्र नास्ति कोऽपि सन्देहः।

नागानन्दं नाटकम्

इदं च नागानन्दं नाटकम्। तस्य नाटकीयं वस्तु न खल्वतिसरसमेव, अपि तु सर्वेषां जनानां कल्याणाय परोपकारव्रतस्य कामपि परां कोटिं प्रकटयति। निखिलैर्नाटकलक्षणैः समन्वितं नागानन्दमेतत् संस्कृतरूपकाणां मध्ये विपुलं वैशिष्ट्यं धारयति। प्रायशः संस्कृतभाषानिबद्धेषु नाटकेषु अनुरागमूलस्य शृङ्गाररसस्यैव सर्वत्र प्राधान्यं गोचरीक्रियते। अत्र तु शृङ्गारं गौणरूपेण प्रदर्श्य कविना दयावीरस्य कापि प्रधानता वर्णिता। दयावीररसप्रदर्शनं तु नाटकेष्वतिविरलमिति विदितमेव। स्वार्थमूलप्राया हि प्राणिनां प्रवृत्तिरिति हेतोर्नाटकेषु स्वार्थोपपादकानामेव बहुधा दृश्यते प्रतिपादनं विषयाणाम्। परन्त्वत्र निःश्रेयसफलकं परोप-

कारनिदर्शकं पवित्रं चरित्रं श्रीहर्षेण निखिलभुवनानां परमकल्याणसम्पादनाय निबद्धमिति सर्वथा जागर्ति नागानन्दस्य वैशिष्ट्य प्रचलितेभ्योऽन्येभ्यः सर्वेभ्यो नाटकेभ्यः। नागानन्दीयां विद्याधरजातकप्रतिबद्धां बौद्धधर्मानुसारिणीं कथां निबध्नतापि कविना भगवत्या गौर्याः प्रसादेन उपगतजीवितं नायकं जीमूतवाहनं दर्शयता वैदिकबौद्धधर्मयोस्तत्कालानुकूलः समुचितः समन्वयः प्रपञ्चितः इत्यहो विपुला विशिष्टता नागानन्दस्य।

प्रथमतः कथासारमुपन्यस्य तदनन्तरं तस्य प्रख्याततामुद्दिश्य तन्मूलं वयं विवेचयिष्यामः। अयमत्र कथाभागः—

कथासारः

अभूदभूतपूर्वो राजा जीमूतकेतुर्नाम। तस्य च तनयोऽभूज्जीमूतवाहनो नाम। अथ समागते वार्धक्ये जीमूतकेतुः स्वराज्यभारं जीमूतवाहने आरोप्याऽऽत्मानं सपत्नीकं वनवासमनैषीत्। जीमूतवाहनोऽपि पितृशुश्रूषाविरहितानि दिनान्यवगणयन्, समृद्धमपि राज्यं तृणमिव परिकलयन्, वयस्य द्वितीयो पितृपरिचर्यासमाक्षिप्तहृदयः सचिवे दत्तराज्यभारो वनमेवायासीत्। तत्र पितुरनुज्ञया मलयाचले आश्रमपदं निरूपयितुं वयस्येन सहोदचलत्। मनोरममाश्रमं च दृष्ट्वाऽतीवानन्दं मनस्यन्वभूत। तत्र काकलीप्रधानं गानमाकर्ण्य विमुग्धचेताः, विजयपताकामिव मकरध्वजस्य संकेतभूमीमिव लावण्यस्य, समीपस्थे गौर्यायतने वीणावादननिरतां, कामपि सखीद्वितीयां कन्यकामपश्यत्। जाते च साक्षात्कारे तयोर्द्वयोर्हृदि सद्यो रागः पदमधात्। केनापि तापसेनाहृता मलयवती स्वगृहमगमत्। विरहेण च व्याकुलमनाश्चतुरिकाद्वितीया क्वापि चन्दनवीथिकायां स्वकालमनयत्। जीमूतवाहनोऽपि तत्रैवाऽऽगत्य स्वप्नेऽनुभूतसौन्दर्यां कामपि कामिनीं स्वप्रियामिति व्यपदिशन् शिलायां वर्णकैः वर्णयाञ्चकार। अन्यस्यां कस्यांचन कामिन्यां तदीयपक्षपातमवधार्य मलयवती लताभिरात्मानमुद्बध्य प्राणान् त्यक्तुकामा नायकेन कथंचिन्निवारितोऽभूत्। शिलायामभिलिखितां स्वकीयामेवाकृतिं निरीक्ष्य सा कथमपि व्यपगतेर्ष्या जाता। विश्वावसुना जनकेन चानुज्ञातोपयमनसंस्कारा मुदा जीमूतवाहनमुपयेमे।

नायकस्तु मलयवतीभ्रात्रा मित्रावसुना सह समुद्रतटं जलौघं द्रष्टुमभिजगाम। तत्र गरुडेन भक्षितानामुरगपतीनां हिमालयशिखरसन्निभानस्थिसंचयानवलोक्यामास। नागानां भक्षणवृत्तान्तमाकर्ण्यतत्स्तत्कृते स्वप्राणपरित्यागेच्छा तस्य मनसि

पदं लेभे। तस्मिन् दिवसे भक्ष्यमाणस्य शंखचूडस्य जनन्या आर्तनादेन सोऽधिकं मर्माहतो बभूव । गोकर्णेश्वरं द्रष्टुं गतवति शंखचूडे जीमूतवाहनो रक्तवस्त्रयुगलेन श्वशुरालयात् कञ्चुकीसमानीतेनाऽऽत्मानमाच्छाद्य वध्यशिलायां समुपावेशयत् । तस्मिन्नेव समये गरुड आजगाम । तं च चञ्च्वा गृहीत्वा मलयशिखरे समुपविष्टो भक्षयितुमारेभे । जीमूतवाहनस्य चूडामणिरस्मिन् व्यापारे तस्य मस्तकात् पितुर्जीमूतकेतोः पादयोर्वन्दनां विधातुमिवापपात । चूडामणिं निरीक्ष्य स वृद्धो ऽतीवाशङ्काकुलितहृदयो बभूव । स्वभार्यया वध्वा च साकं जीमूतवाहनमन्वेष्टुं यावत् कतिचित् पदान्यगमत् तावत् विलपन्तं शङ्खचूडमद्राक्षीत् । तस्मात् लब्ध-समस्तवृत्तान्तो मलयशिखरे समुपाविष्टं भक्षणात् विरतमपि, जीमूतवाहनेन भोजनाय मुहुर्मुहुः प्रार्थ्यमानं, चण्डरूपं सुवर्णं पुरतोऽवलोकयामास । शंखचूडेन निवेदिते जीमूतवाहनस्य विद्याधरत्वे गरुडः स्वीयामतिमहतीं भ्रान्तिमाकलय्य समुपजात-पश्चात्तापः तद्दिनादारभ्य नागानां भक्षणात् विरराम । इन्द्रलोकं चोपेत्य अमृत-वर्षणेन न केवलं परोपकाराय त्यक्तजीवितं जीमूतवाहनं, अपि तु सकलानेव भक्षितानुरगपतीन् जीवयामास । अनुग्रहाय प्रार्थ्यमाना भगवती गौरी अपि स्वीकीयेनामोघदर्शनेन सर्वान् आनन्दनिमग्नान् विदधे । मानसैरुपनीतैः सलिलैश्च जीमूतवाहनं विद्याधराणां चक्रवर्तिपदे सथ एवाभिषिक्तं चकार ।

वस्तुपरीक्षणम्

इदमेव नागानन्दस्य संक्षिप्तं वृत्तम् । नागानां भक्षणव्यापारात् विरते गरुडे तदाह्लाद एव एतन्नाटकाभिधाने हेतुः । वृत्तमिदं रामायणमहाभारतादावनुपल-भ्यमानमपि प्राचीनकालेऽतीव प्रख्यातिमभजत् इति स्फुटं परिज्ञायते । गुणाढ्येन विरचिता बृहत्कथा अस्य नाटकस्य मूलमिति विदितमेव भविष्यति तद्संस्कृता-नुवादमधोविलिखितमवलोकयतां सर्वेषां विपश्चिताम् । अयं श्री गुणाढ्यमहाकविः प्रतिष्ठानपुराधीश श्री सातवाहन महीपतेः सभायामासीत् । खिस्तीयप्रथमशतक एव तस्य समयः । तत्रचिता च बृहत्कथा लक्षश्लोकनिबद्धा पिशाचभाषामयी अद्भुतार्थासीदिति प्रसिद्धमेवा। सा च 'भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथा-मिति' दण्डिना,

समुद्दीपितकन्दर्पा कृतगौरीप्रसाधना ।
हरलीलेव नो कस्य विस्मयाय बृहत्कथा ॥

इति बाणभट्टेन च स्वस्वग्रन्थेष्वन्यैरपि धनञ्जयत्रिविक्रम—गोवर्धनाचार्यादि-

भिश्च स्मृता प्रशंसिता च विद्यते । पैशाचीभाषया निबद्धाया बृहत्कथाया नैकापि पंक्तिरपि साम्प्रतं विद्वज्जनकौतूहलनिरसाय समधिगम्यते इत्यहो विषादस्य विषयः । दिष्ट्या समग्रायास्तया गीर्वाणवाण्यामधुनापि त्रयोऽनुवादाः समुपलभ्यन्ते । प्रथमो बुधस्वामिना विनिर्मितो बृहत्कथाश्लोकसंग्रहः । द्वितीयः काश्मीरकेण महाकविना क्षेमेन्द्रेण विरचितो बृहत्कथामञ्जरीतिनाम्ना प्रसिद्धः । तृतीयस्तु तदेशीयेनैव सोमदेवभट्टेन निबद्धः कथासरित्सागरेत्यभिधानात्मकः । क्षेमेन्द्रः कश्मीरनरेशानन्तराजाज्यसमये (१०२८—१०८०खिस्ताब्देषु) कश्मीरेषु समुत्पन्नोऽभूत् । बृहत्कथामञ्जर्यां बृहत्कथायाः सारोऽतिरुचिरेण शब्दविन्यासेन निबद्धो वर्तते । सोमदेवभट्टस्तु तस्मिन्नेव काले कश्मीरेष्वेवाभूत् । सच श्रीमदनन्तराजमहिष्या सूर्यवत्याः प्रोत्साहनेन नातिसंक्षिप्तं नातिविस्तीर्णं स्वान्तार्कर्षणक्षमं बृहत्कथानुकूलं संस्कृतवाण्या कथासरित्सागरनामकं ग्रन्थरत्नं निर्ममे । बुधस्वामी तु क्षेमेन्द्रादपि प्राचीनः, परन्तु दुर्भाग्यवशात् श्लोकसंग्रहस्य कियानंश एवाद्यावध्युपलब्धो विद्यते । अतः श्लोकसंग्रहस्थाया नागानन्दाख्यायिकाया विषये मौनाश्रयणमेव श्रेयः । उभयोः मञ्जरीसरित्सागरस्थयोः कथावस्तुनोरभेदेऽपि क्वचित् क्वचित् वैचित्र्यमद्भावात् द्वाभ्यामपि जीमूतवाहननिबन्धनाऽऽख्यायिका अत्र विद्वज्जनसौकर्याय यथातथमुल्लिख्यते—

बृहत्कथामञ्जर्यां जीमूतवाहनस्य कथा ।

अस्ति श्री काञ्चनपुरी मूर्ध्नि गौरोगुरोर्गिरेः ।
रत्नप्राकारकिरणैरभ्रान्तोल्लिखिताम्बरा ॥ १ ॥
जीमूतकेतुस्तस्याभूद्विद्याधरपतिः पतिः ।
यस्याभूच्छेषयशसः प्रख्याता काप्यनन्तता ॥ २ ॥
विद्याधरेन्द्रदुहिता भार्याभूत्तस्य संमता ।
कान्ता कनकवत्याख्या ख्यातिक्षेत्रं मनोभुवः ॥ ३ ॥
तेनाजनि सुतस्तस्यां कल्पवृक्षवराद्वरः ।
जीमूतवाहनो नाम समूहो गुणसम्पदाम् ॥ ४ ॥
सोत्कण्ठं काञ्चनलताकुञ्जेष्वमरभूभृतः ।
गायन्ति त्यागसुभगं यस्य स्वर्गाङ्गणे यशः ॥ ५ ॥
तं सर्वगुणसम्पन्नमभिषिच्यात्मजं पिता ।
कल्पवृक्षं ददावस्मै नानासिद्धिसुधाफलम् ॥ ६ ॥

कान्ताकटाक्षचपलं चपलं यौवनं धनम् ।
जीवितं चेति स ध्यात्वा तमर्थिभ्यस्तरुं ददौ ॥ ७ ॥
तेन दारिद्र्यनाशाय जगति प्रतिपादितः ।
हेम्ना संपूर्य निखिलं क्षणात्सोऽन्तर्दधे द्रुमः ॥ ८ ॥
कुलक्रमागते तस्मिन्कल्पवृक्षे व्ययीकृते !
अपूर्वत्यागिना तेन त्रिलोकी विस्मयं ययौ ॥ ९ ॥
ज्ञात्वा तं प्रतिसामन्ता रहितं सुरशाखिना ।
तद्राज्यहरणोद्योगे बभूवुः संहताः मिथः ॥ १० ॥
जीमूतवाहनो ज्ञात्वा विद्यया तद्विचेष्टितम् ।
तद्द्वेधाकृणितमना राज्यं तत्याज निस्पृहः ॥ ११ ॥
स पित्रा सह मात्रा च तपसे सिद्धसेवितम् ।
मलयं खेचरवधूविलासनिलयं ययौ ॥ १२ ॥
खेलद्भुजङ्गकटकं सिद्धमण्डलसेवितम् ।
चण्डीपतिमिवोत्सर्पन्नीलकण्ठप्रभावनम् ॥ १३ ॥
संचरत्सिद्धललनाचरणाम्भोजकान्तिभिः ।
बिभ्राणमिव पर्यङ्कसक्ताब्धेर्विद्रुमावलीम् ॥ १४ ॥
निर्भरस्मेरहाराङ्कमकरन्दोज्वलांशुकम् ।
स त्वार्यं भूभृतां धुर्यं चन्दनागरुभूषितम् ॥ १५ ॥
स प्राप्य सर्वसिद्धानामाश्रयं विषयं श्रियः ।
पित्रोः सपर्यानिरतस्तस्थौ जीमूतवाहनः ॥ १६ ॥
कदाचिदथ विश्रम्भसारिणा सुहृदा सह ।
स्वैरं मधुकराख्येन चचारोपवनेषु सः ॥ १७ ॥
स तत्र कान्तं कुसुमकरन्दं नाम काननम् ।
प्रविश्यापश्यदुच्छ्वासिसौरभाः पुष्पवल्लरीः ॥ १८ ॥
यत्र खेचरनारीणां तारनूपुरराविभिः ।
अशोकाश्चरणाघातैरुत्फुल्लाः भान्ति रागिणः ॥ १९ ॥
यत्र विद्याधरवधूमधुगण्डूषनिर्भरैः ।
जृम्भेवारम्भि बकुलैः पुष्पाननविकाशिभिः ॥ २० ॥
यत्र दिव्याङ्गनातुङ्गस्तनोत्सङ्गतरङ्गिणः ।

मन्दारमकरन्दाढ्याः सुन्दरा वान्ति वायवः ॥ २१ ॥
यत्रोद्धूतालिपटलं विलोक्य घनविभ्रमम् ।
नृत्यन्ति हेमकदलीकुञ्जेषु शिखियोषितः ॥ २२ ॥
उत्कण्ठाकोमलं यत्र गीतं किन्नरयोषितः ।
शृण्वन्ति निश्चलाः साश्रुनयनाः हरिणाङ्गनाः ॥ २३ ॥
ददर्श तत्र कैलाशशिखरस्फारविभ्रमम् ।
गङ्गायितपताकाङ्कं गौर्याः प्रासादमुन्नतम् ॥ २४ ॥
स्वयमेत्य सितच्छायास्पष्टीकृतदिगन्तरम् ।
स्थितं दुहितृवात्सल्यादिव तत्र हिमाचलम् ॥ २५ ॥
देवीगर्भगृहे तस्मिन्गीतं वीणास्वनाश्रितम् ।
शुश्राव श्रोत्रपीयूषं हृदयानन्दनिर्झरम् ॥ २६ ॥
तच्छ्रुत्वा कौतुकाकृष्टः प्रविश्य गिरिजालयम् ।
कन्यामपश्यत् संसारसारं सरसिजेक्षणाम् ॥ २७ ॥
प्रवालपल्लवच्छायपादाम्बुजयुगं बभौ ।
रागसागरसंचारादिव लग्नारुणद्रवम् ॥ २८ ॥
लावण्यनलिनीबालमृणालयुगलोपमे ।
जङ्घाकाण्डद्वये तस्याःकान्तिहंसीव्यरोचत ॥ २९ ॥
विलासबर्हिकदलीदण्डावूरू बभार सा ।
पुष्पायुधपुरोकान्तदन्ततोरणविभ्रमे ॥ ३० ॥
पुलिने कान्तिसरितः पर्यङ्कशयने रतेः ।
मेखलापरिखं यस्या जघनं मन्मथं परम् ॥ ३१ ॥
मग्नो नाभीह्रदावर्तं हरकोपानलाकुलः ।
कामोऽनुमीयते यस्या रोमालीधूम्रलेखया ॥ ३२ ॥
तारहारांशुमुकुलैर्जातौ यस्याः पयोधरौ ।
चक्रवाकाविव मुखासक्तबालबिसाङ्कुरौ ॥ ३३ ॥
यस्या वलयकेयूरनीलरत्नांशुभोगिभिः ।
तारुण्यचन्दनलतालालिते बभतुर्भुजे ॥ ३४ ॥
स्मरबालवसन्तेन कृतेवाधरकान्तिभिः ।
श्यामा यौवनस्थास्सा यस्याः किशलयावलिः ॥ ३५ ॥

सुस्पष्टनासा वंशोज्ज्वललाटच्छत्रमाश्रिताः ।
यत्कटाक्षच्छटाः प्रापुरुत्पलोद्दामदायताम् ॥ ३६ ॥
वदनाम्भोजभृङ्गालीं या बभारालकावलीम् ।
प्रशस्तिमिव कामेन न्यस्तां सौभाग्यभूपतेः ॥ ३७ ॥
तां दृष्ट्वा विस्मयोत्फुल्ललोचनस्तन्मयोऽभवत् ।
क्षिप्रं नवावतारेण स्मरेण तरलीकृतः ॥ ३८ ॥
विस्तीर्णं सुकृतिप्राप्यं तारुण्यस्तनपादपम् ।
प्रशान्तविग्रहकथं न्यस्तचापमिव स्मरम् ॥ ३९ ॥
लक्ष्मीविलासभवनं भुजस्तम्भविभूषितम् ।
सापि लावण्यनलिनी राजहंसं विलोक्य तम् ॥ ४० ॥
लज्जामज्जत्तनुलता कम्पसंपत्तरङ्गिता ।
अस्वेदमौक्तिकवता बभूव स्वेदबिन्दुभिः ॥ ४१ ॥
क्षिप्रं पुलकिता तस्या विरराज कुचस्थली ।
विशङ्किरिव पुष्पेषु शरैराकीर्णकेसरा ॥ ४२ ॥
ततः सहेलं तामेत्य प्राह जीमूतवाहनः ।
प्रागुर्वुपायनकर्पूरमिव दन्तांशुभिर्दिशन् ॥ ४३ ॥
आचाररुचिरः कोऽयं क्रमस्तव सुलोचने ।
संभाष्य तेन यत्पूर्वंस्वागतं प्रणयोजनः ॥ ४४ ॥
उक्त्वेति तन्मुखाम्भोजन्यस्तलोचनषट्पदः ।
अपृच्छत्तत्सखीं लोलकुण्डलोद्योतिताननः ॥ ४५ ॥
रसाधार गुणधारः कुरुते कस्य नो मनः ।
कौतुकोत्कलिकालोलस्वभावसुभगो जनः ॥ ४६ ॥
विधेरवधिनिर्माणश्लैलोक्यनयनोत्सवः ।
कुलालंकरणं कन्या कस्येयं ललिताकृतिः ॥ ४७ ॥
इत्युक्ता तेन सा प्राह सखी प्रणयमन्थरम् ।
गम्भीरोदारमधुरं कलयन्ती तदाशयम् ॥ ४८ ॥
सत्त्वमुन्नतसत्त्वानां दर्शनेन भवादृशाम् ।
मनो नृत्यति किं त्वस्याः क्षणं वाङ् न प्रवर्तते॥ ४९ ॥
लज्जानिकेतनं कन्या कथं नाथ तवाग्रतः ।

सम्भाषणे सुप्रतिभा ललनेव प्रगल्भते ॥ ५० ॥
विश्वावसोः सिद्धपतेर्वंशमुक्तालता सुता ।
इयं मलयवत्याख्या नित्यं गौरीस्तुतिव्रता ॥ ५१ ॥
निवेद्येति सखी क्षिप्रं तद्वयस्यादथाश्रुणोत् ।
जीमूतवाहनकथां प्राज्याभिनयशालिनीम् ॥ ५२ ॥
ततो नवसमुन्मेषकुसुमेषुतरङ्गिताम् ।
कान्तां पिबन्निव दृशा प्राह जीमूतवाहनः ॥ ५३ ॥
सहजेनाभिलाषेण गुणैः कान्त्या च भूषिता ।
इयमालोक्यते क्षिप्रं यदेतज्जन्मनः फलम् ॥ ५४ ॥
आनन्दमधुरा दृष्टिर्मनः प्रीतितरङ्गितम् ।
सतामेतावदौचित्यं बाह्यस्त्वाचारडम्बरः ॥ ५५ ॥
समागमं सुधावृष्टिं दृष्टिपातमनुग्रहम् ।
एवंविधस्य वपुषः को हि नाम न मन्यते ॥ ५६ ॥
इति ब्रुवाणे सानन्दं तस्मिन्विद्याधराधिपे ।
आहूता सा प्रतीहार्या प्रतस्थे मातुरन्तिकम् ॥ ५७ ॥
न्यस्तं मयि मनः पाल्यमेतदत्यन्तपेशलम् ।
इतीव कान्तं सा प्राह व्रजन्ती नूपुरारवैः ॥ ५८ ॥
ददौ त्रिकपरावृत्तिलक्षितैकस्तनी मुहुः ।
तस्मै दृशं सा धम्मिल्लमधुपासारणच्छलात् ॥ ५९ ॥
वेपथुस्तम्भसंरुद्धा तन्वी कृच्छ्रेण सा ययौ ।
सुकुमारेण मनसा सा वहन्ती महाभुजम् ॥ ६० ॥
निजमन्तःपुरं प्राप्य निःश्वसन्ती इलथांशुका ।
पपात शयनोत्सङ्गे दृष्टा मकरकेतुना ॥ ६१ ॥
तस्याः प्रववृधे क्षिप्रं स कोऽपि विरहानलः ।
यः सिच्यमानो बाष्पाम्बुपूरैरुज्जृम्भतेऽधिकम् ॥ ६२ ॥
अत्रान्तरे जलनिधिं प्रविष्टे वासरेश्वरे ।
बभूव रागिणी सन्ध्या नलिनीवनशालिनी ॥ ६३ ॥
पद्मसंकोचचकिता बभ्रमुर्भ्रमरा भुवि ।
संध्यया सपदि व्युत्तारतमोबीजकणा इव ॥ ६४ ॥

तिमिरैरञ्जनश्यामैः श्यामावदनकुन्तलैः ।
चक्रवाकीवियोगाग्निधूमाभैरुत्थितं ततः ॥ ६५ ॥
नीलाम्बुजैरिवोत्सृष्टं भ्रमरैरिव मूर्छितम् ।
नीलकण्ठैरिवोद्गीर्णं चचार सुचिरं तमः ॥ ६६ ॥
अथादृश्यत चण्डोशजटामण्डलमण्डनम् ।
श्यामाकर्पूरतिलको रोहिणीरमणः शशी ॥ ६७ ॥
दिक्कान्ताकेलिमुकुले निशामौक्तिककुण्डले ।
स्मरराजसितच्छत्रे शशिनि स्मेरज़म्भिते ॥ ६८ ॥
उत्फुल्लकुसुमामोदनन्दितेन्दीवरा मुहुः ।
पद्मिनीविरहोच्छ्वासा इव बालानिलाः ववुः ॥ ६९ ॥
योषितां हृदयाकाण्डभङ्गयन्त्रोपले विधौ ।
प्रौढिं प्रयाते पञ्चेषु वह्निकुण्डमहोल्मुके ॥ ७० ॥
श्रीखण्डरससंसिक्तकदलीदलशालिनी ।
बभूव गाढसंतापक्लान्ता सिद्धपतेः सुता ॥ ७१ ॥
न जलार्द्रैर्न वसनैर्न हारैर्न सरोरुहैः ।
तस्या न चन्द्रकान्तैश्च शशाम मदनानलः ॥ ७२ ॥
सा लज्जातरला प्राह तां सखीं पार्श्ववर्तिनीम् ।
अयि त्वमेव मे तत्र कान्तदर्शनसाक्षिणी ॥ ७३ ॥
किं करोमि क्व गच्छामि कस्यैतत् कथयामि वा ।
अयं कन्याविरुद्धो मे क्रमः कामेन निर्मितः ॥ ७४ ॥
(प्रत्यादिशन्ति सन्देशं प्रयान्ति स्वयमेव वा ।
प्रियं प्रणयशालिन्यो निर्लज्जा बत योषितः) ॥ ७५ ॥
किं वा सन्दिश्यते तस्मै लीलया हृतचेतसे ।
युवासौ भाग्यसंपन्नो वाचःकस्य शृणोति वा ॥ ७६ ॥
विश्वासोऽसीति कार्पण्यं वदतीति प्रगल्भता ।
एहीत्याज्ञावलेपोऽयं प्रियोऽसीति विलज्जता ॥ ७७ ॥
न जीवामीत्यसदृशं त्वत्प्रियास्मीत्यलक्षितम् ।
आगच्छामीत्यनुचितं स्मरार्तास्मीति चापलम् ॥ ७८ ॥
न जाने सखि! किं वाच्यो दैवादासादितोऽपि सः ।

सर्वथा नष्टसाथऽस्मिन् मरणं शरणं मम ॥ ७९ ॥
वयस्यामभिधायेत्थं सा निनायाशु निर्झरः ।
संतापशोककठिनं कुचचन्दनमार्द्रताम् ॥ ८० ॥
जीमूतवाहनोऽप्यस्मिन्नन्तरे विरहाकुलः ।
तस्मिन्गौरीवरोद्याने चचारेन्दुमुखीं स्मरन् ॥ ८१ ॥
स कामभुजगाक्रान्तः कौमुदीविषमूर्च्छितः ।
संतापविह्वलो भेजे वातूलतरलां स्थितिम् ॥ ८२ ॥
तं ध्यानमूकमभ्येत्य क्षामं मधुकरः सखा ।
उवाच विप्लवः कोऽयं तवापि मनसः सखे ॥ ८३ ॥
भजन्ति सततं सन्तो विद्यार्जनपरिश्रमम् ।
येन न व्यसनापाते मुह्यन्ति मतिविप्लवैः ॥ ८४ ॥
इति श्रुत्वा विनिःश्वस्य तप्तो जीमूतवाहनः ।
क्षणं विलोक्य वसुधां स्वस्थोऽस्मीति तमभ्यधात्॥८५॥
प्रत्यग्रचन्दनदलैः कल्पिते सुहृदा ततः ।
निषण्णः शयने प्राप न स संतापतानवम् ॥ ८६ ॥
अत्रान्तरे मलयवत्यभ्येत्य विरहासहा ।
गौर्याश्रमे तरुलताप्रान्ते पाशमकल्पयत् ॥ ८७ ॥
ततः प्रणम्य गिरिजां हा हतेति विलप्य सा ।
विधाय साश्रुनयनास्तत्र बाला मृगाङ्कनाः ॥ ८८ ॥
जीमूतवाहनो भूयादन्यस्मिन्मे स जन्मनि ।
विभुरित्यभिधायाभूत् सा शापाभिमुखी क्षणात् ॥ ८९ ॥
तच्छ्रुत्वा सुहृदाहूतस्तूर्णं जीमूतवाहनः ।
छन्नस्तरुलताजालैः शुश्राव च ददर्श च ॥ ९० ॥
ततो भगवती प्राह पुत्रि ! मा साहसं कृथाः ।
भविता चक्रवर्ती ते भर्ता जीमूतवाहनः ॥ ९१ ॥
इति देवीवरं प्राप्य सा ददर्श पुरःस्थितम् ।
जीमूतवाहनं हर्षलज्जामुकुलितेक्षणा ॥ ९२ ॥
अत्रान्तरे समभ्येत्य चेटिका तां व्यजिज्ञपत् ।
दिष्ट्या विवर्धसे देवि! कल्पितस्ते महोत्सवः॥ ९३ ॥

त्वद्भ्रात्रा जनकादेशाद्य विद्याधरात्मजः ।
जीमूतकेतुपुत्राय दातुं त्वां सादरोत्थितः ॥ ६४ ॥
तदेहि कल्पितोऽद्यैव विवाहो जनकेन ते ।
इति श्रुत्वैव सा तूष्णीं प्रययौ चारुहासिनी ॥ ६५ ॥
जीमूतवाहनोऽप्याशु समेत्य पितुरन्तिकम् ।
उवाह मंगलोदारविवाहोचितभूषणम् ॥ ६६ ॥
ततो महोत्सवानन्दि विद्याधरशतानुगः ।
परिणीय प्रियतमां सोऽभूत् संभोगतत्परः ॥ ६७ ॥
प्रेयस्याः सोऽग्रजं तुल्यरूपं मित्रावसुं व्यधात् ।
विलासकेलिलीलासु प्ररूढप्रेमभाजनम् ॥ ६८ ॥
कदाचिदथ विश्रम्भात् समित्रावसुना सह ।
चचार जलधेर्वेलावनान्तमवलोकयन् ॥ ६९ ॥
ददर्श तत्र शिखराकारं नागास्थिसंचयम् ।
युगक्षये महाभूतं करकैरिव पूरितम् ॥१००॥
किमेतदिति तेनाशु पृष्टो मित्रावसुस्ततः ।
उवाच गरुडेनात्र भक्षिता भुजगोत्तमाः ॥१०१॥
सर्वक्षयभयात्तार्क्ष्यस्ततो वासुकिनाथितः ।
विसृष्टं तेन वारेण सदैकं नागमत्त्यसौ ॥१०२॥
अयमस्थिचयस्तेषामद्रिकूलसमुच्छ्रयः ।
उक्त्वेति जनकाहूतस्तूष्णीं मित्रावसुर्ययौ ॥१०३॥
जीमूतवाहनोऽप्येकः सर्पेषु करुणाकुलः ।
चचार तत्र निःसारं ससारं कलयन् धिया ॥१०४॥
ततो ददर्श करुणाक्रन्दशुष्काधराननाम् ।
वृद्धाङ्गनां कुमारेण सान्त्वमानां मुहुर्मुहुः ॥१०५॥
पूर्णेन्दुसुन्दरमुखं कान्तिधूतदिगन्तरम् ।
स्फुरत्स्फीतफणारत्नपुञ्जपिञ्जरिताम्बरम् ॥१०६॥
आनन्दमिव कासारं संतोषमिव जङ्गमम् ।
तं वीक्ष्य तनयं वृद्धा (विललापाश्रुगद्गदम् ॥१०७॥
हा पुत्र ! नयनानन्दसौन्दर्यामृतदीधिते ! ।

शङ्खपालमहावंशशङ्खकमुक्तामणीधित !) ॥१०८॥
हा शङ्खचूड लावण्यनिधानमिदमेवं ते ।
वपुर्गरुडचञ्चग्रवज्रपातासहं कथम् ॥१०९॥
भोगेन नागराजेन प्रेषितोऽसि गरुत्मते ।
सुकुमारशरीरेऽस्मिन् कस्ते त्राणं भविष्यति ॥११०॥
इति पुत्रमुखाम्भोजमाघ्राय विललाप सा ।
जीमूतवाहनोऽभ्येत्य तामुवाच कृपाकुलः ॥१११॥
मातः ! स्थितोऽस्मि ते पुत्रपरित्राणकृतक्षणः ।
परोपकारः संसारे निःसारे प्राप्यते कुतः ॥११२॥
अयमेव सदापाये काये सारसमुच्चयः ।
यत्प्रयाति परायासत्राणसत्पुण्यपात्रताम् ॥११३॥
इत्याकर्ण्य परित्रस्ता सुपर्णाशङ्किनो ततः ।
पुत्रमासाद्य साकम्पा सा पुरः प्रणनाम तम् ॥११४॥
नाहं भुजङ्गाधिपतिर्वितीर्य निजविग्रहम् ।
विद्याधरो रक्षिताहं त्वत्पुत्रस्येति सोऽभ्यधात्॥११५॥
वृद्धावदत्तं त्वमथ (शङ्खचूड़ाधिको मम ।
बहुकल्पशतं धन्यां रक्ष सौम्यामिमां तनुम् ॥११६॥
इति तस्यां ब्रुवाणायां शंखचूड़ोऽति विस्मितः ।
तमभ्यधात्स्मितमुखो ललाटरचिताञ्जलिः) ॥११७॥
अभिनन्दितमेतत्ते दर्शनं सत्त्वशालिनः ।
पूर्णेन्दुरमृतोद्गारिकिरणः कस्य न प्रियः ॥११८॥
अहो नु त्वं निजान् प्राणान् मदर्थं दातुमुद्यतः ।
सहामहे कथं नाम तृणार्थं रत्नविक्रयम् ॥११९॥
कियन्तो न भवाम्भोधौ जाता याताश्च मद्विधाः ।
कौस्तुभस्येव भवतः क्व दृष्टः पुनरुद्भवः ॥१२०॥
सत्त्वोज्ज्वलं तवैवैतन्मुखेन्दौ शोभते वचः ।
मन्धकायस्य जगतामनास्थाने तु पातितम् ॥१२१॥
मद्विधैरागन्तुविधुरा समाश्वास्या विभो! त्वया।
(माता मे स्थानदृष्टोपि(?) साधुः सुचिरबान्धवः)॥१२२॥

१ नागानन्द

इति नागकुमारस्य वचः श्रुत्वा कुलोचितम् ।
जीमूतवाहनः प्राह वत चित्रं प्रभाषसे ॥१२३॥
वृद्धेयं त्वा विना पुत्रं कुलालंकरणं सखे ! ।
कथं जीवति, दुःखं हि जननीनां सुदुःसहम् ॥१२४॥
एतां त्रातुं निजात्मानं रक्ष त्वज्जीविता ह्यसौ ।
अस्याः प्राणपरित्यागे विद्वन्मा कारणं भवः ॥१२५॥
शरीरेण मदीयेन द्वय पाहि महामते ! ।
इत्युक्त्वा शङ्खचूडस्य पादयोर्निपपात सः ॥१२६॥
फणिसूनुस्तमवदन्निर्बन्धाकुलितस्ततः ।
श्रुत्वा विवेचितं नैव मादृशामीदृशं वचः ॥१२७॥
न नाम शङ्खधवलं शङ्खपालमहाकुलम् ।
मयापि शङ्खचूडेन सत्त्वभङ्गात् कलङ्क्यते ॥१२८॥
आसन्नो गारुडःकालःस्वस्ति गच्छाम्यहं विभो ।
वधशैले प्रणम्याशु गोकर्णं शशिशेखरम् ॥१२९॥
उक्त्वेति मात्रानुगते याते तस्मिन् क्षणादभूत् ।
उच्चण्डाकाण्डकल्पान्तवातव्याकुलितं जगत् ॥१३०॥
कालदोर्दण्डशङ्काभाश्छटाघटितदिक्तटाः ।
उत्तस्थुर्मकरास्फारकरालाः सागरोर्मयः ॥१३१॥
ततश्चण्डांशुतप्तस्य सुमेरोरिव रश्मिभिः ।
अभूदार्द्रानलेनेव पूरितं पिङ्गरं नभः ॥१३२॥
आगतं गरुड ज्ञात्वा सूचितं पक्षमारुतैः ।
आरुरोह मदाबद्धः शिलां जीमूतवाहनः ॥१३३॥
रत्नांशुकेन संछन्नः स्थितस्तत्र व्यचिन्तयत् ।
सत्त्वोपकाराय पुनर्जन्म भूयान् ममेति सः ॥१३४॥
ततोऽदृश्यत दिग्दाहदारुणच्छविरम्बरे ।
प्रलयाग्निशिखालोलपक्षाक्षेपः खगेश्वरः ॥१३५॥
तस्योरुवेगसंघट्टस्फूर्जद्धनघनारवैः ।
चुक्रोशाकालकल्पान्तसंत्रस्तेव जगत्त्रयी ॥१३६॥
ततः स तस्य धैर्याब्धिविद्याधरशिरोमणेः ।

जहार शिरसश्चूडं चूडारत्नेन मण्डितम् ॥१३७॥
ततः शरीरमादाय तस्य तुण्डेन खेचरः ।
गगने वलयाकारं चकार गतिविभ्रमम् ॥१३८॥
तच्चञ्चुक्रकचभ्रष्टं रक्तधारापुरःसरम् ।
अङ्के मलयवत्यास्तु चूडारत्नमथापतत् ॥१३९॥
तद् दृष्ट्वा वज्रसंरुग्णा शिराघलतिकेव सा ।
जीमूतकेतवे तस्मै परित्रस्ता न्यवेदयत् ॥१४०॥
स्वविद्यया परिज्ञाय स्वसूनोर्जीवितव्ययम् ।
भार्यास्नुषाभ्यां सहितः सौपर्णीतां शिलां ययौ ॥१४१॥
अत्रान्तरे शङ्खचूडस्तूर्णं तं देशमागतः ।
गोकर्णमर्णवतटे प्रणिपत्य मनोजवः ॥१४२॥
तत्रापश्यन्नखमुखोत्खातस्खलितशेखरम् ।
विद्याधरेन्द्रमादाय तार्क्ष्यमुत्पतितं दिवि ॥१४३॥
तं वीक्ष्य साश्रुनयनो विनाघातं विदारितः ।
आत्मानं तद्वधे मत्वा कारणं विललाप सः ॥१४४॥
हा सत्त्वविपुलोदार्यधैर्यगाम्भीर्यसागर ! ।
हा पूर्णकरुणाकोश ! हा निष्कारणबान्धव ! ॥१४५॥
इति शोचन् स विपदमनुसर्तुं गरुत्मतः ।
जगाम जीवितत्यागदृढीकृतविनिश्चयः ॥१४६॥
भास्वाद्यास्वाद्य तार्क्ष्योऽपि व्योम्नि जीमूतवाहनम् ।
क्षिप्रं स्थगितसंरम्भं प्रदध्यौ विस्मयाकुलः ॥१४७॥
अहो नु सत्त्ववानेष कोऽपि धैर्यमहोदधिः ।
भक्ष्यमाणस्य यस्याङ्गे जायन्ते पुलकाङ्कुराः ॥१४८॥
प्रसन्नवदनः क्षिप्रं जीवशेषोऽपि वर्तते ।
चिन्तयित्वेत्यपृच्छत्त्वं कोऽसीति विनतात्मजः ॥१४९॥
स तं प्राह किमेतेन तव भक्षय मामिति ।
अस्मिन्नवसरे शङ्खचूडोऽभ्येत्य तमब्रवीत् ॥१५०॥
हाहामामाकृथास्तात्य ! साहसं किं न पश्यति ।
अस्य विद्याधरेन्द्रस्य स्वस्तिकाङ्कमुरस्तटम् ॥१५१॥

अहं स नागस्ते भक्ष्यं पश्य जिह्वालताद्वयम् ।
विस्फूर्जद्विषफूत्कारं रक्तस्फोताः फणाश्च मे ॥१५२॥
इदानोमपि मे देहे मांसशोणितमस्ति भोः ।
न च पश्यामि ते तृप्तिं स त्वं दूरे स्थितः कुतः ॥१५३॥
इत्युक्त्वा विपुलं वक्षः प्रसार्योत्तानविग्रहः ।
तूष्णीं मां भक्षयेत्याह स सुपर्णं पुनः पुनः ॥१५४॥
ततोऽस्थिशेषं तं त्यक्त्वा विषण्णे पन्नगेश्वरे ।
जीमूतवाहनवधूर्गुरुभ्यामाययौ सह ॥१५५॥
दृष्ट्वा मलयवत्यग्रे प्राणनाथं तथागतम् ।
मुमोहापूर्वशोकाग्निधूमेनेवान्धकारिता ॥१५६॥
जीमूतकेतुस्तनयं विलोक्य सह जायया ।
पपात मूलनिर्लून इव चन्दनपादपः ॥१५७॥
तार्क्ष्येणाश्वास्यमानेषु तेषु जीमूतवाहनम् ।
संस्पृश्य पाणिना माता शुशो च करुणस्वनम् ॥१५८॥
मुहूर्ताच्छेषजीवोऽपि सोऽब्रवीज्जननीं शनैः ।
मातर्धिनश्वरस्यास्य किं शरीरस्य शोच्यते ॥१५९॥
भवेऽस्मिन् पवनोद्भ्रान्तवीचिविभ्रमभङ्गुरे ।
जायते पुण्ययोगेन परार्थं जीवितव्ययः ॥१६०॥
उक्त्वेति विसृजन् प्राणानविच्छायमुखच्छविः ।
स्फारेण शोकतमसा जगत् संपूरयन्निव ॥१६१॥
ततो मलयवत्यासीन्मरणे कृतनिश्चया ।
शोकस्तम्भेन संरुद्धा न चचाल पपात वा ॥१६२॥
अथ साक्षाद्भगवती गौरी तां भक्तवत्सला ।
समाश्वास्य सुधासारैस्तद्भर्तारमजीवयत् ॥१६३॥
चक्रवर्तिश्रियं चास्मै दत्त्वा क्षिप्रं तिरोदधे ।
ततो देवाः सगन्धर्वास्तस्य सत्त्वमपूजयन् ॥१६४॥
गरुडोऽप्यथ हृष्टात्मा वरदस्तेन याचितः ।
प्रददौ सर्वनागानां पुण्यामभयदक्षिणाम् ॥१६५॥
जीमतवाहनो हृष्टः प्रययौ दयितासखः ।

कथयित्वेति वेतालः पप्रच्छ वसुधाधिपम् ।
सत्त्ववाञ्शंखचूडोऽत्र किं वा जीमूतवाहन ॥१६६॥
इति पृष्टो नृपः प्राह शंखचूडोऽत्र सत्त्वभूः ।
यो बालोऽपि निजौचित्यान्न चचाल महाशयः ॥१६७॥
जीमूतवाहनस्यैतदात्मदानं किमद्भुतम् ।
बोधिसत्त्वः स हि पुरा दत्तवान् बहुशस्तनुम् ॥१६८॥
तपस्तीव्रं यशः शुभ्रं श्लाघ्या श्रीः सत्त्वमद्भुतम् ।
निर्व्याजदानं च नृणां पूर्वाभ्यस्तं हि जायते ॥१६९॥
श्रुत्वेत्यलक्षितो गत्वा वेतालः शिंशिपातरौ ।
तेनैव कण्ठपाशेन तथैवोल्लम्बितः स्थितः ॥१७०॥
इति बृहत्कथामञ्जर्यां शशाङ्कवतीलम्बके षोडशो वेतालः ।

मञ्जरीस्थवृत्तस्य वैशिष्ट्यम्

अयेयं महाकविना क्षेमेन्द्रेण सरसैः शब्दैर्निबद्धा जीमूतवाहनकथा न हरति मनः कस्य सहृदयस्य। सोमदेवेन कथासरित्सागरे प्रदर्शिताख्यानान् नेयं केवलमधिकतरं रसिकानां हृदयमुल्लासयति, प्रत्युत नवीनानामपि घटनानामुल्लेखेन यावत् विवेचकानामपि कामपि प्रीतिमादधाति। नागानन्दीयं वृत्तमनया सह किमपि विपुलं सामञ्जस्यं शब्दविन्यासेन ललितभावप्रदर्शनेन च भजत इति विवेचना निपुणानां स्वत एवाशु स्फुटीभविष्यति पण्डितानाम्। कथासरित्सागरात् क्वचित् क्वचित् वैलक्षण्यमप्युपलभ्यते। तद् यथा—कथासरितसागरे वर्ण्यते जीमूतवाहनस्य मित्रं कोऽप्यज्ञातनामा मुनिकुमारः। अत्र तु मधुकरेति तस्याभिधानं निगदितं कविना। मञ्जर्यां नायको रक्ताम्बरयुगलेन संछन्नगात्रो भूत्वा वध्यशिलायामात्मानमुपवेशयति, सागरे तु न तथा वर्णितं दृश्यते। मञ्जर्यां गरुडेन भक्ष्यमाणस्य जीमूतवाहनस्य चूडामणिर्मलयवत्या अंके एव निपतति, सागरे तु तस्याः पादयोरेवेति। मञ्जर्यां जीमूतवाहनस्य वक्षःस्थले स्वस्तिकस्य स्थितिः प्रतिपादिता कविना, सागरे तस्य नामापि न स्मरति सोमदेवः, इति विद्यत एव मञ्जरीवर्णितस्याख्यानस्य विवेचकानां रसिकानां च कृते समधिकं महत्त्वमिति ।

कथासरित्सागरे जीमूतवाहनस्याख्यायिका ।

अथागत्य पुनः स्कन्धे वेतालं शिंशुपाद्रुमात् ।
स त्रिविक्रमसेनस्तमादायोदचलत्ततः ॥ १ ॥
आगच्छन्तं च तं भूपं स वेतालोऽब्रवीत्पुनः ।
राजन् शृणु कथामेकामुदारां कथयामि ते ॥ २ ॥
अस्तीह हिमवान्नाम नगेन्द्रः सर्वरत्नभूः ।
यो गौरीगङ्गयोस्तुल्यः प्रभवो हरकान्तयोः ॥ ३ ॥
शूरासंस्पृष्टपृष्ठश्च यो मध्ये कुलभूभृताम् ।
अभिमानोन्नतः सत्यं गीयते भुवनत्रये ॥ ४ ॥
तस्यास्ति सानुन्वन्वर्थं यत्काञ्चनपुरं पुरम् ।
न्यासीकृतमिवार्केण रश्मिवृन्दं विभाति यत् ॥ ५ ॥
जीमूतकेतुरित्यासीत्तस्मिन् पुरवरे पुरा ।
विद्याधरेश्वरः श्रीमान् मेरावि शतक्रतुः ॥ ६ ॥
तस्यासीत् स्वगृहोद्याने कल्पवृक्षोऽन्वयागतः ।
यथार्थनामा प्रथितो यो मनोरथदायकः ॥ ७ ॥
तं प्रार्थ्य देवतात्मानं स राजा तत्प्रसादतः ।
प्राप जातिस्मरं पुत्रं बोधिसत्त्वांशसम्भवम् ॥ ८ ॥
दानवीरं सहासन्वं सर्वसत्वानुकम्पिनम् ।
गुरुशुश्रूषणपरं नाम्ना जीमूतवाहनम् ॥ ९ ॥
सांप्रतयौवनं तं च यौवराज्येऽभिषिक्तवान् ।
तनयं प्रेरितः सद्भिस्तद्गुणैः सविवैश्रसः ॥ १० ॥
यौवराज्यस्थितश्चैष जातु जीमूतवाहनः ।
हितैषिभिरुपागत्य जगदे पितृमन्त्रिभिः ॥ ११ ॥
देव ! कल्पतरुर्योऽयमस्ति वः सर्वकामदः ।
अधृष्यः सर्वभूतानां सैष पूज्यः सदा तव ॥ १२ ॥
नास्मिन् सति हि शक्रोऽपि बाधेतास्मान् कुतोऽपरः ।
एतच्छ्रुत्वा स जीमूतवाहनोऽन्तरचिन्तयत् ॥ १३ ॥
अहो बतेदृशमिमं संप्राप्यामरपादपम ।

नासादितं किमप्यस्मात् पूर्वैर्नस्तादृशं फलम् ॥ १४ ॥
केवलं कैश्चिदप्यर्थैरथितैः कृपणोचितैः ।
आत्मा चैष महात्मा च नीतौ द्वावपि लाघवम् ॥ १५ ॥
तदहं साधयिष्यामि काममस्मान्मनोगतम् ।
इति निश्चित्य स ययौ महासत्त्वोऽन्तिकं पितुः ॥ १६ ॥
तत्र संविहिताशेषशुश्रूषापरितोषितम् ।
सुखासीनं तमेकान्ते पितरं स व्यजिज्ञपत् ॥ १७ ॥
तात त्वमेव जानासि यदेतस्मिन् भवाम्बुधौ ।
असंसारमिदं सर्वं वीचिविभ्रमचञ्चलम् ॥ १८ ॥
विशेषेणाचिरस्थायिप्रकाशप्रविलायिनो ।
सन्ध्या विद्युच्च लक्ष्मीश्च दृष्टा कुत्र कदा स्थिरा ॥ १९ ॥
एकः परोपकारस्तु संसारेऽस्मिन्ननश्वरः ।
यो धर्मयशसी सूते युगान्तशतसाक्षिणी ॥ २० ॥
तत्तात ! क्षणिकेष्वेषु भोगेष्वास्माभिरीदृशः ।
एष कल्पतरुः कस्य कृते मोघोऽभिरक्ष्यते ॥ २१ ॥
यैर्वा मम ममेत्येवमाग्रहेणैष रक्षितः ।
पूर्वैस्ते कुत्र कुत्रायं तेषां कश्चैष कोऽस्य वा ॥ २२ ॥
तस्मात् परोपकारैकफलसिद्धये तवाज्ञया ।
तातैनं विनियुञ्जेऽहं कामदं कल्पपादपम् ॥ २३ ॥
एवमस्त्विति पित्रा च दत्तानुज्ञोऽथ तेन सः ।
जीमूतवाहनो गत्वा कल्पवृक्षमुवाच तम् ॥ २४ ॥
अभीष्टाः पूरिताः कामाः पूर्वेषां देव नस्त्वया ।
तन्ममैकमिमं काममनन्यं परिपूरय ॥ २५ ॥
अदरिद्रां यथा पृथ्वीमिमां द्रक्ष्ये तथा कुरु ।
भद्रं ते व्रज दत्तोऽसि लोकायार्थार्थिने मया ॥ २६ ॥
इत्युक्तवति जीमूतवाहने रचिताञ्जलौ ।
त्यक्तस्त्वयैष जातोऽस्मीत्युदभूद्वाक् तरोस्ततः ॥ २७ ॥
क्षणाच्चोत्पत्य स दिवं कल्पवृक्षस्तथा वसु ।
ववर्ष भुवि नैवासीत् कोऽप्यस्तां दुर्गतो यथा ॥ २८ ॥

ततस्तस्य तया तीव्रसर्वसत्वानुकम्पया ।
जीमूतवाहनस्यात्र त्रैलोक्ये पप्रथे यशः ॥ २६ ॥
तेन तद्गोत्रजाः सर्वे मात्सर्यादसहिष्णवः ।
तं लोकसातकृतार्तिघ्नकल्पवृक्षविनाकृतम् ॥ ३० ॥
जेयं सपितृकं मत्वा सम्भूय कृतनिश्चयाः ।
युद्धाय समनह्यन्त तद्गु राज्यापजिहीर्षया ॥ ३१ ॥
तद्गु दृष्ट्वा प्राह पितरं स्वं स जीमूतवाहनः ।
तात कस्यापरस्यास्ति शक्तिस्त्वयि धृतायुधे ॥ ३२ ॥
किन्त्वस्य पापकस्यार्थे शरीरस्य विनाशिनः ।
हत्वा बन्धूनकृपणो राज्यं को नाम वाञ्छति ॥ ३३ ॥
तत् किं राज्येन नः कार्यं गत्वान्यत्र क्वचिद्गु वयम् ।
धर्ममेव चरिष्यामो लोकद्वयसुखावहम् ॥ ३४ ॥
मोदन्तां कृपणा एते दायाया राज्यलोलुपाः ।
इत्युक्तवन्तं जीमूतकेतुस्तं स पिताब्रवीत् ॥ ३५ ॥
अहं त्वदर्थमिच्छामि राज्यं पुत्र ! त्वमेव चेत् ।
तज्जहासि कृपाविष्टस्तन्मे वृद्धस्य तेन किम् ॥ ३६ ॥
एवं कृताभ्यनुज्ञेन पित्रा मात्रा च सोऽन्वितः ।
मलयाद्रिमगात् त्यक्तराज्यो जीमूतवाहनः ॥ ३७ ॥
तत्र चन्दनसंछन्नवहन्निर्झरकन्दरे ।
शुश्रूषमाणः पितरं स तस्थौ कल्पिताश्रमः ॥ ३८ ॥
मित्रं चास्यात्र संपेदे मित्रावसुरिति श्रुतः ।
विश्वावसोः सुतः सिद्धराजस्यैतन्निवासिनः ॥ ३९ ॥
एकदा चात्र स भ्राम्यन् विवेशोपवनस्थितम् ।
द्रष्टुमायतनं देव्या गौर्या जीमूतवाहनः ॥ ४० ॥
तत्रोपवीणयन्तीं च ददर्श वरकन्यकाम् ।
सखीजनान्वितां शैलतनयाराधनोद्यताम् ॥ ४१ ॥
आकर्ण्यमानसंगीतमञ्जुवीणारवां मृगैः ।
दृष्टलोचनलावण्यलज्जितैरिव निश्चलैः ॥ ४२ ॥
दधता तारकं कृष्णमर्जुनेन स्वचक्षुषा ।

पाण्डवोयामिव चमूं कर्णमूलं विविक्षतीम् ॥४३॥
परस्परविमर्देन मुखेन्दोरिव दर्शनम् ।
अतृप्ताविव वाञ्छन्तौ बिभ्रतीं संमुखौ स्तनौ ॥ ४४ ॥
धातुर्घटयतो मुष्टिग्रहेणेव निपीडिते ।
वलीमग्नाङ्गुलीमुद्रे मध्ये क्षाममनोरमाम् ॥ ४५ ॥
दृष्ट्वा च तया सद्यः सोऽभूज्जीमूतवाहनः ।
तन्व्या मुषितचित्तोऽन्तर्दृष्टिमार्गं प्रविष्टया ॥ ४६ ॥
सापि तं भूषितोद्यानं दृष्ट्वोत्कण्ठाविकारदम् ।
कामाङ्गदाहवैराग्याद् वने मधुमिवाधिकम् ॥ ४७ ॥
तथानुरागविवशा भेजे कन्या विहस्तताम् ।
यथा सखीव वीणास्या व्याकुलालापतां ययौ ॥ ४८ ॥
ततः स पप्रच्छ सखीं तस्या जीमूतवाहनः ।
किं धन्यं नाम सख्यास्ते को वंशोऽलंकृतोऽनया ॥ ४९ ॥
तच्छ्रुत्वा सा सखी प्राह नाम्ना मलयवत्यसौ ।
मित्रावसुस्वसा सिद्धराजविश्वावसोः सुता ॥ ५० ॥
एवमुक्त्वा सहृदया सा तं जीमूतवाहनम् ।
नामान्वयौ पृष्ट्वास्य मुनिपुत्रं सहागतम् ॥ ५१ ॥
तां ब्रवीति स्म मलयवती स्मितमिताक्षरम् ।
सखि ! विद्याधरेन्द्रस्य नास्यातिथ्यं करोषि किम् ॥ ५२ ॥
जगत्पूज्योऽतिथिर्ह्येष प्राप्त इत्युदिते तया ।
साभूद् विद्याधरसुता तूष्णीं लज्जाननानना ॥ ५३ ॥
लज्जावतोयं मत्तोऽर्घा गृह्यतामिति वादिनी ।
एकाथ तत्सखी तस्मै सार्घ्यां मालामुपानयत् ॥ ५४ ॥
स चादायैव जीमूतवाहनः प्रेमनिर्भरः ।
कण्ठे मलयत्यास्तां मालां तस्याः समर्पयत् ॥ ५५ ॥
सापि तिर्यक्प्रसृतया पश्यन्ती स्निग्धया दृशा ।
नीलोत्पलमयीं मालामिव तस्मिन्न्यवेशयत् ॥ ५६ ॥
इत्यन्योन्यकृताशब्दस्वयंवरविशेषयोः ।
तयोरेत्य जगादैका चेटी तां सिद्धकन्यकाम् ॥ ५७ ॥

जननी राजपुत्रि त्वां स्मरत्यागच्छ माचिरम् ।
तच्छ्रुत्वाकृष्य कामेषुकीलितामिव कृच्छ्रतः ॥ ५८ ॥
सोत्कां प्रियशुकाद् दृष्टकथाश्चित्सा ययौ गृहम् ।
जीमूतवाहनोऽप्यागात्तद्गतात्मा स्वमाश्रमम् ॥ ५९ ॥
साथ त्वां जननीं दृष्ट्वा प्राणेशविरहातुरा ।
गत्वा मलयवत्याशु पपात शयनीयके ॥ ६० ॥
अथान्तर्गतकामाग्निधूमेनेवाविलेक्षणा ।
अश्रुधाराः प्रमुञ्चन्ती सन्तापक्वथिताङ्गका ॥ ६१ ॥
सखिभिश्चन्दनैर्लिप्ता वीजिता चाब्जिनीदलैः ।
रतिं न मेजे शयने नाङ्के सख्या न भूतले ॥ ६२ ॥
गतेऽथ वासरे क्वापि रक्तया सह सन्ध्यया ।
हसत्प्राचीमुखं चन्द्रे समाक्रम्य च चुम्बति ॥ ६३ ॥
स्मरेण प्रेर्यमाणापि दूतीसंप्रेषणादि सा ।
लज्जया नाशकत्कर्तुं जीवितस्पृहयोज्झिता ॥ ६४ ॥
निनाय च निशामिन्दुविषमामब्जिनीव ताम् ।
बद्धमोहालिपटले हृदि सङ्कोचमेत्य सा ॥ ६५ ॥
तावच्च तद्वियोगार्तः सोऽपि जीमूतवाहनः ।
शयनस्थोपि पतितो हस्ते कुसुमधन्वनः ॥ ६६ ॥
नूतनोद्भिन्नरागोऽपि प्रोन्मिषत्पाण्डुरच्छविः ।
ह्रीमूकोपि वदन् पीडां कामजामनयन्निशाम् ॥ ६७ ॥
प्रातश्चास्युत्सुको भूयस्तद्गौर्यायतनं ययौ ।
यत्र दृष्टोभवत्तेन सा सिद्धाधिपपुत्रिका ॥ ६८ ॥
तत्र तेन स मित्रेण मुनिपुत्रेण पृष्टतः ।
आगत्याश्वास्य ते यावन्मदनानलविह्वलः ॥ ६९ ॥
तावत्तत्रैव साप्यागान्निर्गत्यैकैव निर्जने ।
गुप्तं मलयवत्यात्मत्यागाय विरहासहा ॥ ७० ॥
अलक्षयन्ती कान्तं स्वं पादपान्तरितं च सा ।
उदश्रुलोचना बाला देवीं गौरीं व्यजिज्ञपत् ॥ ७१ ॥
त्वद्भक्त्या देवि संवृत्ता नास्मिञ्जन्मनि चेन्मम ।

जीमूतवाहनो भर्ता तद् भूयात्सोऽन्यजन्मनि ॥ ७२ ॥
इत्युक्त्वा रचयामास स्वोत्तरीयेण तत्क्षणम् ।
अशोकतरुशाखायां पाशं सा गिरिजाग्रतः ॥ ७३ ॥
हा नाथ ! विश्वविख्यातकरुणेनापि न त्वया ।
कथमस्मि परित्राता देव जीमूतवाहन ॥ ७४ ॥
एवमुक्त्वा गले यावत्सा तं पाशं नियच्छति ।
उच्चचार दिवस्तावद्गौरती देव्युदीरिता ॥ ७५ ॥
पुत्रि मा साहसं कार्षीश्चक्रवर्ती पतिस्तव ।
विद्याधरेन्द्रो जीमूतवाहनो हि भविष्यति ॥ ७६ ॥
इत्युक्तवत्यां देव्यां स श्रुत्वैव समवयस्यकः ।
जीमूतवाहनो हृष्टां प्रियामुपजगाम ताम् ॥ ७७ ॥
सैष देव्या वरः पश्य वितीर्णः सत्य एव ते ।
इति जल्पति बालां तां तन्मित्रे मुनिपुत्रके ॥ ७८ ॥
जीमूतवाहनस्तत्तद् ब्रुवन् प्रणयपेशलम् ।
स्वहस्तेनैव तं तस्याः कण्ठात् पाशमपानयत् ॥ ७९ ॥
ततोऽकस्मात् सुधावर्षमिव मन्वानयोस्तयोः ।
भुवं मलयवत्यां च लिखन्त्यां ह्रीतया दृशा ॥ ८० ॥
चिन्वानागत्य सहसा सखी हृष्टा जागाद ताम् ।
सखि कल्याणिनी दिष्ट्या वर्धसेऽभीष्टसिद्धितः ॥ ८१ ॥
अद्यैव हि महाराजस्तव विश्वावसुः पिता ।
कुमारमित्रावसुना विज्ञप्तः सन्निधौ मम ॥ ८२ ॥
इहागतो जगन्मान्यस्तात ! कल्पतरुप्रदः ।
विद्याधरेन्द्रतनयो योऽयं जीमूतवाहनः ॥ ८३ ॥
अतिथित्वात् स नः पूज्यो वरश्चान्यो न तादृशः ।
तस्मान्मलयवत्यासौ कन्यारत्नेन पूज्यताम् ॥ ८४ ॥
तथेति श्रद्धिते राज्ञां भ्राता मित्रावसुः स ते ।
तादर्थ्येन महाभागस्यास्याश्रमपदं गतः ॥ ८५ ॥
जाने सद्यश्च भावी ते विवाहस्तत् स्वमन्दिरम् ।
आयाहि जातु चैषोऽपि महाभागः स्वमास्पदम् ॥ ८६ ॥

इत्युक्त्वा सा तया सख्या राजपुत्री शनैस्ततः ।
ययुः सहर्षा सोत्का च मुहुर्वलितकन्धरा ॥ ८७ ॥
जीमूतवाहनोऽप्याशु गत्वा स्वाश्रममागतात् ।
मित्रावसोर्यथावृत्तं कार्यं श्रुत्वाभिनन्द्य च ॥ ८८ ॥
जातिस्मरः समाचख्यौ तस्मै स्वं पूर्वजन्म सः ।
यत्र मित्रं स तस्यासीत् सा च भार्यैव तत्स्वसा ॥ ८९ ॥
ततो मित्रावसुः प्रीतस्तत्पित्रोः परितुष्यतोः ।
आवेद्य गत्वा पितरौ कृतार्थः स्वावनन्दयत् ॥ ९० ॥
निनाय च तदैव स्वान् गृहाञ्जीमूतवाहनम् ।
चक्रे चोत्सवसम्भारं स्वसिद्धयुचितवैभवम् ॥ ९१ ॥
तस्मिन्नेव च धन्योऽहि तस्य विद्याधरप्रभोः ।
स्वसुर्मलयवत्याश्च विवाहं समपादयत् ॥ ९२ ॥
ततो नवोढया सार्कं तया जीमूतवाहनः ।
तस्थौ मलयवत्या स तत्र सिद्धमनोरथः ॥ ९३ ॥
एकदा कौतुकाच्चाग्र स मित्रावसुना सह ।
मलयाद्रौ भ्रमन्नब्धेर्वेलावनमुपेयिवान् ॥ ९४ ॥
तत्रास्थिराशीन् सुबहून् दृष्ट्वा मित्रावसुं स तम् ।
केषामेतेऽस्थिसंघाताः प्राणिनामिति पृष्टवान् ॥ ९५ ॥
ततो मित्रावसुः श्यालस्तं कारुणिकमब्रवीत् ।
शृणु वृत्तान्तमत्रेमं संक्षेपाद्वर्णयामि ते ॥ ९६ ॥
नागमाता पुरा कद्रूर्विनतां तार्क्ष्यमातरम् ।
निनाय किल दासत्वं सव्याजपणनिर्जिताम् ॥ ९७ ॥
तेन वैरेण गरुडस्तामुन्मोच्यापि मातरम् ।
बली भक्षयितुं नागान् कद्रपुत्रान् प्रचक्रमे ॥ ९८ ॥
सदा प्रविश्य पातालं सोऽथ कांश्चिज्जघास तान् ।
कांश्चिन्ममर्द केचित्तु स्वयं त्रासाद्विपेदिरे ॥ ९९ ॥
तद्दृष्ट्वैकपदे सर्वक्षयमाशङ्क्य नागराट् ।
वासुकिः प्रार्थनापूर्वं तार्क्ष्यस्य समयं व्यधात्॥ १०० ॥
एकमेकमहं नागमाहारार्थं खगेन्द्र ! ते ।

प्रत्यहं प्रेषयाम्यत्र पुलिने दक्षिणोदधेः ॥ १०१ ॥
त्वया तु न प्रवेष्टव्यं पातालेऽस्मिन् कथंचन ।
को हि स्वार्थो विनष्टेषु नागेष्वेकपदे तव ॥ १०२ ॥
इत्युक्ते नागराजेन समयं प्रत्यपद्यत ।
स्वा दर्शी तथेत्येव गरुडो गुरुविक्रमः ॥ १०३ ॥
तदा प्रभृति चैकैकं नागं भुङ्क्ते दिने दिने ।
वासुकिप्रेषितं सोऽत्र खगेन्द्रः पुलिनेऽम्बुधेः॥ १०४ ॥
अतस्तद्भक्ष्यमाणानां नागानामस्थिसञ्चयाः ।
एतेऽत्र गिरिशृङ्गाभा वृद्धिं कालक्रमाद् गताः ॥ १०५ ॥
इति मित्रावसोर्वक्त्रात् सान्तर्दुःखो निशम्य सः ।
निजगाद दयाधैर्यनिधिर्जीमूतवाहनः ॥ १०६ ॥
शोच्यः स वासुको राजा यः स्वहस्तेन विद्विषे ।
उपहारीकरोति स्वाः प्रजाः कलीबो दिने दिने ॥ १०७ ॥
धृताननसहस्रः सन्नेकेनाप्याननेन सः ।
मामादौ भुङ्क्त्व तार्क्ष्येति भाषितुं नाशकत् कथम् ॥ १०८ ॥
कथं चाभ्यर्थयामास निःसत्त्वः स्वकुलक्षयम् ।
तार्क्ष्य नागाङ्गनाक्रन्द नित्याकर्णननिर्घृणः ॥ १०९ ॥
तार्क्ष्योऽपि काश्यपिर्वीरः कृष्णाधिष्ठानपावनः ।
ईदृशं कुरुते पापमहो मोहस्य गाढता ॥ ११० ॥
इत्युक्त्वा स महासत्त्वो हृदि चक्रे मनोरथम् ।
अप्यसारेण देहेन सारमत्राप्नुयामहम् ॥ १११ ॥
एकस्याप्यद्य नागस्य कुर्यां जीवितरक्षणम् ।
अबान्धवस्य भीतस्य दत्त्वात्मानं गरुत्मते ॥ ११२ ॥
इति संचिन्तयन्नेव तस्मिञ्जीमूतवाहने ।
मित्रावसोः पितुः पार्श्वात् चक्तात्राणार्थमाययौ ॥ ११३ ॥
व्रजत्वमहमेष्यामि पश्चादिति ततश्च तम् ।
मित्रावसुं स जीमूतवाहनो व्यसृजद् गृहम् ॥ ११४ ॥
गते तस्मिन् स चात्रैको वाञ्छितार्थोन्मुखो भ्रमन् ।
कृपालुरशृणोद्दूरात् करुणं रुदितध्वनिम् ॥ ११५ ॥

गत्वा ददर्श चोत्तुङ्गशिलातलसमीपगम् ।
युवानमेकं पुरुषं दुःखितं सुन्दराकृतिम् ॥११६॥
पुंसा राजभटेनेव त्यक्तमानीय तत्क्षणम् ।
निवर्तयन्तं रुदतीं वृद्धां सानुनयं स्त्रियम् ॥११७॥
कोऽयं स्यादिति यावच्च जिज्ञासुः सोऽत्र तिष्ठति ।
करुणाकुलितश्छन्नः शृण्वञ्जीमूतवाहनः ॥११८॥
तावत् सा तत्र वृद्धा स्त्री दुःखभारातिपीडिता ।
प्रावर्तत युवानं त दृष्ट्वा दृष्ट्वा नु शोचितुम् ॥११९॥
हा शङ्खचूड ! हा दुःखशतसंप्राप्त ! हा गुणिन् !
कुलैकतन्तो हा पुत्र ! क्व त्वां द्रक्ष्याम्यहं पुनः ॥१२०॥
वत्स ! त्वन्मुखचन्द्रेऽस्मिन् गतेऽस्तं स पिता तव ।
शोकान्धकारपतितः कथं वृद्धो भविष्यति ॥१२१॥
अथर्क्षकरसंस्पर्शादङ्गं दूयेत यत्तव ।
कथं शक्ष्यति तत्सोढुं तार्क्ष्यभक्षणजां रुजम् ॥१२२॥
विस्तीर्णे नागलोकेऽपि धात्रा नागाधिपेन च ।
लब्धस्त्वं किममव्याया विचित्यैकसुतो मम ॥१२३॥
इति तां विलपन्तीं च स युवा तनयोऽब्रवीत् ।
दुःखार्तमपि मामम्ब किं दुःखयसि हा भृशम् ॥१२४॥
निवर्तस्व गृहानेष प्रणामः पश्चिमस्तव ।
इहागमनवेला हि भवेज्जातु गरुत्मतः ॥१२५॥
तच्छ्रुत्वा हा हतास्मीह को मे पास्यति पुत्रकम् ।
इति चक्रन्द सा वृद्धा दिक्षु क्षिप्तार्तलोचना ॥१२६॥
तावच्च बोधिसत्त्वांशः स तज्जीमूतवाहनः ।
श्रुत्वा दृष्ट्वा च कृपया गाढाक्रान्तोऽचिन्तयत् ॥१२७॥
हन्तायं शङ्खचूडाख्यो नागो वासुकिना वत ।
आहारहेतोस्तार्क्ष्यस्य तपस्वी प्रेषितोऽधुना ॥१२८॥
इयं चैतस्य जननी स्नेहनेहान्विगागता ।
एतदेकसुता वृद्धा दुःखदीनप्रलापिनी ॥१२९॥
तदेनमेकमातं चेद्देहेनैकान्तनाशिना ।
रक्षामि नामुना नागं तन्मे धिग्जन्म निष्फलम् ॥१३०॥

इत्यालोच्योपगम्यैव मुदा जीमूतवाहनः ।
वृद्धामुवाच तां मातः पुत्रं रक्ष्याम्यहं तव ॥१३१॥
तच्छ्रुत्वा भावितभया वृद्धा गरुडशङ्किनी ।
संत्रस्ता तार्क्ष्यं मां भुङ्क्ष्व मां भुङ्क्ष्वेति जगाद सा ॥१३२॥
शङ्खचूडस्ततोऽवादीन्नैष तार्क्ष्योऽम्ब मात्रसौः ।
कार्यं चन्द इवाह्लादो क्व स तार्क्ष्यो भयङ्करः ॥१३३॥
इत्युक्ते शङ्खचूडेन प्राह जीमूतवाहनः ।
विद्याधरोऽहमायातो रक्षितुं सुतमम्ब ते ॥१३४॥
दास्यामि हि शरीरं स्वं वत्स्यच्छन्नं गरुत्मते ।
क्षुधिताय प्रयाहि त्वमादायैतं सुतं गृहम् ॥१३५॥
तच्छ्रुत्वा साऽब्रवीद्वृद्धा मैवं त्वं ह्यधिको मम ।
पुत्रो यस्येदृशे काले कृपास्मास्विवयमीदृशी ॥१३६॥
एतच्छ्रुत्वा स जीमूतवाहनः पुनरब्रवीत् ।
न मे मनोरथस्यास्य भङ्गं कर्तुमिहार्हथ ॥१३७॥
अहादेवं ब्रुवाणं च शङ्खचूडो जगाद तम् ।
दर्शितैव महासत्त्व त्वया सत्यं कृपालुता ॥१३८॥
न त्वहं त्वच्छरीरेण रक्षयामि स्वशरीरकम् ।
रत्नव्ययेन पाषाणं को हि रक्षितुमर्हति ॥१३९॥
मादृशैस्तु जगत्पूर्णं स्वात्ममात्रानुकम्पिभिः ।
अनुकम्प्यं जगद्येषां निरलास्ते भवादृशाः ॥१४०॥
न चाहं मलिनोकर्तुं शङ्खपालकुलं शुचि ।
कलङ्क इव तोदणांशुबिम्बं शक्ष्यामि सन्मते ॥१४१॥
इति तं प्रतिषिध्यैव शङ्खचूडः स्वमातरम् ।
जगादाम्ब निवर्तस्व कान्तराद्गर्गमादितः ॥१४२॥
न पश्यसि किमत्रैतन्नासासृक्कर्दमोक्षितम् ।
कृतान्तलोलापर्यङ्करौद्रं वध्यशिलातलम् ॥१४३॥
अहं चाब्धितटे गत्वा नत्वा गोकर्णमीश्वरम् ।
आगच्छामि द्रुतं यावन्नायाति गरुडोऽत्र सः ॥१४४॥
इत्युक्त्वा कृपाणाक्रन्दं प्रणम्यापृच्छ्य मातरम् ।

स गोकर्णप्रणामार्थं शङ्खचूडो ययौ ततः ॥१४५॥
अस्मिंश्चेदन्तरे प्राप्तस्तार्क्ष्यः सिद्धो ममेप्सितः ।
परार्थ इति जीमूतवाहनोऽप्यकरोत् हृदि ॥१४६॥
तावच्चात्सन्न पक्षीन्द्र पक्षानिलचलाँस्तरून् ।
विलोक्यात्र स मामेति निवारणपरानिव ॥१४७॥
मत्वा गरुडवेलां च प्राप्तां जीमूतवाहनः ।
परार्थप्राणदो वध्यशिलामध्यारुरोह ताम् ॥१४८॥
पवनाघूर्णिते चाध्यौ स्फुरद्रत्नप्रभादृशा ।
तं सत्त्वातिशयं तस्य पश्यन्तीव सविस्मयम् ॥१४९॥
आगत्याच्छादितनभा निपत्यैतच्छिलातलात् ।
चञ्च्वा गरुत्मानाहृत्य महासत्त्वं जहार तम् ॥१५०॥
स्रुतासृग्धारमुत्खातशिरोरत्नं च तं जवात् ।
नीत्वा भक्षयितुं शृङ्गे मलयाद्रेः प्रचक्रमे ॥१५१॥
एवमेव परार्थाय देहः स्यात् प्रतिजन्म मे ।
मा भूतां स्वर्गमोक्षौ तु परोपकृतिवर्जितौ ॥१५२॥
इति तार्क्ष्यार्द्यमानस्य तस्यानुध्यायतस्तदा ।
विद्याधरेन्द्रोरपतत् पुष्पवृष्टिर्नभस्तलात् ॥१५३॥
अत्रान्तरे स तद्रक्तधारारुद्धशिरोमणिः ।
तस्या मलयवत्याश्च तत्पत्न्याः प्रापतत् पुरः ॥१५४॥
सा तद्दृष्ट्वा परिज्ञाय चूडारत्नं सुविह्वला ।
अन्तिकस्था श्वशुरयोस्ताभ्यां साश्रुरदर्शयत् ॥१५५॥
तौ च जायापती सूनोः शिरोरत्नं विलोक्य तत् ।
किमेतदिति सम्भ्रान्तौ सहसैव बभूवतुः ॥१५६॥
ततः स्वविद्यानुध्यानाद्यथावृत्तमवेत्य तत् ।
राजा जीमूतकेतुः सा राज्ञो कनकवत्यपि ॥१५७॥
वध्वा मलयवत्या तौ प्रावर्तेतां सह द्रुतम् ।
गन्तुं सत्रैव तौ यत्र तार्क्ष्यजीमूतवाहनौ ॥१५८॥
तावत् स शंखचूडोऽत्र नत्वा गोकर्णमागतः ।
ददर्श रुधिरार्द्रं तन्निम्नो वध्यशिलातलम् ॥१५९॥

हा हतोऽस्मि महापापो ध्रुवं तेन महात्मना ।
आत्मा गरुत्मते दत्तो मत्कृते सकृपालुना ॥१६०॥
तदन्विष्यामि नीतः स क्षणोऽस्मिन् काह्निवैरिणा ।
मज्जेयं नायशःपङ्के जीवन्तं चेत्तमाप्नुयाम् ॥१६१॥
इत्युदश्रुर्वदन् सोऽथ साधुर्दृष्ट्वा निरन्तराम् ।
पतितां भुवि तद्रक्तधारामनुसरन् ययौ ॥१६२॥
अत्रान्तरे भक्षयंस्तं दृष्ट्वा जीमूतवाहनम् ।
हृष्टं विरम्य गरुडश्चिन्तयामास तत्क्षणम् ॥१६३॥
अहो अपूर्वः कोऽप्येष भक्ष्यमाणोऽपि यो मया ।
प्रहृष्यति महासत्त्वो न तु प्राणैर्वियुज्यते ॥१६४॥
बिभर्ति लुप्तशेषे च गात्रे रोमाञ्चकञ्चुकम् ।
किं चोपकारिणी वास्य मयि दृष्टिः प्रसीदति ॥१६५॥
तन्नैव नागः कोऽप्येष साधुः पृच्छामि नाद्भुतमुम् ।
इति तार्क्ष्यं विमृश्यन्तं प्राह जीमूतवाहनः ॥१६६॥
पक्षीन्द्र ! किं निवृत्तोऽसि नहि मे मांसशोणितम् ।
देहे नास्ति न चाद्यापि परितृप्तोऽसि भुङ्क्ष्व तत् ॥१६७॥
एतच्छ्रुत्वातिसाश्चर्यस्तं पप्रच्छ स पक्षिराट् ।
नागो नैवासि तद्ब्रूहि महात्मन् को भवानिति ॥१६८॥
नाग एवास्मि कोऽयं ते प्रश्नः प्रकृतमाचर ।
प्रस्तुतार्थविरुद्धं हि कोऽभिदध्यादबालिशः ॥१६९॥
एवं प्रतिवदत्येव तार्क्ष्ये जीमूतवाहने ।
प्राप्तः स शङ्खचूडोऽत्र दूरादेवाभ्यभाषत ॥१७०॥
मा मा कृथा महापापं साहसं विनतात्मज ।
कोऽयं भ्रमस्ते नह्येष नागो नागोऽहमेष ते ॥१७१॥
इत्युक्त्वाद्भुतमागत्य मध्ये स्थित्वा तयोर्द्वयोः ।
दृष्ट्वा च तार्क्ष्यं विभ्रान्तं शङ्खचूडोऽब्रवीत् पुनः ॥१७२॥
किं भ्राम्यसि फणाः किं मे जिह्वे द्वे च न पश्यसि ।
विद्याधरस्य किं चास्य सौम्यां पश्यसि नाकृतिम् ॥१७३॥
शङ्खचूडे वदत्येवं भार्या च पितरौ च तौ ।

जीमूतवाहनस्यात्र सर्वे सत्वरमाययुः ॥१७४॥
विलुप्ताङ्गं च तं दृष्ट्वा पितरौ तस्य तत्क्षणम् ।
चक्रन्दतुस्तौ हा पुत्र हा हा जीमूतवाहन ॥१७५॥
हा कारुणिक हा वत्स ! परार्थप्रत्तजीवित ।
हा कथं वैनतेयेदमविमृश्य कृतं त्वया ॥१७६॥
एतच्छ्रुत्वैव तार्क्ष्योऽत्र सोऽनुतप्तोऽचिन्तयत् ।
हा कथं बोधिसत्वांशः समोहाद्भक्षितो मया ॥१७७॥
जीमूतवाहनः सोऽयं परार्थप्राणदायकः ।
यस्य भ्रमति कृत्स्नेऽस्मिन्त्रैलोक्ये कीर्तिघोषणा ॥१७८॥
तन्मे मृतेऽस्मिन्पापस्य प्राप्तमग्निप्रवेशनम् ।
अधर्मविषवृक्षस्य पच्यते स्वादु किं फलम् ॥१७९॥
इति चिन्ताकुले तार्क्ष्ये दृष्ट्वा बन्धून्निपत्य सः ।
व्रणव्यथायां पञ्चत्वं प्राप जीमूतवाहनः ॥१८०॥
ततो विलपतोस्तत्र तत्पित्रोः शोकदोनयोः ।
उत्कुश्य मुहुरात्मानं शङ्खचूडे च निन्दति ॥१८१॥
भार्या मलयवत्यस्य नभो दृष्ट्वाशुगद्गदम् ।
पूर्वं प्रसन्नां वरदामित्युपालभताम्बिकाम् ॥१८२॥
विद्याधराधिपो भाविचक्रवर्ती पतिस्तव ।
भवितेत्याहमादिष्टा देवि गौरी तदा त्वया ॥१८३॥
तन्मिथ्यावादिनी जाता त्वमप्यसि कथं मयि ।
इत्युक्तवत्यां तस्यां सा गौरी प्रत्यक्षतामगात् ॥१८४॥
न मे मिथ्या वचः पुत्रेत्युक्त्वा सा स्वकमण्डलोः ।
अमृतेनाशु जीमूतवाहनं सिञ्चति स्म तम् ॥१८५॥
तेन सोऽक्षतसर्वाङ्गः पूर्वाधिकतरद्युतिः ।
जीवन् सद्यः समुत्तस्थौ कृतो जीमूवाहनः ॥१८६॥
इत्थितं प्रणतं तं च सर्वेषु प्रणमत्सु सा ।
उवाच देवी तुष्टास्मि देहदानेन तेऽमुना ॥१८७॥
तदेषा त्वाभिषिञ्चामि पुत्रात्मीयेन पाणिना ।
विद्याधराणामाकल्पं चक्रवर्तिपदेऽधुना ॥१८८॥

एवं वदन्ती जीमूतवाहनं कलशाम्बुभिः ।
तमभ्यषिञ्चच्छुर्वाणी पूजिता च तिरोदधे ॥१८६॥
निपेतुश्चात्र तत्कालं दिव्याः कुसुमवृष्टयः ।
नदन्ति स्म च सानन्दं देवदुन्दुभयो दिवि ॥१९०॥
अथोवाच स तं प्रह्वस्तार्क्ष्यो जीमूतवाहनम् ।
चक्रवर्तिन्नहं प्रीतः पुरुषातिशये त्वयि ॥१९१॥
अपूर्वोदारमतिना त्रिजगत्कौतुकावहम् ।
ब्रह्माण्डभित्तिलिखितं येन चित्रमिदं कृतम् ॥१९२॥
तन्मां प्रशाधि मत्तश्च वृणुष्वाभीप्सितं वरम् ।
इत्युक्तवन्तं गरुडं महासत्त्वो जगाद सः ॥१९३॥
न भक्ष्याः सानुतापेन भूत्वा नागाः पुनस्त्वया ।
तेऽप्यस्थिशेषा जीवन्तु ये त्वया पूर्वभक्षिताः ॥१९४॥
एवमस्तु न भोक्ष्येऽहं नागान्शान्तमतः परम् ।
प्राग्ये च भुक्तास्ते जीवन्त्विति तार्क्ष्योऽप्युवाच सः ॥ १९५ ॥
ततोऽस्थिशेषा येऽप्यासन्नागास्तत् पूर्वभक्षिताः ।
तेऽपि सर्वे समुत्तस्थुस्तद्वरामृतजीविताः ॥ १९६ ॥
सुरैर्नागैर्मुनिगणैः सानन्दैर्मिलितैरथ ।
स लोकत्रितयाभिख्यामुवाह मलयाचलः ॥ १९७ ॥
तत्कालं तं च जीमूतवाहनोदन्तमद्भुतम् ।
गौर्याः प्रसादाद्विदुः सर्वे विद्याधरेश्वराः ॥१९८॥
आगत्य ते च चरणवनता हिमाद्रिं ।
निन्युः क्षणान्मुदितबन्धुसुहृत्समेतम् ।
तं पार्वतीस्वकरकल्पितमहाभिषेकं ।
सच्चक्रवर्तिनमथ प्रतिमुक्ततार्क्ष्यम् ॥१९९॥
तत्रस्थ स पित्रा मात्रा मित्रावसुना च मलयवत्या च ।
निजगृहगतागतेन च संयुक्तः शङ्खचूडेन ॥२००॥
लोकोत्तरचरितादद्भुतसिद्धां जीमूतवाहनः सुचिरम् ।
अभजत रत्नोपचितां विद्याधरचक्रवर्तिधुरम् ॥२०१॥
इत्यत्युदारसरसामाख्यायिकां तदा स बेतालः ।

पुनरेव तं त्रिविक्रमसेनं पप्रच्छ राजानम् ॥२०२॥
तद् ब्रूहि शङ्खचूडः किं वा जीमूतवाहनोऽभ्यधिकः ।
सत्त्वेन तयोरुभयोः पूर्वोक्तश्चात्र समयस्ते ॥२०३॥
इत्यस्माद्वेतालाच्छ्रुत्वा मौनं विहाय शापभयात् ।
तमुवाच स त्रिविक्रमसेनो नृपतिर्निरुद्वेगः ॥२०४॥
बहुजन्मसिद्धमेतच्चित्रं जीमूतवाहनस्य कियत् ।
श्लाघ्यः स शङ्खचूडो मरणोत्तीर्णोऽपि यो रिपवे ॥२०५॥
अन्यप्रदत्तात्मानं प्राप्य सुदूरं गताय तार्क्ष्याय ।
पश्चाद्धावन् गत्वा स्वं देहमुपानयत् प्रसभम् ॥२०६॥
एतन्निशम्यैव नृपस्य तस्य वाक्यं स वेतालवरो जगाम ।
पुनः स्वधामैव तदंसपृष्ठान्नृपोऽपि तं सोऽनुययौ तथैव ॥२०७॥

इति महाकविश्रीसोमदेवभट्टविरचिते कथासरित्सागरे शशाङ्कवतीलम्बके त्रयोविंशस्तरङ्गः समाप्तः ।

वस्तुतारतम्यपरीक्षणम्

अथ कथाभ्यामाभ्यां सह नागानन्दीयस्य वृत्तस्य कृते यथावत्तारतम्यपरीक्षणे श्रीहर्षदेवस्य बृहत्कथा परिचितासीदित्यत्र किं भविष्यति कस्यापि कथमपि सन्देहलेशः । परन्तु विद्यते नाटकवर्णिते कथावृत्ते बृहत्कथानिबद्धे च तस्मिन् बहुषु स्थलेषु स्पष्टतः पार्थक्यम् । मूलकथाया रसानुकूलीकरणायैव यत्र तत्र कविना कृतः विपर्ययः इति सद्य एव स्फुटीभविष्यति कथाद्वयं विवेचयतां विदुषाम् । अत्र कानिचिदेव तानि परिवर्तनानि वयमुल्लिखामः ।

जगतां कल्याणाय कल्पद्रुमवितरणं विधाय जीमूतवाहनो मातापितृभ्यां साकं कल्पवृक्षदरिद्रं मां ज्ञात्वा मद्बान्धवा राज्यमाक्रान्तं विधास्यन्तीति भिया मलयपर्वतं गच्छतीति मूले प्रतिपादयति कविः । नाटकेऽस्मिन् पित्रोर्वनगमनानन्तरं पितृचरणशुश्रूषणायैव जीमूतवाहनो निरापदमपि राज्यं त्यक्त्वाऽऽत्मानं वनवासं नयतीति प्रतिपादयन् श्रीहर्षदेवस्तु नायकस्य पित्रोः कमपि परमानुरागं प्रकटीकरोति । मूले नायको गौर्यायतनं गच्छति, तत्र मलयवतीं साक्षात्करोति, तद्सखीमुखाच्च नायिकायाः सर्वोदन्तमवगच्छति, स्वपरिचयमपि ददाति । नाटके तु गौरीमन्दिरे मलयवतीसाक्षात्कारस्तापसप्रवेशेनाकस्मादेव विच्छिन्नो जातः, येन जीमू-

तवाहनस्तस्या अभिधानेनाप्यपरिचित एवं तिष्ठति। अपरिचयहेतुरेव द्वितीयेऽङ्के मलयवत्या विवाहप्रतिषेधः तन्निबन्धनश्च तस्याः प्राणपरित्यागोद्योग इति स्पष्टं प्रतिपादयता कविना कापि स्वान्तावर्जनकारिणी नाटकचातुरी प्रदर्श्यते। मूले मलयवती तस्या जननी आकारयति, नाटके च कौशिकनामा कोऽपि तापसः कुलपतिः। मूले यदा नायिका नायकविरहविधुरा सती प्राणत्यागाय स्वोत्तरीयेण पाशं विरचयति, तदा 'पुत्रि मा साहसं कार्षीश्चक्रवर्ती पतिस्तवेति' आकाशवाण्या भगवती गौरी तां तस्मात् साहसात् निवारयति। नाटके तु स्वयमेव नायकस्तदवसरे समुपेत्य वारयतीत्यहो रसानुगुणा कवेः वस्तुविन्यासपद्धतिः। मूलकथायां विटचेटयोर्नामापि नोपलभ्यते। अतः नागानन्दस्य तृतीयेऽङ्के सर्वमपि हास्यरसानुकूलं वृत्तं कविकल्पनाप्रसूतमेवेति बोद्धव्यम्। मातङ्गस्याक्रमणवृत्तान्तोऽपि जीमूतवाहनस्य हिंसाविरतिं प्रतिपादयितुं परोपकारव्रतस्य परां काष्ठामपि निदर्शयितुं श्रीहर्षेण निबद्धः। मूले नायकस्य चूडामणिर्मलयवत्याः पादयोः पतति जीमूतकेतुस्तु स्वालौकिकसामर्थ्येन पुत्रस्य दुरवस्थां तामवगच्छति। नाटके तु पितुर्जीमूतकेतोरेव पादयोः तद्वन्दनक्रमेणैव जीमूतवाहनस्य चूडारत्नं पततीति वर्णयन् हर्षदेवो नायकस्य काञ्चन पितृपरिचर्यापरायणतां प्रकटयति। मूले केवलं मलयवत्येवाऽऽक्रान्दं व्यापादयितुं यतते। नाटके तु रसानुगुणतया नायकस्य पितरौ परिणीता नववधूः, शंखचूडः सर्व एव मरणाय समुद्यताः परिलक्ष्यन्ते। मूले नागानां हिंसनात् विरतस्यापि गरुडस्य न कोऽपि प्रायश्चित्तः प्रदर्शितः। नाटके तु सुपर्णः स्वनुष्ठितचरणां कार्याणां प्रायश्चित्तं करोति, नागानां भक्षणात् विरमति, अयशोमार्जनं च विधातुमिन्द्रलोकात् सुधावर्षणं करोति, येन जीमूतवाहनः सर्वे मृता उरगपतयश्च पुनरुज्जीवनं प्राप्नुवन्तीति।

इत्थं बृहत्कथामूलं नागानन्दीयं वृत्तं निबध्नतापि कविना तत्र तत्र स्थलेषु सर्वमनाटकीयं वस्तुजातं परिवर्त्य यः खलु रसपरिपोषः कृतः, या च खलु समुपचितघटनासन्निवेशे चातुरी प्रदर्शिता, तत् सर्वं तत्प्रतिभानुकूलं नितान्तं रसिकजनस्वान्तावर्जकमिति दिक्।

नायकविचारः

अथ जाते वस्तुपरीक्षणे नेतुः परीक्षणमेवात्रावश्यकतया पतितं विद्यतेऽस्माकम्। व्यपदिश्यते रूपकस्य प्रधानं पात्रमेव नेतृशब्देन। तस्मिंश्च केचित् सामान्यगुणाः केचन विशिष्टगुणाश्च नियतं विद्यन्ते। तस्य सामान्यगुणाः यथा—

नेता विनीतो मधुरस्यागी दक्षः प्रियंवदः ।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ॥
बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ॥

नागानन्दस्य नायको विद्याधरचक्रवर्ती जीमूतवाहनो नाम । स च नायकस्य समग्रैरेभिः सामान्यगुणैरलङ्कृतो वर्तते ॥ पितृचरणशुश्रूषणाय समृद्धमपि राज्यं परित्यज्य वनवासनिरतो, जनानां दारिद्र्यदोषविनाशनाय दिव्यस्यापि कल्पद्रुमस्य दाता, स्निग्धैः चित्रोदारवचनैः सर्वासां प्रकृतीनां रञ्जकः, त्रिभुवनविख्याते विद्याधराधिपवंशे लब्धजन्मा, बलसंहननो युवा सङ्गीतकलाममर्मज्ञो नागानां कृते स्वप्राणानपि तृणाय मत्वा दातुमुद्यतो निखिलैरेवैभिर्गुणैर्विभूषितत्वात् कामप्यादर्शनायकतां भजते जीमूतवाहन इति विदितमेव नागानन्दाध्ययनशालिनां विदुषाम् ।

जीमूतवाहनस्य धीरोदात्तत्वम्

तत्र नायकोऽपि धीरोदात्त– धीरललित—धीरप्रशान्त—धीरोद्धतभेदेन चतुर्विधो भवति । अत्र शोककोपाद्यभिभूतान्तःसत्त्वतया अतिगम्भीरतया क्षमाशालित्वेऽप्यात्मश्लाघापराङ्मुखतया दृढव्रतत्वेऽपि निगूढाहंकारतया च जीमूतवाहनो धीरोदात्त एव । तल्लक्षणं यथा दशरूपके—

महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः ।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः ॥

तथा च गरुडेन भक्ष्यमाणोऽपि गात्रे नायकस्योक्तिरेषा महासत्त्वतामभिव्यनक्ति—

शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवैव तावत् किं भक्षणात् त्वं विरतो गरुत्मन् ॥

परोपकारायैव स भवे भवे देहलाभं प्रार्थयते । यथा—

संरक्षता पन्नगमद्य पुण्यं मयार्जितं यत् स्वशरीरदानात् ।
भवे भवे तेन ममैव भूयात् परोपकाराय शरीरलाभः ॥

दग्धशरीरकस्य कृते प्राणिहिंसामाचरतः पुरुषान् मूढत्वेनावजानाति । यथा—

सर्वाशुचिनिधानस्य जरत्तृणलघीयसः ।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥

अत्र प्रथमतः पितृपरिचर्यासक्तस्य राज्यं विहाय वनमुपेतस्य जीमूतवाहनस्य

शमप्रधानतया वर्णितत्वात् धीरप्रशान्तत्वं नैवाशङ्कनीयम्। प्राणिनां जीवितरक्षणार्थं स्वप्राणत्यागस्योत्साहवर्णनस्यैव कविसम्मतोचरत्वात्। अत एव जीमूतवाहनस्य धीरप्रशान्तत्वं प्रतिषिध्य धीरोदात्तत्वख्यापनार्थं दशरूपकावलोके धनिकेन सहृदयहृदयावर्जकं यत् सर्वं प्रतिपादितं तदेतीव मनोहरत्वादिहाप्यविकलमुल्लिख्यते—

ननु च कथं जीमूतवाहनादिर्नागानन्दादावुदात्त इत्युच्यते। औदार्यं हि नाम सर्वोत्कर्षेण वृत्तिः। तच्च विजिगीषुत्व एवोपपद्यते। जीमूतवाहनस्तु निर्विजिगीषुतयैव कविना प्रतिपादितः। यथा—तिष्ठन् भाति पितुः पुरो भुवि यथा' (नागानन्द १।६) इत्यनेन, पित्रोर्विधातुं शुश्रूषां (नागा० १।४) इत्यनेन च। अतोऽस्यात्यन्तशमप्रधानत्वात् परमकारुणिकत्वाच्च वीतरागवच्छान्तता। अन्यच्चात्रायुक्तं यत् तथाभूतं राज्यसुखादौ निरभिलाषं नायकमुदाय, अन्तरा यथाभूतमलयवत्यनुरागोपवर्णनम्। यच्चोक्तं सामान्यगुणयोगी द्विजादिर्धीरशान्त इति, तदपि पारिभाषिकत्वादवास्तवमित्यभेदकम्। अतो वस्तुस्थित्या बुद्ध-युधिष्ठिरजीमूतवाहनादिव्यवहाराः शान्ततामाविर्भावयन्ति।

अत्रोच्यते—यत् तावदुक्तं सर्वोत्कर्षेण वृत्तिरौदार्यमिति, न तत् जीमूतवाहनादौ परिहीयते। न हि एकरूपैव विजिगीषुता। यः केनापि शौर्यत्यागदयादिनाऽन्यानतिशेते स विजिगीषुः, न यः परापकारेणार्थग्रहादिप्रवृत्तः। तथात्वे च मार्गदूषकादेरपि धीरोदात्तत्वप्रसक्तिः। रामादेरपि जगत् पालनीयमिति दुष्टनिग्रहे प्रवृत्तस्य नान्तरीयकत्वेन भूम्यादिलाभः। जीमूतवाहनादिस्तु प्राणैरपि परार्थसम्पादनाद् विश्वमप्यशेते इत्युदात्ततमः। यथोक्तं 'तिष्ठन् भाति पितुः पुरो भुवि यथा' इत्यनेन विषयपराङ्मुखतेति, तत् सत्यम्। कार्पण्यहेतुषु स्वसुखतृष्णासु निरभिलाषा एष जिगीषवः। यदुक्तं—

> स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
> प्रतिदिनमथवा ते वृत्तिरेवं विधैव।
> अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
> शमयति परितापं छायया संश्रितानाम्॥

इत्यादिना [शाकुन्तले कालिदासेन]। मलयवत्यनुरागोपवर्णनं त्वशान्तरसाश्रयं शान्तनायकतां प्रत्युत निषेधति। शान्तत्वं चानहंकृतत्वम्। तच्च विप्रादेरौचित्यप्राप्तमिति वस्तुस्थित्या विप्रादेः शान्तता, न स्वपरिभाषामात्रेण। बुद्ध-

जीमूतवाहनयोस्तु कारुणिकत्वाविशेषेऽपि सकामनिष्कामकरुणत्वादिधर्मत्वाद् भेदः । अतो जीमूतवाहनस्य धीरोदात्तत्वमिति ।

रसविचारः

नाटके एव एव रसः प्राधान्येन विधेयः । स वीरः शृङ्गारो वा । अन्ये रसास्त्वङ्गत्वेनैवोपनिबन्धनीया इति शास्त्राकाराणां नियमानुरोधेनास्मिन् नागानन्दे एक एव रसोऽङ्गित्वं भजते । स च वीर एव । तल्लक्षणं यथा नाट्यशास्त्रे—

उत्साहाध्यवसायादविषादित्वादविस्मयान्मोहात् ।
विविधपदार्थविशेषात् वीररसो नाम सम्भवति ॥
स्मृतिधैर्यवीर्यशौर्योत्साहपराक्रमप्रभावैश्च ।
वाक्यैश्चाक्षेपकृतैर्वीररसः सम्यगभिनेयः ॥

धनञ्जयस्य मते स वीररसः त्रेधा, दयायुद्धदानयोगात् । यथा—

वीरः प्रतापविनयाध्यवसायसत्व-
मोहाविषादनयविस्मयविक्रमाद्यैः ।
उत्साहभूः स च दयारणदानयोगात्
त्रेधा किलात्र मतिगर्वधृतिप्रहर्षाः ॥

विश्वनाथस्य मते तु स चतुर्धा भवति, दयायुद्धदानधर्मभेदात् । यथोक्तं साहित्यदर्पणे—

स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात् ।

वीरस्त्रेधा भवतु चतुर्धा वा भवतु । नात्रास्माकं कापि विप्रपत्तिः । यत उभयोरपि मतयोः विद्यते एव सद्भावो दयावीरप्रकारस्य । स दयावीर एव नाटकेऽस्मिन् प्राधान्येनाभिमतो रसः । तत्र जीमूतवाहनस्य शङ्खचूडप्राणपरिरक्षणाय स्वप्राणपरित्यागे उत्साहः स्थायीभावः, गरुडस्य भक्ष्यभूतेन शङ्खचूडनालम्बनविभावेन तनयाव सोरस्ताडमाक्रोशन्त्या वृद्धायाः आर्तनादादिभिरुद्दीपनविभावैश्च विभावितः,

शयितेन मातुरुदरे विश्रब्धं शैशवे न यत् प्राप्तम् ।
लब्धं सुखं मयास्य बध्यशिलायास्तदुत्सङ्गे ॥
शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवापि तावत् किं भक्षणात् त्वं विरतो गरुत्मन् ॥

इत्यादिभिर्महासत्त्वाभिर्व्यञ्जकैर्वचनैरनुभावैरनुभावितः,

ग्लानिर्नाधोकपीयमानरुधिरस्यापि धैर्योदधे—
मांसोत्कर्तनजा रुजोऽपि वहतः प्रीत्या प्रसन्नं मुखम् ॥
गात्रं यन्न विलुप्तमेष पुलकस्तत्र स्फुटो लक्ष्यते ।
दृष्टिर्मय्युपकारिणीव निपतत्यस्यापकारिण्यपि ॥

इति वर्णितैर्ग्लान्यभावप्रीतिहर्षादिभिर्व्यभिचारिभावैः सुतरां पुष्टीकृतो दयावीरतां भजते । अत्र निर्वेदस्थायिभावात्मकः पित्रोर्वनगमनादिभिर्विभावैर्विभावितः आयासः खलु राज्यमुज्झितगुरोस्तन्नास्ति कश्चिद् गुणः' इत्यादिभिरनुभावैरनुभावितः शान्तरसोऽपि विद्यते । तथैव रतिस्थाय्यात्मको मलयवत्यवलम्बनस्तदलौकिकवीणावादनसौन्दर्याद्युद्दीपनो मनोगतरागाभिव्यञ्जकवचनानुभावो मलयवतीपरिणयनिबन्धनः शृङ्गारसोऽपि रसिकजनचेतांसि केनापि लोकातीतानन्दातिरेकेण चमत्करोति, तथापि द्वावप्येतौ अङ्गिनो दयावीरस्याङ्गत्वमेव भजेते इति । अतस्तयोः गौणत्वेन न तु प्राधान्येन स्थितिः ।

रसविरोधपरिहारः

ननु शान्तशृंगारयोर्नैरन्तर्येण विरोधात् नागानन्दस्य प्रथमेऽङ्के शान्तरसादनन्तरं शृंगाररसस्य विधानात् सम्भाव्यमानो विरोधः समुपलभ्यते इति नैवाशङ्कनीयम्,

एकाश्रयत्वनिर्दोषो नैरन्तर्ये विरोधवान् ।
रसान्तरव्यवधिना रसो न्यस्यः सुमेधसा ॥

इति ध्वन्यालोके आनन्दवर्धनाचार्यमतानुरोधेन,

"रसान्तरेणान्तरितो नैरन्तर्येण यो रसः"

इति काव्यप्रकाशे मम्मटाचार्यप्रदर्शितदिशा शान्तशृङ्गारयोरन्तरैव 'अहो गीतमहो वादित्रम्' इति वचनैर्व्यञ्जितस्य विस्मयस्थायिभावात्मनोऽद्भुतरसस्य प्रतिपादनात् । अयं भावः—रसानां विरोधो द्वेधा समानाधिकरणतया नैरन्तर्येण चेति । तत्र वीरभयानकयोरैकाधिकरण्येन विरोधः इति प्रतिपद्यगतत्वेन भयानको वर्णनीयः । शान्तशृङ्गारयोस्तु नैरन्तर्येण विरोधः । अतोऽविरोधिना रसान्तरेणान्तरितौ निबद्धव्यौ । तथा च मम्मटः—"नागानन्दे शान्तस्य जीमूतवाहनस्य 'अहो गीतमहो वादित्रमि' त्यद्भुतमन्तर्निवेश्य मलयवतीं प्रति शृङ्गारो निबद्धः" । इत्थं तृतीयेऽङ्के विटचेटादीनां वचनैरध्यवसायैश्चाभिव्यक्तो हास्यरसोऽप्यङ्गत्वमेव भजतेऽङ्गिनो रसस्येति सर्वमनवद्यम् ।

अयमेव शान्तशृंगारयोर्विरोधपरिहारो ध्वन्यालोकलोचनेऽपि श्रीमदभिनवगुप्तपादाचार्यैः सुविशद प्रतिपादितः । तच्च यथा—तत्र हि "रागस्यास्पदमित्यवैमि नहि मे ध्वंसीति न प्रत्ययः" इत्यादिनोपक्षेपात्प्रभृति परार्थशरीरवितरणात्मकनिर्वाहणपर्यन्तः शान्तो रसः, तस्य विरुद्धो मलयवतीविषयः शृङ्गारः, तदुभयाविरुद्धमद्भुतमन्तरीकृत्य क्रमप्रसरसम्भावनाभिप्रायेण यः कविना निबद्ध 'अहो गीतमहो वादित्रम्' इति । एतदर्थमेव 'व्यक्तिर्व्यञ्जनधातुना'—(नागा० १।१५) इत्यादिनीरसप्रायमप्यत्र निबद्धमद्भुततरपरिपोषकतयाऽत्यन्तरससरसतावहमिति 'निर्दोषदर्शनाः कन्यकाः' इति च क्रमऽसरो निबद्धः । यदाहुः—चित्तवृत्तिप्रचारप्रसंख्यानाधानाः संख्या पुरुषार्थहेतुकमिदं निमित्तनैमित्तकप्रसङ्गेनेति । अनन्तरं च निमित्तनैमित्तकप्रसङ्गागतो यः शेखरकवृत्तान्तोदितहास्यरसोपकृतः शृंगारस्तस्य विरुद्धो यो वैराग्यशमपोषको नागीयकलेवरास्थिजालावलोकनादिवृत्तान्तः स मित्रावसोः प्रविष्टस्य मलयवतीनिर्गमनकारिणः 'संसर्पद्भिः समन्तात्—' (नागा ३।१५) इत्यादि काव्य उपनिबद्धः क्रोधव्यभिचार्युपकृतवीरसान्तरितो निवेशित इति । (ध्वन्यालोकस्य तृतीयोद्योते १७६ पृष्ठे)

ग्रन्थकर्तुर्निर्णयः

अथ कः खलु रचयिता नागानन्दस्येति विषयं सम्प्रति विचारयामः । तत्प्रस्तावनायामेव कविना शास्त्रनियममनुसरता स्वनाम कीर्तितमिति । आसीदस्य नाटकस्य रचयिता श्रीहर्षनामा कोऽपि महान् महीपतिः, यस्येयं कृतिरिन्द्रमहोत्सवे समुपेतानां तत्पादपद्मोपजीविनां सामन्तनरपतीनां मनोरञ्जनाय नवकृतसम्प्रयोगा बभूवेति *प्रस्तावनागतसूत्रधारवचनैः स्फुटं प्रतीयते । श्रीहर्षस्य कस्मिन् काले प्रादुर्बभूव, कं च जनपदं स्वजन्मनाऽलङ्चकार, कं च राजकुलं मण्डयामासेति प्रश्नात् यथोचितं सप्रमाणञ्च समाधातुमत्र वयं किञ्चिल्लिखामः ।

---

* अथाहमिन्द्रोत्सवे सबहुमानमाहूय नानादिग्देशागतेन राज्ञः श्रीहर्षदेवस्य पादपद्मजीविना राजसमूहेनोक्तः । यथाऽस्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनालकृतं विद्याधरकप्रतिबद्धं नागानन्द नाम नाटकं कृतमित्यस्माभिः श्रोत्रपरम्परया श्रुतं न तु प्रयोगतो दृष्टं तद् यथावत् प्रयोगेनास्य त्वया नाटयितव्यमिति ।

तत्र संस्कृतसाहित्ये श्रीहर्षेत्यभिधानं दधाना विद्यन्ते विभिन्नाः पञ्च जनाः। प्रथमः श्रीहर्षस्तु काव्यप्रदीपकर्तुर्गोविन्दठक्कुरस्यानुज आसीत्। द्वितीयः श्रीहीरसूनुः अप्रतिमनैषधमहाकाव्यस्य रचयिता। तृतीयः कश्मीरमण्डलमहीपतिरासीत् यस्य महिष्या रञ्जनाय सोमदेवेन कथासरित्सागरो निबद्धः। चतुर्थो धाराधिपस्य विद्वज्जनकल्पद्रुमस्य भोजस्य पितामहो मुञ्जमहीपतेः पिता चाभूत्। पञ्चमः स्थाण्वीश्वरस्यासीन्महीपतिः यस्य चरितमनुलक्ष्य श्रीबाणभट्टेन हर्षचरिताभिधानं गद्यकाव्यं निरमायि। एतेषु नागानन्दस्य रचयिता स्थाण्वीश्वरस्याधिपतिरेव भवितुमर्हतीति सप्रमाणं वक्तुं शक्नुमः।

मुञ्जमहीपतेः सभापतिना **श्रीधनिकेन** स्वकीये **दशरूपावलोके** नागानन्दस्य नामोल्लेखः कृतः। श्रीधनिकस्तु स्वभ्रात्रा धनञ्जयेन सह विक्रमस्य दशमशतके धाराधिपश्रीमुञ्जनरेशस्य सभायामासीदिति विदितमेव इतिहासज्ञानाम्। कश्मीरमहीभर्तुः श्री अवन्तिवर्मणो राज्यकाले (८५५—८८३ ई०) आविर्भूत **आनन्दवर्धनाचार्यः** स्वीये **ध्वन्यालोके** रत्नावल्याः नागानन्दस्य च नाम स्मरति। विक्रमस्य नवमशतके काश्मीरकमहाराजश्रीजयापीडस्य मन्त्री **श्रीदामोदरगुप्तोऽपि कुट्टनीमते** रत्नावल्या आर्यामेकामुल्लखति*। येन ह्यायते रत्नावलीनागानन्दयोः कर्ता महाराजश्रीहर्षः विक्रमस्य नवमशतकाद् कथमप्यर्वाचीनो भवितुं नार्हतीति। गोविन्दठक्कुरस्यानुजः श्रीहर्षः पञ्चदशशतके प्रादुर्भावमलभत, न चासीत् स महीपतिः। नैषधचरितस्य कर्ता महाकविः श्रीहर्ष एवमेव नासीत् भूमिपालः, प्रत्युत कान्यकुब्जेश्वरस्य श्री जयचन्द्रस्य सभापण्डितत्वं स स्वयमेव स्वमहाकाव्यस्यान्तिमे पद्ये प्रख्यापयति—'ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरात्' इत्यादिना। कश्मीरदेशस्य राजा ११४६ विक्रमसंवत्सरोदारभ्य ११५८ संवत्सरं यावत् राज्यं चकार। मुञ्जमहीपतेः पिता विक्रमस्य एकादशशतके धारापुर्यां राज्यशासनमकार्षीत्। चत्वारोऽप्येते विक्रमस्य नवमशतकादर्वाचीना एव विद्यन्ते। अतो नागानन्दस्य कर्तृत्वं तेषां कथमपि न सम्भवतीति हेतोः परिशेषात् स्थाण्वीश्वरस्याधिपतिरेव नागानन्दमरीरचदिति विषये नास्ति सन्देहस्यावकाशः।

---

*उदयनगान्तरितमियं प्राची सूचयति दिक् निशानाथम्।
परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी॥

सत्स्वपि एतेषु बलवत्तरप्रमाणेषु येषां हृदि ग्रन्थकर्तारमधिकृत्य सम्प्रति कोऽपि संदेहलेशः क्वापि निलीनो भवेत्, ते खलु चीनदेशीयस्य इत्सिगेत्याख्यां दधानस्य परिव्राजकस्याधोविलिखितामुक्तिं* पठन्तु, अवहितेन चेतसा विभावयन्तु च तदीयमर्थमिति सादरं प्रार्थयामः ।

महाराज श्रीहर्षः ।

अयं महाराज श्रीहर्षः हर्षवर्धनेतिनाम्ना भारतीयेतिहासे नितरां प्रख्यातः इति तु विदितमेव । अस्य पितुर्नाम **प्रभाकरवर्धन** इति, मातुश्च **यशोमती** देवीति । ज्येष्ठो भ्राता राज्यवर्धन नामा ६६१ विक्रमाब्दे पितुर्युपरते राज्यपदाधिकारमलभत । तस्मिन्नेव समये स्वसुः श्रीराज्यश्रीत्याख्यायाः पतिः ग्रहवर्मा मालवनरपतिना यशः शेषतां नीतः । राज्यवर्धनस्तु मालवनरेशमाक्रम्य तं स्ववशमनैषीत् परन्तु कथमपि कपटेन गौडमहीशेन शशाङ्केन संग्रामे हतो वीरगतिं प्रपेदे । तदनन्तरं हर्षवर्धनः ६७३ विक्रमीये राज्यसिंहासनमधिरुह्य सकलमुत्तरं भारतवर्षं नयेन प्रशासन्भूमिं राजन्वतीं चकार ।

स्वराज्यारोहणवर्षादारभ्य स निजाभिधानानुसारिणं 'हर्षसम्वत्' इति नाम्ना प्रथितं नवीनमेकं सम्वत्सरं स्थापयामास । भुवनानां विजयाय सोऽतिमहतीं सेनां स्ववशीचकार । तेन महता बलौघेनोपबृंहितप्रभावो नरपतिरेष वर्षषष्ठकाभ्यन्तरमेव भारतवर्षस्य समग्रमुत्तरीयं विभागं सर्वथा विजित्य सर्वान् तत्तत्प्रदेशाधिपान् निजसामन्तमण्डलीपरिभुक्तान् चकार । महाराजाधिराजेति समुन्नतां पदवीमपि तदनन्तरमलङ्चकार । प्रकृतिषु रूढमूलोऽसौ वसुधाधिपो वर्षाणां पञ्चत्रिंशतं यावत् सर्वत्र नयेन प्रजाः पालयन्, तासां रक्षायै सर्वं कार्यजातं कुर्वन्, परमेन सौख्येन राज्यसिंहासनं मण्डयामास । उत्तरभारतमवजित्य दक्षिणदेशमपि विजि

* "King S'ilāditya (i. e. Harṣa) versified the story of Bodhi Sattva Jimūta vāhana (ch. 'Cloud-borne') who surrendered himself in place of a Nāga. This version was set to music (lit. string and pipe). He had performedit by a band accompanied by dancing and acting, and thus popularised it in his time."-It sings "Recoras of The Budhistic Religion" translated by Takakusu.

गीपुर्महता बलेन प्रातिष्ठत परन्तु चालुक्यवंशस्यालङ्कारभूतेन महाराजद्वितीय **पुलकेशिना** निरुद्धमार्गो यथाकथंचित् निजां राजधानीमाजगाम । बहुषु दिनेषु गच्छत्सु वलभीनरेशो द्वितीयो **धेरसनः** श्रीहर्षेण पराक्रमिणाऽऽक्रान्तः सन् सर्वथा विजितो भूत्वा तद्गुणस्तुतिबन्दितामनीयत । एवं सर्वत्र वशीकृतसामन्तमण्डलीकः श्रीहर्षः हिमालयादारभ्य नर्मदां यावत्, प्राग्ज्योतिषपुरात् (अधुना आसामेति नाम्ना प्रख्यातात् देशविशेषात्) आरभ्य सौराष्ट्रं यावत् समस्तं भूमण्डलं प्रकृती रञ्जयन् हर्षेति यथार्थनामा नरपतिः समधिकेन हर्षेण दिनान्यायापयत् । श्रीहर्षे शासति महीं सर्वत्र जगतां कल्याणमुदियाय, सर्वत्र शान्तेः साम्राज्यं प्रावर्तत, गृहे गृहे प्रजाः सौख्यमन्वभूवन्, किं बहुना महीपतिशिरोमणेः श्रीविक्रमादित्यस्य शासनानुकूलमेव तद्राज्येऽपि समुदभूवन् सौख्यतरङ्गितानि ।

हर्षचरिते *बाणभट्टोऽपि तच्चरितमेवमेव वर्णयति-सोऽयं सुजन्मा सुगृहीतनामा, तेजसां राशिः, चतुरुदधिकेदारकुटुम्बी, भोक्ता ब्रह्मस्तम्भफलस्य, सकलादिराजचरितजयज्येष्ठमल्लो देवः परमेश्वरो हर्षः । एतेन च खलु राजन्वती पृथ्वी । ××× चित्रमिदमत्यमरं राजत्वम् । अपि चास्य त्यागस्यार्थिनः, प्रज्ञाया शास्त्राणि, कवित्वस्य वाचः, सत्त्वस्य साहसस्थानानि, उत्साहस्य व्यापाराः, कीर्तेर्दिङ्मुखानि, अनुरागस्य लोकहृदयानि, गुणगणस्य संख्या, कौशलस्य कला, न पर्याप्तो विषयः । अस्मिंश्च राजनि यतीनां योगपट्टकाः, पुस्तकर्मणां पार्थिवविग्रहाः, षट्पदानां दानप्रहणकलहाः, वृत्तानां पादच्छेदाः, अष्टापदानां चतुरङ्गकल्पना, पन्नगानां द्विजगुरुद्वेषाः, वाक्यविदामधिकरणविचाराः इति ।

श्रीहर्षस्य विजयवर्णनमपि साधु उपन्यस्तं बाणभट्टेनेति दृश्यतामस्य प्रबलः पराक्रमः†—अस्य बहून्याश्चर्याणि श्रूयन्ते । तथाहि-अत्र बलजिता निश्चलीकृताश्चलन्त कृतपक्षाः क्षितिभृतः । अत्र प्रजापतिना शेषभोगिमण्डलस्योपरि क्ष्मा कृता । अत्र पुरुषोत्तमेन **सिन्धुराजं** प्रमथ्य लक्ष्मीरात्मीकृता । अत्र बलिना मोचितभूभृद्वेष्टनो मुक्तो **महानागः** । अत्रादेवेनाभिषिक्तः कुमारः । अत्र स्वामिनैकप्रहारपातितारातिना प्रख्यापिता शक्तिः । अत्र नरसिंहेन स्वहस्तविशसितारातिना प्रकटीकृतो विक्रमः । अत्र परमेश्वरेण तुषारशैलभुवो दुर्गायाः गृहीतः करः।

---

* हर्षचरितस्य द्वितीयोच्छ्वासे पृ० ७७, ७८ (निर्णयसागर)

† हर्षचरितस्य तृतीयोच्छ्वासे पृ० ९०—९१ (नि० सा०)

अत्र लोकपालेन दिशां मुखेषु परिकल्पिता लोकपालाः सकलभुवनकोशश्च अमरजन्मनां विभक्त इति ।

श्रीहर्षस्य राज्यकाल एव 'हुएनत्सांग' नामा चीनदेशीयः परिव्राजको भगवता बुद्धदेवेन प्रचारितस्य स्वधर्मस्य सम्यगध्ययनाय भारतमहीमिमामजिगाम । नालन्दविद्यालये बुद्धतत्त्वदर्शनानां कृत्वा प्रशस्तमध्ययनं बहुकालं यावत् श्रीहर्षस्याभिजनभूयिष्ठां परिषदं स्वावस्थानेन मण्डयामास । 'हुयनत्सांगः' तत्कालिकीं प्रकृतीनां समृद्धिं राज्ञश्च प्रजाजनवत्सलतां च स्वयात्राविवरणग्रन्थे समधिकं प्रशंसति । श्रीहर्षश्चासीदतीव वदान्यः इति व्यक्तमेव होयनसंगकृतात् तद्वर्णनात् । गङ्गायमुनयोः सङ्गमस्थले पवित्रे श्रीतीर्थराजे प्रयागे स पञ्चवर्षानन्तरं महान्तं दानयज्ञमचीकरत् यत्र समस्तमपि संगृहीतमर्थजातं ब्राह्मणेभ्यः श्रमणेभ्यः दरिद्रेभ्यश्च वितीर्य नरपतिरसौ स्वां विभूतिं मृत्पात्रशेषामकार्षीत् । स भगवतस्त्रिलोचनस्य जगन्नायकस्य श्रीसूर्यस्य च भक्तो बभूव । परन्तु श्रूयते हुएनसांगसमागमक्रमेण स तथागतधर्मेऽपि महतीं श्रद्धां विदधे । श्री नागानन्दे भगवतो बुद्धस्य मारविजयं प्रख्यापयन्ती नान्दी सिद्धान्तमिमं द्रढयतीति सुव्यक्तमेव विदुषाम् । बौद्धधर्मे जातश्रद्धेनापि श्रीहर्षेण वैदिकधर्मे स्वास्थ्या कथमपि न शिथिलीकृतेति तद्ग्रन्थावलोकनशीलानां विवेचकानां नापरोक्षमिवेति मन्यामहे ।

कालनिर्णयः

पूर्वोक्तेन वर्णनक्रमेण तस्याविर्भावकालः सत्यतया निर्णेतुं शक्यते । उक्तमेवास्माभिर्यत् ६६३ वैक्रमाब्दे (६०६ ई०) स राज्यसिंहासनं स्वावरोहणविधिना मण्डयामासेति । स० ७०४ वैक्रमाब्दे (६४७ खिस्ताब्दे) जगति स्वयशःकायं निधाय पञ्चत्वं जगाम । एकचत्वारिंशत्वर्षाणि यावत् श्रीहर्षो भारतेऽस्मिन् वर्षे राज्यपदमलङ्चकारेति स्फुटमेव । इत्थं श्रीविक्रमस्य सप्तमशताब्द्याः उत्तरार्द्धमेव तस्य समयः इति निश्चितमेवेति ।

सभापण्डिताः

स केवलं वीरलक्ष्म्याः पर्युपासको नाभूत्, यावत् ललितकलास्वपि परामनुरक्तिमुदवहत् । गुणगौरवशालिनोऽनेकेऽपि विद्वांसस्तस्य सभां मण्डयामासुः । आसीत् तस्य परिषद् अभिरूपजनभूयिष्ठेति नाविदितमिदमितिहासज्ञानां विद्वद्ववरेण्यानाम् । अभूत् श्री बाणभट्टः हर्षसभायाः किमप्यनुपमं रत्नम्, यो नरपते-

विख्यातविक्रमार्जितां यशःपद्धतिं ललितविन्यासवता गद्येन हर्षचरिताख्ये गद्यकाव्ये चारु वर्णयामास। तेन जगद्विख्यातवैदुषीविभवेन निखिलानां रसिकजनानां हृदयहारिणी कादम्बरीति सर्वत्र विख्याताऽतद्द्वयी कथा गौर्वाणवाण्यां निबद्धा। श्रीभगवत्याः स्तोत्रपरम्परारूपं चण्डीशतकमपि काव्यं श्रीबाणभट्टेन व्यलेखीति प्रसिद्धमेव।

मयूरभट्टः श्रीहर्षनरपतेः सभायां द्वितीयं कविरत्नम्। श्रूयते खलु यत् कुष्ठरोगेन दुर्निवारेण दैवदुर्विपाकात् समाक्रान्तोऽय महाकविः भगवन्तं सवितारं स्तोतुकामः शब्दविन्यासशालिनं कमपि मनोरमार्थसंवलितं नातिविस्तरं 'श्रीसूर्यशतक' नामानं काव्यग्रन्थमेकं स्रग्धरावृत्तेन रचयामास। 'आदित्यादेर्मयूरादीनामिवानर्थनिवारणमिति' वदता काव्यप्रकाशे मम्मटाचार्येण मयूरभट्टस्य काव्यकरणचातुरी व्यञ्जनया प्रशंसितेति सुधीभिर्बोद्धव्यम्। कविरयं बाणभट्टस्य श्वसुर आसीदिति विद्यते कापि विबुधसमाजे किम्वदन्ती।

दिवाकरोऽपि श्रीहर्षसभायां सभ्यो बभूवेति प्रसिद्धमेव। श्रूयते स कस्मिंश्चित्निम्नवर्णे कुले जनिमलभत। परन्तु केवलं स्वगुणानां माहात्म्येन उच्चवर्णाभिजाताभ्यां बाणमयूरभट्टाभ्यां सार्कं राज्ञः सम्माननीयां सभ्यपदवीमलङ्चकारेति सत्यमेवाह वाग्देव्याः प्रभावं श्रीराजशेखरः—

अहो प्रभावो वाग्देव्या यन्मातङ्गदिवाकरः।
श्रीहर्षस्याभवत् सभ्यः समो बाणमयूरयोः।

बाणमयूरयोः श्रीहर्षसभायां समुपस्थितिर्दशमशतकाविर्भूतेन महाकविना पद्मगुप्तेन स्वनवसाहसांकचरिताभिधे महाकाव्ये स्फुटमेव प्रमाणीकृता—

सचित्रवर्णविच्छित्तिहारिणोरवनीपतिः।
श्रीहर्ष इव संघट्टं चक्रे बाणमयूरयोः॥

अन्येऽपि कवयः पण्डिताश्च तत्सभामलमकुर्वन्निति सम्भाव्यते। श्रीहर्षः सर्वानेनान् पण्डितान् द्रव्यवितरणेन भूमिदानेन च सर्वथा स्वविभवानुरूपं सममानयदिति तस्य शिलासुट्टङ्कितैर्बहुभिर्लेखैः सुव्यक्तमेव इतिहासविद्याजुषां विदुषाम्

श्रीहर्षस्य ग्रन्थकर्तृत्वम्

नाभूत् श्रीहर्षः केवलं कवीनां परमं परायणं, न च विदुषां केवलं परमः समाश्रयः, यावत् स स्वयमेव ललितललितान् ग्रन्थान् प्रणीय श्रीमत्याः सरस्व-

त्याः विपुलां सपर्यामात्मनाऽपि विदधे । 'निसर्गभिन्नास्पदमेकसंस्थमस्मिन् द्वयं श्रीश्च सरस्वती च' इति कविशिरोमणेः कालिदासस्योक्तिः नितान्तमानुरूप्यं भजन्ती श्रीहर्षमनुबध्नातीति निपुणं प्रदर्शयितुं पारयामः ।

बभूवुरस्माकं भारतेवर्षे विक्रमादित्यशूद्रकहालप्रभृतयो राजानः परमविद्योपासका महाकवयः तेष्वेवायमन्यतमो रत्नावलीकर्ता श्रीहर्षः । पीयूषवर्षो **जयदेवः** स्वप्रसन्नराघवे रूपके कविताकामिनीं वर्णयन् श्रीहर्षं तस्या हर्षत्वेनावर्णयत् 'हर्षो हर्षः' इत्यादिना । हृदयवसतिशीलेन कामिन्याः पञ्चबाणभूतेन बाणभट्टेन साकं तस्य नामोल्लेखं चापि व्यदधात् । विक्रमस्यैकादशशतकसमुद्भूतेन **सोड्ढलेन** उदयसुन्दर्या **श्रीहर्षो** वाग्देवीहर्षप्रदायित्वेन गीर्हर्षेत्यन्वर्थनाम्ना निपुणं प्रशंसितः । यथा—

श्रीहर्ष इत्यवनिवर्तिषु पार्थिवेषु नाम्नैव केवलमजायत वस्तुतस्तु ।
गीर्हर्ष एष निजसंसदि येन राज्ञा सम्पूजितः कनककोटिशतेन बाणः ।

एवमेव **दामोदरगुप्तः** कुट्टिनीमते रत्नावल्या नाम्ना निर्देशमकार्षीत् । तांच राजकृतां विनिर्दिशन् तस्याः महाराजश्रीहर्षकर्तृत्वं ख्यापयंश्च तस्य महतीं काव्यचातुरीं व्यक्तं प्रकटयतितराम् । नाविदितमितिहासज्ञानां यत् **इत्सिंग** नामा चीनदेशाभिजनो बौद्धपरिव्राजकः स्वधर्मग्रन्थानध्येतुकामः श्रीहर्षस्य मृत्योः समनन्तरमेव भारतवर्षमाजगाम । स निजयात्राविवरणात्मके ग्रन्थे स्पष्टमेव श्रीहर्षस्य नागानन्दरचयितृत्वमुल्लिखति । स कथयति—राज्ञा शिलादित्येन (श्रीहर्षेण) बोधिसत्वजीमूतवाहनस्याऽऽख्यायिका नाटकरूपेण परिणमिता, सङ्गीतादिसमुपचितसामग्रीसंवलिता नटैश्चाभिनयं प्रापितेति । व्यक्तमेतेन महाराजश्रीहर्षस्य ग्रन्थकर्तृत्वम् एतेषु प्रमाणेषु विद्यमानेष्वपि ये तत्कर्तृत्वविषये सन्दिहानाः, ते बाणभट्टस्य कथनमिदं विचार्य स्वं संशयं निराकुर्वन्तु । हर्षचरिते बाणभट्टो वारद्वयं राज्ञः काव्यव्याकरणचातुरीं प्रशंसति । "राज्ञां सम्भाषणेषु परित्यक्तमपि मधु वर्षन्तं, काव्यकथास्वपीतामृतमुद्भवमन्तमिति"*कथनं श्रीहर्षस्य कामपि प्रकटयति काव्यवैदुषीम् । 'अस्य कवित्वस्य वाचो न पर्याप्तो विषयः' इति† दर्शयन् बाणभट्टो महाराजस्य काव्यविरचनपाटवं स्फुटमेव व्यनक्ति । इत्थं श्रीहर्षस्य काव्यरचनायां नागानन्दस्य च निबन्धने न भविष्यति कस्यापि कोऽपि सन्देह इति निपुणं प्रतीमः ।

* हर्षचरिते पृ० ७१ † हर्षचरितेपृ० ७८

साम्प्रतं धावककवे रत्नावल्यादिकर्तृत्वं निरस्यते। काव्यप्रयोजनवर्णनप्रस्तावे श्रीमम्मटाचार्यः अर्थकृते काव्यं व्यपदिशन् 'श्रीहर्षादेर्धावकादीनामिव धनमिति, दृष्टान्तमुखेन समुल्लिखति। तत्र केऽपि नवीनाः काव्यप्रकाशटीकाकाराः धावको रत्नावलीं विरच्य श्रीहर्षात् महद्धनं लब्धवानिति प्रतिपादयन्ति*। परन्तु तेषां कथनमेतत् पूर्वोक्तेषु सत्सु प्रबलेषु प्रमाणेषु नास्माकमवतरति श्रद्धापदवीम्। केषुचित् काव्यप्रकाशपुस्तकेषु श्रीहर्षादेर्बाणादीनामिव धनमिति विभिन्नं पाठमुपलभ्य ये खलु साहसिकाः पाश्चात्यविवेचका श्रीहर्षस्य कर्तृत्वं प्रतिषिध्य बाणभट्टे रत्नावल्यादिरचयितृत्वं समारोपयन्ति, तेषां कथनं तु तथैवाश्रद्धेयमिति। मम्मटाचार्यकृतः समुल्लेखस्तु केवलं श्रीहर्षस्य कविषु दातृत्वनिबन्धनः। तथा च प्रचुरं स्मर्यते तस्य दानशीलता कविवरे बाणभट्टे—

यावदस्य स्वयमेव गृहीतस्वभावः पृथिवीपतिः प्रसादवानभूत्। स्वल्पैरेव चाहोभिः परमप्रीतेन प्रसादजन्मनो मानस्य प्रेम्णो विस्रम्भस्य ब्रुविणस्य नर्मणः प्रभावस्य च परां कोटिमनीयत नरेन्द्रेण। —हर्षचरिते।

श्रीहर्षो विततार गद्यकवये बाणाय वाणीफलम्।
—सुभाषितावल्याम्।

हेम्नो भारशतानि वा मदमुचां वृन्दानि वा दन्तिनां
श्रीहर्षेण समर्पितानि कवये बाणाय कुत्राद्य तत्।
या बाणेन तु तस्य सूक्तिनिकरैरुट्टङ्किताः कीर्तय—
स्ताः कल्पप्रलयेऽपि यान्ति न मनाङ् मन्ये परिम्लानताम्॥
—सारसमुच्चये।

श्रीहर्षकृता ग्रन्थाः

सन्ति प्रणीतास्त्रयो ग्रन्थाः महाराजश्रीहर्षेण। आप्नुवानाः सर्वत्र संस्कृतसाहित्ये परमां प्रख्यातिं रञ्जयन्तो विदग्धानां चेतांसि प्रन्था अमी कस्य संस्कृतविद्याजुषो विदुषो नाद्यापि समुपेताः श्रवणपदवीम्। तथापि समुल्लिख्यन्ते ते साम्प्रतं नाम्ना विद्यार्थिजनसौकर्याय। ते च यथा—(१) प्रियदर्शिका (नाटिका), (२) रत्नावली (नाटिका) (३) नागानन्दं (विदुषां करक-

* धावकस्तन्नामा कविः। स हि श्रीहर्षनृपनाम्ना रत्नावलीनाम्नीं नाटिकां कृत्वा बहु धनं लब्धवानिति प्रसिद्धिरिति नागेशविरचिते उद्योते स्पष्टम्।

मलमुपेतं प्रस्तुतमेतन्नाटकम्) । यावत् सर्वेऽप्येते ग्रन्था एकेनैव कविना निबद्धा इति तत्तद्ग्रन्थाध्येतॄणां पठनेनामुना केवलेन झटिति स्फुटीभविष्यति सिद्धान्तः । उपरि विलिखितेषु त्रिष्वपि दृश्यते शब्दानां समानो विन्यासः, गोचरी क्रियते ह्यर्थानां सर्वथा समता, समुपलभ्यते च रचनाया कोऽपि सदृशः प्रकारः । किंबहुना लक्ष्यन्ते च सर्वेष्वपि समुद्धृतानि तान्येव कानिचित् पद्यानि । येन स्फुटमेवामीषां सिध्यति एककविकर्तृत्वम् । ये च केऽपि शङ्काकुलितचित्ता न पारयन्ति सिद्धान्तमिमं स्वीकर्तुम्, ते खलु स्वयमेवावलोकयन्तु नागानन्दस्य प्रियदर्शिकारत्नावलीभ्यां साकं शब्दसादृश्यं भावसाम्यं च, विचारयन्तु चात्मना तदुद्धृतं सिद्धान्तम् ।

तत्र प्रियदर्शिका—रत्नावल्योरुभयोरपि कविना निबद्धमेकमेव वत्सराजस्योदयनस्य नितान्तं कौतुकावहं बृहत्कथामूलं चरित्रम् । अनयोः रत्नावल्यां तु वस्तुविन्यासकौशलेन सुभगभावप्रदर्शनपाटवेन च प्रियदर्शिकां निपुणमतिशेते । संस्कृतसाहित्ये प्रख्यातिं च भजते । दामोदरगुप्तेन कुट्टिनीमते रत्नावल्या अभिनयक्रमो वर्णितः, धनिकेन दशरूपावलोके च रत्नावल्या एव पञ्चसन्ध्यादिविभागः *सुचारुतया प्रदर्शित इति व्यक्तं जागर्ति रत्नावल्याः लोकप्रियता । परन्तु अप्रस्तुततयाऽनयोः परीक्षणमन्तरेण न विभात्यस्मान् समधिकं वर्णयितुम् । अतो विरामः श्रेयानिति प्रतीमः ।*

नागानन्दस्य समीक्षा

नागानन्दमिदं रत्नावल्या अनन्तरं समधिकरमणीयतया सर्वेषां सहृदयानां चेतांसि रञ्जयति । काव्यप्रकाशे मम्मटः, लोचने श्रीअभिनवगुप्तपादाचार्याः, ध्वन्यालोके च श्रीमदानन्दवर्धनपादाः रसविरोधपरिहारवर्णनावसरे नागानन्दं समुल्लिखन्ति नाम्ना विचारयन्ति चात्रत्यं शान्तशृङ्गारयोः समुपलभ्यमानं विरोधम् । अनेन अलङ्कारशास्त्रप्रवीणेषु ग्रन्थस्यास्यासीत्प्रसिद्धिरिति स्फुटं प्रतीयते । रसानुकूल एव वर्णानां विन्यासो निबद्धो दृश्यते । व्यनक्ति शृङ्गाररसवर्णने मधुराणां प्रयोगो वर्णना, विकटवस्तुवर्णनक्रमे तु उद्धतानां व्यक्तमेव कवेः किमपि काव्यपाटवम् । चमत्करोति अर्थेषु चमत्कारः सर्वरसिकजनानां चेतांसि । रसनिवेशश्चापि सर्वथा श्लाघनीय एवेति । सरसमिदं पद्यं पठित्वा कस्य अश्ममयहृदयस्यापि मानसं करुणरसाप्लावितं न स्यात्—

निराधारं धैर्यं कमिवशरणं यातु विनयः
क्षमः क्षान्तिं वोढुं क इह ? विरता दानपरता ?
हतं सत्यं सत्यं व्रजतु कृपणा क्वाद्य करुणा
जगज्जातं शून्यं त्वयि तनय ! लोकान्तरगते ।

पद्यस्यास्य सकृत्पठनेन कः सहृदयो मालतीमाधवे भवभूतेरेतच्छायानुसारि पद्यरत्नमिदं न स्मरति—

असारं संसारं, परिमुषितरत्नं त्रिभुवनं
निरालोकं लोकं, मरणशरणं बान्धवजनम् ।
अदर्पं कन्दर्पं जननयननिर्माणमफलं
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः ।

एवं सर्वत्र श्रीहर्षेण काव्यप्रणयने काऽपि सरसा रीतिः स्वीकृता नाटकनिबन्धने च किमपि महत्कौशलमङ्गीकृतमिति व्यक्तं वक्तुं शक्नुमः । प्रथमाङ्के तपोवनस्य शान्तरससमर्पकं विशदं वर्णनं पठित्वा कस्य नैव नरीनृत्यते मानसमानन्देन । द्वितीयेऽङ्के मलयवतीजीमूतवाहनयोः सरसं विवाहमवलोकयतः कस्य नैव जायते ललितरसाक्रान्त चेतः । तृतीयेऽङ्के शेखरकेण चेटीबुद्धया पादपतनेन प्रसाद्यमानं रक्तवस्त्रावगुण्ठितविग्रहं विदूषकं पश्यतः कस्य प्रफुल्लतां नोपयात्याननं हास्यरसेन सहृदयस्य । चतुर्थेऽङ्के पुत्रवधशङ्कया मृशमाक्रोशन्त्याः शङ्खचूडजनन्याः परिदेवितमाकर्ण्य न जायते कस्यान्तःकरणं सान्द्रं समाप्लुतं करुणारसेन । एवं पञ्चमेऽङ्के जीमूतकेतोः, मलयवत्याः, वृद्धायाश्च सम्भावितानिष्ट शङ्कया करुणां दशां निरीक्ष्य कस्य हृदि नैव दधाति पदं शोकः । किं बहुना मलयशिखरे भक्षणात् विरतं गरुडं पुनरपि स्वशरीरमांसभोजनाय प्रार्थयन्तं जीमूतवाहनमवलोकयन् को नु जगति एवं भविष्यति यस्य मनसि नोत्पादयिष्यति परोपकारव्रतस्य महिमा नायकस्य चोदारचरित्रं च प्रसभं प्रभावम् ।

एवमेव धारयति पात्राणां चित्रणे चरित्रस्य किमपि प्रकृष्टं पाटवं श्रीहर्षः । आत्रेयस्य सदैव हास्याभिरुचिः, जीमूतकेतोः पुत्रवात्सल्यं, वृद्धायाः शङ्खचूडजनन्या निष्कपटः सुतस्नेहः, मलयवत्या अकृत्रिमोऽनुरागः सर्वमेव कविना आप्रारम्भात् अवसानं यावत् सदृशाभिनिवेशपुरःसरं कौशलेन प्रदर्शितमिति सद्यः स्फुटीभवति नाटकाध्ययने पाठकानाम् । परन्तु सर्वथैवादर्शरूपतां भजते श्रीहर्षेण

वर्णितो नायको जीमूतवाहनः । समृद्धमपि कुलक्रमागतं राज्यं परित्यज्य, पितृ-चरणपरिचर्यायै वनं गच्छन् सन्, पुत्राणां शिरोमणिरेष आर्त्तजनप्राणरक्षायै स्वजीवितं परित्यजन् वर्तते दयावीराणामग्र्यादर्शः इति जीमूतवाहनस्य पवित्रं चरित्रं श्रीहर्षोपनिबद्धमवलोकयतः परोपकारमहाव्रतस्याऽहिंसाधर्मस्य च महत्ता प्रभूतैः समुदारैर्भावैर्नैव विधत्ते कस्योन्नतं चेतः पुरुषस्य ।

नागानन्दे सुभाषितानि

समुपलभ्यन्तेऽस्मिन् नागानन्दे स्वभाषा प्रकाशमानानि बहूनि सुभाषितरत्नानि यानि खलु गुणज्ञानां मनांसि प्रसभं प्रलोभयन्ति । तेषां कतिपयान्येवात्रोपन्यस्यन्ते विदुषां लेखनाय ।

(१) रत्नाकरादते कुतश्चन्द्रलेखायाः प्रसूतिः ।
(२) कोदण्डं नवमालिकया विना शोभते रुक्षः ।
(३) कन्याः खलु देवताः ।
(४) निर्दोषदर्शना हि कन्यकाः ।
(५) जाता यामतयैव मेऽद्य मुदितं प्रीत्यै नवोढा प्रिया । (३ । ४)
(६) स्वाङ्गैरेव विभूषितापि बहसि क्लेशाय किं मण्डनम् । (३ । ६)
(७) किं पद्मुमथनो लक्ष्मीक्लेशेन लक्ष्मीमनुद्वहन् निर्वृत्तो भवति ।
(८) आयासः खलु कालक्षपितमुपोद्वलयन्नाक्षिपति कश्चित् गुणः (१।७)।
(९) समागमो भवति पुण्यवतां । (२ । १४)
(१०) स्वगृहोद्यानलतेऽपि किसलये पादं विशंकयते स्नेहात् (५ । १)
(११) एकः श्लाघ्यो विदुषां परहितकरणायैव यस्य प्रयासः।(३।१८)
(१२) शरीरलावण्ये का शोभा खलु लोभनदर्शने (५ । २३)
(१३) मृत्याद् परोपकाराय शरीरलाभः । (४ । २६)
(१४) शरीरकक्ष्यापि कृते सुहृदः कायानि कुर्वते (४ । ७)
इत्थमेव चान्यान्यपि विद्यन्ते मनोहराणि सरलानि पद्यानि ।

नागानन्दस्य वैशिष्ट्यम्

विद्यते का नु खलु विशिष्टता नागानन्दस्य संस्कृतनाटकसाहित्ये ? इति विषयं साम्प्रतं विचारयामः । प्रायशः स्वार्थप्राया एव विलसन्ति प्राणिनां वृत्तय इति हेतोर्लोकचरितमनुरुध्य विरचितेषु रूपकेषु स्वार्थमयानामेव वर्तते प्राधान्यं

लोकवृत्तानाम्। अस्मिन् नागानन्दे तु विहायेमां प्रचलितां रीतिं रूपकाणां, अन्यदेवाऽहिंसामूलकं परोपकारनिबन्धनं लोकानां परममङ्गलाय वृत्तमुपनिबद्धं कविना श्रीहर्षेण। नायको जीमूतवाहनो परित्यज्य समृद्धमपि राज्यं पित्रोश्चरणपरिचर्यानिरतः सर्वेषां पुरतः पुत्रस्याऽऽदर्शरूपता प्रकटयति। तदनन्तरं विहाय गृहमपि पितरौ, अवमत्य च नवपरिणीतां सौन्दर्यसम्पन्नां स्वीयां कान्तां नागस्यैकस्य जीवितरक्षणाय प्रियानपि निजान् प्राणान् गरुत्मते दातुकामः प्रथयति प्रकर्षं परोपकारव्रतस्य, विकाशयति परां कोटिमहिंसाव्रतस्य, उपदिशति च निजेन चरितेन सर्वान् जनान् विमलां व्यवहाररूपतां 'अहिंसा परमो धर्मः' इति सिद्धान्तवचनस्य। प्रायो नाटकेषु शृङ्गारस्यैव विलसति कमनीया वर्णनरीतिरङ्गीकृता कविभिः, परन्तु नागानन्दे दयावीररसस्य परमसुन्दर उपन्यस्तो वर्णनप्रकारः श्रीहर्षेण। अन्यश्चात्र विभाति विधिर्वैशिष्ट्यस्य। श्रीहर्षसमये तदानीन्तनभारतीयाना वैदिकधर्मोपरि आसीदेव काऽपि परमा श्रद्धा परन्तु भगवता शौद्धोदनिना तथागतेन स्थापितस्य बौद्धधर्मस्यापि सार्वत्रिको बभूव प्रचार इति मन्यन्ते इतिहासवेत्तारः। नागानन्दे वैदिक-बौद्धधर्मयोरनयोः परमसुन्दरः समन्वयक्रमोऽपि तथैव कविना वर्णितोऽस्माभिर्गोचरीक्रियते। जीमूतवाहनस्तु बोधिसत्त्व एव। तदीया कथापि विद्याधरजातकप्रतिबद्धा बौद्धधर्मसेवाऽऽश्रयत्वेन सम्पतुष्यन्ति। परन्तु वर्णयति श्रीहर्षः प्रथमाङ्के नायिका मलयवती वैदिकधर्मदेवतां गौरीं वाणीं प्रसादयन्तीं तदीयान् प्रसादाँश्चाभिलष्यन्तीम्। एवमेव पञ्चमाङ्के भगवत्या गौर्या अमोघदर्शनायाः प्रार्थनासमकालमेवाविर्भूतायाः प्रसादेनालभत नायको निजां चेतनतां प्राप्तवाश्च समुन्नता विद्याधराणां महत्तीयां चक्रवर्तिपदवीमिति रूपयता महाकविना चारु प्रदर्शितः वैदिकबौद्धधर्मयोः मनोरमः समन्वयक्रमः।

आदर्शपुस्तकपरिचयः

नागानन्दस्य मूलपाठश्चतुर्भिरादर्शपुस्तकैः स्थिरीकृतोऽस्माभिः। 'क' संज्ञकं म० म० श्रीगणपतिशास्त्रिणाऽनन्तशयनग्रन्थमालायां सम्पादितं श्रीशिवरामकृतया व्याख्यया मण्डितं प्रथमं पुस्तकम्। 'ख' संज्ञकं करमरमहाशयसम्पादितमाङ्गलभाषानुवादोपेतं द्वितीयं पुस्तकम्। 'ग' संज्ञकं श्रीजीवानन्दविद्यासागरसम्पादितं कलिकातानगरे मुद्रितं तृतीयं पुस्तकम्। 'घ' संज्ञकं चतुर्थं तु नवीनचन्द्रविद्याभूषणेन महाशयेन सम्पादितं कलिकातानगरे मुद्रितमधुना

विरलप्रचारम् । एषां साहाय्येन ग्रन्थोऽयमस्याभिर्यथामति संशोधितः । शिवरामस्वीकृतः पाठस्तु नितरां समीचीनः इति स एव प्राधान्येनाङ्गीकृतोऽस्माभिः । परन्तु अन्येषामादर्शपुस्तकानां साहाय्येन स्थलेषु बहुषु समुचितं परिवर्तनमपि विहितम् ।

भावार्थदीपिका

तत्र विद्यमानास्वन्यासु टीकासु कस्याश्चिदतिविपुलत्वात् कस्याश्चन चातिलघुत्वात् विद्यार्थिनां नातीवोपकारित्वात् भावार्थदीपिका व्याख्याऽस्माभिर्विरचिता । अत्र कठिनानां प्रायः सर्वेषामंशानां कोशव्याकरणप्रदर्शनपुरःसरं सरलैः शब्दैः कृता व्याख्या । विहितं सर्वत्र भावानां प्रकटनम् । समुद्धृता अन्येषां कवीनामपि काव्येभ्यस्तत्समाना उक्तयः । दत्तो व्याख्यायाः सहैव समग्रस्यास्य नाटकस्य हिन्दीभाषायामनुवादः । इत्थं विद्यार्थिनां विचार्य आवश्यकतां प्रायः सर्वेषां अनुरूपाणां विषयाणामत्र सरलया भाषया विहितं प्रतिपादनं यदि तेषामुपकाराय स्यात्, तर्हि 'क्लेशः फलेन हि पुनर्नवतां विधत्ते' इति स्मारं स्मारं कालिदासीयामुक्तिं परिश्रममिमं सफलं मन्येमहि ।

उपसंहारः

सर्वासु नागानन्दीयासु व्याख्यासु शिवरामकृता विमर्शिण्येव सर्वथा शीर्षस्थानीयतां भजते । भावार्थदीपिकाया रचनायां विमर्शिण्याऽतीव साहाय्यं कृतमिति शिवरामस्य महान्तमुपकारं स्वीकुर्मः । क्वचित् क्वचित् स्थले विद्यार्थिनां लाभाय विमर्शिण्या उद्धरणमपि दत्तमस्माभिः । करमरकरमहोदयेन सम्पादितनागानन्दमस्माकं महदुपकाराय अभूदिति करमरकरमहाशयस्य भृशमाभारानङ्गीकुर्मः । साम्प्रतं येषां महानुभावानां प्रोत्साहनेन व्याख्येयं विरचिताऽभूत्, येषां विपुलेन साहाय्येन विमलेन च सदुपदेशेन वयं बहुश उपकृताः स्मः, तेषां परमकारुणिकानां ज्येष्ठभ्रातृकल्पानां साहित्याचार्यं श्रीबटुकनाथशर्मणां महान्तमुपकारं कैः शब्दैरङ्गीकर्तुं पारयाम इति सत्यमेव न वयं जानीमः । यत्र हृदयं हृदयेन सह संवदति, तत्र नावकाशो भाषाया इति ।

हिन्दूविश्वविद्यालय काशी
अक्षयतृतीया २१-४-३१

बलदेव उपाध्यायः

संक्षिप्त हिन्दी कथासार

प्रथमांक

विद्याधरोंके अधिपति जीमूतकेतु नामक राजा थे। वे जब वृद्धावस्थामें अपनी पत्नी सहित तपस्या करने जाने लगे, तब उनके साथ उनके पुत्र जीमूतवाहन भी चले। उन्होंने राज्यका भार मंत्रीको सौंप दिया तथा अन्य सांसारिक सुखोंको भी त्याग दिया। विपिनमें पहुचकर पितृभक्त राजकुमार जीमूतवाहन पिताके आदेशसे अपने मित्र आत्रेयके साथ मलयपर्वतपर तपोभूमिमें पिताके रहनेके योग्य स्थान खोजने गये। तपोभूमिमें पर्यटन करते हुए उन्हें गाना सुनाई पड़ा। उस गानेको सुनते हुए वे धीरे-धीरे पार्वती-मन्दिरके समीप जा पहुचे। मन्दिरके भीतर राजकुमारी मलयवती वीणा बजा रही थीं एवं गाना गा रही थीं। उन्होंने झाड़ीकी ओटमें छिपकर गाना सुना और तत्पश्चात् राजकुमारी मलयवती और चेटीका वार्तालाप सुना। उन लोगोंने उक्त वार्त्तालापसे ज्ञात कर लिया कि राजकुमारीको गौरी देवीने सपनेमें वर दे दिया है कि, "उनका परिणय शीघ्र विद्याधर चक्रवर्त्तीसे होगा" इस वार्त्तालापके सुननेके बाद राजकुमार अपने सखा सहित राजकुमारीके सामने आ गये। राजकुमारी राजकुमारको देखते ही प्रेममें विभोर हो लज्जान्विता होकर नतमुख हो गयीं। उसी समय कुलपतिकी आज्ञासे एक तपस्वी वहा राजकुमारीको बुलाने उनके पिता विश्वावसुकी ओरसे आये और राजकुमारीको घरपर बुला ले गये। राजकुमारका भी अन्तःकरण राजकुमारीके प्रेममें परिव्याप्त हो गया। इस पारस्परिक प्रेम विह्वलतापर राजकुमारके सखा विदूषकको अति आनन्द हुआ।

द्वितीयांक

राजकुमारी राजकुमारके प्रेमपाशमें फंसकर अति विह्वला हो गयीं। घरसे वे चेटियोंके साथ चन्दन लतागृह चली गयीं। केलोंके पत्तोंसे परिव्याप्त चन्दन लतागृहकी चन्द्रकान्तमणिमयी शिलापर जा बैठीं। उन्हें विरहव्यथा सता रही थी। अतः वहांपर चतुरिका नामकी चेटीने, उनकी वियोग पीड़ाकी शान्तिके लिये, उनके हृदयपर चन्दनके रसका लेप किया तथा केलोंके पत्तोंसे हवा की। परन्तु, इसका परिणाम प्रतिकूल हुआ। राजकुमारीको शान्तिके स्थानमें अशान्ति मिलने लगी ये उपचार और भी दाहक एव सन्तापकर हुए।

राजकुमार भी राजकुमारीके प्रेममें उन्मत्त होकर मनोरञ्जनार्थ उसी चन्दनलतागृहकी ओर अपने सखाके साथ चले गये। उन लोगोंके आनेकी ध्वनि सुनकर राजकुमारी अपनी चेटीके साथ एक झाड़ीमें जा छिपीं। वहीं छिपे-छिपे दोनोंकी वार्ता श्रवण करने लगीं।

राजकुमारने अपने मित्र आत्रेयसे कहा—"मैंने कल रातमें स्वप्नमें अपनी प्रियतमा राजकुमारीको इसी चन्दनलतागृहमें चन्द्रकान्तमणिकी शिलापर बैठे देखा। उस समय वे प्रणयकोपसे रोती हुई मुझे उलाहना दे रही थीं। अत एव उक्त स्वप्नवाले समागम स्थलपर दिवस बिताने आया हूं। जिससे चित्तको कुछ शान्ति प्राप्त हो और ज्यादा व्याकुल न होवे।"

चन्दनलतागृहकी चन्द्रकान्तमणिकी शिलापर राजपुत्र जीमूतवाहनने अपनी प्रेयसी मलयवतीका चित्र खींचा एवं उसी चित्रसे अपना मनोविनोद करके प्रसन्न हुए। उसी क्षण सिद्धकुमार मित्रावसु वहां आ गये तथा राजकुमार जीमूतवाहन से अपने पिताजीका सन्देश कहने लगे। सन्देश—"पिताजीने कहा है कि, 'मैं अपनी पुत्रीका उद्वाह आपके साथ करना चाहता हूं जिसका नाम कुमारी मलयवती है,।" राजपुत्र जीमूतवाहन अपनी प्रेयसीको नामसे न जानते थे अपितु सूरतसे जानते थे। अतः उन्होंने मलयवती कुमारिकाको अपनी प्रियतमाके अतिरिक्त अन्य कुमारिका समझकर साफ साफ अनिच्छा प्रकट कर दी तथा कह दिया कि मैं अपने अन्तःकरणमें दूसरी कुमारीको स्थान दे चुका हूं। इतनेमें सखा आत्रेयने मित्रावसुसे कहा—"आप राजवाहनके माता-पिताके समीप जायें तथा अपना सन्देश कहें। यदि वे स्वीकार कर लेंगे तो राजकुमार जीमूतवाहन अवश्य उनकी आज्ञाका उल्लङ्घन न कर सकेंगे।

राजकुमारी मलयवती ये बातें श्रवण कर रही थीं और अपनी अवहेलनापर दुःखी होकर वे अशोक वृक्षसे लटककर फांसी लगानेको तैयार हो गयीं। उनकी चेटी हल्ला मचाने लगी। हल्ला सुनकर राजपुत्र जीमूतवाहन शीघ्र सहायतार्थ दौड़ पड़े और मलयवती कुमारीका हाथ पकड़कर चन्द्रकान्तमणि शिलाके समीप ले आये तथा उस शिलापर खींचा हुआ चित्र कुमारीको अवलोकित कराया, जिसे देखकर कुमारीको शान्ति मिली। अन्योन्यमें प्रेमांकुरका उद्गम हो जानेसे वहीं उन दोनोंका गान्धर्वरूपेण विवाह हो गया इतनेमें एक चेटीने दौड़ी हुई आकर निवेदित किया कि, "राजकुमार जीमूतवाहनके

जननी-जनक जीमूतकेतुने भी सम्बन्ध स्वीकार कर लिया है तथा आज ही पाणिग्रहण संस्कार करनेका निश्चय हो गया है।" ततः मलयवती कुमारी, कुमार जीमूतवाहन और विदूषक सभी लोग स्नान आदिके लिये चले गये।

तृतीयांक

राजकुमार—राजकुमारीके पाणिपीडनोत्सवपर सभी लोग आमोद-प्रमोद मनाने लगे ततः शेखरक नामका विट मदिरा पान किये हुए चेटके साथ कुसुमाकर बागमें अपनी प्रियतमा नवमालिकाकी खोजमें आया। उसी बागमें विदूषक भौंरोंसे बचनेके लिये साड़ी धारण किये हुए उसे दिखायी दिया। बस, विट विदूषकको ही अपनी प्रिया नवमालिका समझकर आलिंगन करने दौड़ा सब लोग हंसने लगे येन-केन-प्रकारेण विदूषक अपना पिंड छुड़ाकर स्नानके लिये गया। उसी कालमें राजकुमार और राजकुमारी बागमें आये। राजकुमार जीमूतवाहनने राजकुमारी मलयवतीकी सुन्दरता तथा ललितांगोंकी प्रशंसा की एवं उनके लजाशील स्वभाव और हाव भावसे प्रमुदित हुए।

राजकुमारी मलयवतीकी सहचरियोंने तमालपत्रके रसोंसे परिहासमें विदूषकका मुंह काला कर दिया। थोड़ी देरमें सिद्धकुमार मित्रावसुके आनेकी सूचना हुई जिस कारण कुमारी मलयवती तथा चेटिया चली गयीं। कुमार मित्रावसु आकर राजकुमार जीमूतवाहनसे कहने लगे कि, "आपके साम्राज्यपर आक्रमण करके मतंग नामक शत्रुने अधिकार कर लिया है।" इस दुःखद समाचारसे जीमूतवाहन बड़े हर्षित हुए—दुःखी नहीं हुए। कुमार मित्रावसुने जीमूतवाहनसे मतंग विदारणकी आज्ञा मांगी। इसपर राजकुमार मित्रावसुको शान्ति धारणका ही उपदेश देने लगे और शत्रुको नष्ट करनेकी आज्ञा नहीं दी।

चतुर्थांक

राजकुमार जीमूतवाहन मित्रावसुके साथ समुद्र किनारे टहलने गये। समुद्र-तटपर राजपुत्र जीमूतवाहनने हड्डियोंकी राशिको कई स्थानोंमें देखा और कुमार मित्रावसुसे पूछा—"ये अस्थिराशियां कैसी पड़ी हैं?" मित्रावसुने उत्तर दिया—"नागराज वासुकिने गरुड़के भयसे उन्हें (गरुड़को) खानेके लिये एक नाग नित्यप्रति देनेका नियम बना दिया है। अतः अति कालसे गरुड़ आकर नित्य एक नागको भक्षण करते हैं और हड्डियां यहीं छोड़ देते हैं उन्हीं

हड्डियोंका समूह आपको दृष्टिगोचर हो रहा है।" यह वृत्तान्त श्रवणकर राजपुत्र जीमूतवाहन अति दुःखी हुए और सोचने लगे कि यदि मैं अपना शरीर देकर एक नागकी भी रक्षा कर सका तो अपनेको सौभाग्यशाली समझूंगा। इतनेमें मित्रावसुको घरसे पिताजीका आमन्त्रण मिला कि, "शीघ्र घर आओ" पिताके निदेश पर मित्रावसु घर चले गये और जीमूतवाहन समुद्रतटपर ही रह गये। समुद्रके पास ही अन्वेषण करते हुए राजपुत्र जीमूतवाहनको एक वृद्धाके रोनेकी आवाज सुन पड़ी। पता लगानेपर ज्ञात हुआ कि, "आज शंखचूड़ नामक नागको गरुड़के भोजनार्थ वासुकिने वध्यस्थानपर भेजा है जहांसे गरुड़ सदा आकर नागको ले जाते हैं। अपने एक मात्र पुत्र शंखचूड़के लिये उसकी माता विलख रही है।" राजकुमार जीमूतवाहन शंखचूड़के लिये अपनेको गरुड़को समर्पण करनेके लिये उद्यत हो गये परन्तु शंखचूड़ राजी न हुआ। इसी समय शंखचूड़ वासुकि द्वारा प्रदत्त लाल कपड़ोंको पहनकर गोकर्णेश्वर पूजनको गया। इतनेमें ही जीमूतवाहनको एक कंचुकीने लाल कपड़े लाकर दिये और कहा—"ये कपड़े मित्रावसुकी माताने आपको पहननेको भेजे हैं।" अभिवाञ्छित सिद्धिके समान राजकुमारने शीघ्र उन कपड़ोंको पहन लिया और वध्यशिलातलपर जाकर बैठ गये। गरुड़जी आकाशसे आकर राजवाहनको चोंचसे उठाकर मलयपर्वतपर ले गये। राजपुत्रकी इस परोपकारितापर देवताओंने पुष्प वृष्टि और दिशाओंको गुंजानेवाली दुंदुभि बजायी।

पुष्प वृष्टि तथा दुन्दुभि ध्वनि सुनकर गरुड़जीने समझा कि मेरे वेगसे आनेके कारण पारिजात वृक्ष हिल गया होगा। अतः फूल गिरने लगे हैं और मेघमण्डल कम्पित होकर ध्वन्यमान हो रहा है—ऐसा सोचकर परमप्रसन्न हुए।

पंचमांक

राजकुमार जीमूतवाहनको बहुत देरतक समुद्रतटसे न आये जानकर व्याकुल महाराज विश्वावसुने जीमूतकेतुके पास प्रतीहारी भेजा और कहलाया कि "अभीतक राजपुत्र नहीं लौटे क्या आपके समीप चले गये।" जब प्रतीहारी महाराज जीमूत केतुसे महाराज विश्वावसुका सन्देश कह रहा था उसी समय रक्त और मांससे लथपथ जीमूतवाहनका एक चूड़ामणि आकाशसे जीमूतकेतुके सामने गिरा। उक्त चूड़ामणिको देखकर जीमूतकेतु तथा उनकी पत्नी और नवीना वधू मलयवती अति क्लेशित हो गयीं।

तपोवनके आश्रमसे बाहर वे लोग जीमूतवाहनको खोजने निकले तो शंखचूड़ नामक नाग उसके सामने आया और उसने अपना सारा वृत्त महाराज जीमूतकेतुसे कह दिया—"आज जब मैं देव पूजा करके वध्यशिलापर जानेवाला था उसके पहले ही कोई दयालु महात्मा मेरे स्थानपर जाकर बैठ गये और गरुड़ उन्हें ही उठा ले गया है।" इस वृत्तको सुनकर जीमूतकेतुको निश्चय हो गया कि यह चूड़ामणि जीमूतवाहनका ही है। वे लोग इस दुःखद वृत्तान्त को सुनकर अग्निप्रवेश करके प्राणोंको त्यागना चाहने लगे। परन्तु शंखचूड़के अनुरोधसे वे गिरे हुए रक्त बिन्दुओंका अनुसरण करते हुए साथमें यज्ञशाला की अग्नि लिये हुए मलय पर्वतपर पहुंचे। जहां पर्वतकी चोटीपर गरुड़ जीमूतवाहनके शरीरमें चोंच मारते हुए रक्त पान कर रहे थे।

शंखचूड़ने कुछ आगे पहुचकर गरुड़जीसे कहा—"नागराज वासुकिने तो मुझे आपके भोजनार्थ प्रेषित किया था। हे विष्णुवाहन! आप भ्रान्तिसे इन शरीरधारी महात्माको उठा लाये।" गरुड़जी अपनी इस भयंकर भूलपर बहुत पछताये। ततः जीमूतकेतु तथा उनकी पत्नी और मलयवती आदि भी चढ़कर मलयपर्वतके शिखरपर आ पहुचें। गरुड़जी अपनी दुष्कृतिपर दुःखी होकर अग्निकी तलाशमें थे कि अग्नि मिले तो उसमें प्रवेश करके प्राणोंको विसर्जित कर दूं। इतने हीमें अग्नि लेकर आते जीमूतकेतु दिखायी पड़े। गरुड़जीके इस विचारको राजकुमार राजवाहनने अनुचित बताया और कहा—"पापसे दूर होनेका यह उपाय उपयुक्त नहीं है। आपको उचित है कि किये हुये दुष्कृतोंपर पश्चात्ताप करें तथा भविष्यत्में पाप न करनेका प्रण करें।" गरुड़जीने प्रण किया कि "अब जीव हत्या न करूंगा।" तत्पश्चात् राजकुमार घावोंके कष्टको न सहकर प्राण त्यागने लगे। इस बातपर गरुड़जी आकाशमें उड़कर अमृत लेने चले गये। इतने हीमें गौरी भवानीने आविर्भूत होकर राजकुमारको जलाभिषेक द्वारा उज्जीवित कर दिया। ततः स्वर्गसे अमृत वर्षण होने लगा जिससे सभी [illegible]न मृत नाग गण भी जो उठे। फिर गौरीने राजकुमारको राज्याभिषेकद्वारा विद्याधरोंका चक्रवर्ती बना दिया और हाथी, घोड़े, रत्न देकर आशीष दी। इस रीतिसे सभी आनन्दमग्न हो गये।

जय बुद्ध भगवान्‌की।

पात्र-परिचय

(पुरुष)

१—**सूत्रधार**—प्रयोगका प्रवर्त्तक ।
२—**नायक**—जीमूतवाहन ।
३—**विदूषक**—आत्रेय नामक नायकके मित्र ।
४—**तपस्वी**—शाण्डिल्य नामक मुनि (कुलपतिके आश्रमका अधिवासी)
५—**मित्रावसु**—राजकुमारीके भाई ।
६—**विट**—शेखरक ।
७—**चेट**—शेखरकका नौकर ।
८—**काञ्चुकीय**—अन्तःपुरका दास ।
९—**किङ्कर**—वासुकिका नौकर ।
१०—**गरुड़जी**—नागोंके शत्रु ।
११—**शङ्खचूड़**—नाग ।
१२—**जीमूतकेतु**—नायकके पिता ।
१३—**सुनन्द**—मित्रावसुके घरका सेवक ।

(स्त्री)

१—**नटी**—सूत्रधारकी पत्नी ।
२—**मलयवती**—नायिका (विश्वावसुकी पुत्री, राजकुमारी) ।
३—**नवमालिका**—विटकी स्त्री ।
४—**चतुरिका**—चेटी ।
५—**मनोहरिका**—चेटी ।
६—**वृद्धा**—शङ्खचूड़की माता ।
७—**देवी**—नायककी माता ।
८—**गौरी**—भगवती हिमालयपुत्री ।

नागानन्दस्थपद्यानामनुक्रमणी ।

	अ०	श्लो०
आकृष्टबिम्बशोभा	२	८
अग्रेसरीभवतु	५	३८
अज्ञाननिद्राशयितो	५	२६
अनया जघनाभोग-	१	२०
अनिहत्य तं सपत्नं	३	१४
अन्तःपुराणां विहित-	४	१
अन्योदन्यर्शनकृतः	२	१४
अभिलषिताधिकवरदे	५	३५
अमी गीतारम्भैः	३	८
अस्मिन् वध्यशिलातले	४	२७
अस्या विलोक्य मन्ये	४	१२
आत्मीयः पर इत्ययं	५	२१
आदावुत्पीडपृथ्वी	५	६
आमोदानन्दितालिः	४	२८
आर्त्तं कण्ठगतप्राणं	४	११
आलोक्यमानमतिं	५	५
आवर्जितं मया	५	१७
आवेद्य ममात्मीयं	५	१०
आस्तां स्वस्तिकलक्ष्म	५	१८
इत्येष भोगपतिना	४	६
उत्प्रेक्ष्यमाणा त्वां	५	२९
उत्फुल्लकमलकेसर	१	१४
उदूर्जज्जलकुञ्जरेन्द्रं	४	३
उष्णीषः स्फुट एष	१	१८
	५	३३
एकस्तो गुरुश्च अणं	१	१९
एकाकिनापि हि मया	३	१६
एतत्ते भ्रूलतोद्भासि	३	११
एतन्मुखं प्रियायाः	३	१०
कण्ठे हारलतायोरये	२	१२

	अ०	श्लो०
कवलितलवङ्गपल्लवं	४	४
कामेनाकृष्य चापं	१	२
कुणसि घणचन्दण	२	१
कुर्वाणो रुधिरार्द्रं	५	१४
क्रोडीकरोति प्रथमं	४	८
क्वचिदू द्वीपाकारः	५	२७
क्षिप्त्वा बिम्ब	४	२५
क्षौमे भङ्गवती	५	२
खेदाय स्तनभार एव	३	६
गात्राण्यमूनि न	५	३०
गोकर्णमर्णवतटे	५	७
ग्लानिनांधिकपीयमान	५	१५
चञ्चच्चन्दूद्धृतार्घं	४	१८
चन्दनलतागृहमिदं	२	६
चूणामणि चरणयोः	५	१२
जायन्ते च म्रियन्ते	४	१६
जिह्वासहस्रद्वितयस्य	४	५
ज्वालाभङ्गैस्त्रिलोक-	५	२२
णिच्च जो पिवइ	३	१
तमुरियं तरलायतलोचने	१	१७
तापात्तत्क्षणशुष्टं	१	२१
तार्क्ष्येण भक्ष्यमाणानां	५	६
तिष्ठन् भाति पितुः पुरो	१	७
तुलयाः संवर्तकाभ्रैः	४	२२
त्रातोऽयं शङ्खचूडः	५	३८
दक्षिणं स्पन्दते चक्षुः	१	१०
दिग्बाह्वा हरिचन्दनेन	२	९
दिनकरकरामृष्टं	३	१३
द्विजपरिजनबन्धुहिते	१	४
दृष्टा दृष्टिमधोददाति	३	४

	अ०	श्लो०
व्यानव्याजमुपेत्य	१	१
न खलु न खलु	२	११
न तथा सुखयति	४	२३
नागानां रक्षिता भाति	४	२६
नाहिश्राणात् कीर्तिं°	५	८
निजेन जीवितेनापि	५	३४
नित्यं प्राणाभिघातात्	५	२५
निद्रामुद्रावबन्ध°	३	१८
निराधारं धैर्य्यं	५	३१
निष्यन्दत इवानेन	२	७
निष्यन्दश्चन्दनानां	३	७
नीताः किं न निशाः	२	३
न्याय्ये वर्त्मनि योजिताः	१	८
पक्षैः पीत्वाम्बुनाथं	६	३२
प्रतिदिनमहिनाहारेण	४	१९
प्रिया सन्निहितैवेयं	२	९
भक्त्या विदूरविनता	५	१३
भुक्तानि यौवनसुखानि	६	३
मधुरमिव वदन्ति	१	१२
मन्नेतद्म्बापंय	४	१४
महाहिमस्तिष्क°	४	१३
माद्यत्कुञ्जरगण्ड°	१	६
मूढाया मुहुरश्रुसन्ततिजुषः	४	९
मेदोस्थिमांसमज्जा°	६	२४
मेरौ मन्दरकन्दरासु	६	१९
म्रियते म्रियमाणे	४	१७
यद्विद्याधरराजवंश°	२	१०
यैरस्यन्तदयापरैः	४	१०
रागस्यास्पद·	१	६
वच्छत्थलम्हि दइआ	३	२
वासोऽर्थं दययेव	१	११
वासोयुगमिदं	२	२१

	अ०	श्लो०
विधातुं पितृशुश्रूषां	१	९
विद्याधरेण केनापि	५	११
विलुप्तशेषाङ्गतया	५	२३
विश्वामित्रः श्वमांसं	४	१५
वृष्टिं दृष्टशिखण्डि°	५	४०
वृष्ट्या पिष्टातकस्य	२	१३
व्यक्तिर्व्यञ्जनधातुना	१	१९
व्यावृत्त्यैव सितासिते	२	२
शयितेन मातुरंके	४	२४
शय्या शार्दूलमासनं	४	२
शशिमणिशिला सेयं	२	६
शिरामुखैः स्यन्दत एव	६	१६
शिवमस्तु सर्वजगतां	६	४१
श्रीहर्षो निपुणः कविः	१	३
संरक्षता वल्गमद्य	४	२६
संसर्पद्भिः समन्तात्	३	१६
समुत्पत्स्यामहे मातः	४	२०
संप्राप्ताखण्डदेहाः	६	३६
सर्वांशुचिनिधानस्य	४	७
स्त्रीहृदयेन न सोढाः	२	४
स्थानप्राप्त्या दधानं	१	१३
स्फुरसि किमु दक्षिणेतर	६	४
स्मितपुष्पोद्गमोऽयं ते	३	१३
स्रस्तानापादलम्बान्	५	२८
स्वगृहोद्यानगतेऽपि	५	१
स्वर्गस्त्री यदि	१	१६
स्वशरीरमपि परार्थे	३	१७
स्वशरीरेण शरीरं	६	२०
हसासाहतहेम°	६	३७
हरिहरपितामहाणं	३	१
हुङ्कारं ददता मया	३	६

समाप्तेयमनुक्रमणी ।

विषयानुक्रमणी

विषय	पृष्ठ
उपोद्घातः	५१
उपक्रमः	१
नाटकविचारः	२
नागानन्दं नाटकम्	३
कथासार	४
वस्तुपरीक्षणम्	५
बृहत्कथामञ्जर्यां जीमूत-वाहनकथा	६
मञ्जरीस्थवृत्तस्य वैशिष्ट्यम्	१८
कथासरित्सागरे जीमूत-वाहनकथा	१६
वस्तुतारतम्यपरीक्षणम्	३३
नायकविचारः	३४
जीमूतवाहनस्य धीरोदात्तत्वम्	३५
रसविचारः	३७
रसविरोधपरिहारः	३८
ग्रन्थकर्तुर्निर्णयः	३६
महाराजश्रीहर्षः	४१
कालनिर्णयः	४३
सभापण्डिताः	,,
श्रीहर्षस्य ग्रन्थकर्तृत्वम्	४४
श्रीहर्षकृता ग्रन्थाः	४६
नागानन्दस्य समीक्षा	४७
नागानन्दे सुभाषितानि	४६
नागानन्दस्य वैशिष्ट्यम्	,,
आदर्शपुस्तकपरिचयः	५०
भावार्थदीपिका	५१
उपसंहारः	,,
संक्षिप्त हिन्दी कथासार	५२
पात्रपरिचय	५७
नागानन्दस्थपद्यानुक्रमणी	५८
प्रथमोऽङ्कः	१
द्वितीयोऽङ्कः	५५
तृतीयोऽङ्कः	६८
चतुर्थोऽङ्कः	१३६
पञ्चमोऽङ्कः	१७८

प्राप्तिस्थानम्

चौखम्बा-संस्कृत-पुस्तकालय,

बनारस सिटी



नागानन्द-नाटकम्

'भावार्थदीपिका'-संस्कृत-हिन्दीव्याख्याद्वयोपेतम्

अथ प्रथमोऽङ्कः ।

नान्दी- सुन्दरीम्

ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरातुरं जनमिमं त्रातोऽपि नो रक्षसि ।

भावार्थदीपिका ।

मञ्जुलवञ्जुलकुञ्जे गुञ्जन्मिलदलिकेलिवल्लिसुमपुञ्जे ।
मरकतनिकरमनोज्ञं सकलमनोज्ञं कमप्यहं वन्दे ॥ १ ॥
दिनकरतनयातीरे प्रतिफलितात्मरूप इव नीरे ।
जयति हरन् भवतापं कोऽपि तमालश्रिदेकदृढमूलः ॥ २ ॥
वर्षति सुधां दयार्द्रा या सर्वदा समं स्वैरम् ।
सा कालिन्दीपुलिने काचित् कादम्बिनी जयत्यद्य ॥ ३ ॥
हर्षदेवप्रणीतस्य नागानन्दस्य बोधिनी
भावार्थदीपिका व्याख्या द्योततां विदुषां मुदे ॥ ४ ॥

अथ कविकुलकलमतकर्महाराजः श्रीहर्षदेवः 'त्रिवर्गसाधनं नाट्य' मित्यादि स्मृतिवाक्यमनुस्मरन्, नागानन्दनामानं नाटकं चिकीर्षुः, तत्र पूर्वरङ्गस्य प्रधानाङ्गभूतामष्टपदां नान्दीं प्रस्तौति ध्यानव्याजमित्यादिना—ध्यानव्याजं ध्येयवस्तु·

नान्दी :—

ध्यान का बहाना करके किस सुन्दरी का चिन्तन कर रहे हो ? क्षण भरके लिये आँख खोल कर कामदेव के बाण से व्याकुल हम लोगों पर दृष्टिपात करो। रक्षक होकर के भी

तमेवे तत्रिक निर्दय मन्य

मिथ्याकारुणिकोऽसि निर्घृणतरस्त्वत्तः कुतोऽन्यः(१) पुमान्
सेर्ष्यं मारवधूभिरित्यभिहितो बोधौ(२) जिनः पातु वः ॥ १ ॥

विषयकं चिन्तनं ध्यानं तदेव व्याजः छलं, तमुपेत्य प्राप्य का अलौकिकसौन्दर्यसम्पन्नां सुन्दरीं चिन्तयसि ? । ध्यानच्छलेन मुद्रितनयनः कां सुभगां मनसा चिन्तयन् परमानन्दसन्दोहमनुभवसीति भावः । चक्षुः नेत्रं उन्मील्य उन्मिष्य । भवतामेकस्यापि नेत्रकोणस्य विषयत्वे कृतार्थता भवेत्, किं पुनर्द्वयोरिति भावः । अनङ्गशरातुरं नास्ति अङ्गं यस्यासौ अनङ्गः कामः ("कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः" इत्यमरः) तस्य शरैः बाणैः आतुरं विह्वलीकृतचेतसम् । इमं पुरतो दृश्यमानम् । जनं, बह्वर्थवाचकोऽयं जनशब्दः, मारवधूभिरित्युक्तत्वात् । न केवलमेकां द्वे वा, अपि तु बह्वीः विधिवशात् त्वामेवाधिकृत्य प्रवृत्तमनोरथाः । क्षणं मुहूर्तमात्रमेव । पश्य अवलोकय । आतापि निखिले जगति रक्षकत्वेन प्रख्यातोऽपि त्वं कथमस्मान् नो नैव रक्षसि ? अतः मिथ्याकारुणिकः मिथ्या मृषैव करुणा शीलमस्येति कारुणिकः (करुणा + ठक्) । त्वं मिथ्यादयालुरसि । ("स्याद् दयालुः कारुणिकः" इत्यमरः) मिथ्याकारुणिक इत्यत्र सुप्सुपा समासः । दीनजनानां रक्षणरूपकार्यासत्त्वे तत्करणभूतं दयालुत्वं खपुष्पवत् अलीकमित्यर्थः । त्वत्तः भवत्तः (पञ्चम्यर्थे तसिलप्रत्ययः) । निर्घृणतरः नास्ति घृणा दया यस्यासौ निर्घृणः निर्दयः । ["कारुण्यं करुणा घृणा । कृपा दयानुकम्पा स्यादित्यमरः] अतिशयेन निर्घृणः निर्घृणतरः (अतिशायने तरप् प्रत्ययः) निष्करुणतरः अन्यः पुमान् मनुष्यः कुतः ? त्वादृशो निर्दयो जगति न कोऽपि वर्तत इत्यर्थः । इति इत्थं प्रकारेण । मारवधूभिः—मारयति प्राणिनः इति मारः कामः । तस्य वधूभिः तत्सहकारिणीभिः अप्सरोभिः । सेर्ष्यं ईर्ष्यया सहितं सेर्ष्यं समत्सरं (क्रियाविशेषणमिदम्) अभिहितः कथितः । बोधौ समाधौ स्थितः । बोधिरिति जिनप्रक्रियया समाधिकथनम् । "विशुद्धबुद्धिसन्तानो बोधिरित्यभिधीयते" इति विमलश्रिया शिवरामः । समाधिलग्न इति यावत् । जिनः जानातीति जिनः सर्वज्ञः बुद्धः इत्यर्थः ।

हमारी रक्षा नहीं कर रहे हो । तुम झूठे ही दयालु हो । तुमसे बढ़ कर निर्दय-हृदय मनुष्य और कहाँ मिलेगा-इस प्रकार मार की स्त्रियों (अप्सराओं) के द्वारा ईर्ष्या के साथ कहे गये

---

(१) स कोऽन्यः—ग, घ । (२) बुद्धो—ग, घ ।

अपि च,—

कामेनाकृष्य चापं हृतपटुपटहाबलिगभिर्मारवीरै-

('सर्वज्ञः सुगतो बुद्धः धर्मराजस्तथागतः ।
समन्तभद्रो भगवान् मारजिल्लोकजिज्जिनः' इत्यमरः ।)

वः युष्मान् सामाजिकान् पातु रक्षतु । कामस्य सहकारिणीनां दिव्याङ्गनानां मोहकैरपि वाग्विलासैरचलितचित्तः समाधिलग्नो भगवान् बुद्धदेवः अखिलान् सामाजिकान् परिपालयतु इति सरलार्थः । पुरा किल देवराजो ध्याननिमग्नस्य बुद्धदेवस्य समाधिभङ्गाय सानुचरं कामं प्रेषितवान् परन्तु विहिताखिलप्रयत्नेनापि मारेण स्वल्पोऽपि मुनेश्चित्तक्षोभो नैवोत्पादितोऽभूदिति ललितविस्तरादिबुद्धग्रन्थस्था कथात्रानुसन्धेया । शार्दूलविक्रीडितं वृत्तम् ; तल्लक्षणं यथा वृत्तरत्नाकरेः- "सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्" ॥ १ ॥

एवं नान्दीपद्यं पठित्वा उत्तरकालभवं चित्तैकाग्र्यरूपं विशेषमवलम्ब्य तमेव बुद्धदेवं प्रशंसितुं कविर्द्वारमुद्घाटयति **कामेनाकृष्येति**—कामेन चापमाकृष्य शर-

---

समाधि में लीन बुद्ध भगवान् आपकी रक्षा करें(१) ॥ १ ॥

और भीः—

जिन बुद्ध भगवान् को कामदेव अपना बाण खींच कर देख रहा है, उसके वीर योद्धा

((१) नागानन्द की नान्दी भगवान् बुद्धदेव की स्तुति में है। पहले और दूसरे दोनों पद्यों मे मारविजय की ओर निर्देश किया गया है। जब शाक्यमुनि तत्त्वज्ञान प्राप्त करने के विचार से गया में बोधिवृक्ष के नीचे आसन जमाकर समाधि करने लगे तब मार (काम) अपनी सेना के साथ उन्हे प्रलोभन दिखाकर समाधि भ्रष्ट करने आया परन्तु दृढ़प्रतिज्ञ गौतम अपने आसन से तनिक भी नहीं डिगे—मार के समग्र प्रलोभनों का कोई भी फल नहीं हुआ। अन्तमें मार ने पराजय स्वीकार की और शाक्यमुनि को समाधि सफल हुई—उन्हें 'बोधि' प्राप्त हुई। उसी दिनसे वे 'बुद्ध' के नाम से प्रसिद्ध हुये। 'मार विजय' भगवान् बुद्ध के चरित्र की सब से अधिक महत्त्वपूर्ण घटना समझी जाती है। ललितविस्तर तथा अश्वघोषप्रणीत बुद्धचरित (१३ वां सर्ग) में यह घटना बड़े विस्तार से वर्णित है। मार के विषयमें अश्वघोषने कहा है—

यं कामदेवं प्रवदन्ति लोके चित्रायुधं पुष्पशरं तथैव ।
कामप्रचाराधिपतिं तमेव मोक्षद्विषं मारमुदाहरन्ति (१३ सर्ग, २ पद्य ।)

पहिले पद्य में काम के द्वारा भेजी गई अप्सराओं की लीला का उल्लेख है। ये शाक्यमुनि के चित्तको वशमें करने के लिये नाना प्रकार की बातें बना रही हैं। परन्तु बुद्ध भगवान् समाधि से तनिक भी विचलित नहीं होते।)

भ्रूभङ्गोत्कम्पजृम्भास्मितचलितदृशा(१) दिव्यनारीजनेन ।
सिद्धैः प्रह्वोत्तमाङ्गैः पुलकितवपुषा विस्मयाद् वासवेन

सन्धानं कृत्वा । अत्र स्थितेनेति पदमध्याहार्यम् । शरं प्रयोक्तुमनसापि तद्वैफल्यं निश्चित्य तदवस्थेन मारेणावलोकितः इत्यर्थः । अहो न मे क्वापि एतादृशं वैफल्यं जातमिति हेतोः समाधिभङ्गायायातो मारोऽपि बुद्धं विस्मयेनावलोकयति स्मेति भावः (मारवीरैः मारस्य वीरैः सहायकैः सैन्यैः हतपटुपटहावलिभिः हताः उच्चैर्वादिताः, पटवः, पटुध्वनयः, पटहाः वाद्यविशेषाः यैस्तस्थाभूताः अन्यच्च आवलन्ति बुद्धस्य पुरतः प्लुतगत्या ये उद्धतं सञ्चरन्ति ते आवलिनः तैः तथोक्तैः दृष्टः । 'शरसन्धानं कृत्वाऽस्मत्स्वामी सद्यो जेष्यतीति मारवीराः गर्वभरया गत्या सञ्चरन्ति, परन्तु स्वामिनो वैफल्यमाकलय्य तेषामपि विस्मयः' इति भावः । तथा दिव्यनारीजनेन मनोहारिणीभिः अप्सरोभिः । भ्रूभङ्गोत्कम्पजृम्भास्मितचलितदृशा । भ्रूभङ्गः भ्रूविलासः । उत्कम्पः अधृष्यस्य मुनेर्दर्शनजेन भयेन कम्पनम् । जृम्भा मुखविजृम्भणम् । स्मितं ईषत् हसनम् । तैः कामजविकारैश्चलितौ चञ्चलतां प्राप्तौ दृशौ नयने यस्य तादृशेन सता ['ललितवतेति' पाठे तु ललितं मृदुपदविन्यासादिका शृङ्गारचेष्टा । 'सुकुमारोऽङ्गविन्यासो मसृणो ललितं विदुः' इति धनञ्जयः । तद्वता विविधाः शृङ्गाररसादिबोधिकाः चेष्टाः विदधता सता इत्यर्थः] 'अवलोकितः' इत्यत्रापि शेषः । सिद्धैः देवयोनिविशेषैः । प्रह्वोत्तमाङ्गैः प्रह्वं नम्रीभूतं उत्तमाङ्गं शिरः येषां तथाभूतैः । बुद्धदेवं प्रति गौरवात् भक्तिनम्रशिरोभिः सद्भिरवलोकित इति भावः । पुनः वासवेन मारस्य प्रेरकेण इन्द्रेण ('वासवो वृत्रहा वृषा' इत्यमरः) विस्मयात् अतिशयाश्चर्यात् हेतोः (हेत्वर्थे पञ्चमी) । पुलकितवपुषा पुलकाः रोमाञ्चाः ('पुलकः कृमिभेदे प्रस्तरभेदे च मणिदोषे । रोमाञ्चे हरितालेऽपि' इति मेदिनी) सञ्जाताः अस्येति पुलकितं ('तदस्य सञ्जातं तारकादिभ्य इतच्' इति सूत्रेण इतच् प्रत्ययः) उद्भूतरोमाञ्चं वपुः शरीरं यस्य तादृशेन सता दृष्टः । पिनाकपाणेः समाधिभङ्गं कृतवतोऽपि कामस्य प्रयासवैफल्यमवलोक्य आ-

गण जोर से बाजा बजाते हुये जिनके सामने कूद फाँद मचा रहे है, अप्सरा गण भ्रूविलास, कम्प, जम्हाई और मुसकुराहट से चञ्चल हुये अपने नेत्रों से जिन्हे देख रही हैं, अपने मस्तक को नवा कर सिद्धगण जिसका दर्शन कर रहे हैं, और विस्मय के कारण पुलकित शरीर होकर

(१) ललितव्रता—ख ।

ध्यायन् बोधेरवाप्तौ (१)चलित इति वः पातु दृष्टो मुनीन्द्रः ॥२॥

नान्द्यन्ते—

सूत्रधारः । अलमतिविस्तरेण । अद्याहमिन्द्रोत्सवे सबहुमानमाहूय

अर्थात् पुलकितगात्रो देवराजोऽपि यं भगवन्तं बुद्धदेवमवलोकितवानिति भावः ।) अन्यच्च ध्यायन् समाधिलग्नः । बोधेः तत्त्वज्ञानस्य । अवाप्तौ प्राप्तौ । अत्र निमित्तार्थे सप्तमी 'चर्म्मणि द्वीपिनं हन्तीतिवत्' । अचलितः अस्खलितचित्तः सन् । मुनीन्द्रः वः युष्मान् पातु रक्षतु । 'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः' इति भावः । खरवरावृत्तम् । तल्लक्षणं यथा-"भ्रमनैर्यानां त्रयेण त्रिमुनियतियुता खरवरा कीर्तितेयम्" ॥ २ ॥

नान्द्यन्ते—नान्द्याः समाप्तौ । नान्दीलक्षणं यथा—

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥
नान्दीं पदैर्द्वादशभिरष्टभिर्वाप्यलङ्कृताम् ।
सूत्राधारः पठेत् तत्र मध्यमस्वरमाश्रितः ॥

नागानन्दीया नान्दी बुद्धदेवस्य स्तुतिप्रयोजिकेति स्फुटमेव पद्याभ्यामवगम्यते । अष्टपदा द्वादशपदा वा नान्दी प्रयोज्येति द्वितीयश्लोकात् भारतमुनेरभिमतं मतं स्फुटीभवति । तत्र

इन्द्र जिन्हे देख रहा है, तत्त्वज्ञान के प्राप्त करने के लिये दत्त चित्त होकर ध्यान में संलग्न मुनियों में श्रेष्ठ वे ही बुद्ध भगवान् आपकी रक्षा करें(२) ॥ २ ॥

(नान्दी के अनन्तर)

(सूत्रधारः—बस, बस ! अत्यन्त विस्तार मत करो । आज इस इन्द्रध्वज के उत्सव के

(१) बोधेरवाप्तौ न—ग, घ ।

(२) इस दूसरे पद्य में गौतम की एकाग्रचित्तता को देखकर भिन्न भिन्न व्यक्तियों की विभिन्न मनोवृत्तियों का परिचय दिया गया है । काम बाण खींचकर चकित होकर देख रहा है; वीरगण गर्व से फाँद रहे हैं, अप्सरायें भिन्न २ भाव से देख रहीं हैं; सिद्धगण प्रणाम कर रहे हैं और इन्द्र भगवान् विस्मय से रोमाञ्चित हो रहे हैं । भगवान् बुद्धदेव की स्तुति करने से नाटककार की बौद्ध धर्म के प्रति श्रद्धा प्रकट हो रही है । नान्दी 'भावार्थसूचक'-भविष्यघटना को सूचित करने वाली-हुआ करती है । इन दोनों पद्यों से इस नाटक के नायक जीमूतवाहन की परोपकारशीलता तथा दृढचित्तता की सूचना मिल रही है ।

नानादिग्देशागतेन राज्ञः(१) श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमू-

श्लोकपादं पदं केचित् सुप्तिङन्तमथापरे ।
परेऽवान्तरवाक्यं च पदमाहुर्विशारदाः ॥

इति प्राचीनप्रमाणानुसारेण श्लोकपादस्यापि पदशब्देन व्यवहारात् श्लोकद्वयात्मिकैषा नान्दी अष्टपदैव मन्तव्येति ।

सूत्रधारः—

नाट्यस्य यदनुष्ठानं तत् सूत्रं स्यात् सबीजकम् ।
रङ्गदैवतपूजाकृत् सूत्रधार उदीरितः ॥
नर्तकीयकथासूत्रं प्रथमं येन सूच्यते ।
रङ्गभूमि समाक्रम्य सूत्रधारः स उच्यते ॥

इत्याद्युक्तलक्षणात् नाटकीयवस्तुनः प्रधानप्रस्थापको नटविशेषः ।

अभिति । **इन्द्रोत्सवे**—इन्द्रस्य देवराजस्य उत्सवविशेषे । 'प्रतिवत्सरं वर्षादिसिद्ध्यर्थं वेणुमयमिन्द्रध्वजमुत्थाप्य क्रियमाणे उत्सवे' इति शिवरामः । एष एवोत्सवः 'पुरुहूतध्वजस्येव तस्योन्नयनपङ्क्तयः' इत्यत्र रघुवंशे कालिदासेनापि वर्णितपूर्व एव । इन्द्रध्वजोत्थापनविधिस्तु अचिरमेव प्रकाशनमुपनीते महाराजभोजदेवप्रणीते 'समराङ्गणसूत्रधार' नाम्नि शिल्पशास्त्रविषयके निबन्धे स्फुटतरं प्रपञ्चितो दृश्यते । तद्विशेषान् ज्ञातुकामैः स एव निबन्धो विशदमालोचनीयः ।

पादपद्मोपजाविना—पादपद्मं राज्ञः चरणकमलं उपजीव्यति तदनुसृत्य निरापदं स्वं स्वं राज्यं भुङ्क्ते यस्तेन । नृपस्यानुचरभूतेनेत्यर्थः ।

अवसर पर भिन्न भिन्न देश से आने वाले, महाराज श्री हर्षदेव(२) के चरण कमल की छाया में निरापद राज्य करने वाले, राजाओं ने बड़े आदर के साथ मुझे बुला कर कहा है कि हमारे

---

(१) राज—ग, घ ।

(२) महाराज **श्रीहर्षदेव** (या हर्षवर्धन) उत्तरीयभारत के सम्राट् थे । इनकी राजधानी स्थाण्वीश्वर (थानेश्वर) थी । इन्होंने ६०६ ई० से लेकर ६४८ ई० तक राज्य किया । विशेष वर्णन के लिये संस्कृत भूमिका देखिये ।

हेनोक्तः-"यत्तदस्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनाऽलङ्कृतं विद्याधरजातक(१) प्रतिबद्धं नागानन्दं नाम नाटकं कृतमित्यस्माभिः श्रोत्रपरम्परया श्रुतं, न च प्रयोगतो दृष्टम्। तत्तस्यैव राज्ञः सकलजनहृदयाह्लादिना(२) बहुमानात् अस्मासु चानुग्रहबुद्धया यथावत्प्रयोगेण अद्य त्वया नाटयितव्यम्" इति। तत् यावत् इदानीं नेपथ्यरचनां कृत्वा यथाऽभिलषितं सम्पादयामि। [परिक्रम्यावलोक्य च। भावजितानि

अपूर्ववस्तुरचनालङ्कृतम्—अपूर्वस्य निरतिशयनूतनस्य वस्तुनः नाटकीयकथायाः या रचना निर्माणं तया अलङ्कृतं विभूषितं।

विद्याधरजातकप्रतिबद्धम्। जातक नाम भगवतो बुद्धस्य प्राक्तनजन्मस्वाचरितानां आदर्शकायकलापानां प्रतिपादनपरः कश्चित् बुद्धधर्मीयो ग्रन्थविशेषः। विद्याधरजातकेन जीमूतवाहनस्य कथाप्रतिपादकेन प्रबन्धविशेषेण प्रतिबद्धं सम्बद्धं।

नागानन्दं—न्यायानुसारेण नामकीर्तनं कविनात्र कृतम्। नागानां गरुडेन सातिशयं त्रासितानां सर्पाणां आनन्दः जीमूतवाहनस्य जीवितप्रदानेन परितुष्टात् पक्षिराजात् अभयवरं प्राप्य समुपजातः आह्लादः वर्ण्यतेऽस्मिन्निति नागानन्दं नाम प्रस्तुतं नाटकम्। [एतदभिधानेन च गर्भितार्थस्य प्रकाशनात् युक्तमेवेदं नाम। 'नाम कार्यं नाटकस्य गर्भितार्थप्रकाशनम्' इति विश्वनाथोक्तेः]

श्रोत्रपरम्परया—कर्णपरम्परया श्रुतं अवगतम्।

नेपथ्यरचना—नेपथ्यस्य वेशस्य (आकल्पवेशौ नेपथ्यं परिकर्म प्रसाधनमित्यमरः) रचना निर्माणं तावत् विधाय यथावत् कृत्वा।

यथाभिलषितं—मनसेप्सितं प्रयोगरूपं कार्यं **सम्पादयामि** करोमि।

स्वामी श्री हर्षदेव ने अपूर्व वस्तु की रचना से अलंकृत, (३) विद्याधरजातक से सम्बद्ध, नागानन्द नामक नाटक बनाया है। यह बात हमने कानों कान सुन रक्खी है; परन्तु अभी तक हमने इसका अभिनय नहीं देखा। इसलिये समस्त प्रजाजन के हृदय को प्रसन्न करने वाले महाराज के प्रति अत्यन्त आदर से और हमारे ऊपर दया बुद्धि से ठीक ठीक प्रयोग करके आज तुम उसका अभिनय हमें दिखलावो। इसलिये इस समय मैं वस्त्र भूषा की रचना कर अपने

---

(१) चक्रवर्ति—ग, घ। (२) सामाजिकजनमनांसि—ख।

(३) **जातक कथा**—भगवान् बुद्धदेवके पूर्वजन्म की कथाओं को कहते हैं। ये कथाएँ संख्यामें पाँच सौ से भी अधिक है। नागानन्द की कथा भी इसीमें से एक है। परन्तु 'विद्याधर जातक' नामका अभी तक कोई जातक उपलब्ध नहीं हुआ।

च सकलसामाजिकमनांसि(१) इति मे निश्चयः। यतः,—

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च बोधिसत्त्व(२) चरितं नाट्ये च दक्षा वयम्।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-

सकलसमाजिकमनांसि-सकलानां सर्वेषां समाजिकानां रङ्गभूमिसमवेतानां सभासदानां मनांसि हृदयं आवर्जितानि अनुकूलीकृतानि आकृष्टानीति यावत्। इति मे मम सूत्राधारस्य निश्चयः।

प्रस्तुताभिनयेषु गुणवर्णनेन श्रोतृणां प्रवृत्तेरुन्मुखीकरणाय नाट्याङ्गभूतां प्ररोचनामवतारयति **'श्रीहर्ष'** इत्यादिना:—नाटकस्यास्य रचयिता श्रीहर्षः निपुणः रचनासु चतुरः कविर्वर्तते। एषा अस्मन्नयनगोचरीभूता परिषदपि सभासि गुण-ग्राहिणी (गुणान् गृह्णातीति णिनिः) गुणपक्षपातिनी। 'वर्तते' इति शेषः। अन्यच्च बोधिसत्त्वचरितं बोधिसत्त्वः=सुचरितस्य माहात्म्येन भविष्यज्जन्मनि यो बोधिमाप्तुमर्हति, बौद्धशास्त्रेषु स पुरुषः बोधिसत्त्व' इतिनाम्ना व्यपदिश्यते। 'बुद्धस्तु श्रीघनः शास्ता बोधिसत्त्वो विनायकः' इत्युक्तत्वात्। अतस्त्व जीमूतवा-हनस्य पूर्वतरं प्रसिद्धं नामान्तरं बोधिसत्त्व इति। तच्च कारणात्मनि बुद्धे' इति साधु प्रतिपादयति विमर्शिणी। अत्र बोधिसत्त्वाभिधानेन जीमूतवाहनस्य व्यप-देशः कविना कृतः इत्यवगन्तव्यम्। तस्य चरितं। लोके संसारे। हारि मनोहरं वर्तते। वयं नटाश्च नाट्ये अभिनयकर्मणि दक्षाः अतीव कुशलाः स्म। इह प्रस्तु-तेऽभिनये एकैकमपि उपरि वर्णितेषु अन्यसाहाय्यनिरपेक्षं एकमपि वस्तु पदार्थः।

अभिलषित वस्तु का सम्पादन करने जा रहा हूं। (चारों तरफ घूम कर और देखकर) यह मेरा निश्चय है कि समस्त सभासदों का मन इस समय मेरे अनुकूल है। क्योंकि—

श्री हर्ष निपुण कवि हैं। यह परिषद भी गुण को ग्रहण करने वाली है। बोधिसत्व(३) का चरित्र इस संसार में मनोहर है और हम लोग नाटक कला में चतुर हैं-इनमें की एक भी वस्तु से वाञ्छितफल की प्राप्ति हो सकती है, परन्तु मेरे अच्छे भाग्य से इन सम्पूर्ण गुणों का समुदाय इस समय उपस्थित दीखता है। इससे तो मेरा निश्चय है कि दर्शक गण का चित्त में

---

(१) खपुस्तके नास्ति। (२) वत्सराज-ख, सिद्धराज—ग।

(३) 'बोधिसत्व' का शाब्दिक अर्थ है ज्ञाननिष्ठ अथवा ज्ञानसम्पन्न। बौद्ध ग्रन्थों में यह शब्द उन ज्ञाननिष्ठ करुणाशील महात्माओं के लिये प्रयुक्त किया जाता है जो अगले जन्ममें बुद्धत्व को प्राप्त करने वाले होते हैं।

मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥ ३ ॥

तद् यावत् अहं गृहं गत्वा गृहिणीमाहूय सङ्गीतकमनुतिष्ठामि ।

[परिक्रम्य नेपथ्याभिमुखमवलोक्य । इदमस्मद्गृहं, यावत् प्रविशामि ।

[प्रविश्य] आर्ये ! इतस्तावत् ।

(१)द्विजपरिजनबन्धुहिते मद्भवनतटाकहंसि मृदुशीले ।

चाञ्छितफलप्राप्तेः वाञ्छितं मनसेष्टं च यत् फलं सामाजिकानां मनःसमावर्जनं तस्य प्राप्तेः पदं स्थानं कारणमिति यावत् । मद्भाग्योपचयात् मम भाग्यस्य उपचयात् वृद्धया सौभाग्येनेत्यर्थः । मम सुकृतप्रकर्षात् समुदितः एकत्रीभूतः अयं गुणानां निपुणत्वमनोहरत्वादीनां गणः समुदायः किमु ? एषु एकस्मिन् वस्तुन्यपि रङ्गप्रीतिः, निखिलेऽस्मिन् गुणे समवेते रङ्गप्रीतिरिति किमु वक्तव्यम् । 'उन्मुखीकरणं तत्र प्रशंसातः प्ररोचना' इति धनञ्जयेन सम्यग्लक्षिता प्रस्तुतार्थवर्णनेन श्रोतॄणां प्रवृत्त्युन्मुखीकरणात् प्ररोचना नामैतद् भारतीवृत्त्या अङ्गम् । शार्दूलविक्रीडितं नाम वृत्तं तल्लक्षणन्तु प्रागेव प्रदर्शितम् ॥ ३ ॥

तद्यावदिति—संगीतकं नाम 'नृत्तवाद्यगीतानि संगीतकमिहोच्यते' इति समुदितानां गीतनृत्यवाद्यानामेषा संज्ञा । समाजिकमनोरञ्जनाय गीतादिकमारचयामीत्यर्थः ।

नेपथ्यं नाम नटादीनां वेषभूषापरिधानस्थानम् ।

सूत्रधारः स्वप्रियायाः गुणगौरवं वर्णयन् तामाह्वयति द्विजपरिजनेत्यादिना—हे द्विजपरिजनबन्धुहिते ! द्विजेभ्यः—दानादिना ब्राह्मणेभ्यः, परिजनेभ्यः भृत्यादिना सेवकेभ्यः, बन्धुभ्यश्च अनुकूलव्यवहारेण मित्रेभ्यश्च हिते हितकारिणि ! । मद्भवनतटाकहंसि मद्भवनमेव मदीयं गृहमेव तटाकः ह्रदः तस्य हंसीरूपे ! शोभाहेतु-

---

अपनी तरफ आकृष्ट कर सकूंगा ॥ ३ ॥

इस कारण से मैं घर आकर अपनी स्त्री को बुलाकर गीत गाने जा रहा हूं । (चारों तरफ घूम कर, नेपथ्य की ओर देखकर) यह हमारा घर है । मैं प्रवेश करता हूं । (प्रवेश करके) आर्ये । जरा इधर आवो ।

ब्राह्मण, भृत्य और मित्र जनों के लिये हित करने वाली, मेरे घर रूपी तालाब की

---

(१) पद्यमिदं पुस्तके नास्ति ।

परपुरुषचन्द्रकमलिन्यार्ये कार्यादितस्तावत् ॥ ४ ॥

नटी। [प्रविश्य सास्रम्] अज्ज ! इअम्हि मन्दभग्गा। माणवेदु अज्जउत्तो को णिओओ अणुचिट्ठीअदुत्ति(१)। (आर्य्य ! इयमस्मि मन्दभाग्या। आज्ञापयतु आर्य्यपुत्रः को नियोगोऽनुष्ठीयतामिति।) किस आज्ञा की प्रतीक्षा करती हो ॥

सूत्र। [नटीमवलोक्य] आर्य्ये ! नागानन्दे नाटयितव्ये किमिदमकारणमेव रुद्यते ?

नटी। अज्ज ! कधं ण रोइस्सं ? यदो दाव तादो अज्जाए सह थविरभावं जाणिअ अदूरजादणिव्वेदो कुडुम्बभारुव्वहणजोग्गो दाणीं तुमं

त्वादिति भावः। मृदुशीले ! मधुरव्यवहारशालिनि ! परपुरुषचन्द्रकमलिनि परपुरुषः एव अन्यो जन एव चन्द्रः तस्मै कमलिनी ! यथा चन्द्रोदये कमलिनी संकोचमेवाधत्ते न विकाशम्; एवमेव त्वमपि परपुरुषात् स्वत एव पातिव्रत्येन विमुखी भवसीति भावः। अतः हे आर्ये सदाशयसम्पन्ने ! कार्यात् अवश्यकरणीयेन केनचित् प्रयोजनेन। इतः तावत् आगच्छेति शेषः। आर्या तल्लक्षणं च श्रुतबोधे यथा—

यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि।
अष्टादश द्वितीये चतुर्थे पञ्चदश सार्या ॥ ४ ॥

हंसिनी की तरह शोभा बढ़ाने वाली, सुन्दर शरीर वाली, चन्द्रमा से कमलिनी की तरह दूसरे पुरुष से विद्वेष(२) करने वाली, ऐ आर्य्ये ! तुमसे कुछ कार्य है, जरा यहाँ आवो ॥ ४ ॥

नटी:—(प्रवेश करके आंसू बहाते हुये) हे आर्य ! लो मन्दभागिनी मैं यहां आ गई। आप आज्ञा दें, मैं किस आज्ञा का पालन करूँ।

सूत्र—(नटी को देखकर) आर्य्ये ! नागानन्द नाटक खेलते समय तुम बिना कारण ही क्यों रो रही हो ?

नटी:—आर्य्य ! मैं क्यों न रोऊँ, क्योंकि मेरे ससुर सास के साथ अपनी वृद्धावस्था को जान कर शीघ्र ही वैराग्य उत्पन्न हो जाने से तुम्हें कुटुम्ब के भार को ढोने में समर्थ हृदय में

---

(१) खपुस्तके नास्ति।

(२) कमलिनी का प्रेम सूर्य के साथ है। शीतल चन्द्रमा भी उसे नहीं भाता, वह उससे सदा द्वेषही करती है। उसी तरह पतिव्रता नटी गुणसम्पन्न भी अन्यपुरुष से विद्वेष करती है।

त्ति हिअए विलक्खिअ तवोवणं गदो। (आर्य्ये ! कथं न रोदिष्यामीति ? यतस्तावत् तातः आर्य्यया सह स्थविरभावं ज्ञात्वा अदूरजातनिर्वेदः, कुटुम्बभारोद्वहनयोग्य इदानीं त्वमिति हृदये विचार्य तपोवनं गतः ।)

सूत्रधारः । [सनिर्वेदम्] अये ! कथं मां परित्यज्य तपोवनं यातौ पितरौ, तत् किमिदानीं युज्यते ? [विचिन्त्य] अथवा कथमहं गुरुचरणपरिचर्या-सुखं परित्यज्य गृहे तिष्ठामि ? कुतः ?—

विधातुं पितृशुश्रूषां त्यक्त्वैश्वर्यं क्रमागतम् ।

अज्जेति—तातः श्वसुरः । आर्या श्वश्रूः । तया सह सहितः ।

स्थविरभावं स्थविरस्य वृद्धस्य भावः वृद्धत्वमिति यावत् । ("प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि" इत्यमरः) तं ज्ञात्वा । अदूरजातनिर्वेदः अदूरं सम्प्रति यथा स्यात् तथा जातः उत्पन्नः निर्वेदः विषयवैराग्यं यस्य तथोक्तः सन् । इदानीमधुना त्वं कुटुम्बभारोद्वहनयोग्यः कुटुम्बस्य भारोद्वहने सम्यक् परिपालने योग्यः समर्थः इति हृदये आलोच्य मनसा विचिन्त्य तपोवनं गतः । 'पुत्रसङ्क्रान्तलक्ष्मीकस्तया वानुमतो व्रजेत्' इति स्मृतिवचनानुरोधेन तातः त्वयि कुटुम्बस्य पोषणभारं निक्षिप्य आर्ययानुयातः सन् तपोवनं गतः इत्यर्थः ।

अये इति—कथं अहं गुरुचरणपरिचर्यासुखं गुर्वोः मातापित्रोः चरणपरिचर्यायाः चरणसेवायां यत् सुखं निरतिशयानन्दः तत् परित्यज्य विहाय गृहे तिष्ठामि ? मम गृहे स्थितिर्नैवोपयुक्तेति भावः ।

नायकस्य प्रवेशसूचनाय स्वाभिलषितं वस्तु प्रकारान्तरेण प्रकटयति **विधातुमिति**—पित्रोः । माता च पिता चेति पितरौ (एकशेषद्वन्द्वे पितृशब्दस्य शेषः) । तयोः शुश्रूषां सेवां विधातुं कर्तुं । क्रमागतं परम्परया प्राप्तं ऐश्वर्यं ईश्वरस्य धनिकस्य भावः—ऐश्वर्यं (भावार्थे ष्यञ्प्रत्ययः) विपुला सम्पत्तिः । तत् त्यक्त्वा यथा

विचार कर तपोवन चले गये हैं ।

सूत्रधारः—(वैराग्य के साथ) ओ, क्या पिता माता मुझे छोड़ कर तपस्या करने के लिये जंगल में चले गये ? इस समय मुझे क्या करना चाहिये । अथवा गुरुजन के चरण की सेवा करने के सुख को छोड़ कर मैं घर पर कैसे रह सकता हूं । क्योंकि—

कुलपरम्परा से प्राप्त होने वाले इस ऐश्वर्य को छोड़कर माता पिता की सेवा करने के लिये आज ही मैं उसी प्रकार वन में जा रहा हूं जिस प्रकार जीमूतवाहन (राज पाट छोड़

वनं याम्यहमद्यैव यथा जीमूतवाहनः ॥ ५ ॥

[इति निष्क्रान्तौ ।]

[आमुखम्]

[ततः प्रविशति नायको विदूषकश्च]

नायकः । [सनिर्वेदम्] वयस्य आत्रेय !—

एष जीमूतवाहनः वनं याति तथैव अहमपि अद्यैव सेवाया विलम्बपरिहाराय अस्मिन्नेव दिवसे वनं यामि । उपमालङ्कारः तल्लक्षणं यथा कुवलयानन्दे—

उपमा यत्र साधर्म्यलक्ष्मीरुल्लसति द्वयोः ।
हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते ॥

अनुष्टुब् वृत्तं तल्लक्षणं श्रुतबोधे :—

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरु विजानीयात् एतद् पद्यस्य लक्षणम् ॥ ५ ॥

आमुखमिति प्रस्तावनायाः—अन्यदभिधानम् । एतल्लक्षणं स्फुटतया प्रतिपादितं साहित्यदर्पणे श्रीविश्वनाथकविराजैः—

नटी विदूषको वापि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संल्लापं यत्र कुर्वते ॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।
आमुख तत्तु विज्ञेय नाम्ना प्रस्तावनापि सा ॥

तत्र विविधविधेषु प्रस्तावनाभेदेषु एष यथेति वचनोपक्षेपात् पात्रस्य साक्षात् प्रवेशेन घनञ्जयमतानुसारेण प्रयोगातिशयोऽयमिति ।

'एषोऽयमित्युपक्षेपात् सूत्रधारप्रयोगतः
पात्रप्रवेशो यत्रैव प्रयोगातिशयो मतः' इति तल्लक्षणात् ।

इति आमुखम्

जीमूतवाहनाभिधानो नायकः क्रमप्राप्तमपि राज्यभोगं वस्तुविचारेण नाति-

---

कर माता पिता की सेवा के लिये जगलमें रहा है) ॥ ५ ॥

(दोनों चले गये)

[आमुख]

(नायक और विदूषक का प्रवेश)

नायकः—(निर्वेद के साथ) वयस्य आत्रेय !

रागस्यास्पदमित्यवैमि न हि मे ध्वंसीति न प्रत्ययः
कृत्याकृत्यविचारणासु विमुखं को वा न वेत्ति क्षितौ।
एवं निन्द्यमपीदमिन्द्रियवशं(१) प्रीत्यै भवेद् यौवनं
भक्त्या याति तदीत्थमेव पितरौ शुश्रूषमाणस्य मे ॥ ६ ॥

सम्मानयन् वनस्थयोरपि पित्रोः परिचरणमेव श्रेयस्करं मन्यमानः तदुपकारित्वात् यौवनस्य साफल्यं वर्णयति **रागस्येत्यादिना**—

इदं यौवनं युवावस्था। रागस्य विषयवासनायाः। आस्पदं स्थानं (आस्पदं प्रतिष्ठायामिति सूत्रेण निपातनात्साधु) इति अवैमि सर्वथा जानामि। यौवने मनुष्याणां मनसि कामादयो विकाराः नितरां प्रस्फुरन्तीति स्पष्टमहं जानामीति वक्तुरभिप्रायः। न ध्वंसि न नश्वरमिदं। इति एवरूपः मे प्रत्ययः विश्वासो न। ("प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु" इत्यमरः)। यथा विषयरसमत्तानां जनानां हृदि यौवनस्य नश्वरत्वं नैव प्रतिभासते, तथा नैव मम विश्वासः। निश्चयेन यौवनं क्षणभङ्गुरमेवावगच्छामीति भावः। 'सम्भाव्यनिषेधनिवर्तने हि द्वौ प्रतिषेधौ' इति वामनसूत्रानुसारेण अत्रत्यौ द्वौ नञौ समधिकं निश्चयं प्रतिपादयतः। 'शरदम्बुधरच्छायागत्वर्यो यौवनश्रियः' इति भारविणापि तथैव यौवनस्य नश्वरत्वं प्रतिपादितम्। क्षितौ पृथिव्यां कः पुरुषः। कृत्याकृत्यविचारणासु कृत्यस्य कर्तव्येन विहितस्य। तथा अकृत्यस्य अकार्यत्वेन निषिद्धस्य कर्मणः विचारणासु विविच्य विमर्शनेषु। विमुखं विपरीतं। कार्याकार्यनिर्धारणे पराङ्मुखमिति भावः। वेत्ति न जानाति। सर्वे जानन्तीत्यर्थः। स्वेच्छाचारिणां यूनां बुद्धिः कार्याकार्यविचारे सर्वदैव प्रतिकूलेति पामरैरपि ज्ञायते, का कथा विद्याविदग्धानामित्याशयः। एवं निन्द्यमपि—इत्थं रागास्पदत्वेन नश्वरत्वेन विचारवैमुख्येन च गर्हणीयमपि। इन्द्रियवशं नेत्रादीन्द्रियाधीनं यौवनं प्रीत्यै आनन्दाय भवेत्। यदि भक्त्या अनुरागेण पितरौ शुश्रूषमाणस्य पित्रोः सेवां विदधतः इत्थ-

मैं इस युवावस्था को विषय वासना का स्थान समझता हूं। मेरा पूरा विश्वास है कि यह क्षणभङ्गुर है, पृथ्वीतल पर कौन मनुष्य नहीं जानता है कि यह कर्तव्य और अकर्तव्य के विचार करने से सर्वथा विमुख है। इस प्रकार इन्द्रियों के अधीन रहने वाला निन्दनीय भी यौवन मुझे आनन्द पहुँचा सकता है, यदि माता पिता की भक्ति के साथ इस तरह सेवा करते हुये यह व्यतीत हो॥ ६॥

(१) मीप्सितफल—ग, घ।

विदूषकः। [सरोषम्] भो वअस्स! णं णिव्विण्णो एव तुमं एत्तिअं कालं एदाणं जीवन्तमुआणं कदे इमं ईदिसं वणवासदुक्खं अणुहवन्तो ता पसीद दाणिं पि दाव। गुरुचरणसुस्सूसाणिब्बंधादो णिवत्तिअ इच्छापरिभोगरमणिज्जं रज्जसुहं अणुहवोअदु। (भो वयस्य! ननु निर्विण्ण एव त्वमेतावन्तं कालमेतयोर्जीवन्मृतयोः कृते इदमीदृशं वनवासदुःखमनुभवन्। तत् प्रसीद इदानीमपि तावत्, गुरुचरणशुश्रूषानिर्बन्धात् निवृत्य इच्छापरिभोगरमणीयं राज्यसुखमनुभूयताम्।)

नायकः। वयस्य! न सम्यगभिहितं त्वया। कुतः?—

तिष्ठन् भाति पितुः पुरो भुवि यथा सिंहासने किं तथा?

मेव मे यौवनमिति शेषः याति अतिवर्तते। निखिलजनैर्निन्दनीयमपि यौवनं पितृपरिचर्यातु अतिवर्तते तर्हि श्लाघनीयत्वेन अवश्यं मामानन्दयिष्यतीति भावः। शार्दूलविक्रीडितम् ॥ ६ ॥

भो वयस्येति। जीवन्मृतयोः जीवतोरपि मृतयोः। निश्चेष्टत्वात् जीवनमपि ययोः दण्डनायैव कल्पते इति भावः। वृद्धयोः अतएव प्रत्युपकारासमर्थयोरिति भावः। कृते प्रयोजनाय (अव्ययपदमिदम्)। ईदृशं वनवासदुःखं। एतावन्तं दीर्घं कालमभिव्याप्य। अनुभवन् न निर्विण्ण एव अद्यापि तव हृदि निर्वेदः नाङ्कुरितः?

गुरुजनशुश्रूषानिर्बन्धात् गुरुजनस्य शुश्रूषायां सेवायां यो निर्बन्धः अभिनिवेशः। एकाग्रचित्ततेति यावत्। तस्मात् निवृत्य विरम्य। इच्छापरिभोगरमणीयं इच्छाया यथेच्छमित्यर्थः। परिभोगेण यथेष्टवस्तुलाभेन। रमणीयं सुभगं। राजसौख्यं अनुभूयताम्।

नायको विदूषकवचसामनौचित्यं प्रदर्शयन् तं युक्तमनुशास्ति **तिष्ठन्नित्यादिना**—पितुः स्वजनकस्य। पुरः अग्रे भुवि चिताच्छादनविरहितायां कठोरायां

विदूषकः—(क्रुद्ध होकर) मित्र! जीते होने पर भी निश्चेष्ट होने के कारण मृतकतुल्य इन वृद्धों के लिये इतने दिनों तक वनवास के कठिन दुःख को भोगते हुये तुम विषय सुख से विमुख हो गये हो। भला इस समय भी तो प्रसन्न हो। पितामाता की सेवा का हठ छोड़ो और इच्छा की परिपूर्ति होने से सुन्दर राज्यसुख को भोगो।

नायकः—मित्र तुमने ठीक नहीं कहा। क्योंकि—

पिता के सामने जमीन पर बैठने में जैसी शोभा है वैसी क्या राजसिंहासन पर बैठने में

यत् संवाहयतः सुखं तु चरणौ तातस्य किं राजके (१) ।
किं भुक्ते भुवनत्रये धृतिरसौ भुक्तोज्झिते या गुरोः ?
आयासः खलु राज्यमुज्झितगुरोस्तत्रा(२)स्ति कश्चिद्गुणः ? ॥७॥

विदूषकः । [आत्मगतम्] अहो से गुरुअणसुस्सूसाणुराओ ! । [विचिन्त्य] भोदु ता एदं पि दाव अण्णं विअ भणिस्सं । [प्रकाशं]

भूमौ । तिष्ठन् (पुत्र इति शेषः) यथा भाति शोभते तथा सिंहासने विभूषारत्नखचिते राज्यासने किं भवति ? पितृचरानुरक्तस्य भूम्यामुपविशतः पुत्रस्य यादृशी शोभा समुल्लसति चित्रवस्त्रालङ्कारादिभिः विभूषिते राज्यासनेऽपि तिष्ठतः तादृशी नैव भवितुमर्हतीति भावः । तातस्य चरणौ पादौ । संवाहयतः परिचर्याक्रमेण अर्चयतः । पुत्रस्येति शेषः । यत् सुखमनुभवति तत् राजके राज्ये स्थितस्य किं भवति ? नैवेति भावः । गुरोः भुक्तोज्झिते भुक्तात् भक्षितात् उज्झिते अवशिष्टे भुक्ते सति या धृतिः सन्तोषः तुष्टिरिति यावत् । (धृतिर्नेष्टौ स्त्रियां तुष्टौ इति मेदिनी) भवति । भुवनत्रये त्रिष्वपि भुवनेषु न-तु भूमण्डले राज्यमात्रे वा भुक्ते तत्तद्भोग्यसाकल्यस्वीकारेण अनुभूते पालिते च । किं सा भवति ? 'पितृपरायणस्य पुत्रस्य तदुच्छिष्टान्नभोजनजा प्रीतिः गुणैः त्रिभुवनैश्वर्यभोगनिबन्धनामपि धृतिमतिशेते' इति भावः । उज्झितगुरोः उज्झितौ राज्यसुखार्थं परित्यक्तौ गुरू पितरौ येन एवं भूतस्य मम । राज्यं आयास एव केवलं दुःखभोगाय कल्पिष्यते इति भावः । तेन राज्येन । कश्चिद् गुणः लाभः अस्ति ? किं भवान् राज्यशासने कमपि लाभं पश्यति ? अहन्तु एकमपि नैव पश्यामीति भावः । अनेन पद्येन कविः नायकस्य निरतिशय गुरुसेवानुरागं सूचयन् धीरोदात्ततां स्पष्टतया प्रतिपादयति । शार्दूलविक्रीडितं छन्दः ॥ ७ ॥

है ? पिता के पैर दबाने में जो सुख है वह क्या राज्य पाने में है ? पिता के जूठन खाने से जो तृप्ति मिलती है, वह क्या त्रिभुवन के पालन करने तथा भोग्यवस्तु के मिलने में है ? सच तो यह है कि गुरुजन का परित्याग करने से मुझे राज्यकरना केवल आयासमात्र जान पड़ता है- केवल परिश्रम ही परिश्रम है, कोई सुख नहीं । क्या उसमें कोई गुण है ? (मेरी राय में माता पिता की सेवा करने में ही सच्चा सुख है, राजसिंहासन पर बैठकर भोग विलास करने में नहीं)७

विदूषकः -(आप ही आप) अहा, राजकुमार का गुरुजन की सेवा करने में कितना अनुराग है ! (सोचकर) अच्छी, इसे मैं दूसरी तरह से कहूंगा । (प्रकाश) मित्र ! मैं

---

(१) क—ख । (२) तेना—ख ।

भो वअस्स ! णक्खु अहं रज्जसोक्खं ज्जेव । केवलं उद्दिसिअ एअं भणामि, अण्णं पि दे करणीज्जं अत्थि ज्जेव । (अहो अस्य गुरुजनशुश्रूषानुरागः ! । भवतु तदेतदपि तावत् अन्यदिव भणिष्यामि । भो वयस्य ! न खल्वहं राज्यसुखमेव केवलमुद्दिश्य एवं भणामि, अन्यदपि ते करणीयमस्त्येव ।)

नायकः [सस्मितम्] वयस्य ! ननु कृतमेव यत्करणीयम् । पश्य—

न्याय्ये वर्त्मनि योजिताः प्रकृतयः सन्तः सुखं स्थापिता
नीतो बन्धुजनस्तथात्मसमतां राज्ये च रक्षा कृता ।
दत्तो वृत्तमनोरथाधिकफलः कल्पद्रुमोऽप्यर्थिने

"ननु कृतमेव यत् करणीयमि" त्यात्मन उक्तिं विशदयति नायकः 'न्याय्ये वर्त्मनी'त्यादिना—प्रकृतयः प्रजाः अमात्यादयो वा । ("प्रकृतिर्गुणसाम्ये स्यात् अमात्यादिस्वभावयोः । योनौ लिङ्गे पौरवर्गे" इति मेदिनी) न्याय्ये न्यायादनपेतं न्याय्यं (धर्मपथ्यर्थन्यायादनपेते इति सूत्रेण न्यायशब्दात् यत् प्रत्ययः) तस्मिन् तस्य तस्य स्वाधिकारसदृशे। वर्त्मनि आचारे । योजिताः स्थापिताः। प्रजासु नहि कश्चिदुन्मार्गगामीति भावः । सन्तः सज्जनाः । सुखं निरुद्वेगं वेश्मादिप्रदानेन यथाऽन्यत्रगमनाभिरुचिर्न भवेत् तथा स्थापिताः । तथा बन्धुजनः बान्धवगणः । आत्मसमतां वसनाशनादिकल्पनैः स्वतुल्यत्वं नीतः प्रापितः । अतो नास्ति अन्तरङ्गाणां कोऽवसर इति ध्वन्यते । राज्येऽपि रक्षा कृता । दत्तमनोर-

---

केवल राज्यसुख के ही लिये इसे नहीं कहता हू, बल्कि तुम्हे और भी तो करना ही है।

नायकः—(मुसकुराकर) वयस्य, मेरा जो कर्तव्य था, उसे मैंने तो कर ही डाला है। देखोः—

मैंने प्रजाओं को न्याय मार्ग में लगाया है। सज्जन लोगों को सुख पूर्वक रक्खा है, अपने बन्धुजनों को अपने समान बनाया है, राज्य की पूरी रक्षा की है; मनोरथ से भी अधिक फल देने वाला (१)कल्पवृक्ष भी याचकों को दे डाला है। इससे अधिक और कौन कार्य करना

---

(१) कथासरित्सागर तथा वृहत्कथामञ्जरी दोनों ग्रन्थों में जीमूतवाहन की आख्यायिका में इस बात का उल्लेख मिलता है। लिखा है कि जीमूत केतु (जीमूतवाहन के पिता) के उद्यान में सब मनोरथों को पूरा करने वाला कल्पवृक्ष था जिसके अनुग्रह से ही उसे जीमूतवाहन जैसा दानवीर पुत्र उत्पन्न हुआ था। बड़े होने पर जब जीमूतवाहन को इस वृक्ष की स्थिति विदित हुई, तब उसने पिता की आज्ञा लेकर उसे संसार के कल्याण के लिये दे दिया। कल्पवृक्ष स्वर्ग में चला गया और पृथ्वीपर ऐसी धन की वृष्टि की कि कोई मनुष्य दरिद्र नहीं

कृतसमित्कुशकुसुममुपभु*क्तमूलफलकन्दनीवारप्रायमिदं स्थानं वर्त्तते । तदितो मलयपर्वतं गत्वा किञ्चित् तस्मिन् निवासयोग्यमाश्रमपदं निरूपय" इति । तदेहि मलयपर्वतमेव गच्छावः ।

विदूषकः-जं भवं आणवेदि । एदु भवँ (यद् भवानाज्ञापयति । एतु भवान् ।) [इत्युभौ परिक्रामतः] ।

विदूषकः-[अग्रतोऽवलोक्य] भो वअस्स ! पेक्ख पेक्ख, एसो क्खु सरसघणसिणिद्धचंदणवणुच्छङ्गपरिमिलणलग्गबहुलपरिमलो विमलतडणिवडणजज्जरिज्जतणिज्झरुच्छलितसिसिरसीमरासारवाही पढमसङ्गमोक्कण्ठिदपिआकण्ठग्गहो विअम्गपरिस्समं अवणअंतो रोमञ्चेदि पिअवअस्सं मलममारुदो । (भो वयस्य ! प्रेक्षस्व प्रेक्षस्व । एष खलु सरसघनस्निग्धचन्दनवनोत्सङ्गपरिमिलनलग्नबहुलपरिमलो विमलतटनिपतनजर्जरायमाण-

---

यः परिभोगः वस्तूनामुपभोगः तेन । दूरीकृतसमित्कुशकुसुमं समिधः-यज्ञार्थं काष्ठं च कुशाश्च कुसुमानि च एतेषां समाहारः समित्कुशकुसुमं (समाहारे एकवचनं नपुंसकञ्च ।) दूरीकृतं नष्टं जातं यत्र तत् । उपभुक्तं अतिशयेन भुक्तं उपभुक्तं । उपभुक्तमूलफलकन्दनीवारप्रायं मूलं च फलं च कन्दश्च नीवारश्च वन्यधान्यं च एतत् प्रायेण भूम्ना उपभुक्तं यस्मिन् एवंभूतं स्थानमिदं वर्तते । अस्मदुपभोगेन कन्दमूलफलादीनामत्र कष्टेन उपलब्धिर्भवतीति भावः ।

भो वयस्येति । विषदूको मलयभूम्याः सामीप्यं सूचयितुं तद्देशीयं पवनं स्तौतिः-सरसघनस्निग्धचन्दनवनोत्सङ्गपरिमिलनलग्नबहुलपरिमलः सरसानि गिरि-

---

नहीं देता हूं । अतएव इस तुच्छ वस्तु के विषय में विचार करने से क्या लाभ ? मेरे लिये तो पिता की आज्ञा का पालन करना ही श्रेयस्कर है । पिता ने मुझे आज्ञा दे रक्खी है कि "वत्स सीमूतवाहन, बहुत दिनों के उपभोग करने से इस स्थान में यज्ञकी लकड़ी, कुश और फूल का अभाव होगया है और कन्द, मूल, फल के अधिक उपभोग से उनकी प्राप्ति कष्ट से हो रही है । अतएव यहाँ से मलयपर्वत पर जाओ और वहाँ पर रहने योग्य आश्रम के लिये कोई स्थान देखो" । इसलिये आओ हमलोग मलय पर्वत पर चलें ।

विदूषकः—जैसी आपकी आज्ञा । आइये, चलिये ।

(अब दोनों घूम रहे हैं)

विदूषकः—(आगे देखकर) ऐ मित्र ! यह देखो । सरस, घने और चिकने चन्दन

---

* 'युं'—ग, घ ।

निर्झरोच्छलितशिशिरसीकरासारवाही प्रथमसङ्गमोत्कण्ठितप्रियाकण्ठग्रह इव मार्ग-परिश्रममपनयन् रोमाञ्चयति प्रियवयस्यं मलयमारुतः ।)

नदीसमीपस्थतया आर्द्राणीव भासमानानि; घनानि निबिडानि स्निग्धानिम सृणानि यानि चन्दनवनानि चन्दनवृक्षाणां काननानि । तस्य उरसङ्गे क्रोडे परिमिलनेन परिवर्तनेन तत्सङ्गमेनेति यावत् । लग्नः संश्लिष्टः बहुलः प्रचुरः परिमलः गन्धः यस्यासौ तथोक्तः । विषमतटपतनजर्जरीक्रियमाणनिर्झरोच्चलितशिशिरशीकरासारवाही । विषमेषु निम्नोन्नतेषु तटेषु गिरिप्रान्तेषु पतनेन जर्जरीक्रियमाणाः प्रतिकणं खण्डशो भिद्यमानाः । ये निर्झराः जलप्रपाताः तेभ्यः उच्चलितानां इतस्ततः प्रक्षिप्तानां शिशिराणां शीतलानां शीकराणां जलकणानां आसारं सङ्घयं वहति धारयतीति तथोक्तः । निर्झरजलबिन्दुगर्भित इत्यर्थः । मलयमारुतः मलयपर्वतात् आगच्छन् रमणीयः पवनः । मार्गपरिश्रमं मार्गचलनजनितं खेदं । अपनयन् दूरीकुर्वन् । प्रथमसङ्गमोत्कण्ठितदयिताकण्ठग्रह इव प्रथमसङ्गमे प्रथमसमागमे । सङ्गमस्य प्रथमत्वेन अतीवोत्कण्ठा ध्वन्यते । उत्कण्ठितायाः उत्सुकायाः । दयितायाः प्रियायाः । कण्ठग्रहः आलिङ्गनमिव । प्रियवयस्यं भवन्तं रोमाञ्चयति शीतलस्पर्शतया रोमोद्भेदं जनयतीत्यर्थः । यथा प्रथमसमागमे दयिता स्वयमेव कण्ठालिङ्गनं विधाय प्राणवल्लभस्य मार्गखेदं हठात् अपनुदति । आनन्दातिरेकाच्च तं रोमाञ्चितकलेवरं विदधाति । तथैव त्रिधा लालितः चन्दनानामामोदमावहन् निरतिशयशिशिरोऽयं मलयसमीरो मार्गपरिश्रमं दूरीकुर्वन् प्रियवयस्यं भवन्तं क्षणे पुलकितमाश्रं करोतीति विदूषकस्याभिप्रायः । पूर्णोपमालङ्कारः । अत्र द्वयर्थैः पदैः अनुकूलया उपमया च कविना भाविनं मलयवतीसङ्गमरूपमर्थं विशदं सूचयता चतुर्थे पताकास्थानकं योजितमिति साधु अवगन्तव्यम् । यदुक्तं विश्वनाथेन—

"द्व्यर्थौ वचनविन्यासः सुश्लिष्टः काव्ययोजितः ।
प्रधानार्थान्तराक्षेपी पताकास्थानकं परम्" ॥ इति ।

के वनों में लोट पोट करने से अत्यन्त सुगन्धित और विमल तट से गिरने के कारण जर्जर होने वाले झरनों से निकले हुये शीतल जलबिन्दुओं को धारण करने वाला यह मलयानिल बह रहा है । प्रथम समागम के कारण उत्कण्ठित होने वाली प्रियतमा के आलिङ्गन की तरह यह मलयमारुत मार्ग के परिश्रम को दूर करता हुआ तुम्हारे शरीर में रोमाञ्च पैदा कर रहा है।

नायकः । [निरूप्य सविस्मयम्] अये ! प्राप्ता एव वयं मलयपर्वतम् । [समन्तादवलोक्य] अहो रामणीयकमस्य ! तथा हि ।—

माद्यद्दिग्गजगण्डभित्तिकषणैर्भग्नस्रवच्चन्दनः
क्रन्दत्कन्दरगह्वरो जलनिधेरास्फालितो वीचिभिः ।

अये इति । अहो इति आश्चर्यकरं रामणीयकं रमणीयत्वमस्य प्रदेशस्येति शेषः । रमणीयस्य भावः रामणीयकं ['थोपधात् गुरूपोत्तमाद् वुञ्' इति सूत्रेण वुञ् प्रत्ययः ।]

नायकः देशरमणीयतया जनितामात्मनः मानसे प्रोल्लसन्तीं भावमङ्गीमभिव्यनक्ति माद्यदित्यादिनाः—

माद्यद्दिग्गजगण्डभित्तिकषणैः । माद्यतां प्रारब्धमदानां दिग्गजानां दिशामन्ते कृतनिवसतीनां ऐरावतादीनां गजानां [तन्नामानि यथामरकोषे—"ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः"] याः गण्डभित्तयः प्रशस्ताः गण्डाः इति गण्डभित्तयः । 'प्रशंसावचनैश्चेति' समासः । भित्तिशब्दः प्रशस्तार्थः । तथा च गणरत्नमहोदधौ "मत्तल्लिकोद्धमिश्राः स्युः प्रकाण्डस्थलभित्तयः" । प्रशस्तवाचकेषु भित्तिशब्दोऽन्यतमः । 'निघातदानालगण्डभित्तिर्वन्यः सरित्तो गज उन्ममज्ज' (रघुवंशे ५।४३।) इति पद्यांश टीकाकारवरेण्यो मल्लिनाथोऽप्येवमेव व्याख्यातवान् । अथवा प्रदेशार्थवाचकोऽपि भित्तिशब्दो वर्तते "भित्तिः प्रदेशे कुड्येऽपि" इति विश्वकोषात् । गण्डानां भित्तयः प्रदेशाः । तासां कषणैः कण्डूशमनाय घर्षणैः । भित्तिशब्दप्रयोगेण विना गण्डस्य स्थौल्यं कषणस्य बहुदेशव्यापित्वं च सूच्यते । भग्नस्रवच्चन्दनः भग्नाः छिन्नाः अतः स्रवन्तः श्च्योतद्रसाः चन्दनवृक्षाः यस्मिन् तथाभूतः । जलनिधेः समुद्रस्य वीचिभिः लहरीभिः । आस्फालितः निरन्तरमाहतः । अत एव क्रन्दत्कन्दरगह्वरः क्रन्दन्ति जलप्रवेशात् नदन्ति । कन्दराणां गह्वराणि कुहराणि बिलानीति यावत् यस्मिन् तथोक्तः । ['दरी तु कन्दरो वा स्त्री देवखातबिले गुहा । गह्वरम्' इत्यमरः] तथा च सिद्धाङ्गनानां सिद्धाः देवयोनिविशेषाः । तेषा

नायकः—(देख कर, विस्मय के साथ) क्या हम लोग मलय पर्वत पर आ गये ? (चारो तरफ देखकर) अहा ! क्या ही इसकी रमणीयता है । यह देखो ।

मतवाले दिग्गजों के सुन्दर गण्डस्थलों के घर्षण से टूटे हुये चन्दन वृक्षों से रस चू रहा

पादालक्तकरक्तमौक्तिकशिलः सिद्धाङ्गनानां गतैः
सेव्यो*ऽयं मलयाचलः किमपि मे चेतः करोत्युत्सुकम् ॥९॥

अङ्गनानां पेशलगात्राणां दयिहाना। गतैः गमनैः (भावे क्तप्रत्ययः)। पादालक्तकरक्तमौक्तिकशिलः। पादानां प्रसाधनाय प्रत्यग्रोऽनुलिप्तो योऽलक्तकः अलक्तकरसः। तलाक्तुलिव्यापिना तेन रक्ता रक्ताभाः कृताः मौक्तिकाः स्वच्छमुक्ताकि र्निमिताः शिलाः प्रस्तरखण्डानि यत्र तथाभूतः। तेन सुखप्रधानतया बह्वीनां सुन्दरीणां स्वैरसञ्चारविषयतया देशस्य श्लाघनीयत्वं ध्वन्यते। अतः सेव्यः उपभोगक्षमः। अयं पुरतोऽवलोक्यमानः। मलयाचलः मलयाभिधानः पर्वतः। मे चेतः मदीयं चित्तं किमपि केनापि अनिर्वचनीयेन हेतुना। उत्सुकं उत्कण्ठितं करोति। चन्दनरसासारवाही समुद्रोर्मिभिर्गर्जत्कन्दरकुहरः सिद्धयुवतीनां गमनेनालक्तकरसरञ्जितान् मुक्ताप्रचुरान् प्रस्तरान् धारयन् अयं मलयाचलोऽवश्यमेव उपभोगक्षमो वर्तते यतो मदीयमपि चेतः हठात् उत्सुकं भवतीति सरलार्थः। [आश्चर्यकरमेव एतस्य रामणीयकमिति स्फुटं समर्थितमनेन पद्येनेति। इह मौक्तिकशिलानां वस्तुसम्पद्रूपत्वेन स्वशौक्ल्यगुणत्यागात् लाक्षारञ्जितत्वकथनेन च उदात्ततद्गुणयोः वाक्यार्थरूपकाव्यलिङ्गं प्रत्यनुग्राहकतया संकरालङ्कारः। तल्लक्षणानि च यथा कुवलयानन्दे—

(क) उदात्तमृद्धेश्चरितं श्लाघ्यं चान्योपलक्षणम् ॥
(ख) तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः।
पद्मरागायते नासामौक्तिकं तेऽधरत्विषा ॥
(ग) समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्।
जितोऽसि मन्द कन्दर्प मच्चित्तेऽस्ति त्रिलोचनः ॥

तथा चैतेषां परस्परानुग्राह्यानुग्राहकतया संकरः। यथोक्तं काव्यप्रकाशे—
अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु संकरः। शार्दूलविक्रीडितं वृत्तम् ॥९॥

है। यहाँ समुद्र की लहरों से ताडित होने से गुफायें शब्द कर रही हैं। सिद्धाङ्गनाओं के चलने से यहाँ स्वच्छ मोती की शिलायें महावर से रंगे पैरों के संग से लाल होगयी हैं। अहा! यह मलयाचल आनन्द की भूमि है! न जाने क्यों यह मेरे चित्त को उत्सुक कर रहा है ॥ ९ ॥

* दृष्टो—ग, घ।

तदेह्यत्रारुह्य वासयोग्यं किञ्चिदाश्रमपदं निरूपयावः ।

विदूषकः । एव्वं करेम्ह । [अग्रतः स्थित्वा] एदु भवं । (एवं कुर्वः । एतु भवान् ।)

[आरोहणं नाटयतः ।]

नायकः । [दक्षिणाक्षिस्पन्दनं सूचयन्] **अये !—**

दक्षिणं स्पन्दते चक्षुः फलाकाङ्क्षा न मे क्वचित् ।
न च मिथ्या मुनिवचः कथयिष्यति किं न्विदम् ॥ १० ॥

विदूषकः । **भो वअस्स ! अवस्समासण्णं दे पिअं णिवेदेदि ।** (भो वयस्य ! अवश्यमासन्नं ते प्रियं निवेदयति ।)

नायको दक्षिणाक्षिस्पन्दनाख्यं निमित्तं सूचयति दक्षिणं स्पन्दते इत्यादिना—

सखे ! मे दक्षिणं चक्षुः नेत्रं स्पन्दते उपरि अधश्च अविच्छिन्नं स्फुरति । मे फलाकाङ्क्षा प्रयोजनाभिलाषः क्वचित् कस्मिन्नपि अर्थाधिगमे न नैव विद्यते । मुनिवचः पुरुषस्य दक्षिणाक्षिस्फुरणं शुभव्यञ्जकमिति प्रामाणिकं वचनं ।

स्पन्दान्मूर्ध्नि च्छत्रलाभं ललाटे पट्टमशुकम्
इष्टप्राप्तिं दृशोरूर्ध्वमपाङ्गे हानिमादिशेत् ।
वामभागस्तु नारीणां पुंसां श्रेष्ठस्तु दक्षिणः ॥

इति निमित्तनिदाने मुनिवाक्यम् । मिथ्या न । कदापि मृषा भवितुं नार्हति । इदं स्पन्दनं किं नु कथयिष्यति अधुना दक्षिणाक्षिस्पन्दनस्य किं फलं भविष्यतीति नैवाहं जाने इति । अनुष्टुब् छन्दः ॥ १० ॥

इसलिये आवो रहने योग्य आश्रम के लिये कोई स्थान देखें ।

विदूषकः—अच्छा, हमलोग ऐसा ही करें । **(आगे खड़ा होकर)** आप आइये । **(दोनों आरोहण का अभिनय कर रहे हैं)**

नायकः—**(दाहिनी आँख के फड़कने की सूचना देता हुआ)** अये—

मेरी दहिनी आँख फड़क रही है, परन्तु मुझे किसी फलकी अभिलाषा नहीं है । मुनियों का (१)वचन झूठा नहीं होता । अतः देखें आज क्या फल होता है ॥ १० ॥

विदूषकः—ऐ मित्र ! तुम्हारी शीघ्र ही होने वाली किसी प्रिय वस्तु की यह अवश्य सूचना दे रहा है ।

---

(१) शकुनशास्त्र के वेत्ता पुरुषों का कहना है कि जब पुरुष का दाहिना नेत्र फड़कता है तो उसे कोई अभिलषित प्रिय वस्तु मिलती है । यह कथन कभी झूठा नहीं हो सकता क्योंकि यह प्रामाणिक पुरुषों की उक्ति है ।

नायकः । एवं नाम यथाऽऽह भवान् ।

विदूषकः । [विलोक्य] भो वअस्स ! पेक्ख पेक्ख । एदं क्खु सविसेसघणसिणिद्धपाअवविसोहिअं सुरहिहविग्गन्धगब्भिणुद्दामधूमणिग्गमं अणुव्विग्गसुहणिसण्णसावअगणं तवोवणं विअलक्खीअदि । (भो वयस्य ! प्रेक्षस्व प्रेक्षस्व । एतत् खलु सविशेषघनस्निग्धपादपविशोभितसुरभिहविर्गन्धगर्भितोद्दामधूमनिर्गममनुद्विग्नसुखनिषण्णश्वापदगणं तपोवनमिव लक्ष्यते ।

नायकः । सम्यगुपलक्षितम् । तपोवनमेवैतत् । कुतः ?—

वासोऽर्थं #दयया व नातिपृथवः कृत्तास्तरूणां त्वचो

भो वयस्येति । भो वयस्य ! मित्र ! एतत् खलु । सविशेषघनस्निग्धपादपोपशोभित सविशेषं सातिशयं घनाः निविडाः स्निग्धाः चिक्कणाः पादपाः वृक्षाः तैः उपशोभितं सर्वतः भूषितम् । सुरभिहविर्गन्धगर्भितोद्दामधूमनिर्गमं सुरभिः शोभनः हविर्गन्धः होमद्रव्यात् संजायमान आमोदः । तद्गर्भितः तन्मिश्रितः । उद्दामः प्रचुरः सञ्जीभूय बहुत्वेन प्रकाशमानः धूमस्य निर्गमः निर्गमनं यत्र तत् तथा भूत तथा च अनुद्विग्नसुखनिषण्णश्वापदगणं अनुद्विग्नाः तपोमाहात्म्येन विस्मृतपरस्परमत्सरत्वात् निःशङ्कचित्ताः । अतः सुखं निषण्णाः उपविष्टाः ये श्वापदाः हरिणादयो वन्यजीवाः तेषां गणः समूहो यत्र तथाभूतं तपोवनमिव मुनीनामाश्रयभूमिरिव लक्ष्यते । (हविर्गन्धमिश्रितधूमोद्गमेन निःशङ्कोपविष्टपशुगणेन च नियतं तपोवनमिदमिति स्फुटीभवति) । तथा च शाकुन्तले—

एते चार्वागुपवनभुवि च्छिन्नदर्भाङ्कुरायां, नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति ।

नायकोऽपि तपोवनस्य मुलभानि लक्षणजातानि प्रदर्शयति-वासोऽर्थमित्यादिना:—वासोऽर्थं परिधानाय (वाससे इदमिति विप्रदे नित्यसमासः) । तरूणां आश्रमवृक्षाणां । दयया अनुकम्पया एव (वृक्षकाणां पोडा मामूदिति कारणा-

---

नायकः—जैसा आप कहते हैं, वैसा ही हो ।

विदूषकः—(देखकर) ऐ मित्र ! यह देखिये। अत्यन्त घने और चिकने वृक्षों से सुशोभित यह तपोवन सा दिखाई दे रहा है क्योंकि यहाँ जो धूम निकल रहा है उसमें सुरभित होमगन्ध की बहुलता दीख पड़ती है और बिना किसी भय के पशुगण सुख पूर्वक बैठे हुये दृष्टिगोचर हो रहे हैं ।

नायकः—भाई तुमने ठीक देखा। यह तपोवन ही है । क्योंकि:—

यहाँ पहनने के लिये दया के कारण वृक्षों के थोडे ही छाल छीले गये हैं । आकाश की

---

* दययैव—ख ।

†भग्नाऽऽलक्ष्यजरत्कमण्डलुनभःस्वच्छं पयो नैर्झरम्।
दृश्यन्ते त्रुटितोज्झिताश्च वटुभिर्मौञ्जयः क्वचिन्मेखला
नित्या*कर्णनया शुकेन च पदं साम्नामिदं पठ्यते ॥ ११ ॥

दित्यर्थः) नातिपृथवः नास्तिविस्तीर्णाः। त्वचः वल्कलानि। कृत्ताः उन्मथिताः सन्ति (मुनिभिरिति शेषः)। नैर्झरं निर्झरस्येदमिति नैर्झरं (तस्येदमिति सूत्रेण अण्प्रत्ययः) निर्झरसम्बन्धि। (प्रवाहो निर्झरोझराः इत्यमरः) । पयः जलं। नभःस्वच्छं आकाशवत् निर्मलं। भग्नालक्ष्यजरत्कण्डलु च; भग्नाः त्रुटिताः [जरत्तया भग्नाः न तु मुनिप्रमादेन अतएव जले निक्षिप्ताः इत्यत्र शेषः] आलक्ष्याः पयसो नैर्मल्यात् स्फुटं दृश्यमाणाः। जरन्तः वृद्धतराः कण्डलवः मृदादिनिर्मितानि जलपात्राणि यस्मिन् तथाभूतं दृश्यते।

'दण्डादीनां त्रुटने जले तत् परित्यागो युक्तः' इत्यर्थे मनुः—

मेखलामजिनं दण्डमुपवीतं कमण्डलुम्।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत् ॥ २ अध्याये; ६४ श्लोकः।

जलस्य स्वच्छतया तन्निक्षिप्ताः कमण्डलवः बहिः स्फुटं दृश्यन्ते इति सरलार्थः। क्वचित् कस्मिन्नपि स्थाने। मौञ्ज्यः मुञ्जः घासविशेषः तन्निर्मिताः (मुञ्जस्येमाः मौञ्ज्यः। तस्येदमित्यण्) मेखलाः व्रताय धार्यमाणानि कटिबन्धनानि। वटुभिः छात्रैः। त्रुटितोज्झिताः आदौ त्रुटिताः भग्नाः पश्चात् उज्झिताः त्यक्ताः (स्नानानुलिप्तवत् समासः) दृश्यन्ते। नित्याकर्णनया प्रतिदिनं निरन्तरश्रवणेन हेतुना। शुकेन साम्नां वेदमन्त्राणां ('वेदसामान्य एवात्र विवक्षा' इति विमर्शिनीकाराः) इदं सद्यः श्रूयमाणं पदं पठ्यते। (वटूननुकुर्वता शुकेन यथा श्रुतमविकलं पदमुच्चार्यते इत्यर्थः) अनुकरणप्रधानाः शुका भवन्ति। अतस्तत्स्वभावस्य स्फुटं वर्णनात् स्वभावोक्तिरलङ्कारः। तल्लक्षणं यथा कुवलयानन्दे—

स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम्।
कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते ॥
वृत्तमिदं शार्दूलविक्रीडितम् ॥ ११ ॥

तरह स्वच्छ झरने के जल में फेंके गये, टूटे हुये, पुराने कमण्डलु दीख पड़ते हैं। कहीं कहीं मूंज की बनी मेखला दिखाई पड़ती है जिन्हें विद्यार्थियों ने टूट जानेके कारण से फेंक दिया है। और यह देखो, प्रतिदिन सुनने के कारण से यह शुक वेदों का मन्त्र पढ़ रहा है ॥ ११ ॥

† भग्ना°—ग। ‡ रजः—क, ग। ततः—घ। * कर्णतया—ग, घ।

तदेहि प्रविश्य अवलोकयावः । [प्रविश्य नाट्यतः । सविस्मयं विलोक्य] अहो ! नु खलु मुदितमुनिजनप्रविचार्यमाणसन्दिग्धवेदवाक्यविस्तरस्य पठद्वटुच्छिद्यमानार्द्रार्द्रसमिधस्तापसकुमारिकाऽऽपूर्यमाणबालवृक्षकालवालस्य प्रशान्तरमणीयता तपोवनस्य । इह हि— श्लोकः ॥

अहो न्विति । नायकः—अहो आश्चर्यभूता वर्तते तपोवनस्य प्रशान्तरमणीयता शान्तता मनोहरता च । उभयमुपपादयतिः—मुदितमुनिजनप्रविचार्यमाणसन्दिग्धवेदवाक्यविस्तरस्य मुदितेन आत्मारामतया नित्यतुष्टेन । मुनिजनेन तपस्विगणेन । प्रविचार्यमाणः प्रकर्षेण विचार्यमाणः । सन्दिग्धः अनिश्चितः वेदवाक्यविस्तरः वैदिकमन्त्राणां समूहो यस्मिन् तथाभूतस्य । तथा पठद्वटुजनाच्छिद्यमानार्द्रसमिधः पठता स्वाध्यायं पठता बटुजनेन छात्रवृन्देन । आच्छिद्यमानाः यथाकामं लूयमानाः । आर्द्राः वृक्षेभ्यः सद्यःत्रुटिताः अतएव सरसाः । समिधः यज्ञीयकाष्ठानि यत्र तथोक्तस्य । एवं तापसकुमारिकापूर्यमाणबालवृक्षकालवालस्य तापसकुमारिकाभिः मुनिकन्यकाभिः । पूर्यमाणानि (जलेनेति शेषः) बालवृक्षकाणां स्वल्पं प्ररूढाना वृक्षाणा (अत्र कप्रत्ययेन कुमारीणां शिशुत्वेऽपि कृत्यतात्पर्ये वृक्षाणा लोभनीयत्वं च द्योत्यते) आलवालानि वृक्षमूले जलधारणस्थानानि यस्मिन् तथाभूतस्य ['अम्भसा यत्र धारणम् । स्यादालवालमावालमावापः' इत्यमरः । 'आधारश्चाधिकरणे आलवालोऽम्बुधारणे' इति विश्वः ।] तपोवनस्य आश्चर्यकारिणी शान्तता रमणीयता च वर्तते । [तपोवने मुनयः सन्दिग्धान् वेदमन्त्रान् प्रविचारयन्ति; स्वाध्यायं रटन्तो विद्यार्थिनः आर्द्रा मेध्यां समिध यज्ञादीनां प्रयोजनाय छिन्दन्ति; मुनिबालिका अपि बालवृक्षाणामालवालानि जलेन परिपूरयन्ति अतः प्रशान्तत्वेऽपि मनोहारिणी छविः समुल्लसत्येतस्य तपोवनस्येति सरलार्थः] अत्रार्थे कालिदासः—

सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् ।
विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् ॥

इसलिये आवो । भीतर जाकर हम लोग देखें । (दोनों प्रवेश करते हैं । विस्मयके साथ देखकर) अहा ! यह तपोवन कितना प्रशान्त और रमणीय है जहाँ प्रसन्न मुनिगण सन्दिग्ध वेद मन्त्रों का विचार कर रहे हैं, जहाँ पढ़ते हुये विद्यार्थीगण गीली समिधा को तोड़ रहे हैं और जहाँ तापसों की कुमारी कन्यायें छोटे छोटे पौदों के थालों (आलबाल) को जल से भर रही हैं । यहाँ:—

मधुरमिव वदन्ति* स्वागतं भृङ्गशब्दै-
र्नतिमिव फलनम्रैः कुर्वतेऽमी शिरोभिः ।
मम ददत इवार्घ्यं पुष्पवृष्टीः किरन्तः
कथमतिथिसपर्यां शिक्षिताः शाखिनोऽपि ॥ १२ ॥

जीमूतवाहनः तपोवनमेव पुनरपि वर्णयति **मधुरमिवेत्यादिना**—इह हि अस्मिन् तपोवने । शाखिनः ('शाखाः विद्यन्ते येषु' इति) शाखासम्पन्नाः वृक्षाः ("वृक्षो महीरुहः शाखी" इत्यमरः) भृङ्गशब्दैः भ्रमराणां झङ्कारैः । मधुं मञ्जुलं स्वागतवचनं वदन्ति उच्चारयन्ति इव । इवेति सम्भावनायाम् । अस्मदागमने मुदितमधुकरमधुरझङ्कारस्य एभ्यो वृक्षेभ्यः प्रसरणात् स्वागतगीतिरियमिति सम्भाव्यते अमी आश्रमद्रुमाः । फलनम्रैः फलभारावनतैः । शिरोभिः शाखाग्रभागैः । नतिमिव प्रणाममिव । कुर्वते विदधति । तथा च पुष्पवृष्टीः पुष्पाणां वृष्टीः वर्षणं । किरन्तः प्रक्षिपन्तः । मम महां (अविवक्षया सम्प्रदानस्य अनिर्देशः) अर्घ्यं पूजोपहारं ददते प्रयच्छन्तीव लक्ष्यन्ते । अष्टाङ्गोऽर्घो भवति—

आपः क्षीरं कुशाग्राश्च दधि सर्पिः सतण्डुलम् ।
यवः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकीर्तितः ॥

कथं विस्मयकरमिदं शाखिनोऽपि निर्जीवकल्पाः वृक्षा अपि अतिथिसपर्याम् अतिथीनां आगन्तुकानां सपर्यां पूजनविधिं ["पूजा नमस्यापचितः सपर्याऽर्चाऽर्हणाः समाः" इत्यमरः] शिक्षिताः मुनिभिरिति शेषः । यत्र निर्जीवकल्पानां द्रुमाणामपि अतिथिपूजापरिज्ञानं, तत्र का कथा खलु विदितनिखिलाचाराणां दयालूनां मुनीनामिति ध्वन्यते । अत्र मधुकरझङ्कारस्य स्वागतवचनत्वेन, वृक्षाणां फलभारावनतस्य विधिविहितप्रमाणत्वेन, पुष्पपतनस्य अर्घ्यदानत्वेन च कविनोत्प्रेक्षणात् उत्प्रेक्षालङ्कारः । यथोक्तं साहित्यदर्पणे:—

'भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना' ।

तस्याश्च इवशब्देन स्फुटमभिधीयमानत्वात् वाच्यत्वमवगन्तव्यमिति दिक् । मालिनी वृत्तम् । तल्लक्षणं यथोक्तं वृत्तरत्नाकरे—'ननमयययुतेयं मालिनी भोगि-

यहाँ पर वृक्षगण भौंरों के गुञ्जार से, जान पड़ता है कि, हमारा स्वागत कर रहे हैं। अपने शिरों को फल के भार से झुका कर ये मानों हमें प्रणाम कर रहे है। जान पडता है

* °न्तः—ग ।

तन्निवासयोग्यमिदं तपोवनम्। मन्ये भविष्यतीह वसतामस्माकं निर्वृतिः। इति।

विदूषकः। भो वयस्स! किं क्खु एदे ईसिवलिअकन्धरा णिच्चल-मुहाबसरंतदरदलिअदब्भकवला समुण्णमिदद्दिएणेककण्णा सुहणि-मोलिदलोअणा आमणंता विअ हरिणा लक्खीअन्ति। (भो वयस्य! किं खल्वेते ईषद्वलितकन्धरा निश्चलमुखापसरद्दरदलितदर्भकवलाः समुन्नमितदत्तैक-

लोकैः' इति। एतत्समानार्थकं पद्यं यथा भवभूतेरुत्तररामचरितेः—

ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुरच्युतः
स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः।
कलमविरलमत्युत्कण्ठं क्वणन्तु शकुन्तयः
पुनरिदमयं देवो रामः स्वयं वनमागतः॥

श्रीश्रीहर्षस्य नैषधचरितेऽपिः—

फलानि पुष्पाणि च पल्लवे करे वयोतिपातोद्गतवातवेपिते।
स्थितैः समादाय महर्षिवार्घकाद्वने तदातिथ्यमशिक्षि शाखिभिः
(१ स० ७८ श्लो०)॥ १२॥

निर्वृत्तिः—सुखम्।

भो वयस्येति। भो वयस्य भो मित्र! किं एते। ईषद्वलितकन्धराः ईषत् स्तोकं वलिताः वक्रीकृताः कन्धराः ग्रीवाः यैः तथोक्ताः। तथा च निश्चलमुखापस-रद्दरदलितदर्भगर्भकवलाः निश्चलमुखेभ्यः कस्मिंश्चित् प्रीतिकरे वस्तुनि आसक्त-

कि फूल की वर्षा कर ये मुझे अर्घ्य दे रहे हैं। अहा! इस आश्रम के वृक्ष भी अतिथियों की (१)पूजा करने का ढङ्ग सीख गये हैं॥ १२॥

इसलिये यह तपोवन हमारे रहने योग्य है। विश्वास है कि यदि हम लोग यहाँ रहें तो हमें सुख अवश्य मिलेगा।

विदूषकः—ऐ वयस्य! यह देखो ये हरिन लोग अपनी गरदनों को थोडा सा झुकाये हुये

(१) अतिथि की पूजा मीठे वचन बोलकर, प्रणाम कर तथा अर्घ्य देकर की जाती है। वृक्ष गण भी अपने ढंग से ये कार्य कर रहे हैं भौरों की मीठी आवाज होती है, फलों के बोझ से सिर नये हुए हैं, फूल झड़ रहे हैं। अतः जान पड़ता है कि ये आश्रमवृक्ष हमारे जैसे अतिथि का सत्कार कर रहे हैं।

र्णाः सुखनिमीलितलोचना आकर्णयन्त इव हरिणा लक्ष्यन्ते।)

नायकः [कर्णं दत्त्वा] सखे! सम्यगुपलक्षितम्। तथाहि,—

स्थानप्राप्त्या दधानं प्रकटितगमकां मन्द्रतारव्यवस्थ
निर्ह्रादिन्या विपञ्च्या मिलितमलिरुतेनेव तन्त्रीस्वरेण।
एते दन्तान्तरालस्थिततृणकवलच्छेदशब्दं नियम्य

चित्ततया निस्पन्देभ्यः। मुखेभ्यः। अपसरन्तः गलन्तः। दरदलिताः ईषच्चर्विताः। ये दर्भाः कुशाः तद्गर्भाः तद्विशिष्टाः कवलाः ग्रासाः येषा तथोक्ताः। समुन्नमित-दत्तैककर्णाः समुन्नमितः ऊर्ध्वमुत्थापितः। दत्तश्च शब्दश्रवणाय अवधानं प्रतिपतश्च। एकः कर्णः यैस्तथोक्ताः। कर्णमेकमुत्थाप्य शब्दं शृण्वन्तः इत्यर्थः। सुख-निमीलितलोचनाः सुखेन निमीलितानि आनन्दानुभूतिवशात् मुद्रितानि लोचनानि नेत्राणि यैस्तथाभूताः एते पुरतो दृश्यमाणाः हरिणाः आकर्णयन्तः कमपि शब्दं शृण्वन्त इव लक्ष्यन्ते प्रतीयन्ते। (शब्दश्रवणावसरेऽपि कर्णोन्नमनादिकाः विविधाः मुद्राः प्रायशो जायन्ते, अत एव एताभिरुल्लिखिताभिः मुद्राभिः श्रवण-स्यानुमानं विदूषकेण उपयुक्तमेव कृतमिति।)

नायकोऽपि विदूषकस्योक्तिं साधु समर्थयन् गीतस्य विशिष्टतां प्रकटयति स्थानेत्यादिना:—एते कुरङ्गाः हरिणाः ["कुरङ्गः परिभ्रमणस्थानमेषामिति भ्रमणशीलतया नाम्नो रूढिः। गीतश्रवणतात्पर्येण निश्चलतया विपर्यस्ता इति गीतस्य सौभाग्यातिशयः प्रकाश्यते" इति विमर्शिण्यां शिवरामः]। व्याजिह्मा-ङ्गाः व्याजिह्मं सङ्गीतश्रवणाभिप्रायेण वक्रीभूतं अङ्गं शरीरं लक्षणया ग्रीवा येषां तथोक्ताः सन्तः। दन्तान्तरालस्थिततृणकवलच्छेदशब्दं दन्तयोः अन्तराले मध्ये स्थितस्य तृणकवलस्य घासग्रासस्य छेदशब्दं चर्वणजातं शब्दं नियम्य निरुध्य (रोमन्थशब्दस्य श्रवणव्याघातकारित्वात् विरम्य इति भावः)। स्थानप्राप्त्या स्थानानां उरःकण्ठशिरसां प्राप्त्या प्रकृष्टया आप्त्या तत्तत्स्थानेभ्यः यथोचितोच्चा-

---

हैं। उनके मुँह से थोड़े से चबाये हुये कुश के कौर गिर रहे हैं। ये ऊपर उठा कर कान लगाये हुये हैं। आनन्द से आँखें बन्द किये हुये हैं, जान पड़ता है कि ये कुछ सुन रहे हों।

नायकः—(कान लगाता है) मित्र! तुमने ठीक समझा। देखोः—

ये हरिण दाँतों से दबाये गये घास के कौर के चबाने से उत्पन्न होने वाले शब्द को रोक करके (घास खाना बन्द कर) अपने अङ्ग को टेढ़े किये हुये सुन्दर पद वाले इस गीत को

रणेनेत्यर्थः। हृत्कण्ठशिरांसि त्रीणि क्रमशो मन्द्रमध्यतारस्वरोत्पत्तिस्थानानि। यथा चोक्तं—

यदूर्ध्वं हृदयग्रन्थेः कपालफलकादधः।
प्राणसंचरणस्थानं स्थानमित्यभिधीयते।
उरः कण्ठः शिरश्चेति तत् पुनस्त्रिविधं मतम्" ॥

एतत्स्थानसम्बद्धाः स्वराः यथा संगीतदर्पणे—

"हृदि मन्द्रो, गले मध्यो, मूर्ध्नि तार इति क्रमात्"

प्रकटितगमकां—गमको नाम स्वराणामुत्थानप्रकारः। यथा प्रतिपादितम्—

स्वरोत्थानप्रकारस्तु गमकः परिकीर्तितः।
स कम्पिताद्रिभेदेन स्मृतः सप्तविधो बुधैः ॥

तन्निर्वचनमपि यथा—

स्वश्रुतिस्थानसम्भूतां छायां श्रुत्यन्तराश्रयाम्।
स्वरो यत् गमयेत् गीते गमकोऽसौ निरूपितः ॥

तथा च प्रकटिताः साधु व्यञ्जिताः गमकाः स्वरोत्थानप्रकाराः यस्यां तथाभूतां मन्द्रतारव्यवस्थां मन्द्रस्य गम्भीरस्य तारस्य उच्चस्य च स्वरविशेषयोः व्यवस्था यथास्वं यथाकालं नियमनं, तां दधानं धारयत्। (गीतविशेषणमेतत्) तथाच निर्ह्रादिन्याः प्रशस्तनादवत्याः विपञ्च्याः वीणायाः ('वीणा तु वल्लकी विपञ्ची' इत्यमरः) विपञ्चीनाम नवतन्त्रीसम्पन्ना कोणवाद्या च वीणा भवति। यथा च भरतः—

सप्ततन्त्री भवेच्चित्रा विपञ्ची नवतन्त्रिका।
विपञ्ची कोणवाद्या स्यात् चित्रा चाङ्गुलिवादना ॥

श्लिष्टेन इव भ्रमरगुञ्जितेन। तन्त्रीस्वनेन तन्त्रीस्वरेण मिलित सङ्गतं तथा स्फुटललितपदं स्फुटानि स्पष्टानि ललितानि च सुन्दराणि च ("ललितं त्रिषु

सुन रहे हैं। गीत के पद क्या ही स्पष्ट हैं! उचित उच्चारण (१)स्थान के प्राप्त करने से

---

(१) मन्द्र, मध्य तथा तार—इन तीन स्वरों के तीन उत्पत्तिस्थान हैं—उर, कण्ठ और शिर। मन्द्र का सम्बद्ध हृदयसे है, मध्य का कण्ठ से, तथा तार का सम्बन्ध मस्तक से है। इस गीत में ये भिन्न भिन्न स्वर अपने उचित स्थानों से उत्पन्न हुये हैं। आशय है कि गीत के स्वरों का उच्चारण उचित ढङ्ग से किया गया है।

[ततः प्रविशति भूमावुपविष्टा वीणा वादयन्ती मलयवती चेटी च]।

नायिका । (गायति)—

उत्फुल्लकमलकेसरपरागगौरद्युते ! मम हि गौरि ! ।
अभिवाञ्छितं प्रसिध्यतु भगवति ! युष्मत्प्रसादेन ॥ १४ ॥

नायिका स्वाभिलषितसिद्धये संस्कृतभाषया पार्वतीं स्तौति **उत्फुल्लेत्यादिना**—उत्फुल्लकमलकेसरपरागगौरद्युते । उत्फुल्लस्य विकसितस्य कमलस्य ये केसराः किञ्जल्काः ("किञ्जल्कः केसरोऽस्त्रियाम्" इत्यमरः) तेषां परागः धूलिः । (परागः पुष्परजः' इत्यमरः) तद्वत् गौरा पीता द्युतिः कान्तिः यस्याः तत्सम्बुद्धौ पद्मपरागवत् पीतवर्णे इत्यर्थः । हे भगवति ऐश्वर्यविशिष्टे 'ऐश्वर्यदीनां भगशब्दो वाचकः' इति मन्वर्थमुक्तावल्या कुल्लूकभट्टाः । तैरेव विष्णुपुराणस्थं पद्यमिदं तत्रैव प्रमाणतयोपन्यस्तम्:—

"ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणा" ॥

गौरि ! पार्वति । युष्मत्प्रसादेन तवानुग्रहेण मम अभिवाञ्छितं मनोरथः प्रसिध्यतु प्रतिबन्धरहितं निष्पन्नो भवतु । आशासे युष्मदनुग्रहेण मेऽनुरूपवराभिलाषा सद्यः पूर्णतामेष्यतीति भावः । अत्र पादपूरणमात्रप्रयोजकत्वात् हीति पदमनर्थकमिति काव्यप्रकाशस्य दोषप्रकरणात्मके सप्तमोल्लासे मम्मटाचार्याः । आर्याछन्दः लक्षणान्तूक्तं पूर्वमेव ॥ १४ ॥

(अनन्तर जमीन पर बैठी हुई, वीणा बजाती हुई, चेटी के साथ मलयवती प्रवेश करती है)

नायिका—(गाती है) खिले हुये कमल के केसर की धूलि की तरह गौरकान्ति को धारण करने वाली, ऐ ऐश्वर्यसम्पन्न भगवती गौरी ! आप मेरे उपर दया कीजिये जिससे मेरी मनःकामना पूर्ण (१) हो ॥ १४ ॥

(१) साहित्यदर्पण के छठे परिच्छेदमें विश्वनाथ कविराजने इस आर्या को 'गेयपद' के उदाहरण में दिया है। दशप्रकार के हास्य के भेदों में 'गेयपद' पहला प्रकार है। इसका लक्षण साहित्यदर्पण में दिया है—

तन्त्रीमाण्डं पुरस्कृत्योपविष्टस्यासने पुरः ।
शुष्कं गानं गेयपदम्... ।

नायकः [कर्णौ दत्त्वा] वयस्य ! अहो गीतम् ! अहो वाद्यम् !!
व्यक्तिर्व्यञ्जनधातुना दशविधेनाप्यत्र लब्धाऽमुना

अहो आश्चर्यकरं वर्तते गीतम् ; अहो वाद्यं वीणावादनप्रकारोऽपि तद्वत् आश्चर्यसीमानमधिरोहति ।

तदेव विस्मयकरं गानवाद्ययोर्वैशिष्ट्यं प्रतिपादयति नायको व्यक्तिर्व्यञ्जनधातुनेत्यादिना:-अत्र अस्यां गीतौ । अमुना दशविधेनापि समग्रेण दशप्रकारेण व्यञ्जनधातुना वीणावादनकौशलेन व्यक्तिः स्पष्टता लब्धा प्राप्ता । धातुनाम वाद्य वादनविधिः। यथोक्तमस्मत्सम्मादितस्य नाट्यशास्त्रस्य ३३६ तमे पृष्ठे भरतमुनिना-

विस्तारः करणश्चैव आविद्धो व्यञ्जनस्तथा ।
चत्वारो धातवो ज्ञेया वादित्रकरणाश्रयाः ॥ (२९ अध्याये ८१ श्लोकः)

तत्र "आसारप्रसारविधिना सकलशाखासु सामग्रीमनुभवन् विस्तारः, शाखाभेदमात्रविधायी करणः, तदन्योन्यानुरूपमेलनकृद् आविद्धः, सर्वस्याप्यस्य मूलभूतो व्यञ्जयति विशेषानिति व्यञ्जनधातुः" । व्यञ्जनधातुश्च दशप्रकारको भवतीति यथोक्तं मुनिना—

"इति दशविधः प्रयोज्यो वीणाया व्यञ्जनो धातुः" ।

तस्य दशप्रकारता यथा—

व्यञ्जनधातुर्ज्ञेयः कलतलनिष्कोटितान्यथोन्मृष्टम् ।
रेकावमृष्टपुष्पानुस्वनितं बिन्दुरनुबन्धः ॥
(नाट्यशास्त्रे २९ अ० ८९ श्लो० ३३७ पृ०)

नायकः—(कान लगाकर सुनता है । मित्र ! अहा हा ! यह गाना कितना मीठा है और यह बजाना कितना अद्भुत ।

इस गाने में वीणा बजाने की दशों प्रकारकी (१)व्यञ्जनरीति स्पष्ट अभिव्यक्त हो रही है। तीनों प्रकार के (२)लय अर्थात् द्रुत (तेज), मध्य (बीचका) तथा विलम्बित (जिसमें

---

(१) वीणा के बजाने के चार प्रकार होते है । इनमें व्यञ्जनरीति सबसे श्रेष्ठ है । इसके दश प्रकार होते हैं जिनका पूरा २ वर्णन भरतनाट्यशास्त्र में दिया गया है । इसके लिये संस्कृतटीका देखिये ।

(२) "तालान्तरालवर्ती यः स कालो लयउच्यते"-तालों के बीचें के कालको लय कहते हैं । यह तीन प्रकार का होता है-द्रुत, मध्य और विलम्बित ।

विस्पष्टो द्रुतमध्यलम्बितपरिच्छिन्नस्त्रिधाऽयं लयः ।
गोपुच्छाप्रमुखाः क्रमेण यतयस्तिस्रोऽपि सम्पादिता-

एतेषां लक्षणान्यपि सुस्पष्टं प्रतिपादितानि मुनिना:—

अङ्गुष्ठाभ्यां तु तन्त्रीणां स्पर्शनं यत् कलं तु तत् ।
वामेन पीडनं कृत्वा दक्षिणेनाहतिस्तलम् ॥ ९० ॥
सव्याङ्गुष्ठप्रहारश्च निष्कोटितमिहोच्यते ।
सव्याप्रदेशिनीघातमुन्मृष्टमितिसंज्ञितम् ॥ ९१ ॥
सर्वाङ्गुलिसमाक्षेपात् रेफ इत्यभिधीयते ।
कनिष्ठाङ्गुष्ठकाभ्यां तु दक्षिणाभ्यामधोगतम् ॥ ९२ ॥
तन्त्रीषु त्रिप्रकारं वाद्यवमृष्टमिति स्मृतम् ।
कनिष्ठाङ्गुष्ठसंयुक्तं पुष्पमित्यभिधीयते ॥ ९३ ॥
तलस्थानेऽधरन्यासस्तथानुस्वनितमुच्यते ।
गुर्वक्षरैकतन्त्र्यां तु बिन्दुरित्यभिसंज्ञितः ॥ ९४ ॥
व्यासस्समासादेषामनुबन्धः सार्वधातुको ज्ञेयः ।

(नाट्यशास्त्रे २९ अध्याये)

'समग्रापि वादनरीतिः विपञ्च्यां ताड्यमानायां सद्यः स्फुटतां भजते इति भावः' । तथा च लयः तालान्तरालवर्ती कालः । उक्तञ्च—

तालान्तरालवर्ती यः स कालो लय उच्यते ।
त्रिविधः स च विज्ञेयो द्रुतो मध्यो विलम्बितः ॥

द्रुतमध्यलम्बितपरिच्छिन्नः । द्रुतश्च मध्यश्च लम्बितश्च तैः परिच्छिन्नः सम्यक् कृतप्रभेदः त्रिधा त्रिप्रकारेण विस्पष्टः विशेषेण स्पष्टीकृतो लक्ष्यते । न केवलं विपञ्चीवादने एव कौशलं स्फुरति, अपि तु, द्रुतादिकः त्रिविधोऽपि लयः स्फुटं प्रतीयमानः सन् वादनचातुरी प्रकर्षयतीति भावः ।

गोपुच्छाप्रमुखाः समा स्रोतोवहा गोपुच्छा इति तिस्रोऽपि त्रिप्रकारका अपि यतयः तालानां विरामरूपाः यदुक्तं—

"तालच्छन्दोवगतिविषये वाग्यते यो विरामः

(विलम्ब हो) यहाँ साफ तौर से मालूम पड रहे है । गोपुच्छा आदि तीनों तरह की (१)यति

(१) तालका जहां विराम होता है, उसे यति कहते हैं । इसके तीन प्रकार होते हैं–समा, स्रोतोवहा तथा गोपुच्छा ।

तत्त्वौघानुगताश्च वाद्यविधयः सम्यक् त्रयो दर्शिताः ॥ १५ ॥

वाद्यैर्हीनः श्रवणसुभगो नामतः सा यतिः स्यात्" ।
लयगानाद् यतिः सम्यक् कथिता दत्तिलादिभिः ।
समा स्रोतोवहा चैव गोपुच्छा चेति सा त्रिधा ॥

क्रमेण सम्यक् संवादिताः सम्मादिताः । गीतेऽस्मिन् यथास्थानं यतित्रयमपि सम्मादितमित्यर्थः । तत्त्वौघानुगताः तत्त्वात्मकं, ओघात्मकं, अनुगतात्मकं चेति त्रयोऽपि वाद्यविधयः त्रिविधोऽपि वाद्यप्रकारः सम्यक् सुचारुरूपेण दर्शिताः प्रकटीकृताः सन्ति । वीणावाद्यस्य त्रैविध्यं यथा—

त्रिविधं वैणवं वाद्यं कर्तव्यं गीतसंश्रयं तज्ज्ञैः ।
तत्त्वं[१] तथानुगत[२]मोघ[३]श्चानेककरणसंयुक्तम् ॥ १०२ ॥

तल्लक्षणानि च यथा तत्रैव—

लयतालवर्णपदयतिगीत्यक्षरभावकं भवेत् तत्त्वम् ।
गीतं च यदनुगच्छेदनुगतमित्युच्यतेव वाद्यम् ॥ १०३ ॥
आविद्धकरणबहुलं उपर्युपरिपाणिकं द्रुतलयं च
अनपेक्षितगीतार्थं वाद्यं चौघं बुधैर्ज्ञेयम् ॥ १०४ ॥
स्थिते तत्त्वं प्रयोक्तव्यं मध्ये चानुगतं भवेत् ।
द्रुते चौघं प्रयुञ्जीयादेष वाद्यगतो विधिः ॥ १०५ ॥

(नाट्यशास्त्रे अ० २९ पृ० ३३८)

अतएव सर्वेषां तालल्यवाद्यवादनविधीनामेकत्र समग्रतया विशदप्रतिपादनात् गीतमिदममतीवाश्चर्यकरमिति स्थाने जीमूतवाहनस्य हृदि आश्चर्यलहरी-

---

इस गीत में ठीक स्थान पर रखी गई है । तथा तत्त्व-ओघ—अनुगत नामक तीनों प्रकार के बजाने का ढंग इस गाने में दिखलाया गया है(१) ॥ १५ ॥

---

(१) इस पद्यमें शास्त्रीय गान तथा वाद्य विधान का वर्णन किया गया है । कविने संगीत शास्त्र विषयक अपना प्रकृष्ट पाण्डित्य अच्छे ढंग से दिखलाया है । सारांश यही है कि गाने और बजाने में जिन २ गुणों की आवश्यकता होती है, वे सब इसमें विद्यमान हैं । यही पद्य नाटककार के अन्य ग्रन्थ प्रियदर्शिका में भी पाया जाता है । इससे ग्रन्थकार की सङ्गीत-शास्त्रकी प्रवीणता भली भाँति प्रकटित होती है ।

चेटी । [सप्रणयम्] भट्टिदारिए ! चिरं क्खु वादअंतीए कुदण-परिस्समो अग्गहत्थाणं ? (भर्तृदारिके ! चिरं खलु वादयन्त्याः कुतो न परिश्रमोऽग्रहस्तयोः ?)

नायिका । [साधिक्षेपम्] हञ्जे ! कुदो मे देईए पुरदो वीणं वादअन्तीए अग्गहत्थाणं परिस्समो ! (हञ्जे ! कुतो मे देव्याः पुरतो वीणां वादयन्त्या अग्रहस्तयोः परिश्रमः !)

चेटी । भट्टिदारिए ! णं भणामि किं एदाए णिक्करुणाए पुरदो वादेण ? जा एत्तिअं कालं कण्णआजणदुक्करेहिं णिअमोवासणेहिं आराधअन्तीए अज्जवि ण दे पसादं दंसेदि । (भर्तृदारिके ! ननु भणामि किमेतस्या निष्करुणायाः पुरतो वादितेन ? या एतावन्तं कालं कन्यकाजनदुष्करैर्नियमोपासनैराराधयन्त्या अद्यापि न ते प्रसादं दर्शयति ।)

समुल्लासः । नाटक्कारस्य हर्षदेवस्य सङ्गीतकलायां नितान्तं निष्णातता (१)पद्येनानुना स्फुटतया सूच्यते । शार्दूलविक्रीडितं वृत्तम् ॥ १५ ॥

भर्तृदारिके ननु भणामीति । निष्करुणायाः दयारहितायाः एतस्याः देव्याः पुरतः अग्रे वादितेन किम् वीणावादनं निरर्थकमेव । एतावन्तं कालं अतिदीर्घकालं व्याप्य (कालाध्वनोरत्यन्तसंयोगे इति द्वितीया) । कन्यकाजनदुष्करैः 'कन्या त्वजातोपयमा सलज्जा नवयौवना' इति विश्वनाथः । अनुकम्पार्हाः कन्याः इति कन्यकाः (अनुकम्पार्थे कन्) कन्यकाजनेन दुष्कराणि दुःखेन साध्यानि । तैः नियमोपवासनैः नियमाः विविधानि व्रतानि (नियमो मन्त्रणायां च प्रतिज्ञानि-

---

चेटी— (प्रेम के साथ) भर्तृदारिके ! बहुत देरसे तुम यह वीणा बजा रही हो । क्या तुम्हारी उङ्गलियां थक नहीं गई हैं ?

नायिका—(उसे झिड़कती हुई) आये ! देवी के सामने मैं वीणा बजा रही हूं । भला मेरी उङ्गलियां थकने क्यों लगीं ?

चेटी—भर्तृदारिके । मैं तो यह कहती हूं कि इस दयाहीन देवी के सामने वीणा बजाने से क्या लाभ । जो सुकुमार कन्याजनों के लिये अत्यन्त कठिन नियम और उपवासों से उसकी इतने दिनों तक पूजा करने वाली भी तुम्हारे ऊपर अब तक अपनी प्रसन्नता नहीं दिखलाती ।

---

(१) प्रियदर्शिकायास्तृतायेऽङ्केऽपि पद्यमिदं समुपलभ्यते । सङ्गीतज्ञानप्रचुरोऽस्मिन् पद्ये 'गोपुच्छप्रमुखाः' 'आतोद्यानुगताश्चे' त्याद्यशुद्धिबहुलं पाठपङ्क्तीकृत्य श्रीजीवानन्दविद्यासागरेण या खलु विवृतिर्विहिता सा तु नातिसमीचीना ।

विदूषकः । **कण्णआ क्खु एसा, किं ण पेक्खम्ह ?** (कन्यका खल्वेषा, किं न प्रेक्षावहे ?)

नायकः । **को दोषः ? निर्दोषदर्शनाः कन्यका भवन्ति । किन्तु कदाचिदस्मान् दृष्ट्वा बालभावसुलभलज्जासाध्वसान्न चिरमिह तिष्ठेत्, तदनेनैव लताजालान्तरेण पश्यावः ।**

विदूषकः । **एव्वं करेम्ह ।** (एवं कुर्वः ।) [उभौ पश्यतः]

विदूषकः । [दृष्ट्वा सविस्मयम्] **भो वअस्स ! पेक्ख पेक्ख । महह अच्चरिअं ! ण केवलं वीणाविण्णाणेण्व्व सुहं करेदि । जाव इमिणा वीणाविण्णाणाणुरूवेण रूवेण वि मच्छीएं सुहं उप्पादेदि । का उण एसा ? किं दाव देई ? आहो णाअकण्णआ ? आहो विज्जाहरदारिआ ?**

अये व्रते' इति मेदिनी) तैः उपासनैश्च आराधयन्त्याः सम्यक् पूजयन्त्याः ते तव प्रसादं वरदानादिना अनुग्रहं नैव प्रदर्शयति गौरी । अतः एतस्याः समीपे वीणावादनं निरर्थकमेव इति दास्या आशयः ।

को दोषः इत्यादि । परकलत्रदर्शनमेव दोषावहं भवति । कन्यकाः अपरिणीताः बालिकाः खलु निर्दोषदर्शनाः नास्ति दोषो यस्मिन् एवम्भूतं दर्शनमवलोकनं यासां तथोक्ताः भवन्ति । नहि कन्यानां दर्शने कोऽपि दोष इत्यर्थः ।

बालभावसुलभलज्जासाध्वसात् बालभावेन बालस्वभावेन सुलभा अयत्नसाध्या या लज्जा तया साध्वसं भीतिः, तद्धेतोः ('भीतिर्भीः साध्वस भयम्' इत्यमरः) इह स्थाने सा चिर न तिष्ठेत्, तत् तस्मात् कारणात् । **अनेनैव** लताजालान्तरेण लतानां जालं समूहः । तदेव अन्तरं व्यवधानं तेन 'लतागुल्मान्तर्हितशरीरौ भूत्वा' इति यावत् । एनां पश्यावः ।

विदूषकः—हाँ यह तो कोई कन्या है । हमलोग फिर क्यों न देखें ।

नायकः—कोई दोष नहीं । कन्याओं के देखने में कोई दोष नहीं है । किन्तु कदाचित् हमलोगों को देखकर बालिकाओं में साधारणतया पाये जाने वाली लाज और भय से वह बहुत देर तक यहाँ नहीं ठहर सकती है । अतएव हमलोग इस लताकुञ्ज के भीतर से ही उसे देखें ।

विदूषकः—अच्छा हमलोग ऐसा ही करें । **(दोनों देखते हैं)**

विदूषकः—**(देखकर विस्मय के साथ)** ऐ मित्र । देखो देखो । क्या ही आश्चर्य है । अपनी वीणा की निपुणता से ही यह केवल हमें आनन्दित नहीं करती बल्कि वीणा विज्ञान के अनुरूप अपने सुन्दर रूप से भी हमें आनन्दित कर रही है । यह कौन होगी ! क्या यह कोई

आहो सिद्धकुलसम्भवेत्ति ? (भो वयस्य ! प्रेक्षस्व प्रेक्षस्व । अहह आश्चर्यम् ! न केवलं वीणाविज्ञानेनैव सुखं करोति । यावत् अनेन वीणाविज्ञानानुरूपेण रूपेणापि अक्ष्णोः सुखमुत्पादयति । का पुनरेषा ? किं तावत् देवी ? आहोस्वित् नागकन्यका ? आहोस्वित् विद्याधरदारिका ? आहोस्वित् सिद्धकुलसम्भवेति ?)

नायकः । [सस्पृहमवलोकयन्] **वयस्य ! केयमिति नावगच्छामि । एतत् पुनरहं जानामि ।**

स्वर्गस्त्री यदि तत् कृतार्थमभवच्चक्षुःसहस्रं हरे-
र्नागी चेन्न रसातलं शशभृता शून्यं मुखेऽस्याः स्थिते ।

भो वयस्येति । अनेन वीणाविज्ञानानुरूपेण वीणायाः विज्ञानं वीणावादनकौशलं' तदनुरूपेण तत्तुल्येन लोभनीयेनेत्यर्थः । रूपेण सौन्दर्येण । अक्ष्णोः नयनयोरपि । सुखं प्रीतिं उत्पादयति जनयति । यथास्या वीणावादनं कर्णयोः सुखमास्वादयति तथैव लोकोत्तरा रूपच्छटापि नेत्रयोरानन्दं जनयतीति रूपगुणयोरेकाधिष्ठानं सर्वथा विस्मयकरमिति भावः । 'आहोस्वित्' 'उताहो' इत्येतत् पक्षान्तरस्य वाचकमव्ययद्वयम् ।

नायकः तदन्वयविषये स्वकीयं सन्देहं स्फुटयति **स्वर्गस्त्रीत्यादिना**—यदि इयं पुरतो दृश्यमाना स्वर्गस्त्री स्वर्गलोकाधिवासिनी रमणी भवेत्, तत् हरेः इन्द्रस्य । चक्षुःसहस्रं कृतार्थं कृतः आचरितः अर्थः प्रयोजनं यस्य तथाभूतं सफलमित्यर्थः अभवत् । नेत्रसहस्रेण एनामवलोकयतो देवराजस्य नेत्रबाहुल्यं सफलं भविष्यतीति भावः । नागी चेत्, यदीयं नागलोकवासिनी भवेत्, तर्हि अस्याः मुखे सति, एतस्याः अद्भुतसौन्दर्याकरे आनने विद्यमाने सति, रसातलं पाताललोकः शशभृता शशिना—चन्द्रमसेति यावत् शून्यं विरहितं न स्यात् । अस्याः मुखेनैव पातालस्य चन्द्रवत्ता इति भावः । 'लोकान्तरे कादाचित्कमेव पूर्णचन्द्रसाहित्यं, रसातले तु सर्वदैवेति लोकान्तरात् नागलोकस्य व्यतिरेको व्यज्यते'

देवी है ? या कोई नागकन्या है ? या कोई विद्याधरबालिका है ? अथवा सिद्धकुल में उत्पन्न होने वाली है ।

नायकः—(**अभिलाषा से देखकर**) मित्र ! यह कौन है, यह मैं निश्चय नहीं कर सकता । इतना तो मैं अवश्य जानता हू कि.—

यदि यह कोई दिव्यङ्गना है तो इन्द्र के हजारों नेत्र कृतकृत्य होगये । यदि यह कोई नागकन्या है, तो इसके मुख के वहाँ विद्यमान रहने पर पाताल चन्द्रमा से विहीन नहीं है । यदि

जातिर्नः सकलान्यजातिजयिनी विद्याधरी चेदियं
स्यात् सिद्धान्वयजा यदि त्रिभुवने सिद्धाः प्रसिद्धास्ततः ॥ १६ ॥

विदूषकः । [नायकमवलोक्य सहर्षमात्मगतम्] **दिट्ठिआ चिरस्स दाव कालस्स पडिदो क्खु एसो गोअरे मम्महस्स ।** [आत्मानं निर्दिश्य भोजनमभिनीय] **अहवा णहि णहि, मम एव्व एक्कस्स बम्हणस्स ।** (दिष्ट्या चिरस्य तावत् कालस्य पतितः खल्वेष गोचरे मन्मथस्य । अथवा नहि नहि, ममैव एकस्य ब्राह्मणस्य ।)

इति विमर्शिण्या शिवरामः । इयं विद्याधरी विद्याधरकुलोत्पन्ना चेत्, तर्हि नः अस्माकं जातिः सकलान्यजातिजयिनी सकलां लोकत्रयप्रसृता अन्यजातिं सुरासुरादिजातिं जेतुं शीलमस्याः तथाभूता भविष्यति । निखिलामन्या जातिं जेष्यतीत्यर्थः । यदि सिद्धान्वयजा सिद्धानां देवयोनिविशेषाणां अन्वयात् वंशात् ["अन्ववायोऽन्वयो वंशः" इत्यमरः] जाता स्यात्, ततः एतज्जन्मना एव । सिद्धाः त्रिभुवने । त्रयाणा भुवनानां लोकाना समाहारः इति त्रिभुवन तस्मिन् त्रिष्वपि लोकेषु प्रसिद्धाः विख्याताः भवेयुः । (सिद्धाः प्रागेताहक्कन्यारत्नोत्पत्तिविरहात् अप्रसिद्धाः आसन्, अधुना स्ववंशेऽस्याः सत्त्वात् त्रिभुवने ख्यातिमाप्नुवन्तीति भावः) । अत्र प्रकृतेऽप्रकृतस्य वस्तुनः संशयात् सन्देहालङ्कारः । उक्तं च साहित्यदर्पणे—"**सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः**"

शार्दूलविक्रीडितं नाम छन्दः ॥ १६ ॥

दिष्ट्येति । दिष्ट्या सौभाग्येन । चिरस्य तावत् कालस्य चिरकालानन्तरं मन्मथस्य कामस्य गोचरे विषये पतितोऽसि । शान्तिपथप्रस्थितोऽपि अधुना चिरात् कथमपि भोगसरणिं प्रापितः इत्यर्थः । अथवा ममैव ब्राह्मणस्य गोचरे पतितः अतः परं मदायत्त एवायं भविष्यतीति विदूषकस्य हर्षबीजम् ।

यह कोई विद्याधरी है, तो हमारी (विद्याधर) जाति अन्य सब जातियों को जीतने वाली हो गई और यदि यह सिद्धों के वश में उत्पन्न हुई है, तो सिद्ध लोग आज त्रिभुवन में प्रसिद्ध होगये ॥ १६ ॥

विदूषकः—(नायक को देखकर । हर्ष के साथ, मन ही मन) बहुत दिनों के बाद आज यह सौभाग्य से कामदेव के वशीभूत हुआ है। **(अपने को दिखलाकर भोजन का अभिनय करते हुये)** अथवा, नहीं नहीं । हमारे केवल एक ब्राह्मण के (वशीभूत हुआ है)।

चेटी । [सप्रणयम्] भट्टिदारिए ! णं भणामि, किं एदाए णिक्करुणाए पुरदो वाइदेण ? (भर्तृदारिके ! ननु भणामि, किमेतस्या निष्करुणायाः पुरतो वादितेन ?) [इति वीणामाक्षिपति]

नायिका । [सरोषम्] हञ्जे ! मा भगवदिं गोरिं अधिक्खिव । णं अज्ज किदो मे भगवदीए पसादो । (हञ्जे । मा भगवतीं गौरीमधिक्षिप । नन्वद्य कृतो मे भगवत्या प्रसादः ।)

चेटी । [सहर्षम्] भट्टिदारिए ! कहेहि दाव कोरिसो ? (भर्तृदारिके ! कथय तावत् कीदृशः ?)

नायिका । हञ्जे । जाणामि, अज्ज सिविणए एदं एव्व वीणं वादअंती भगवदीए गोरिए भणिदम्हि,—"वच्छे मलअवदि ! परितुट्ठम्हि तुह एदिणा वीणाविण्णाणादिसएण, इमाए अ बालजणदुक्करए असाहारणाए ममोवरि भत्तिए । ता विज्जाहरचक्कवट्टी अचिरेण ज्जेव पाणिग्गहणं दे णिव्वत्तइस्सदि" त्ति । (हञ्जे ! जानामि, अद्य स्वप्ने एतामेव वीणां वादयन्ती भगवत्या गौर्या भणिताऽस्मि—"वत्से मलयवति ! परितुष्टाऽस्मि तवैतेन वीणाविज्ञानातिशयेन, अनया च बालजनदुष्करया असाधारणया

हञ्जे जानामीति । 'हञ्जे' इति चेट्या आमन्त्रणपदम् । यथोक्तं नाट्यशास्त्रे—

समानाभिस्तथा सख्यो हलाभाष्याः परस्परम् ।
प्रेष्या हञ्जेति वक्तव्या स्त्रिया या तूत्तमा भवेत् ॥

बालजनदुष्करया बालजनेन अपरिणतवयस्केन अतिकोमलाङ्गेनेति यावत् । दुष्करया दुःखेन कर्तुं शक्यया ।

चेटी—(प्रेम के साथ) भर्तृदारिके ! मैं कह रही हूँ कि इस दयारहित देवी के सामने वीणा बजाने से क्या लाभ । (वीणा को खींच लेती है ।)

नायिका—(क्रुद्ध होकर) भगवती गौरी की निन्दा मत करो । आज भगवती ने मुझे वरदान दिया है ।

चेटी—(प्रसन्न होकर) भर्तृदारिके ! कहो, किस तरह का वरदान ।

नायिका—मैं जानती हूँ कि सपने में जब मैं यही वीणा बजा रही थी, तब भगवती ने आकर मुझसे कहा, "वत्से ! मलयवती तुम्हारी वीणा बजाने की इस निपुणतासे तथा कन्याओं के लिये दुष्कर इस असाधारण भक्ति से मैं संतुष्ट हूँ । इसलिये विद्याधरों का चक्रवर्ती

ममोपरि भक्त्या ! तद् विद्याधरचक्रवर्त्ती अचिरेणैव ते पाणिग्रहणं निर्वर्त्तयिष्यति" !)

चेटी । [सहर्षम्] **भट्टिदारिए ! जइ एव्वं, ता कीस सिविणअं इमं भणीअदि ? णं हिअअत्थिदो वरो देईए दिण्णो ।** (भर्तृदारिके ! यद्येवं, तत् कस्मात् स्वप्नः अयं भण्यते ? ननु हृदयस्थितो वरो देव्या दत्तः)

विदूषकः । [श्रुत्वा] **भो वअस्स ! अवसरो क्खु एसो अह्माणं देईदंसणस्स । ता एहि उवसप्पम्ह ।** (भो वयस्य ! अवसरः खल्वेषोऽस्माकं देवीदर्शनाय । तदेहि उपसर्पावः ।)

नायकः । **न तावत् प्रविशामि ।**

विदूषकः । [अनिच्छन्तमपि नायकं बलादाकृष्य उपसृत्य] **सोत्थि भो·**

विद्याधराणां चक्रवर्ती चक्रं राजमण्डलं वर्तयतीति चक्रवर्ती राजाधिराजः । विद्याधरचक्रवर्तीति पश्चादवस्था प्रति पूर्वनिर्देशः । तदानीं जीमूतवाहनस्य तत्प्रदानाधिष्ठानात् । वाजपेययाजी पुत्रं जनिष्यते इतिवत् । यः पाणिग्रहणं निर्वर्तयिष्यति स चक्रवर्ती च भविष्यतीति वाक्यार्थः । **अचिरेण** शीघ्रमेव । तव पाणिग्रहणं निर्वर्तयिष्यति । शीघ्रमेव तेन सह तवानुरूपो विवाहः सम्पन्नो भविष्यतीत्यर्थः ।

भट्टिदारिए इति । भर्तृदारिके ! राजपुत्रि ! ।

"राजा भट्टारको देवस्तत्सुता भर्तृदारिका" इत्यमरः ।

'वाच्या प्रकृतिभी राज्ञः कुमारी भर्तृदारिका' इति नाटचशैल्यनुरोधात् दास्यादिकाः सर्वाः राजपुत्री भर्तृदारिकेति भणन्ति । अतोऽयं सम्बोधनशब्दः प्रचुरतयात्र प्रयुक्तो दृश्यते । यदि एतादृशः मनोऽभिलषितवरलाभः तदा कथं तं गुरुतरवरलाभं स्वप्नशब्देन लघूकरोषि इति चेटीवचसामभिप्रायः ।

राजा बहुत शीघ्र ही तुम्हारा पाणिग्रहण करेगा" ।

चेटी—(प्रसन्नता के साथ) राजकुमारी, यदि ऐसा है तो इसे तुम स्वप्न क्यों कहा रही हो । तब तो भगवती ने तुम्हारे हृदय में रहने वाला वर (पति) ही दे दिया है ।

विदूषकः—(सुनकर) मित्र ! यही अवसर हम लोगों के देवी के दर्शन करने का है । इसलिये आओ हम लोग समीप चलें ।

नायकः—मैं तो नहीं जाऊंगा ।

विदूषकः—(नहीं चाहते हुये भी नायकको हठपूर्वक ले जाता है, समीप पहुँच

दिए । भोदि ! सच्चकं ज्जेव चदुरिआ भणादि, वरो एव्व सो देईए । दिण्णो । (स्वस्ति भवत्यै भवति ! सत्यमेव चतुरिका भणति, वर एव स देव्या दत्तः ।

नायिका । [सभाध्वसमुत्तिष्ठन्ती नायकमुद्दिश्य], हज्जे । को णु क्खु एसो ? (हञ्जे ! कोनु खल्वेषः ?)

चेटी । [नायकं निरूप्यापवार्य] इमाए अणण्णसरिसाए आकिदीए एसो सो भअवदोए पसादीकिदो त्ति तक्केमि । (अनया अनन्यसदृश्या आकृत्या एष स भगवत्या प्रसादीकृत इति तर्कयामि ।)

नायिका [सस्पृहं सलज्जञ्च नायकमवलोकयति ।]

नायकः । तनुरियं तरलायतलोचने !

श्वसितकम्पितपीनघनस्तनि ! ।

श्रममलं तपसैव गता पुनः

इमाए इति । अनया अनन्यसदृश्या लोकोत्तरेण अलौकिकेनेत्यर्थः । अकृत्या शरीरेण एषः पुरतो दृश्यमानः स विद्याधरचक्रवर्ती भगवत्या गौर्या प्रसादीकृतः अनुग्रहस्वरूपेण प्रदत्त इति चिन्तयामि ।

नायिकायाः लज्जासुलभामवस्थामवलोक्य जीमूतवाहनः चाटुगर्भं वचनमभिधत्ते तनुरियमित्यादिनाः—हे तरलायतलोचने ! तरले अस्मदाकस्मिकागमनजात् त्रासात् चञ्चले आयते दीर्घे च लोचने नयने यस्याः तत्सम्बोधने तथोक्ते । श्वसितकम्पितपीनघनस्तनि श्वसितेन निरन्तरं निःसरता श्वासवायुना । कम्पितौ पीनौ स्थूलौ घनौ कठिनौ च स्तनौ यस्याः तथाभूते (स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् इति सूत्रेणप ङिकौ ङीष् प्रत्ययः) तथाच हे संभ्रमकारिणि ! सम्भ्रमं सहसागन्तुकदर्शनज त्रासं करोति या तथाभूते । इयं ते तनुः कोमलं शरीरं । तपसा एव तपश्चरणेन एव । अलं पर्याप्तम् (अव्ययं विशेषणञ्चेदम्)

कर) आपका कल्याण हो । चतुरिका ठीक कहती है । देवीने यह वर ही दिया है ।

नायिका—(डर से उठती है, नायककी ओर दिखाकर) ये चेटी ! यह कौन है ?

चेटी—(नायकको देखकर) इस अलौकिक आकृति से जान पडता है कि भगवती के द्वारा दिये गये प्रसाद स्वरूप यही महानुभाव हैं ।

नायिका—(अभिलाषा और लज्जा के साथ नायक को देखती है)

नायकः—हे चञ्चल और दीर्घनेत्र वाली ! सांस लेने से तुम्हारे स्थूल और कठिन स्तन काँप रहे हैं । यह तुम्हारी पतली देह तपस्या से ही पूरी तरह श्रान्त हो चुकी है । ये सम्भ्रम-

किमिति सम्भ्रमकारिणि ! खिद्यते ? ॥ १७ ॥

नायिका । [अवाक्य] हञ्जे ! अदिसद्धसेण ण सक्कुणोमि पदस्स अहिमुही ठादु । (हञ्जे ! अतिसाध्वसेन न शक्नोमि एतस्याभिमुखी स्थातुम्।) [नायकं तिर्यक् सलज्जञ्च पश्यन्ती किञ्चित् पराङ्मुखी तिष्ठति] ।

चेटी । भट्टिदारिए ! किं पदम् ? (भर्तृदारिके ! किमेतत् ?)

नायिका । हञ्जे ! ण सक्कुणोमि पदस्स आसण्णे चिट्ठिदुं । ता एहि अण्णदो गच्छम्ह । (हञ्जे ! न शक्नोमि एतस्यासन्ने स्थातुम् । तदेह्यन्यतो गच्छावः ।) [उत्थातुमिच्छति ।]

विदूषकः । भो ! भाअदि क्खु एसा ! मम पठिअविज्जं विअ मुहुत्तअं धारेमि (भो ! बिभेति खल्वेषा ! मम पठितविद्यामिव मुहूर्त्तं धारयामि ।)

("अलं भूषणपर्याप्तिशक्तिवारणवाचकम्" इत्यमरः) श्रमं खेदम् गता प्राप्ता । (शीतातपसहिष्णुभिः मुनिभिः साध्येन, दिवानिश कन्यकाना देहमनःपीडावहेन तपश्चरणेनैव ते सुकुमारं शरीरं श्रान्तं जातम् ; इति भावः) श्रमसर्वस्वसम्पादनाय इदमेवालम् , किमन्येनेति एवकारेण स्फुट ध्वन्यते । पुनः किमिति केन हेतुना विद्यसे ? तपक्लान्तं शरीरं कस्मात् हेतोः पलायनप्रयासेन आयास्यते; अतः खेदं सम्भ्रमञ्च निरस्य सुखमास्वेति नायकस्याशयः । द्रुतविलम्बितं नाम वृत्तं तल्लक्षणं यथा वृत्तरत्नाकरेः—'द्रुतविलम्बितमाह नभौ भरौ' इति ॥ १७ ॥

भो भोअदि इति । मम विदूषकस्य पठितविद्यामिव पठितां अभ्यस्ता विद्यामिव एनां मुहूर्तं अल्पसमयं यावत् धारयामि तव पुरतः स्थापयामि तस्याः गम-

---

कारिणी, जल्दी में बिना बूझे काम करने वाली ! हमारे यहाँ आने से अपने शरीर को तुम और कष्ट क्यों दे रही हो ॥ १७ ॥

नायिका—(हटकर) अत्यन्त डर के कारण मैं उसके सामने खड़ी नहीं हो सकती। (नायक को लज्जा के कारण तिरछी आंखों से देखती हुई मुंह नीचे किये खड़ी रहती है)

चेटी—राजकुमारी ! यह क्या (तुम भयभीत क्यों हो रही हो ?) ।

नायिका—ऐ चेटी ! मैं इसके समीप खड़ी नहीं रह सकती। इसलिये आओ हम लोग अलग चलें। (उठना चाहती है)

विदूषकः—ऐं ! यह तो हम लोगों से डर रही है। मैं इसे पढ़ी हुई विद्या की तरह एक मुहूर्त के लिये यहाँ रोक रखता हूं।

नायकः । को दोषः ?

विदूषकः । **भोदि ! किं एत्थ तुह्माणं तवोवणे ईरिसो आआरो ?—जेण अदिहो आअदो वा आमेत्तएण वि ण संभावीअदि ?** (भवति ! किमत्र युष्माकं तपोवने ईदृश आचारः ?—येनातिथिरागतो वाङ्मात्रेणापि न सम्भाव्यते ?)

चेटी । [नायिका दृष्ट्वा आत्मगतम्] **अणुरज्जदि विअ एत्थ एदाए दिट्ठी । भोदु एव्वं दाव भणिस्सं । [प्रकाशम्] भट्टिदारिए ! जुत्तं भणादि बम्हणो । उइदो क्कु दे अदिहिजणसक्कारो । ता किं ईरिसे महाणुभावे पडिवत्तिमूढा चिट्ठसि ? अहवा चिट्ठ तुमं, अहं एव्व जधा-**

ननिरोधादिति भावः । विदूषकः क्षणमात्रेणैव सर्वं पठितं विस्मरति अतः तदधीता विद्या यथा स्वल्पकालमेव तिष्ठति तथैव मलयवत्या अपि क्षणं तत्र स्थितौ विदूषकस्य प्रयत्नः प्रवर्तते ।

भोदि इति । अतिथिः अभ्यागतः । अतति सततं गच्छतीति, न विद्यते (द्वितीया) तिथिः यस्येति वा सोऽतिथिः । तथाच निरुक्ते (४, ४) यास्कः—अभ्यतितो गृहान् भवति । अभ्येति तिथिषु परकुलानीति वा, परगृहाणीति वा । वाङ्मात्रेणापि केवलया वाचापि [वाच्शब्दात् मयट्प्रत्ययः] आगतः अतिथिः न सम्भाव्यते नैव सत्क्रियते । उपकरणाभावे मधुरया वाचापि गृहस्थैरतिथीनां सत्कारः कर्तव्य इति समुदाचारः । यथा चोक्तं—

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥

एतस्मिन्नवसरे नायिकया लज्जया तदकरणात् विदूषकप्रभस्यावकाशः ॥

नायकः—इसमें क्या दोष है ।

विदूषकः—क्या आपके तपोवन में ऐसे ही आचार हैं कि आप आये हुये अतिथि की शब्दों से भी अभ्यर्थना नहीं करते ?

चेटी—**(नायिका को देखकर, आप ही आप)** राजपुत्री की दृष्टि इस पुरुष में अनुरक्त सी जान पड़ती है । अच्छा मैं इस तरह से बातचीत करूँगी । **(सबके सामने)** राजपुत्री यह ब्राह्मण ठीक कह रहा है । अतिथि का सत्कार करना तुम्हारे लिये उचित ही है । तब ऐसे महानुभाव के सत्कार करने के विषय में तुम मूढ़ सी क्यों खड़ी हो । अथवा तुम

णुरूवं करइस्सं । [नायकं निदिश्य] सामदं अज्जस्स ? आसणपरिग्गहेण अलङ्करेदु अज्जो इमं पदेसं । (अनुरज्यत इवात्रैतस्या दृष्टिः । भवतु एवं तावत् भणिष्यामि । भर्तृदारिके ! युक्तं भणति ब्राह्मणः । उचितं खलु ते अतिथिजनसत्कारः । तत् किमीदृशे महानुभावे प्रतिपत्तिमूढा तिष्ठसि ? अथवा तिष्ठ त्वम् , अहमेव यथाऽनुरूपं करिष्यामि । स्वागतमार्य्यस्य ? आसनपरिग्रहेण अलङ्करोत्वार्य्य इमं प्रदेशम् ।)

विदूषकः । **भो वअस्स ! सोहणं एसा भणादि । उवविसिअ एत्थ मुहुत्तअं वीसमम्ह । (भो वयस्य ! शोभनमेषा भणति । उपविश्यात्र मुहूर्त्तं विश्राम्यावः ।)**

नायकः । **युक्तमाह भवान् । [उभावुपविशतः] ।**

नायिका । [चेटीमुद्दिश्य] **अइ परिहाससीले ! मा एवं करेहि । कदाचि कोवि तावसो पेक्खदि, तदो मं अविणीदेत्ति संभावइस्सदि ।**

अनुरज्यदि इति । एतस्याः मलयवत्याः दृष्टिः अत्र अस्मिन् महापुरुषे अनुरज्यतीव अनुरागं बध्नातीव लक्ष्यते । कस्मात् कारणात् अस्मिन् महानुभावे महान् अनुभावः प्रभावो यस्य तथाभूते । प्रकृष्टतेजोशालिनि पुरतो वर्तमाने एतस्मिन् महापुरुषे इत्यर्थः । प्रतिपत्तिमूढा प्रतिपत्तौ गौरवे 'अभ्यर्थनादिसमादरकरणे' इत्यर्थः । ['प्रतिपत्तिः पदप्राप्तौ प्रकृतौ गौरवेऽपि च" इति मेदिनी] मूढा अनभिज्ञा इव तिष्ठसि ? राजपुत्री भूत्वा विदिताखिलाचारापि त्वं कथं शिष्टाचारग्रहणपराङ्मुखी भवसीत्यर्थः ।

आसनपरिग्रहणे आसनस्य स्वीकरणेन आसने उपविश्य इत्यर्थः । आर्य्य इमं प्रदेशं स्थानं अलङ्करोतु विभूषयतु । दयया आसने उपविश्यतामित्यर्थः ।

खड़ी रहो । मैं ही उचित काम किये देती हूं (**नायक से**) आपका स्वागत है । आसन को स्वीकार कर आप इस स्थान को अलङ्कृत कीजिये ।

विदूषकः—मित्र ! यह बहुत ठीक कह रही है । यहाँ बैठ कर हम लोग क्षण भर विश्राम् करें ।

नायकः—तुमने ठीक ही कहा । (**दोनों बैठते हैं**)

नायिका—(**चेटी से**) तुम्हें परिहास बहुत प्रिय है । ऐसा मत करो । शायद कोई तपस्वी देख लेगा तो मुझे उद्दण्ड समझेगा । (**तब एक तपस्वी प्रवेश करता है**)

(अयि परिहासशीले ! एवं कुरु । कदापि कोऽपि तापसः प्रेक्षते, ततो मामविनीतेति सम्भावयिष्यति ।) [ततः प्रविशति तापसः] ।

तापसः । आज्ञापितोऽस्मि कुलपतिना कौशिकेन, यथा,—"वत्स शाण्डिल्य ! पितुराज्ञया सिद्धराजमित्रावसुर्भविष्यद्विद्याधरचक्रवर्त्तिनं कुमारजीमूतवाहनमिहैव मलये पर्वते क्वापि वर्त्तमानं भगिन्या मलयवत्या वरहेतोर्द्रष्टुमद्य गतः । तञ्च प्रतीक्षमाणाया मलयवत्याः कदाचित् मध्यन्दिनसवनवेलावधिरतिक्रामेत्, तदेनामाहूयागच्छ" इति । तत् तपोवनगौरीगृहमेव गच्छामि । [परिक्रम्य भूमिं निरूप्य सविस्मयम् ।]

अह इति । अविनीता=दुःशीला ।

आज्ञापितोऽस्मीति । कुलपतिः—

मुनीनां दशसाहस्रं योऽन्नपानादिपोषणात् ।
अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः ॥

कुलपतिभूतेन कौशिकेन अस्मदुपाध्यायेन आज्ञापितोऽस्मि आदिष्टोऽहम् । तं प्रतीक्षमाणायाः सोदरागमनं प्रतिपालयन्त्याः मलयवत्याः । कदाचित् प्रमादात् मध्यन्दिनसवनविधिः मध्यन्दिने मध्यान्हे कर्तव्य यत् सवनं स्नानं । ["सवनं त्वध्वरे स्नाने सोमनिर्दलनेऽपि च" इति मेदिनी] तस्य विधिः अनुष्ठानं अतिक्रामेत् व्यतीतो भवेत् ।

तापसः—कुलपति(१) कौशिक ने मुझे आज्ञा दी है कि वत्स शाण्डिल्य !।पिता की आज्ञा से सिद्धराज मित्रावसु इसी मलयपर्वत के किसी प्रदेश में रहने वाले, विद्याधरों के सम्राट् होनेवाले, कुमार जीमूतवाहन को अपनी बहिन मलयवती के लिये वर निश्चित करने के विचार से आज ही देखने गये हैं । उनकी प्रतीक्षा करते हुये मलयवती को शायद दोपहर की स्नान वेला बीत जाय । इसलिये उसे बुला कर यहाँ लावो । इसलिये मैं पार्वती के मन्दिर में जा रहा हूं । (घूम करके पृथ्वी को देखकर, विस्मय के साथ) किस पुरुष के पैरों के चिह्न इस धूलीमय प्रदेश पर पड़े हुये हैं जिनसे उसके चक्रवर्त्ती होने की सूचना मिल रही

(१) कुलपति उस ऋषि को कहते हैं जो दस हजार विद्यार्थियों को पढ़ाता है।। साथ ही साथ उनके भोजन वस्त्र की भी व्यवस्था करता है ।

मुनीनां दशसाहस्रं योऽन्नपानादिपोषणात् । अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः ॥

अये ! कस्य पुनरियं पांशुले भूप्रदेशे प्रकाशचक्रचिह्ना पदपङ्क्तिः ? [अग्रतो जीमूतवाहनं निर्दिश्य] । **नूनमस्यैवेयं महापुरुषस्य । तथाहि,—**

उष्णीषः स्फुट एष मूर्द्धनि विभात्यूर्णेयमन्तर्भ्रुवो-
श्चक्षुस्तामरसानुकारि हरिणा वक्षःस्थलं स्पर्द्धते ।
चक्राङ्कश्च यथा पदद्वयमिदं मन्ये तथा कोऽप्ययं

अये आश्चर्येबोधकमव्ययमिदम् । कस्य पुरुषस्य इयं पांसुलप्रदेशे (पांसवो विद्यन्ते अस्मिन्निति पांसुलः । पांसुशब्दात् लच् प्रत्ययः) धूलिमयः चासौ प्रदेशः च अस्मिन् धूलिप्रचुरेऽस्मिन् स्थाने । प्रकाशितचक्रवर्तिचिन्हा प्रकाशितानि स्फुटं दृश्यमाणानि चक्रवर्तिनः राजाधिराजस्य चिह्नानि छत्रकुलिशादीनि लक्षणानि यस्याः तथोक्ता । पदपङ्क्तिः चरणाङ्कराजिः दृश्यते ? ("पद शब्दे च वाक्ये च व्यवसायप्रदेशयोः । पादतच्चिह्नयोः स्थानत्राणयोरङ्घ्रवतुनो"रिति मेदिनी) ।

तापसो महापुरुषत्वसूचकानि धूलावुद्धतानि तान्येव लक्षणानि वर्णयतिः— **उष्णीष** इत्यादि । एषः स्फुटः स्पष्टं लक्ष्यमाणः । उष्णीषः चिन्हविशेषः ("उष्णीषस्तु शिरोवेष्टे किरीटे लक्षणान्तरे" इति मेदिनी) उष्णीषबन्धस्थाने ललाटोपरि पट्टबन्धरेखा उष्णीषः कथ्यते इति शिवरामः । मूर्ध्नि मस्तके यस्मात् विभाति शोभते । भ्रुवोः अन्तः भ्रूमध्यभागे स्फुटं प्रतीयमाना इयं ऊर्णा आवर्ताकार सूक्ष्मलोममय चक्रवर्तित्वव्यञ्जकं चिन्हं—

ऊर्णा मेषादिलोम्नि स्यात्, आवर्ते चान्तरा भ्रुवोरित्यमरः ॥
ऊर्णा भ्रूमध्यागावर्ते तन्तौ मेषादिलोमसु इति च वचनात् ॥

विभातीति शेषः । चक्षुः नयनं तामरसानुकारि तामरसं रक्तकमलं (पङ्केरुहं तामरसमित्यमरः) अनुकरोति अनुसरति तथाभूतं रक्तवर्णता दधानं सौभाग्यव्यञ्जकं वर्तते । वक्षःस्थलं उरः हरिणा सिंहेन स्पर्धते तत्सादृश्यमाप्नोति यथा सिंहो विशालवक्षाः भवति तद्वदयमपीत्यर्थः । शिवरामस्तु विष्णवर्थमनुसृत्य हरिपदेन तद्वक्षोलक्ष्मणया लक्ष्मीविलासादियोग्यतचातुर्यसर्वस्व स्वीकृतमिति वदति । यथा इदं धूलावुद्धतं पदद्वयं चक्राङ्क चक्रचिह्नितं विभाति तथाहं मन्ये सम्भावयामि

है । (**आगे जीमूतवाहन को देखकर**) अवश्य ही इसी महानुभाव के ये पदचिह्न हैं ।

मस्तक के ऊपर यह उष्णीष (पगड़ी) का सा चिह्न दिखाई दे रहा है । भौंहोंके बीच में भौंरी का चिह्न है । आँख रक्त कमल की तरह लाल है । छाती सिंह के वक्षःस्थल की स्पर्धा करने वाली है । पैरों में चक्र का चिह्न है । इसलिये मुझे जान पड़ता है कि यह महापुरुष

नो विद्याधरचक्रवर्त्तिपदवीमप्राप्य विश्राम्यति ॥ १८ ॥

अथवा कृतं सन्देहेन । व्यक्तमेतेनैव जीमूतवाहनेन भवितव्यम् । [मलयवतीं निरूप्य] अये ! इयमपि राजपुत्री । [उभौ विलोक्य] चिरात् खलु युक्तकारी विधिः स्यात् । [उपसृत्य नायकं निर्दिश्य ।] स्वस्ति भवते ।

कोऽप्ययं पुरुषः । विद्याधरचक्रवर्तिपदवीं विद्याधराणां चक्रवर्तिनः सम्राजः पदवीं पदम् अप्राप्य अलब्ध्वा नो विश्राम्यति नैव निवर्तते । उष्णीषादिभिरेभिः लक्षणजातैः स्फुटमनुमीयते यदयं महापुरुषः अवश्यमेव विद्याधराणां चक्रवर्ती भविष्यतीति भावः । तथा च सामुद्रिकशास्त्रे वचनम्—

अतिरक्तः करो यस्य ग्रथिताङ्गुलिको मृदुः ।
चापाङ्कुशाङ्कितः सोऽपि चक्रवर्ती भवेद् ध्रुवम् ॥
भ्रुवोर्मध्ये यस्य रोम भालश्चैव सुविस्तृतः ।
करे च चरणे चिह्नं चक्रादि, स हि राज्यभाक् ॥

भगवतो बुद्धदेवस्य शरीरे एवमेव चक्रवर्तिचिह्नानि वर्णयति महाकविरश्वघोषः स्वबुद्धचरिते—

चक्राङ्कपाणिं स तथा महर्षिर्जालावनद्धाङ्गुलिपाणिपादम् ।
सोर्णाभ्रुवं वारणवस्तिकोशं सविस्मयं राजपुत्रं ददर्श ॥
शार्दूलविक्रीडितं वृत्तम् ॥ १८ ॥

चिरात् खलिवति । विधिः कार्यजातस्य विधाता दैवमिति यावत् ("विधिर्विधानेदैवे च" इत्यमरः) चिरात् बहुदिवसानन्तरं खलु युक्तकारी स्यात् अनुरूपयोजको भवेत् यदि इदं अन्योन्यारूपं परस्परस्पृहणीयसौन्दर्यं युगलं द्वन्द्वं घटयेत् संयोजयेत् तर्हि बहोः कालात् परं तुल्ययगुणं वधूवरं समानयन् विसदृशयोगनिबन्धनं सम्यक् प्रक्षालयेत् इत्यर्थः । तथा च कालिदासः—

परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन् द्वये रूपविधानयत्नः पत्युः प्रजानां विफलोऽभविष्यत् ॥-रघुवंशे ॥

विद्याधरों के चक्रवर्त्ती पद को विना पाये नहीं रह सकता ॥ १८ ॥

अथवा सन्देह करने की कोई आवश्यकता नहीं है । इससे स्पष्ट ही है कि ये जीमूतवाहन होंगे । (**मलयवती को देखकर**) ये ! यह भी राजपुत्री है । (**दोनों को देखकर**) बहुत दिनों के बाद ब्रह्मा योग्य वर वधूका मिलानेवाला होगा । (**आगे चलकर नायक को निर्देशकरके**) आपका कल्याण हो ।

नायकः । भगवन् ! जीमूतवाहनोऽभिवादयते । [उत्थातुमिच्छति ।]

तापसः । अलमलम् अभ्युत्थानेन । ननु "सर्वस्याभ्यागतो गुरुः" इति भवानेवास्माकं पूज्यः । तद् यथासुखं स्थीयताम् ।

नायिका । अज्ज ! पणमामि । (आर्य्ये ! प्रणमामि ।)

तापसः [नायिकां निर्दिश्य] वत्से ! अनुरूपभर्तृगामिनी भूयाः । राजपुत्री ! त्वामाह कुलपतिः कौशिकः, यथा,—'अतिक्रामति मध्यन्दिनसवनवेला, तत् त्वरितमागम्यताम्" इति ।

मलयवती । जं गुरु आणवेदि । [आत्मगतम्]

एक्कतो गुरुवअणं मणतो दइअदंसणसुहाइं ।
गमणागमणाधिरूढं अज्ज वि दोलएदि मे हिअअं ॥ १६ ॥

अलमिति । अभ्युत्थानेन शिष्टाचारप्रयुक्तेन अभ्युत्थानेन अलं कृतम् । 'अभ्यागतभूतस्त्वं अभ्युत्थानादिकं शिष्टाचारं मा कुरु' इत्यर्थः । (अलमित्यस्य निषेधार्थत्वात् तद्योगे तृतीया) । अभ्यागतः अतिथिः । सर्वस्य सर्वेषां जनानां गुरुः पूजनीयो भवति । तथा च प्रामाणिकवचनम्—

'गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः' ॥

अधुना तापसवचनप्रेरिता गृहं गन्तुकामा मलयवती जीमूतवाहनात् स्वविरोगमाशङ्कमाना स्वमनोऽभिलाषं स्पष्टाक्षरैर्व्यक्तीकरोति '*एक्कतो' इत्यादिना-

---

नायकः—भगवन् ! जीमूतवाहन आपको प्रणाम करता है । **(उठना चाहता है)**

तापसः—बस, बस, मत उठिये । "अतिथि सब का गुरु (पूजनीय) है" इस रीति से आप ही हम लोगों के पूजनीय हैं, इसलिये सुखपूर्वक बैठिये ।

नायिका—आर्य्ये ! मैं प्रणाम करती हूं ।

तापसः—**(नायिका की ओर निर्देश करके)** ऐ बालिके ! अपने अनुरूप पति को प्राप्त करो । राजपुत्री ! कुलपति कौशिक ने तुम्हारे लिये कहला भेजा है कि दोपहर की पूजा का समय व्यतीत हो रहा है । अतएव जल्दी आवो ।

मलयवती—जैसी गुरुजी की आज्ञा । **(आप ही आप)**

---

* इयं गाथा अनन्तशयनतः प्रकाशिते 'क' संज्ञके पुस्तके नास्ति । श्रीजीवानन्देन सम्पादिते गसंज्ञके पुस्तके गद्यरूपत्वेन परिणता दृश्यते । एषा करमकरमहोदयगृहीतपाठानुसारिणी तत्संस्कारणादेवात्र गृहीता । "अज्जवि मे दोलएदि हिअअं (अद्यापि मां दोलयति हृदयम्) इति गपुस्तकस्थपाठः ॥

(यद् गुरुराज्ञापयति ।

एकतो गुरुवचनम् , अन्यतो दयितदर्शनसुखानि ।
गमनागमनाधिरूढमद्यापि दोलायते मे हृदयम् ॥)

[उत्थाय निश्वस्य सलज्जं सानुरागञ्च नायकं पश्यन्ती तापसहिता निष्क्रान्ता ।]

नायकः । [सोत्कण्ठं निश्वस्य नायिकां पश्यन्] ।

अनया जघनाभोगभरमन्थरयानया ।

एकतः एकस्मिन् पक्षे । गुरुवचन गुरोः कौशिकमुनेः वचन गृहागमनादेशरूपम् । गुरुवचनत्वेन अतुल्लङ्घनीयमिति भावः । अन्यतः अपरस्मिन् पक्षे । दयितदर्शनसुखानि दयितस्य प्रियस्य (जीमूतवाहनस्येति यावत्) दर्शनसुखानि दर्शनेन आह्लादाः समुत्पद्यन्ते इति शेषः । अतएव गमनागमनाधिरूढं गमनं च अगमनं च तदधिरूढ गन्तुकाममगन्तुकाम च मे मम हृदय चेतः अद्यापि दोलायते सन्देहाविष्करणेन व्याकुलीभवति । अतोऽधुनाहं किकर्तव्यमूढतयाऽऽकुलीभूतेत्यर्थः । गाथा नाम छन्दः । संस्कृते या आर्या सैव प्राकृते गाथा । तल्लक्षणं यथा—

पढमं बारहमत्ता बीए अट्ठारहेहिं संयुक्ता ।
जह पढमं तह तीअं दहपञ्चविहूसिया गाहा ॥
[प्रथमं द्वादश मात्रा द्वितीयेऽष्टादशभिः संयुक्ता ।
यथा प्रथमं तथा तृतीय पञ्चदशविभूषिता गाथा ॥]

नायिकाया अन्यतोगमनेन जनिता निजामाकुलता प्रकटयितुकामो जीमूतवाहनो मन्त्रयति **अनयेति** ।

जघनाभोगभरमन्थरयानया जघनस्य नितम्बस्य आभोगः विस्तारः परिपूर्णतेति यावत् (आभोगः परिपूर्णता इत्यमरः) तस्य भरः भारः गुरुत्वमित्यर्थः । तेन मन्थरं मन्दं यानं गमनं यस्याः तया परिणाहिना जघनेन मन्दं मन्दं गच्छ-

---

एक ओर तो गुरु जी की आज्ञा है और दूसरी ओर प्रियतम के दर्शन का सुख । इस समय जाऊँ कि न जाऊँ इस बात को सोचता हुआ मेरा हृदय डवाँडोल हो रहा है ।(मैं कुछ निश्चित नहीं कर सकती) ॥ १९ ॥

(उठकर के तथा सांस लेकर लज्जा और अनुराग के साथ नायक को देखती हुई तापस के साथ बाहर जाती है) ।

नायकः—(उत्कण्ठा के साथ सांस लेकर नायिका को देखता हुआ) नितम्ब के विस्तृत होने के कारण से मन्द मन्द चलने वाली इस सुन्दरी ने दूसरी दिशा (गुरुके

अन्यतोऽपि व्रजन्त्या मे हृदये निहितं पदम् ॥ २० ॥

विदूषकः । भो दिट्ठं तुए पेक्खिदव्वं, ता दाणिं मज्झण्णसूरकिरणसंतावदिवड्ढिदो विअ मे उदरग्गी धमधमाअदि; पा एहि णिक्कम्मह । जेण बम्हणो अदिही भविअ मुणिजणसमासादो लद्धेहिं कंदमूलफलेहिं पि दाव पाणधारणं करेमि । (भो ! दृष्टं त्वया प्रेक्षितव्यम् । तदिदानीं मध्याह्नसूर्यकिरणसन्तापद्विगुणित इव मे उदराग्निर्धमधमायते । तदेहि निष्क्रामावः । येन ब्राह्मणोऽतिथिर्भूत्वा मुनिजनसकाशात् लब्धैः कन्दमूलफलैरपि यावत् प्राणधारणं करोमि ।)

नायकः । [ऊर्ध्वमवलोक्य] मध्यमध्यास्ते नभस्तलस्थ भगवान् सहस्रदीधितिः । तथाहि,—

न्त्यैति भावः । अनया नायिकया । अन्यतोऽपि अन्यस्मिन्नपि देशे गुरुसमीपे । व्रजन्त्या गच्छन्त्या मे हृदये । पदं चरणं निहितम् स्थापितम् । अस्याः गमनं, अन्यतो पादक्षेपस्तु मम हृदये इति कार्यकारणयोर्भिन्नदेशत्वात् असङ्गतिनामा अलङ्कारः । कार्यकारणयोर्भिन्नदेशतायामसङ्गतिरिति तल्लक्षणात् । अतिलोकसौन्दर्यसारेण अनया मदीयं मानसं स्वायत्तीकृतमिति ध्वन्यते । अनुष्टुब् छन्दः ॥२०॥

भो दिट्ठं इति। मध्यान्हसूर्यकिरणसन्तापद्विगुणित इव । मध्यान्हे यः सूर्यकिरणः तस्य सन्तापेन उत्कृष्टया उष्णतया द्विगुणित इव द्विरावृत्त इव मे जठराग्निः उदरवह्निः धमधमायते अतिशयेन प्रज्वलतीति भावः (अग्निप्रज्वलनस्यानुकरणशब्दोऽयम् ।)

मध्यमध्यास्ते इति भगवान् सहस्रदीधितिः सहस्रं दीधितयः किरणाः ("भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियामि"त्यमरः) यस्याऽसौ सूर्यः

समीप) में जाते हुये भी मेरे हृदयमें अपना पैर स्थापित कर दिया (मुझे आकृष्ट कर लिया है) ॥ २० ॥

[**विदूषकः**—अहा ! देखने योग्य वस्तु तुमने देख ली । इस समय दोपहर को सूर्य की किरण की गर्मी से दूनी हुई मेरी पेट की अग्नि (भूख) धूँ धूँ कर रही है-बल रही है। इसलिये आवो हम दोनों चलें, जिससे ब्राह्मण और अतिथि होने से मैं मुनियों के संपर्क से प्राप्त हुये कन्द, मूल, फल से अपने प्राण को धारण कर सकूँ ।

नायकः—(**उपर देख कर**) भगवान् सूर्य आकाश के मध्य में वर्तमान हैं। इस तरह:—

तापात् तत्क्षणघृष्टचन्दनरसौ पाण्डू कपोलौ वहन्
संसक्तैर्निजकर्णतालपवनैः संवीज्यमाननः ।
सम्प्रत्येष विशेषसिक्तहृदयो हस्तोज्झितैः शीकरैः

नभस्तलस्य आकाशस्य मध्यं मध्यभागं अध्यास्ते अधिरोहति । ('अधिशीङ्स्थासां कर्म' इति सूत्रेण मध्यस्य कर्मत्वम्) मध्याह्नो जात इत्यर्थः ।

नायकस्तदेव स्फुटं प्रकटयति तापादित्यादिना—

तापात् सूर्यजनितग्रीष्मात् (हेतौ पञ्चमी) तत्क्षणघृष्टचन्दनरसापाण्डू तत्क्षणं घृष्टेन मुखपार्श्वघर्षणेन चन्दनानां चन्दनवृक्षाणां स्रवता रसेन आपाण्डू पीतवर्णौ कपोलौ गण्डस्थले वहन् धारयन् (कञ्चन अनङ्गज्वरेण उत्कण्ठितोऽपि अतिशयशौर्यप्रतिपादनाय तत्क्षणं परिचारकैः पिष्टस्य चन्दनस्य रसेन ललाटादिषु गाढतरं लिप्तेन धवलौ कपोलौ वहतीति प्रतीयते । अत्र शब्दमहिम्ना गजपतौ कामज्वरपीडितस्य नायकस्य करुणावस्थाः आरोप्यन्ते इति बोद्धव्यम्) तथा च संसक्तैः सम्यक् सक्तैः निजकर्णतालपवनैः निजकर्णयोः तालः आस्फालः सञ्चालनमिति यावत् ("तालः करतलेऽङ्गुष्ठमध्यमाभ्यां च सम्मिते । गीतकालक्रियामाने करास्फाले द्रुमान्तरे" इति मेदिनी) तज्जैः कर्णान्दोलनेन जातैः पवनैः संवीज्यमाननः संवीज्यमानं किञ्चित् निवृत्ततापतामापाद्यमानम् आननं मुखं यस्य तथाभूतः [विरहोत्कण्ठितोऽपि चन्दनरसस्य अकिंचित्करत्वं निरूप्य परिचारकैः उभयकर्णोपान्ते निरन्तरगृह्यमाणव्यजनानां पवनैः किञ्चित् निरातपत्वमनुभवति] । सम्प्रति अधुना अतितापात् । हस्तोज्झितैः हस्तेन शुण्डादण्डेन ("हस्तो नक्षत्रभेदे स्यात् करेभकरयोरपि" इति विश्वः) उज्झितैः परित्यक्तैः । शीकरैः अम्बुकणैः (शीकरोऽम्बुकणाः स्मृताः इत्यमरः) विशेषसिक्तहृदयः विशेषं साकल्येन सिक्तं हृदयं उरःस्थलं ("हृदयं मन उरसोः" इति विश्वः) यस्य तथाभूतः जलकणैः सन्ततं हृदयं सिञ्चन्नित्यर्थः । [इतरोऽपि तापाधिक्यात् स्वहस्तेन अन्यहस्तेन वा विसृष्टैः जलकणैः मुखपादादीन् अवसिच्य

अत्यन्त गर्मी के कारण, उसी क्षण में, गण्डस्थल की रगड़ से चूने हुये चन्दन के रस के लग जाने से पीले पीले कपोल को धारण करता हुआ, अच्छी तरह से सिक्त, अपने कान के इधर उधर फेंकने से उत्पन्न हुई हवा से अपने मुँहको पँखा करता हुआ, अपने हाथ (सूड़) से फेंके गये जल के बिन्दुओं से वक्षःस्थल को (गर्मी के कारण) सींचता हुआ यह हाथियों

गाढायल्लकदुःसहामिव दशां धत्ते गजानां पतिः ॥ २१ ॥

[निष्क्रान्ताः सर्वे ।]

इति प्रथमोऽङ्कः ।

हृदयं सविशेषं सिञ्चति] इत्थम्भूतो गजानां पतिः गजेन्द्रः गाढायल्लकदुःसहां गाढेन अनिवार्येण आयल्लकेन उत्कण्ठया विशिष्टरमणीनिरन्तरानुध्यानतदलाभप्रवर्धमानेन सन्तापेन ["स्यादायल्लकमाध्यानमुत्कण्ठोत्कलिका रतिः"] दुःसहां अति कठिनामिव दशामवस्थां धत्ते धारयति [विरहिनायकवत् गजपतेः करुणोत्पादिकाः दशा वर्तन्ते इति गजवर्णनमुखेन मध्याह्नस्याविर्भावो निश्चिततया प्रतिपाद्यते] एवं श्लेषानुगृहीतया उत्प्रेक्षया अङ्कान्तरप्रतिपादयिष्यमाणस्य नायकविप्रलम्भस्य अङ्कान्तरसमुचितबिन्दूपक्षेपोऽयमिति मन्यन्ते विमर्शिणीकाराः । स्वभावोक्तिः उत्प्रेक्षा च । तल्लक्षणं यथा कुवलयानन्दे—

"संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना"

शार्दूलविक्रीडितं वृत्तम् ॥ २१ ॥

अङ्कलक्षणं यथा भरतनाटयशास्त्रे—

अङ्क इति रूढिशब्दो भावैरसैश्च रोहयत्यर्थान् ।
नानाविधानयुक्तो यस्मात्तस्माद् भवेदङ्कः ॥
यत्रार्थस्य समाप्तिर्यत्र च बीजस्य भवति संहारः ।
किञ्चिदवलग्नबिन्दुः सोऽङ्क इति सदावमन्तव्यः ॥
एकदिवसप्रवृत्तं कार्यं त्वङ्केऽथ बीजमधिकृत्य ।
रङ्गं तु ये प्रवृष्टाः सर्वेषां भवति तत्र निष्क्रान्तिः ॥ (२०अ०, २२७ पृ०

इति भावार्थदीपिकाख्यायां नागानन्दव्याख्यायां प्रथमोऽङ्कः समाप्तः ।

का राजा, अनिवार्य उत्कण्ठा से उत्पन्न विरही की असह्य दशा की तरह, असहनीय अवस्था को प्राप्तकर रहा है(१) ॥ २१ ॥

(सब जाते हैं)

इति भाषानुवादे प्रथमोऽङ्कः

---

(१) इस पद्यमें कवि ने गजपति को विरही नायक के रूप में अङ्कित किया है । विरही नायक गर्मी के कारण गालों पर चन्दन का लेप लगाता है, पङ्खों की हवा कराता है, और अपने या किसी दूसरे के हाथ से पानी के छींटों से शरीर को, विशेषतः हृदयको, ठंढा बनाये

अथ द्वितीयोऽङ्कः

[ततः प्रविशति चेटी]।

चेटी । **आणत्तह्मि भट्टिदारिआए मलअवदीए, जहा,—"'हञ्जे ! मणोहरिए ! अज्ज चिराअदि मे भाअरो अज्जो मित्तावसू । तो गदुअ जाणेहि किं आअदो ण वेत्ति'** । [परिक्रामति । नेपथ्याभिमुखं दृष्ट्वा ।] **का उण एसा तुरिदतुरिदं इदो ज्जेव्व आअच्छदि ?** [निरूप्य] **कहं चदुरिया !** (**आज्ञप्तास्मि भर्तृदारिकया मलयवत्या, यथा—"'हञ्जे मनोहरिके ! अद्य चिरयति मे भ्राता आर्य्यः मित्रावसुः । तद् गत्वा जानीहि किमागतो न**

अथ प्रथमेऽङ्के परस्परदर्शनानुबद्धरतिपरिपोषयोर्नायकनायिकयोरधुना द्वितीयाङ्के विप्रलम्भपरिपोषं वर्णयितुकामो नाट्यकारो नायिकायाः शिशिरोपचाराद्यपेक्षितं चन्दनलतागृहरचनादिकं कार्यं प्रवेशकाभिधानेनार्थोपक्षेपकेण प्रतिपादयति । तथा च भरतः ।

बह्वाश्रयमप्यथ प्रवेशकैः संक्षिपेच्च सन्धिषु च ।
अङ्केषु संप्रयुक्तं जनयति खेदं प्रयोगस्य ॥ (ना० शा० २० अ०)

आज्ञप्तास्मीति । 'हञ्जे' इति दास्याः सम्बोधनपदम् । यथोक्तं विश्वनाथेन "हलेति सदृशी, प्रेष्या हञ्जे, वेश्याज्जुका तथा" ।

आर्यमित्रावसुश्चिरयति = भविष्यद्विद्याधरचक्रवर्तिनो जीमूतवाहनस्यान्वेषणाय जनकेन प्रेषितो मे भ्राता आर्यमित्रावसुः (आर्येति पदं ज्येष्ठत्वं द्योतयति) एतावतापि कालेन न प्रत्यावृत्तः इति भ्रातुः प्रत्यावर्तनं उत्ताम्यता हृदयेन प्रतीक्षमाणा मलयवती तद्वार्ताहरणाय स्वकीया चेटीं प्रेषयति ।

(इसके बाद चेटी प्रवेश करती है)

चेटी—राजकुमारी मलयवती ने मुझे आज्ञा दी है—"'ऐ मनोहरिके ! आज मेरे जेठे भाई श्रेष्ठ मित्रावसु देर कर रहे हैं । अतएव जाकर पता लगावो कि वह आये कि नहीं'

रहता है । इस दोपहर के समय गजेन्द्र की दशा भी ठीक ऐसी ही है । इसीलिये वह विरही नायक की दशा का अनुभव कर रहा है । जीमूतवाहन स्वयं मलयवती के वियोग से व्याकुल है । अतः उसका हाथी को अपने ही समान देखना सर्वथा स्वाभाविक है ।

वा" इति । का पुनरेषा त्वरितत्वरितमित एवागच्छति ? कथं चतुरिका ।)

[ततः प्रविशति द्वितीया चेटी]

प्रथमा [उपसृत्य] हला चदुरिए ! किं णिमित्तं उण मं परिहरिअ एव्वं तुरिदाए गच्छीअदि ? (हला चतुरिके ! किं निमित्तं पुनर्मां परिहृत्य एवं त्वरितया गम्यते ?)

द्वितीया । हला मणोहरिए ! आणत्तम्हि भट्टिदारिआए मलअवदीए,- "हञ्जे चतुरिए ! कुसुमावचअपरिस्समणिस्सहं मे सरीरं । सरदादबज्जणिदो । विअ मे संदाबो अधिअदरं बाधेदि । ता गच्छ तुमं, बालकदलीपत्तपरिक्खित्ते चंदणलदाघरए चन्दमणिसिलाअलं सज्जीकरेहि"त्ति । अणुचिट्ठिदं अ मए जधा आणत्तं । जाव गदुअ भट्टिदारिआए णिवेदेमि । (हला मनोहरिके ! आज्ञप्ताऽस्मि भर्तृदारिकया मलयवत्या—"हञ्जे चतुरिके ! कुसमावचयपरिश्रमनिःसहं मे शरीरं शरदातपजनित इव मे सन्तापोऽधिकतरं बाधते । तद् गच्छ त्वं, बालकदलीपत्रपरिक्षिप्ते चन्दनलतागृहे चन्द्रम-

---

त्वरितत्वरितम्=अतित्वरितमतिशीघ्रमिति यावत् । (वीप्सायां द्विर्वचनम् ।)

हला इति । हञ्जे चतुरिके ! कुसुमावचयपरिश्रमनिस्सहं कुसुमानां पुष्पाणां अवचये आहरणे यः परिश्रमः खेदः तेन निःसहं क्लेशासहिष्णु मे मम शरीरं कर्मभूतम् । शारदातपजनितः शरदि आतपेन सूर्यस्य प्रकृष्टेन तापेन जनितः उत्पादित इव सन्तापः अधिकतरं बाधते पीडयति । [शारदातपस्य तीक्ष्णातिशयात् तत्साम्येन सन्तापस्यापि उत्कटता व्यज्यते ।] तस्मात् त्वं गच्छ ।

बालकदलीपत्रपरिक्षिप्ते बालकदल्याः । बालेतिपदं शैत्यस्य प्रकर्षतां सूचयति । पत्रैः अति मृदुलैरित्यर्थः । परिक्षिप्ते परिवेष्टिते । चन्दनलतागृहे

(परिक्रमा करती हुई नेपथ्य को देखकर) यह कौन जल्दी जल्दी इधर ही आ रही है ! क्या यह चतुरिका है ?

(इसके बाद दूसरी दासी प्रवेश करती है)

प्रथमा—(चलकर) ऐ चतुरिके ! किस लिये तुम मुझको छोड़कर जल्दी से जा रही हो ?

द्वितीया—ऐ मनोहरिके ! राजकुमारी मलयवती ने मुझे आज्ञा दी है—"ऐ चतुरिके, फूलों के चुनने के परिश्रम से थके हुये मेरे शरीर को शरद ऋतु के घाम से उत्पन्न किये गये की भाँति यह सन्ताप अधिक कष्ट दे रहा है । इसलिये तुम जाओ और नये कोमल केले के पत्ते से ढके हुये चन्दनलता के कुञ्ज में चन्द्रकान्त मणि की शिला को सजाओ" । जैसी मुझे

णिशिलातलं सज्जीकुरु' इति । अनुष्ठितञ्च मया यथाऽऽज्ञप्तम् । यावद् गत्वा भर्तृदारिकायै निवेदयामि ।)

प्रथमा । **जइ एव्वं, ता लहुं गदुअ णिवेदेहि, जेण से तहिं गदाए उवसमदि संदावो ।** (यद्येवं, तल्लघु गत्वा निवेदय, येनास्यास्तत्र गताया उपशाम्यति सन्तापः ।) शीघ्र

द्वितीया । (विहस्यात्मगतम्) **ण ईरिसो से संदावो जो एव्वं उवसमिस्सदि । विवित्तरमणीअं चंदणलदाघरअं पेक्खन्तीए अधिअदरो संदावो दुविस्सदि त्ति तक्केमि ।** (प्रकाशम्) **ता गच्छ तुमं । अहप्पि "सज्जीकिदं मणिसिलातलं" त्ति गदुअ भट्टिदारिआए णिवेदेमि ।** (नेदृशोऽस्याः सन्तापो य एवमुपशमिष्यति । विविक्तरमणीयं चन्दनलतागृहं प्रेक्षमाणाया अधिकतरः सन्तापो भविष्यतीति तर्कयामि । तद्गच्छ त्वम् । अहमपि "सज्जीकृतं मणिशिलातलम्" इति गत्वा भर्तृदारिकायै निवेदयामि ।)

चन्दनलताकुञ्जे 'अतिशिशिरे' इति भावः । चन्द्रमणिशिलातलं स्वयमतिशीतलं चन्द्रकान्तशिलातलं सज्जीकुरु परिष्करणादिना निर्मलीकुरु ।

यद्येवमिति । लघु शीघ्रम् । सन्तापः उपशमं गमिष्यति शान्तो भविष्यति ।

नेदृश इति । नहि एतादृशः मदनायासजनितः । सन्तापः एवं शीतलोपचारेण शान्तो भविष्यति । प्रत्युत विविक्तरमणीयं विविक्तं निर्जनं रमणीयं नेत्ररञ्जकं च चन्दनलतागृहं पश्यन्त्याः तापः अधिकतरं भविष्यतीति मन्ये । स्थानानां निर्जनता रमणीयता च अतिशयेन कामोद्दीपके भवतः, अतो निर्जनेऽस्मिन् लोभनीये कुञ्जे तापस्य प्राचुर्यमवश्यम्भावीति सम्भावयामि ।

आज्ञा मिली थी, वैसी मैंने कर दिया । अब जाकर राजपुत्री को इस बात की सूचना दे देती हूं ।

प्रथमा—यदि ऐसा है तो शीघ्र जाकर सूचना दे दो, जिससे वहाँ जाकर उसका कष्ट शीघ्र शान्त हो जाय ।

द्वितीया—**(हँसकर आपही आप)** इसका कष्ट ऐसा नहीं है, जो इस उपचार से शान्त हो जायगा । मैं तो ऐसा समझती हूं कि एकान्त और रमणीय चन्दनलता के कुञ्ज को देखकर इसका कष्ट और भी अधिक बढ़ जायगा । **(प्रकाश)** इसलिये तुम जाओ । मैं भी जाकर राजपुत्री को "चन्द्रशिला सजाई गयी है" इस बात की सूचना दे देती हूं ।

(इति निष्क्रान्ते । प्रवेशकः) ।

[ततः प्रविशति सोत्कण्ठा मलयवती चेटी च] ।

मलयवती । [निःश्वस्यात्मगतम्] **हिअअ ! तधा णाम तस्सि जणे लज्जाए *परं मुहो कदुअं दाणिं तहिं मत्तणा गदं सि त्ति अहो ! दे मत्तं भरित्तणं । [प्रकाशम् ।] हञ्जे चदुरिए ! आदेसेहि मे भअवदीए मामदणं । (हृदय ! तथा नाम तस्मिन् जने यत् लज्जया पराङ्मुखीकृत्येदानीं**

प्रवेशकः । ये विष्कम्भादयो पञ्च अर्थोपक्षेपका नाट्यशास्त्रे वर्णितास्तन्मध्ये प्रवेशकोऽप्यन्यतमः । स च नीचपात्रप्रयोजितः, वृत्तवर्तिष्यमाणानां कथांशानां सूचकः, अङ्कद्वयान्तर्गत एव भवितुमर्हति । यथोक्तं दर्पणकारेण—

प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः ।
अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा ॥

प्रथमाङ्कद्वितीयाङ्कयोर्मध्यवर्ती अत्रत्यः प्रवेशकोऽयं नीचपात्रत्वेनाभिमताभ्यां सुभाभ्यां चेटीभ्यां प्राकृतभाषया प्रयोजितः सन् 'मलयवती मदनबाणानां गोचरीभूता चन्दनलतागृहमधिस्थातुकामा वर्तते' इति भविष्यद्कथांशं साधु प्रकटयति ।

इति प्रवेशकः

सोत्कण्ठा—उत्कण्ठया सहिता । उत्कण्ठा नाम मनसेप्सितस्य वस्तुनोऽप्राप्तौ चित्तचाञ्चल्यादिसम्पादको गात्रसशोषणादिविधायकश्चावस्थाविशेषः । यथा—"रागे त्वलब्धविषये वेद्वना महती तु या ।
संशोषणी तु गात्राणा तामुत्कण्ठा विदुर्बुधाः" ॥

अत्र प्रवेशकसूचितं मलयवत्याः विप्रलम्भशृङ्गारं कविः वर्णयितुमुपक्रमते । तत्र श्रवणेनाङ्कुरितः परस्परदर्शनेन परिपोषं गतो नायिका नायकविषयकोऽभिलाषः कविना प्रतिपाद्यते हृदयेत्यादिना । हे मदीयहृदय ! तस्मिन् प्रियतमे तदा दर्शनावसरे लज्जया मां पराङ्मुखीकृत्य विमुखीं विधाय । तस्मिन्नेव गतमसि—

(दोनों निकलती हैं)

प्रवेशक

(इसके बाद उत्कण्ठा के साथ मलयवती और चेटी प्रवेश करती हैं)

मलयवती—(सांस लेकर, आपही आप) ऐ मेरे हृदय ! मुझे तो उस पुरुष से लज्जा के कारण पराङ्मुख करके, तुम स्वयं उसके पास चले गये हो । ऐ ! यह कैसा तेरा

---

* मंथर मुहं—ग ।

तत्रात्मना गतमसीति । अहो ! ते आत्मम्भरित्वम् । हञ्जे चतुरिके ! आदिश मे भगवत्या आयतनम् ।)

चेटी । [आत्मगतम्] चंदणलदाघरअं पत्थिदा भणादि भगवदीए आअदणं । [प्रकाशम् ।] चंदणलदाघरअं भट्टिदारिआ पत्थिदा । (चन्दनलतागृहं प्रस्थिता भणति भगवत्या आयतनम् । चन्दनलतागृहं भर्तृदारिका प्रस्थिता ।)

नायिका । [सलज्जम्] हञ्जे ! सुट्ठु सुमराविदं । ता एहि तहिं ज्जेव गच्छम्ह । (हञ्जे ! सुष्ठु स्मारितम् । तदेहि तत्रैव गच्छावः ।)

चेटी । एदु एदु भट्टिदारिआ । (एतु एतु भर्तृदारिका ।)

नायिका । (अन्यतो गच्छति) ।

चेटी । (पृष्ठतो दृष्ट्वा सोद्वेगमात्मगतम्) । अहो ! से सूण्णहिअअत्तणं ! कहं तं ज्जेव देवीभवणं पत्थिदा । (प्रकाशम् ।) भट्टिदारिए ! णं इदो चंदणलदाघरअं । ता इदो इदो एहि । (अहो ! अस्याः शून्यहृदयत्वम् ! कथं तदेव देवीभवनं प्रस्थिता । भर्तृदारिके ! नन्वितश्चन्दनलतागृहम् । तदित इत एहि ।)

तस्य प्रियतमस्यानुसरणं त्वयापि विधीयते इति आश्चर्यकरं ते आत्मम्भरित्वम् (आत्मानं बिभर्तीति आत्मम्भरिः, आत्मन् + भृ + इन् ।) तस्य भावः तत्त्वम् । स्वोदरपूरकत्वं स्वार्थपरत्वमिति यावत् । "आत्मम्भरिः कुक्षिम्भरिः स्वोदरपूरके" इत्यमरकोशवचनात् । भगवत्याः गौर्याः आयतनं गृहं मन्दिरमिति यावत् ।

स्वार्थपना है—तुम बड़े स्वार्थी हो । (प्रकाशित रूपसे) ऐ चतुरिका ! भगवती गौरीके मन्दिर का रास्ता मुझे बताओ ।

चेटी—(आप ही आप) राजकुमारी तो चन्दनलतागृह की ओर जाने के लिये निकली है, परन्तु गौरी के मन्दिर का नाम लेती है (प्रकाश) राजपुत्री ने तो चन्दनलता के कुञ्ज की ओर प्रस्थान किया है ।

नायिका—(लज्जा के साथ) अच्छी तुमने याद दिलाई । इसलिये आओ हम दोनों वहाँ चलें ।

चेटी—राजपुत्री, आओ आओ ।

नायिका—(दूसरी दिशा में जाती है)

चेटी—(पीछे देखकर, उद्वेग के साथ, आपही आप) धन्य है इसकी शून्यहृदयता को—पागलपन को । वह तो भगवती के उसी मन्दिर की ओर चली जा रही है । (प्रकाश)

नायिका। (सविलक्षस्मितं तथा करोति)।

चेटी। इदं चंदणलदाघरअं। ता पविसिअ चंदमणिसिलादले उप-विसिअ समस्ससदु भट्टिदारिआ। (इदं चन्दनलतागृहम्। तत् प्रविश्य चन्द्रमणिशिलातले उपविश्य समाश्वसितु भर्तृदारिका।)

(उभे उपविशतः)।

नायिका। [निःश्वस्य आत्मगतम्] भअवं कुसुमाउह! जेण तुमं रूवसोहाए णिज्जिदोसि, तस्स तुए ण किम्पि किदं। मम उण अणव-रद्धाए वि अबलेत्ति करिअ पहरंतो ण लज्जेसि? (आत्मानं निर्वर्ण्यं मदनावस्थां नाटयन्ती प्रकाशम्] हञ्जे! कीस उण धणपल्लवणिरुद्धसूर-किरणं तं एव्व चंदणलदा घरअं ण मे अज्जवि संदावदुक्खं अवणेदि।

(भगवन् कुसुमायुध! येन त्वं रूपशोभया निर्जितोऽसि तस्य त्वया न किमपि कृतम्। मम पुनरनपराद्धाया अपि अबलेति कृत्वा प्रहरन् न लज्जसे? हञ्जे!

सविलक्षं सविस्मयं ("विलक्षौ विस्मयान्विते" इत्यमरः) मदीयं स्खलितं दास्या विज्ञातमिति निरूप्य विस्मयवती नायिका स्मितं करोति।

भगवन्निति। भगवन् कुसुमायुध कुसुमानि पुष्पाण्येव आयुधानि यस्य कुसुमायुधः तत्सम्बोधने। "अरविन्दमशोकं च चूतं च नवमल्लिका। नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः" इति वर्णनप्रकारेण पुष्पबाणः कामदेवः। मदन! येन जीमूतवाहनेन त्वं रूपशोभया सौन्दर्यसम्पत्त्या निर्जितः वशीकृतोऽसि तस्य त्वया किमपि न कृतं नायकस्य अतिशयबलशालित्वादिति भावः। अनप-राद्धाया दोषरहिताया अपि मम अबला स्त्री बलरहिता च इति कृत्वा मनसि विचार्य प्रहरन् न लज्जसे। अतिसौन्दर्यसम्पन्नं सबलं जीमूतवाहनं विहाय तत्

राजपुत्री! चन्दनलता का कुञ्ज इस ओर है। इस लिये इधर आवो।

नायिका—(आश्चर्य के साथ, मुसकुराकर वैसा करती है)

चेटी—यह चन्दनलता का कुञ्ज है। राजपुत्री इसमें प्रवेश कर के तथा चन्द्रकान्त शीतल सेज पर बैठ करके शान्त हों।

(दोनों बैठती हैं)

नायिका—(साँस लेकर, आपही आप) ऐ फूलों के बाण वाले (कामदेव), जि (जीमूतवाहन) ने तुमको अपने रूप की शोभा से जीत लिया है उसका तो तुमने कुछ

कि पुनर्घनपल्लवनिरुद्धसूर्य्यकिरणं तदेव चन्दनलतागृहं न मे अद्यापि सन्तापदुःखमपनयति !।)

चेटी। जाणामि अहं एत्थ संदावस्स कारणं; किं उण *असंभावणीअं ति भट्टिदारिआ ण तं पडिवज्जिस्सदि त्ति। (जानाम्यहमत्र सन्तापस्य कारणम्; किं पुनरसम्भावनीयमिति भर्तृदारिका न तत् प्रतिपत्स्यते इति।)

नायिका। [आत्मगतम्] लक्खिदा विअ महं एदाए, तहवि पुच्छिस्सं। [प्रकाशम्] हञ्जे ! किं तं जं ण पडिवज्जिअदि। ता कहेहि दाव किं तं कारणं ?। (लक्षितेवाहमेतया, तथाऽपि पृच्छामि। हञ्जे ! किं तत् यच्च

न्धात् अबला रमणीं मां बाणैः प्रहरसीति प्रत्यनीकालङ्कारः। तल्लक्षणं यथा काव्यप्रकाशे—

प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया।
या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते॥

अयमेवार्थो रत्नावल्यामपि कविना निबद्धः—"भगवन् कुसुमायुध ! निर्जितसकलसुरासुरो भूत्वा कथं स्त्रीजनं प्रहरन्न लज्जसे"।

हञ्जे घनपल्लवनिरुद्धसूर्यकिरणं घनैः निविडैः। पल्लवैः कोमलपत्रैः निरुद्धाः निवारिताः सूर्यकिरणाः सूर्यरश्मयो यस्मिन् तथाभूतं सूर्यतापविरहितमपि तदेव चन्दनलतागृहम् अद्यापि मे सन्तापदुःखं मनसिजक्षोभोत्पादितं दुःखं कस्मात् हेतोः न अपनयति नैव दूरीकरोति। (सघनपल्लवाच्छादनेन स्वतोऽतिशीतलस्य चन्दनलतागृहस्य तापशमनयोग्यता ध्रुवं प्रतीयते; तदकरणात् प्रश्नस्यावकाशः)।

नहीं बिगड़ा, परन्तु मुझ निरपराधिनी तथा बल रहित स्त्री को मार रहे हो। इसमें क्या तुमको लज्जा नहीं आती ?

(अपने को देखकर प्रेम से व्याकुल अवस्था को प्रकट करती हुई, प्रकाश रूप से) दासी ! क्यों यह चन्दनलता का कुञ्ज, जहाँ पर घने पल्लवों के होने के कारण से सूर्य्य-किरणें नहीं आ सकती हैं, मेरे गर्मी से उत्पन्न कष्ट को दूर नहीं करता ?

चेटी—मैं इस सन्ताप के कारण को जानती हूं। परन्तु राजपुत्री "यह असम्भव है" ऐसा कहकर आप इसका विश्वास नहीं करेंगी।

नायिका—(आपही आप) इसने मुझे ताड़ लिया। तौभी मैं पूछती हूं। (प्रकाश)

---

* असंभाविणी (असंभाविनी)-ग।

प्रतिपद्यते । तत् कथय तावत् किं तत् कारणम् ?)

चेटी । **एसो दे हिअअट्ठिदो वरो** । (एष ते हृदयस्थितो वरः ।)

नायिका । [सहर्षं संभ्रममुत्थाय द्वित्राणि पदानि गत्वा] । **कहिं कहिं सो ?** (कुत्र कुत्र सः ?)

चेटी । [उत्थाय सस्मितम्] **भट्टिदारिए ! 'सो को ?** (भर्तृदारिके ! स कः ?)

नायिका । [सलज्जमुपविश्य अधोमुखी तिष्ठति] ।

चेटी । **भट्टिदारिए ! एदम्हि वत्तुकामा,—एसो दे हिअअट्ठिदो वरो एव्व देईए दिण्णो सिविणके *पत्थाविदे । कअणं एव्व पविमुक्ककुसुमबाणो विअ मअरद्धओ भट्टिदारिआए दिट्ठो ! सो दे इमस्स संदावस्स कारणं, जेण एदं सहावसीदलंपि चंदणलदाघरअं ण दे संदावदुक्खं अवणेदि ।** (भर्तृदारिके ! एतदस्मिन् वक्तुकामा,—एवं ते हृदयस्थितो वर एव देव्या दत्तः स्वप्ने प्रस्तुते क्षणमेव प्रविमुक्तकुसुमबाण इव मकरध्वजो भर्तृदारिकया दृष्टः । स ते अस्य सन्तापस्य कारणं, येनैतत् स्वभावशीतलमपि चन्दन-

---

भट्टिदारिए इति । वक्तुकामा वक्तुकामः अभिलाषः यस्याः सा ('लुम्पेदवश्यमः कृत्ये तुंकाममनसोरपि" इति वचनात् तुमुनो मस्य लोपः ।) किमपि कथयितुमुत्सुकास्मीत्यर्थः । स्वप्ने प्रस्तुते सति स्वप्नविषयके आलापे प्रस्तुते सति विमुक्तकुसुमचापः विमुक्तः विशेषेण त्यक्तः कुसुमनिर्मितः चापः धनुर्येनासौ कामस्य पुष्पचापेन विरहितः साक्षात् मकरध्वजः काम इव भवत्या दृष्टः । स

दासी ! वह कौन सी वस्तु है जिसे मैं स्वीकार नहीं करूँगी । कहो, क्या कारण है ?

चेटी—यह वर है जिसने आपके हृदय को आकर्षित कर लिया है ।

नायिका—**(हर्ष तथा सम्भ्रम के साथ** खड़ी होती हुई । दो तीन डेग चलकर) वह कहाँ है ? कहाँ है ?

चेटी—**(उठकर मुसकराहट के साथ)** राजपुत्री ! वह कौन है ? 'वह' इस पद से तुम्हारा क्या अभिप्राय है ?

नायिका—**(लज्जा के साथ बैठकर मुँह नीचे किये हुये बैठती है ।)**

चेटी—राजपुत्री ! मैं यह कहना चाहती हूं कि तुम्हारे हृदय में स्थित (मनोनुकूल) वर को ही देवी ने दिया है । स्वप्नावस्था में बात चीत करते समय फूल के बाणों से रहित कामदेव ही को तुमने देखा है । वही तेरे इस सन्ताप का कारण है । इसीलिये यह स्वभाव से ही

---

* पच्छवि (पश्चात्)-ग ।

लतागृहं न ते सन्तापदुःखमपनयति ।

नायिका । [*चतुरिकाया अलकं सज्जयन्ती] † हञ्जे ! चदुरिआ क्खु तुमं । किं दे अवरं पच्छाईअदि, ता कहिस्सं ! (हञ्जे ! चतुरिका खलु त्वम् । किं ते अपरं प्रच्छाद्यते, तत् कथयिष्यामि ।)

चेटी । भट्टिदारिए ! दाणिं एव्व कहिदं इमिणा वरालावमत्तजणिदेण संभमेण । ता मा संतप्प । जइ महं चदुरिआ, तदा सोवि भट्टिदारिअं अवेक्खंतो ण मुहुत्तअं पि अहिरमिस्सदि । ता एदम्पि मए लक्खिदं । (भर्तृदारिके ! इदानीमेव कथितममुना वरालापमात्रजनितेन सम्भ्रमेण । तन्मा सन्तप्यस्व । यद्यहं चतुरिका, तदा सोऽपि भर्तृदारिकामपेक्षमाणो न मुहूर्त्तमप्यभिरंस्यते । तदेतदपि मया लक्षितम् ।)

नायिका । [सास्रम्] हञ्जे ! कुदो अम्हाणं एत्तिआणि भाअधे-

एवास्य मदनसन्तापस्य कारणम् ।

अलक- सज्जयन्ती केशं प्रसाधयन्ती । स्वरहस्यं प्रति तस्या अन्तरङ्गतामापादयितुमाबर्जनप्रकारोऽयम् ।

भट्टिदारिए इति । ननु इदमेव तव हृश्यगतो मनोरथ एव । अमुना वरालापमात्रजनितेन वरेत्यक्षरद्वयोच्चारणेनैव अन्यविषयकेणापि अन्यथा प्रतीत्या समुत्पादितः यः संरम्भः त्रासः तेन कथितम् । वरेत्युच्चारणमात्रेण त्वमतीव चकितेव दृश्यसे तेन ते मनोरथम् अनुमातुमहं समर्था भवामि ।

शीतल चन्दनलता का कुञ्ज तुम्हारे आन्तरिक कष्ट को दूर नहीं कर सकता ।

नायिका—(चतुरिका के बाल को सँवारती हुई) दासी ! वास्तव में तुम चतुरिका हो । तुमसे कौन बात छिपाई जा सकती है । इसलिये मैं कहती हूं ।

चेटी—राजपुत्री ! "वर" शब्दके उच्चारण मात्र से तुम्हारे हृदय में उत्पन्न होने वाली घबराहटने इस बात को तो प्रगट ही कर दिया है-कहने की कोई जरूरत नहीं । इस लिये सताप मत करो । यदि मैं चतुरिका हूं-वास्तविक में कुशल हूं—तो वह (वर) भी तुम्हें न पाकर एक क्षण के लिये भी किसी वस्तु में अनुराग नहीं कर सकता है । इस बात को भी मैंने देख लिया है ?

नायिका—(आंसू बहाती हुई) हमारा इतना अच्छा भाग्य कहाँ से हो सकता है ।

---

* गपुस्तके नास्ति । † 'चदुरिआए लक्खिदम्हि सच्चं'-इति गपुस्तकेऽधिकं दृश्यते ।

आइं ? (हञ्जे ! कुतोऽस्माकमियन्ति भागधेयानि ?)

चेटी। भट्टिदारिए ! मा एव्वं भण। किं मधुमहणो वच्छत्थलेण लच्छिं अणुव्वहंतो णिव्वुदो भोदि ? (भर्तृदारिके ! मैवं भण। किं मधुमथनो वक्षःस्थलेन लक्ष्मीमनुद्वहन् निर्वृत्तो भवति ?)

नायिका। किं सुअणो पिअं वज्जिअ अण्णं भणिदुं जाणादि ? सहि। अदो वि मे संदावो अधिअदरं बाधेदि, जं सो महाणुभाओ वाआमेत्तेण वि मए ण संभाविदो। सो वि अकिदपडिवत्ती अदक्खिणेत्ति मं संभावइस्सदि। (किं सुजनः प्रियं वर्जयित्वा अन्यत् भणितुं जानाति ? सखि अतोऽपि मे सन्तापोऽधिकतरं बाधते, तत स महानुभावो वाङ्मात्रेणापि मया न सम्भावितः। सोऽप्यकृतप्रतिपत्तिरदक्षिणेति मां सम्भावयिष्यति।) [इति रोदिति]।

हञ्जे इति। भागधेयानि=भाग्यानि (स्वार्थे धेयप्रत्ययः)

भट्टिदारिए इति। किं मधुमथनः मधोः दैत्यविशेषस्य मथनः नाशकः विष्णुरिति यावत्। वक्षःस्थलेन उरसा। लक्ष्मीं स्वकीयां प्रियतमाम् अनुद्वहन् अधारयन् किं निर्वृत्तः सौख्यसम्पन्नो भवति ! नैव भवतीति भावः। यथा लक्ष्मीमन्तरेण विष्णुः क्षणमपि आनन्दं नैव लभते। एवमेव वीराग्रेसरी स जीमूतवाहनो ललनालालामभूतां त्वामलभमानः न सुखलेशभाग् भविष्यतीति भावः।

किं सुअणो इति। वाङ्मात्रेण—केवलं वचनेन, न तु अभ्युत्थानादिना कार्येण अकृतप्रतिपत्तिं न कृता प्रतिपत्तिः सम्मानं यया तादृशीं माम् अदक्षिणेति अविग्धां धर्मादिकृत्येषु अकुशलां मंस्यते। कचिन्निपातेनापि कर्तुरभिधानं भवतीति हेतोरत्र 'इति' शब्दयोगे प्रथमा प्रयुक्ता दृश्यते।

चेटी—राजपुत्री ! ऐसा मत कहो। विष्णु अपनी छाती में लक्ष्मी को धारण न करके क्या कभी सुख पूर्वक रह सकते हैं। (उसी तरह से जीमूतवाहन बिना तुमको पाये कभी आनन्दित नहीं हो सकता)।

नायिका—क्या मित्रजन प्रिय वस्तु को छोड़कर दूसरा कुछ कहना जानते हैं। (मित्रगण सदा अभिलषित वस्तु के विषय में ही बातें करते हैं) ऐ सखि ! मैंने उस महानुभाव का वचन से भी सत्कार नहीं किया है, यह सोचकर मेरा कष्ट और अधिक बढ़ रहा है। वह भी सत्कार या सम्मान न करने वाली मुझे धर्मादि कार्य में मूढ़ समझेंगे।

(रोती है)

चेटी। भट्टिदारिए! मा रोद। अहवा कहं ण रोइस्सदि? अहिमो से हिअअस्स संदावो अधिअदरं बाधेदि। ता किं दाणीं एत्थ करइस्सं? ता जाव चंदणलदापल्लवरसं से हिअए दाइस्सं। [उत्थाय चन्दनपल्लवं गृहीत्वा निष्पीडय हृदये ददाति।] भट्टिदारिए! णं भणामि, मा रोद। अअं खलु ईरिसो चंदणरसो इमेहिं अणवरदपडंतेहिं बाहविदूहिं उण्हीकिदो ण दे हिअअस्स एदं संदावं अवणेदि। (भर्तृदारिके! मा रुदिहि। अथवा कथं न रोदिष्यति? अधिकोऽस्या हृदयस्य सन्तापोऽधिकतरं बाधते। तत् किमिदानीमत्र करिष्ये। तद् यावत् चन्दनलतापल्लवरसमस्या हृदये दास्ये। भर्तृदारिके! नन्वु भणामि, मा रुदिहि। अयं खलवीदृशश्चन्दनरस एभिरनवरतपतद्भिर्वाष्पबिन्दुभिरुष्णीकृतो न ते हृदयस्य एतं सन्तापमपनयति।)

(कदलीपत्रमादाय बीजयति।

नायिका। (हस्तेन निवारयति) सहि! मा वीजेहि। उण्हो खलु एसो कमलीदलमारुदो। (सखि! मा वीजय। उष्णः खल्वेष कदलीदलमारुतः।

चेटी। भट्टिदारिए! मां इमस्स दोसं कहेहि।

*कुणसि घणं†चन्दणलदापल्लवसंसग्गसीदलं पि इमं

वायोरुष्णत्वे कदलीदलवीजनस्य न कोऽपि दोषो वर्तते, प्रत्युत त्वमेवास्य मूलं कारणमिति प्रतिपादयितुं चेटी प्रयतते कुणसीत्यादिना—

चेटी—राजपुत्री! मत रोओ। अथवा क्यों न रोओगी? इसके हृदय का अधिक सन्ताप इसे और अधिक कष्ट दे रहा है। अब मैं इस समय क्या करूं? मैं शीघ्र ही चन्दनलता के रसको इसके हृदय पर लगाऊँगी। (उठकर चन्दन के पल्लव को लेकर उसे निचोड़कर रसको हृदय पर लगाती है)

राजपुत्री! मैं फिर कहती हूं मत रोओ। यह चन्दनका रस, तुम्हारी आँख से लगातार गिरनेवाले आँसू के बिन्दुओं से गर्म होकर, तुम्हारे हृदय के कष्ट को दूर नहीं कर सकता है।

(केले के पत्ते को लेकर पंखा कर रही है।)

नायिका—(हाथ से रोकती है) सखी! पंखा मत करो। केले के पत्ते से उत्पन्न हुई यह हवा गर्म है।

चेटी—राजपुत्री! इसका दोष मत दो।

* इयं गाथा गपुस्तके नोपलभ्यते। तत्स्थाने तदभिप्रायकं तुम चिअचंदणपल्लवसंसग्गसीदलं इमं णीसासेहिं पप्फिअ कमलीदलमारुदं उण्हं करेसि। (त्वं चितचन्दनपल्लवसंसर्गशीतलम् इमं निश्वासैः प्रपञ्च्य कदलीदलमारुतमुष्णं करोषि।) इति गर्भं दृश्यते।

† तरुण (तरुण)—ख।

णीसासेहि तुमं एव्व कअलीदलमारुअं उण्हं ॥ १ ॥

(भर्तृदारिके ! मा अस्य दोषं कथय ।

करोषि घनचन्दनलतापल्लवसंसर्गशीतलमपीमम् ।

निःश्वासैस्त्वमेव कदलीदलमारुतमुष्णम् ॥)

नायिका । (सास्रम्) सहि ! अत्थि कोवि इमस्स संदावस्स उवसमोवाओ ? (सखि अस्ति कोऽपि अस्य सन्तापस्योपशमोपायः ?)

चेटी । भट्टिदारिए ! अत्थि, जदि सो एत्थ आअच्छदि । (भर्तृदारिके ! अस्ति, यदि सोऽत्रागच्छति ।)

(ततः प्रविशति नायको विदूषकश्च) ।

नायकः—

व्यावृत्यैव सितासितेक्षणरुचा तानाश्रमे शाखिनः

त्वमेव घनचन्दनलतापल्लवसंसर्गशीतलं घना सान्द्रा या चन्दनलता तस्याः पल्लवानाम् अतिशयशिशिराणां नूतनकिसलयानां संसर्गेण सम्पर्केण शीतलमपि इमं कदलीदलमारुतं शीतलैः कदलीपत्रैः सञ्चारितं पवनं निःश्वासैः तप्तनिःश्वासितैः उष्णं करोषि । शीतलस्य कदलीदलमारुतस्य नात्र कोऽपि दोषः, प्रत्युत त्वमेव निःश्वासेनैनं उष्णं करोषि । अतः रोदनमतिनिःश्वासं च नियम्य तूष्णीमास्स्वेत्यर्थः । गाथा नाम छन्दः । तल्लक्षणं तु प्रागेवोक्तम् ॥ १ ॥

एतत्पर्यन्तेन उद्दीपकैः नायिकायाः विप्रलम्भस्य उत्कर्षं विधाय नायकस्य रतिपरिपोषं युगपद् विधातुं तदीयां विरहिसुलभामवस्थां प्रकटयति कविः व्यावृत्येत्यादिनाः—

व्यावृत्यैव गुरुजनसमीपे साक्षात् दर्शनमनुचितमिति दृष्टिं परावृत्य एव । सितासितेक्षणरुचा सिते तारकामभितः शुभ्रवर्णे; असिते तारकाभ्यन्तरे कृष्ण-

---

घने चन्दन की लता के नये पत्तों के सम्पर्क से शीतल, इस केले के पत्ते की हवा को तुम अपने गर्म गर्म श्वासों से अत्यन्त उष्ण कर रही हो ॥ १ ॥

नायिका—(आँसू बहाती हुई) सखि ! क्यों इस सन्ताप को शान्त करने का कोई उपाय है ? ॥ १ ॥

चेटी—राजपुत्री ! एक उपाय है, यदि वह (जीमूतवाहन) यहाँ आवें ।

(इसके बाद नायक और विदूषक प्रवेश करते हैं)

नायक—आँखोंकी सफेद और कालो कान्ति से आश्रम मे स्थित उन वृक्षों को, शाखाओं में लगे हुये और प्रकाशमान कृष्णसार नामक मृगों के चर्म के समूह से युक्त करते हुये की

कुर्वत्या विटपावसक्तविलसत्कृष्णाजिनौघानिव ।
यद् दृष्टोऽस्मि तया मुनेरपि पुरस्तेनैव मय्याहते
पुष्पेषो ! भवता मुधैव किमिति क्षिप्यन्त एते शराः ? ॥ २ ॥

विदूषकः । भो वअस्स ? कहिं क्खु दे गदं तं धीरत्तणं ? (भो वयस्य? कुत्र खलु ते गतं तत् धीरत्वम् ?)

वर्णे ये ईक्षणे नेत्रे तयोः रुचा कान्त्या । आश्रमे तान् शाखिनः विविधशाखासम्पन्नान् द्रुमान् । विटपावसक्तविलसत्कृष्णाजिनौघान् इव । विटपेषु शाखासु अवसक्तानि लग्नानि विलसन्ति निर्मलतया प्रकाशमानानि च । कृष्णान् कृष्णसारमृगाणां यानि अजिनानि चर्माणि ["अजिन चर्मकृत्तिः स्त्री" इत्यमरः ।] तेषाम् ओघः समूहो येषु तथाभूतान् कुर्वत्या सम्पादयन्त्या (नेत्रयोः श्वेतकृष्णकान्तिसम्पर्केण आश्रमस्था वृक्षा दृष्टाः सन्तः शाखासु संसक्तानि शबलाजिनानि धारयन्त इव प्रतीयन्ते इति भावः । इवेति सम्भावनार्थकत्वात् उत्प्रेक्षालङ्कारः) । "भिन्नरूपेषु वस्तुषु तदुचितसौन्दर्यसम्भावनाभावनपटीयसी अस्या अवलोकनचातुरी विद्यते इति श्लाघातिशयो द्योत्यते" इत्यामनन्ति विमर्शिणीकाराः । यद् मुनेरपि शमिडल्यनाम्नः तापसस्यापि । अपि शब्दोऽत्र नायिकाया अन्तर्गतं स्नेहमभिव्यनक्ति । "अपिशब्देनात्र विश्रब्धप्रवृत्तिविरोधे सत्यपि दर्शनकर्मताङ्गीकारेण सहजलज्जापरगौरवातिलङ्घिचित्तस्य पक्षपातातिशयः प्रकाश्यते" । पुरः अग्रे तया दृष्टोऽस्मि अवलोकितोऽहम् । अस्मीति अहमित्यर्थे विभक्तिप्रतिरूपकमव्ययम् । "दासे कृतागसि भवत्युचितः प्रभूणा पादप्रहार इति सुन्दरि ! नास्मि दूये" इत्यत्र तद्दर्शनात् । तेनैव तदवलोकनेनैव मयि आहते विद्धे सति, हे पुष्पेषो कुसुमशायक मदन ! भवता एते शराः किमिति केन हेतुना । मम मारणाय मुधैव व्यर्थमेव क्षिप्यन्ते । मलयवत्याः कमनीयेन कटाक्षेणैव हृदयभेदसिद्धौ पुनस्तद्भेदाय तवेषुपातः निष्फलः इति भावः । वृत्तं शार्दूलविक्रीडितम् ॥ २ ॥

नाई, वहाँ से दृष्टि हटाकर ही उसने (मलयवती ने) मुनिके सामने मुझे देखा है। उसकी दृष्टिसे ही मेरा हृदय विद्ध हो गया है। अतएव हे कामदेव ! फिर मुझे मारने के लिये अपने फूलों के बाण व्यर्थ ही क्यों मुझ पर फेंक रहे हो ॥ २ ॥

विदूषकः—ऐ मित्र ! तेरी वह धीरता कहाँ चली गई ?

नायकः । वयस्य ! ननु धीर एवास्मि, कुतः ?—

नीताः किं न निशाः शशाङ्क*धवलाः ? नाघ्रातमिन्दीवरं ?
किं नोन्मीलितमालतीसुरभयः सोढाः प्रदोषानिलाः ? ।
झङ्कारः कमलाकरे मधुलिहां किं वा मया न श्रुतः ?
निर्व्याजं विधुरेष्वधीर इति मां येनाभिधत्ते भवान् ॥ ३ ॥

'न त्वं धीर' इति विदूषकेणाविच्छिन्नः सन् नायकः आत्मधीरत्वं साधयति नीता इति । शशाङ्करुचयः शशाङ्केन चन्द्रमसा रुचिः कान्तिः यासु तथाकाराः 'चन्द्रिकासम्बन्धेन दुष्प्रेक्षा इत्यर्थः । निशा रात्रयः मया न नीताः किम् ? नीता एवेति भावः । इन्दीवरं बहुलगन्धयुक्तं कमलं न आघ्रातं किम् ? उन्मीलितमालतीसुरभयः उन्मीलिताभिः सद्यः प्रस्फुटिताभिः मालतीभिः सुरभयः तत्संसर्गात् घ्राणतर्पणगन्धाः प्रदोषानिलाः सन्ध्यासु सौरभमादधानाः विरहिहृदयदलनाय वलन्तः समीरणाः न सोढाः किम् ? किं मया तादृशवायुसेवनं परिहृतम् ? सोढा एवेति काङ्क्षिप्यते । न केवलं मया सन्ध्यातिवाहनमेव विहितम्, अपि तु दिवा कमलाकरे न केवलं कमले, प्रत्युत रविकरप्रबोधितपङ्कजमण्डिते कमलवने । मधुलिहां मधुरसपानेन प्रमत्तानां । झङ्कारः सातिशयगुञ्जितं मया न श्रुतः किम् ? स्मरोद्दीपकमपि तादृशं झङ्कारमहं धीरतयैव श्रुतवानित्यर्थः । एवं विविधैः प्रमाणैः मम धैर्यस्य सिद्धौ विधुरेषु दयिताविप्रयुक्तेषु ["विधुरं तु प्रविश्लेषे" इत्यमरः । "वैकल्येऽपि च विश्लेषे विधुरं विकले त्रिषु" इति च मेदिनी] । अधीरः व्याकुलीकृतचित्तः इति भवान् केन हेतुना निर्व्याज [नास्ति व्याजः छलो यस्मिन् कर्मणि तत् यथा स्यात् तथा परिहासच्छलं विहाय । वास्तविकरूपेणेति यावत् । अभिधत्ते कथयति । चन्द्रादीनामुद्दीपकत्वेऽपि अविकृतचेतसैव मया तत् सर्वं सोढम्, तत् कस्माद्धेतोः त्वं 'क्व गतं ते धैर्यमिति' मुधैव मामाक्षिपसीति भावः । एतेन धैर्यरूपः पौरुषो गुणो व्याख्यातः । यथोक्तं दर्पणे विश्वनाथेन—

"व्यवसायादचलनं धैर्यं विघ्ने महत्यपि" ।

छन्दस्तु शार्दूलविक्रीडितम् ॥ ३ ॥

नायकः—ऐ मित्र ! मैं तो धीर ही हूं । क्योंकि—

चन्द्रमा के कारण उजली चाँदनी रातों को क्या मैंने नहीं बिताया ? क्या मैंने नीले कमल को नहीं सूंघा ? क्या खिले हुये मालतीपुष्प की सुगन्ध से युक्त सायं कालकी सुन्दर हवा को

* रुचयो—क ।

(विचिन्त्य)। अथवा मृषा नाभिहितं, वयस्यात्रेय ! नन्वधीर एवास्मि ।

स्त्रीहृदयेन न सोढाः क्षिप्ताः कुसुमेषवोऽप्यनङ्गेन ।
येनाद्यैव पुरस्तव वदामि धीर इति स कथमहम् ? ॥ ४ ॥

विदूषकः । (आत्मगतम्) एव्वमधीरत्तणं पडिवज्जंतेण आचक्खिदो महन्तो आवेगो हिअअस्स । ता जाव कहिं एव्व एदं अवक्खिवामि । [प्रकाशम्] भो वअस्स ! कीस उण अज्ज तुमं लहु एव्व गुरुअणं सुस्सूसिअ इह आगदो ? (एवमधीरत्वं प्रतिपद्यमानेनाख्यातो महाननेन हृदयस्यावेगः, तत् यावत् कुत्रैव एनम् अपक्षिपामि । भो वयस्य ! कथं पुनरद्य त लब्धेव गुरुजनं शुश्रूषित्वा इहागतः ?)

अथवा अधीर एवाहमिति नायकः स्वाधीरता प्रकटयति **स्त्रीहृदयेनेति**-स्त्रीहृदयेन स्त्रीगतं स्त्रियामासक्त हृदयं यस्य तेन भार्यासक्तमनसेति शिवरामः । अथवा स्त्रिया इव रागाद्यभिभवासहिष्णु हृदयं चित्तं यस्यत थाभूतेन येन मया । अनङ्गेन अङ्गवैधुर्यात् बाणाकर्षणासमर्थेनापि कामेन क्षिप्ताः प्रयुक्ताः कुसुमेषवोऽपि अतिमृदुला अपि पुष्पशराः न सोढाः स अहम् अद्यैव तव पुरः धीर इति कथं वदामि । स्त्रीगतहृदयत्वात् पुष्पाणामपि बाणाः यदि मया न सोढाः, तत् तव पुरतः धीरत्वेन मम विकत्थनमतीवानुचितमिति नायकस्याशयः । आर्या, लक्षणन्तु प्रागेवोक्तम् ॥ ४ ॥

एवमिति । एवं अधीरत्वं चलचित्तत्वं । प्रतिपद्यमानेन अङ्गीकुर्वता अनेन प्रियवयस्येन हृदयस्य महान् आवेगः संक्षोभः आख्यातः प्रकटीकृतः । लब्धेव द्रुतमेव ।

मैंने नहीं सहा ? क्या मैंने कमलों के समूह में भौंरों का गुञ्जारना नहीं सुना ? (इन सब बातों के करने पर भी मुझमें कुछभी विकार नहीं उत्पन्न हुआ) । तब फिर तुम क्यों मुझे वास्तव में "स्त्री के वियोग से अधीर हो" ऐसा क्यों कह रहे हो ? ॥ ३ ॥

(सोचकर) अथवा इसने (विदूषक ने) झूठ नहीं कहा है । मित्र आत्रेय ! मैं वास्तवमें अधीर हूं ।

जिसका हृदय प्रियतमा के द्वारा आकर्षित कर लिया गया है ऐसे मुझसे शरीर रहित कामदेव के द्वारा फेंके गये फूलके भी बाण नहीं सहे गये । इस लिये ऐसी अवस्था में मैं तुम्हारे सामने अपनेको धीर कैसे कह सकता हूं ? ॥ ४ ॥

विदूषकः—(आपही आप) इस तरह अपनी चञ्चलता को प्रकट करते हुये यह (जीमूतवाहन) अपने हृदय के महान् आवेग को कह रहा है । इस लिये इस समय इसके

नायकः । **वयस्य ! स्थाने खल्वेष प्रश्नः, कस्य वाऽन्यस्यैतत् कथनीयम् ? अद्य खलु स्वप्ने जानामि—सैव प्रियतमा** [अङ्गुल्या निर्दिशन्] **अत्र चन्दनलतागृहे चन्द्रकान्तमणिशिलायामुपविष्टा प्रणयकुपिता किमपि मामुपालभमानेव रुदती मया दृष्टा, तदिच्छामि स्वप्नानुभूतदयितासमागमरम्ये अस्मिंश्चन्दनलतागृहे दिवसशेषं समतिवाहयितुम् । तदेहि, गच्छावः ।** [परिक्रामतः]

चेटी । [कर्णं दत्त्वा ससम्भ्रमम्] **भट्टिदारिए ! पदसद्दो विअ ।** (भर्तृदारिके ! पदशब्द इव ।)

वयस्येति । स्थाने (अव्ययपदमेतद्) युक्तमेव । ["युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः] प्रणयकुपिता—प्रणयेन प्रणयमानेन कुपिता । विना कारणमपि कमपि प्रणयसम्बन्धिनं हेतुं निमित्तीकृत्य क्रुद्धेति यावत् ।

प्रणयमानो यथा साहित्यदर्पणे विश्वनाथः—

मानः कोप स तु द्वेधा प्रणयेर्ष्यासमुद्भवः ।
द्वयोः प्रणयमानः स्यात् प्रमोदे सुमहत्यपि ।
प्रेम्णः कुटिलगामित्वात् कोपो यः कारणं विना ॥

मां उपलभमाना तिरस्कुर्वती इव ।

तत् इच्छामि स्वप्नानुभूतदयितसमागमरम्ये स्वप्ने अनुभूतेन दयितायाः प्रियायाः समागमेन परस्परमिलनेन रम्ये रमणीये अस्मिन्नेव प्रदेशे दिवसशेषं दिनस्यावशिष्टभागं अतिवाहयितुं व्यत्येतुम् ।

मन को किसी दूसरी जगह लगा दूं (**प्रकाश**) । ऐ मित्र ! तुम अपने माता पिता की सेवा करके आज यहाँ इतनी जल्दी कैसे चले आये ?

नायकः—ऐ मित्र ! यह प्रश्न तुमने बडे मौके से किया है। तुमको छोडकर यह बात और किससे कहूंगा । आज मैंने स्वप्न में देखा है कि वह प्रिया (**अंगुली से दिखलाता है**) जो कि चन्दन लता के कुञ्ज में चन्द्रकान्तमणि शिला पर बैठी हुइ है प्रणयमान से क्रुद्ध होकर मुझे किसी बातकी (जो मुझे याद नहीं है) उलाहना दे रही है तथा रो रही है । इसलिये मैं चाहता हू कि स्वप्न में अनुभव किये गये प्रिया के समागम से सुन्दर—रमणीय इस चन्दन लताके कुञ्ज में दिनके शेष भाग को बिताऊँ। इसलिये आवो। हम दोनों चलें। (**दोनों जाते हैं**) ।

चेटी—(उत्सुकता से कान लगा कर) राजपुत्री ! पैर के शब्द की तरह कुछ सुनाई पड रहा है ।

नायिका । [ससम्भ्रममात्मानं पश्यन्ती] हञ्जे ! मा* ईरिसं आआरं पेक्खिअ कोवि मे हिअअं तुलईस्सदि † । ता उट्ठेहि, इमिणा रत्तासोअपादवेण अन्तरिदा पेक्खम्ह दाव को एसो त्ति । (हञ्जे ! मा ईदृशमाकारं प्रेक्ष्य कोऽपि मे हृदयं तुलयिष्यति । तदुत्तिष्ठ, अनेन रक्ताशोकपादपेन अन्तरिते प्रेक्षावहे तावत् क एष इति ।) [तथा कुरुतः] ।

विदूषकः । एदं चंदणलदाघरअं । ता एहि पविसम्ह । (इदं चन्दनलतागृहम् । तदेहि प्रविशावः ।) [नाट्येन प्रविशतः] ।

नायकः—

चन्दनलतागृहमिदं सचन्द्रमणिशिलमपि प्रियं न मम ।
चन्द्राननया रहितं चन्द्रिकया मुखमिव निशायाः ॥ ५ ॥

हञ्जे इति । हञ्जे ईदृशमाकारं शिशिरोपचारादिभिर्निर्वृतं मदीयं शरीरं प्रेक्ष्य मा कोऽपि मे हृदयं तुलयिष्यति बहिराकारदर्शनेन हृद्गताभिप्रायस्य अनुमानं न कोऽपि करिष्यतीत्यर्थः। तुलयिष्यतीत्यत्र तुलाशब्दात् 'तत्करोति तदाचष्टे' इति णिच् । तत् तस्मात् कारणात् उत्तिष्ठ अनेन रक्ताशोकपादपेन रक्ताशोकस्य वृक्षेण अन्तरिते भूत्वा तिरोहितगात्रे भूत्वा प्रेक्षावहे निपुणं पश्यावः क एष इति ।

लतागृहं दयितया विरहितं निरीक्ष्य नायकस्य कातरोक्तिरियम्—चन्दनलतेत्यादि । स चन्द्रमणिशिलं शीतलेन चन्द्रकान्तप्रस्तरेण युक्तमपि इदं चन्दनलतागृहं चन्द्राननया चन्द्रवत्कमनीयम् आननं मुखं यस्या तादृश्या मदीयया प्रियया रहितं सत् चन्द्रिकया कौमुद्या रहितं ["चन्द्रिका कौमुदी ज्योत्स्ना"इत्यमरः] निशायाः

नायिका—(घबराहट में अपने को देखती हुई) दासी ! मेरे इस आकार (हृदय में चन्दनरस लगाना तथा पखा झेलने आदि) को देखकर कोई मेरे हृदय की गुप्त बातको कहीं समझ न जाय । इसलिये उठो । इस लाल अशोक वृक्ष से अपने अङ्गों को छिपा कर हम लोग देखें कि यह कौन है । (**ऐसा ही करती हैं**)

विदूषकः—यह चन्दन लता का कुञ्ज है । इसलिये यहाँ आवो, हम लोग प्रवेश करें ।

(**अभिनय करते हुये प्रवेश करते हैं**)

नायकः—उस चन्द्रमुखी के बिना चन्द्रकान्तमणि से युक्त भी यह चन्दन लता का कुञ्ज मुझे प्रिय (सुन्दर) नहीं मालूम होता, जैसे चाँदनी के बिना रात्रिका अगला भाग । जिस

---

* खपुस्तके नास्ति । † कलइस्सदि (कलयिष्यति)—ख ।

चेटी। [दृष्ट्वा] भट्टिदारिए ! दिट्ठिआ वड्ढसि। सो एव्व णं दे हि-अअवल्लहो जणो। (भर्तृदारिके ! दिष्ट्या वर्धसे। स एव ननु ते हृदयवल्लभो जनः।)

नायिका। [दृष्ट्वा सहर्षं ससाध्वसम्] हञ्जे ! एदं पेक्खिअ अदिसङ्कसेण ण सक्कुणोमि इह एव्व असणे चिट्ठिदुं, कदावि एसो मं पेक्खदि, ता एहि अण्णदो गच्छम्ह। [सोत्कण्ठं पदं दत्वा] हञ्जे ! वेवंति मे ऊरुओ। (हञ्जे ! एनं प्रेक्ष्य अतिसाध्वसेन न शक्नोमि इहैवासने स्थातुं, कदापि एष प्रेक्षते, तदेहि अन्यतो गच्छावः। वेपेते मे ऊरू।)

चेटी। [विहस्य] अइ काअरे ! इह ट्ठिदं तुमं को पेक्खदि ? णं विसुमरिदो दे अअं रत्तासोअपादवो, ता इध एव्व उवविसिअ चिट्ठम्ह।

रात्र्याः मुखं प्रारम्भः प्रदोष इव ["प्रदोषो रजनीमुख"मित्यमरः।] मम प्रियं न। यथा कौमुद्या रहितः निशाया आरम्भः जनानां नैवानन्दप्रदो भवति, तथैव चन्द्राननया तया प्रियतमया विरहितं स्वभावशीतलमपि इदं चन्दनलतागृहं मे हर्षाय न भविष्यतीति भावः। शीतलस्यापि चन्दनलतागृहस्य अप्रीतिजनने चन्द्राननाराहित्य हेतुत्वेनोपन्यस्तमिति पदार्थस्य हेतुत्वात् काव्यलिङ्गनामालङ्कारः 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतमि'ति तल्लक्षणात्। मुखमिवेत्यत्र उपमालङ्कारश्च। आर्याच्छन्दः॥ ५॥

भट्टिदारिए इति। दिष्ट्या भाग्येन वर्धसे विजयसे। हृदयवल्लभः प्रियतमो जनः

ससाध्वसं—साध्वसेन भयेन सहितं। वेपेते कम्पेते। एतेन अनुरागजनितः कम्पो नाम सात्त्विको भावः कविना सूचितः यथा चोक्तं विश्वनाथेन—

रागद्वेषश्रमादिभ्यः कम्पो गात्रस्य वेपथुः।

प्रकार चन्द्रमा के बिना प्रदोष काल सुन्दर नहीं लगता, उसी प्रकार उस चन्द्रमुखी के बिना यह कुञ्ज भी भला नहीं मालूम पडता है॥ ५॥

चेटी—(देखकर) राजपुत्री ! तुम धन्यवादके पात्र हो। यही तुम्हारे हृदयवल्लभ हैं—प्रियतम हैं।

नायिका—(**हर्षके साथ देखकर**) दासी,—इस पुरुष को देखकर मैं इस स्थान में बैठने के लिये असमर्थ हूं। शायद यह मुझे देखता हो। इसलिये आओ हम दोनों दूसरी जगह चलें (**उत्कण्ठा के साथ पैर रखकर**) मेरे दोनों जंघे काँप रहे हैं।

चेटी—(**हँस कर**) ये कातरस्वभाववाली ! यहाँ बैठी हुई तुझे कौन देखता है ? क्या

(अयि कतारे । इह स्थितां त्वां कः प्रेक्षते । ननु विस्मृतस्ते अयं रक्ताशोकपादपः तदिहैव उपविश्य तिष्ठावः ।) [तथा कुरुतः]

विदूषकः । [निरूप्य] **भो वअस्स ! एसा सा चन्दमणिसिला ।** (भोवयस्य ! एषा सा चन्दमणिशिला ।)

नायकः । [सवाष्पं निःश्वसिति] ।

चेटी । **भट्टिदारिए ! जाणामि सिविणआलावो विअ, ता अवहिदा दवि सुणस्ह ।** (भर्तृदारिके ! जानामि स्वप्नालाप इव, तदवहिते तावत् शृणुवः ।) [उभे आकर्णयतः] ।

विदूषकः । [हस्तेन चालयन्] **भो वअस्स ! णं भणामि, एसा सा चंदमणिसिलेत्ति ।** (भो वयस्य ! ननु भणामि, एषा सा चन्द्रमणिशिलेति ।)

नायकः । [सवाष्पं निःश्वस्य] **सम्यगुपलक्षितम्** । [हस्तेन निर्दिश्य] ।-

शशिमणिशिला सेयं यस्यां विषाण्डुरमाननं

तत्र त देश दयितादर्शनविषयत्वेन प्रतिपादयति जीमूतवाहनः **शशिमणि-शिलेत्यादिना**—

सा इयं शशिमणिशिला चन्द्रकान्तशिला (सेति पदं प्रियतमोपवेशनाधिकरणत्वेन सौभाग्यातिशयं द्योतयति । इयमिति च पदं तदभावेन इदानीं शोच्यतां प्रतिपादयति) यस्याम् उपविष्टा सती मयि जीमूतवाहने (नीरसानामग्रगण्ये इति अवमानगर्भोक्तिरियमिति विमर्शिणीकाराः) चिरयति सङ्केतस्थानागमने विलम्बं कुर्वति सति ("यस्य च भावेन भावलक्षण"मिति सूत्रेण सप्तमी) विषाण्डुरं

तुम बिल्कुल भूलगई कि यह रक्त-अशोक का वृक्ष है । इसलिये हम दोनों यहीं बैठें ।

(ऐसा ही करती हैं)

विदूषकः—(निरूपण करके) ऐ मित्र ! यही चन्द्रमणि शिला है ।

नायकः—(आंसू बहाता सांस लेता है ।

चेटी—ऐ राजपुत्री । स्वप्नालापकी तरह कुछ सुनाई पड़रहा है । इसलिये हम लोग सुनें ।

(दोनों सुनती हैं)

विदूषकः—(नायक को हाथसे पकड़ कर हिलाता हुआ) ऐ मित्र! मैं फिर कहता हूं कि यही चन्द्रकान्तमणि की शिला है ।

नायकः—(आंसू गिराता हुआ सांस लेकर) तुमने ठीक ही देखा ।

(हाथ से निर्देश करके)

यही वह चन्द्रकान्त शिला है जहाँ पर आने में मेरे देर कर देने से नये पल्लव के शदृश

करकिसलये कृत्वा वामे घनश्वसितोद्गमा।
चिरयति मयि व्यक्ताकूता मनाक्स्फुरितैर्भ्रुवो-
र्विरमितमनोमन्युर्दृष्टा मया रुदती प्रिया ॥ ६ ॥

ततस्त्वस्यामेव चन्द्रमणिशिलायामुपविशावः।

[उभावुपविशतः]।

नायिका। [विचिन्त्य] का उण एसा हुविस्सदि? (का पुनरेषा भविष्यति?)

चेटी। भट्टिदारिए! जधा अम्हे ओवारिदा दाव एदं पेक्खन्दु, ता णाम तुमम्पि एव्वं दिट्ठा। (भर्तृदारिके! यथा आवाम् अपवारिते तावत् एन

मदनक्लान्ततया पीतच्छायम्। आननं मुख। वामे करकिसलये अतिमृदुले ताम्रवर्णतया लोभनीये वामे हस्ते निधाय। घनश्वसितोद्गमा घनः निरन्तरं बहुलः। श्वसितानां बहिःनिस्सरता श्वासाना। उद्गमः आविर्भावः यस्याः तादृशी। (अनेन इष्टप्राप्तयभावात् चिन्तातिशयः द्योत्यते। 'ध्यान चिन्तेहितानाप्तेः शून्यता श्वासतापकृत्' इति वचनात्)। अन्यच्च भ्रुवोः मनाक् स्फुरितैः परिचितैः ईषच्चलनैः व्यक्ताकूता व्यक्तः प्रकटीकृतः आकूतः प्रणयमानजनितः कोपालम्भरूपोऽभिप्रायः यस्याः सा तथोक्ता। विरमितमनोमन्युः विरमितः "मादृशीनां प्रियतमस्य अनात्मतया आत्मसन्तापहेतुक एव कोपारम्भः" इति विचिन्त्य उपशमितः। मनोगतः मन्युः क्रोधः (मन्युर्दैन्ये क्रतौ क्रुधीत्यमरः) यया सा तथाभूता (नेत्रादिकोपस्य स्फुटमेव व्यञ्जनात् मनोगत एव प्रशमितः इति सत्यमेवोक्तम्) प्रिया रुदती सती मया दृष्टा अवलोकिता 'स्वप्ने' इति शेषः। (उपायान्तरस्य अपाटवेन रोदनमेव तया स्वीकृतमिति भावः) हरिणीवृत्तम्। तल्लक्षणं यथा छन्दोमञ्जर्याम्—"नसमरसला गः षड्वेदैर्हयैर्हरिणी मता" ॥ ६ ॥

Raghu Nath Sharma

अपने बायें हाथ पर चिन्ताके कारण पीले मुखको रखकर, अपनी उस प्रियाको मैंने (स्वप्न में) रोते हुये देखा था, जिसका श्वास गंभीर तथा अधिक चल रहा है, भौंहों के थोड़े थोड़े फड़कने से जिसका (प्रेम संबंधी) अभिप्राय व्यक्त है तथा (प्रिय मेरे पास अब नहीं आवेगा ऐसा समझ कर निराशाके कारण) जिसके मनका क्रोध आपही शान्त हो गया है ॥ ६ ॥

इसलिये इसी ही चन्द्रकान्त की शिला पर हम दोनों बैठें। **(दोनों बैठते हैं)**

नायिका—(सोचकर) यह नायक जिस सुन्दरीका वर्णन कर रहा है वह कौन हो सकती है?

चेटी—राजपुत्री! जैसे हम लोग अपने को छिपा कर उन्हें देखते हैं वैसे ही वे भी कहीं

प्रेक्षावहे, मा नाम त्वमपि एव दृष्टा ।)

नायिका । जुज्जदि एदं । किं उण पणअकुविदं पिअअणं हिअए करिअ मंतेदि ? (युज्यते एतत् । किं पुनः प्रणयकुपितं प्रियजनं हृदये कृत्वा मन्त्रयति ।)

चेटी । भट्टिदारिए ! मा ईरसिं सङ्कं करेहि, पुणोवि दाव सुणम्ह । (भर्तृदारिके ! मा ईदृशीं शङ्कां कुरुष्व । पुनरपि तावत् शृणुवः ।)

विदूषकः । [आत्मगतम्] । अहिरमदि एसो एदाए कथाए, भोदु एदं उज्जेव बड्ढाइस्सं । [प्रकाशम् ।] भो वअस्स ! तदा सा तुए रुदती किं भणिदा ? (अभिरमते एष एतया कथया, भवतु एतामेव वर्धयिष्यामि । भो वयस्य ! तदा सा त्वया रुदती किं भणिता ?)

नायकः । वयस्य ! इदमुक्ता—

निष्यन्दत इवानेन मुखचन्द्रोदयेन ते ।

अहिरमदि इति । अभिरमते आनन्दं प्राप्नोति । एतामेव वर्धयिष्यामि एतामेव कथां विस्तरेण वर्णयामि ।

स्वप्नानुभूतां घटनां पृच्छन्तं विदूषकमानन्दातिरेकेणाह्लादितो नायकस्तं वयस्येत्यामन्त्रण करोति ब्रवीति च सा इदं स्वप्ने उक्ता (मयेति शेषः) । तदेव वचन प्रतिपादयति इति । निष्यन्दत बाष्पाम्बुना त्वन्नेत्रयुगलात् प्रसरता अश्रु-वारिणा । सिक्तं आर्द्रीकृतं । एतत् चन्द्रकान्तशिलायाः तल, ते तव अनेन स्फुटं दृश्यमानेन मुखचन्द्रोदयेन मुखमेव चन्द्रः तस्य उदयेन आविर्भावेन निष्यन्दते इव क्षरतीव । द्रवीभावमवलम्ब्य प्रवहतीवेत्यर्थः । मुखचन्द्रमिति रूपकालङ्कारः ।

तुम्हे देखते न हो ।

नायिका—यह ठीक ही है । फिर यह (नायक) प्रेम से क्रुद्ध हुये किस प्रियजन के विषय में इस तरह की बातें कर रहा है ।

चेटी—राजपुत्री ! इस तरह की शका मत करो । पुनः हम लोग और बातें सुनें ।

विदूषकः—(आपही आप) यह इस वार्तालाप से प्रसन्न मालूम होता है । इसलिये मैं और भी बातें करूँ ।

(प्रकाशरूप से) ऐ मित्र ! उस रोती हुई स्त्री से तुमने उस समय क्या कहा ?

नायकः—ऐ मित्र ! मैंने उससे यह कहा कि:—

यह आँसू के जलसे सींचा गया चन्द्रकान्त पत्थर, मालूम होता है कि, तेरे मुख रूपी

एतद् बाष्पाम्बुना सिक्तं चन्द्रकान्तशिलातलम् ॥ ७ ॥

नायिका । [सरोषम्] चदुरिए ! अत्थि किं अदो वि अवरं सोदव्वं! ता एहि, गच्छम्ह अण्णदो । (चतुरिके ! अस्ति किमतोऽप्यपरं श्रोतव्यम् ? तदेहि, गच्छावोऽन्यतः ।)

चेटी । [हस्ते गृहीत्वा] भट्टिदारिए ! एव्वं मा भण, तुमं एव्व सिविणए दिट्ठा, ण एदस्स अण्णस्सिं दिट्ठी अहिरमदि । (भर्तृदारिके ! एवं मा भण, त्वमेव स्वप्ने दृष्टा, न एतस्य अन्यस्यां दृष्टिरभिरमते ।)

नायिका । ण मे हिअअं पतिआअदि, ता कहावसाणं जाव पडिवालेम्ह । (न मे हृदयं प्रत्येति, तत् कथाऽवसानं यावत् प्रतिपालयावः ।)

अत्र वस्तुगत्या वर्तमान बाष्पसिक्तत्व चन्द्रोदयोद्गतजललवत्वेन कविना उत्प्रेक्ष्यते अतएव क्रियोत्प्रेक्षा । रूपकन्तु 'बाष्पाम्बुना सिक्तमिति' काव्यलिङ्गस्य निर्वाहकत्वेनापेक्षते । 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतमिति' काव्यलिङ्गलक्षणम् । उत्प्रेक्षा च मुख्यालङ्कारतामासादयन्ती रूपकेणात्रानुप्राणिता दृश्यते । अतः अस्मिन् पद्ये एतेषामङ्गाङ्गिभावेन सवलनात् संकरालङ्कारः । अनुष्टुब्लुन्दः ॥ ७ ॥

न मे इति । प्रत्येति विश्वसिति । तत् कथावसानं कथायाः अवसानं अन्तं यावत् प्रतिपालयावः प्रतीक्षमाणे तिष्ठावः । कथान्ते सर्वं स्फुटीभविष्यतीति सम्भावयामि ।

चन्द्रमा के उदय होने से जल चुवा रहा है । (तुम्हारे आँसू इस शिलातलपर गिर रहे हैं, जिससे चन्द्रकान्तशिला की सेजसे पानी चू रहा है । जान पडता है कि जिस प्रकार चन्द्रमा को देखकर चन्द्रकान्त मणि से पानी चूने लगता है, उसी तरह से तेरे मुख रूपी चन्द्रमाको देख कर मानो यह पानी चुवा रहा है) ॥ ७ ॥

नायिका—(क्रोध के साथ) चतुरिके । क्या अभी और कुछ सुनना बाकी है? इसलिये आओ हम दोनों दूसरी जगह चलें ।

चेटी—(हाथ पकड़कर) राजपुत्री ! ऐसा मत कहो । तुम्हीं को स्वप्न में इसने (जीमूतवाहन ने) देखा है । इसकी दृष्टि किसी दूसरी नायिका में नहीं लगी है ।

नायिका—मेरे हृदय में विश्वास नहीं होता । अतः कथा की समाप्ति तक हम दोनों बातें सुनें, तबतक प्रतीक्षा करें ।

नायकः । वयस्य ! जाने तामेवास्यां शिलायामालिख्य, तया चित्रगतया आत्मानं विनोदयामीति । तदित एव गिरितटान्मनःशिलाशकलान्यादाय आगच्छ ।

विदूषकः । जं भवं आणवेदि । [परिक्रम्य । गृहीत्वापसृत्य] भो वअस्स ! तुए एक्को वण्णओ आणत्तो । मए उण इध ज्जेव *सुलहा पञ्चराइणो वण्णआ आणीदेति । आलिहदु भवं (यद्भवान् आज्ञापयति । भो वयस्य ! त्वया एको वर्णक आज्ञप्तः, मया पुनरिहैव सुलभाः पञ्चरागिणो वर्णा आनीता इति; आलिखतु भवान् ।) [उपनयति] ।

वयस्येति । स्वप्नसादृश्यप्रतिकृतिदर्शनादयश्चत्वारो विरहविधुरस्य विनोदोपायाः प्रायेण भवन्ति । यथोक्तं—

वियोगावस्थासु प्रियजनसहत्वानुभवनं
ततश्चित्रं कर्म स्वपनसमये दर्शनमपि ।
तदङ्गस्पृष्टानामुपनतवता स्पर्शनमपि
प्रतीकारः कामव्यथितमनसा कोऽपि कथितः ॥

तत्र स्वप्नदर्शनं प्रागेव प्रतिपादितम् । सम्प्रति प्रतिकृतिदर्शनं प्रस्तौति—तामेव स्वप्ने दृष्टां दयितां शिलायां आलिख्य वर्णकेन लिखित्वा चित्रगतया चित्रितया तया आत्मानं विनोदयामि आनन्दपात्रतां नयामीति जाने । मनःशिला नाम गैरिकादिधातुविशेषः । तस्य शकलानि खण्डानि ["भित्तं शकलखण्डे वा पुंसि" इत्यमरः] अत्र प्रतिमुखसन्धौ मलयवतीसमागमरति प्रति चित्रलेखनादिर्नायकप्रयत्नोऽतीवानुकूलः । अतो विलासो नाम प्रतिमुखसन्धेरङ्गम् । "रत्यर्थेहा विलासः स्यात्" इति धनञ्जयवचनात् ।

यद्भवानिति । वर्णयति चित्रयतीति वर्णका रञ्जनसाधनो धातुः । त्वया एकः वर्णका मनःशिलाशकलं आज्ञप्तः, मया पुनः सुलभा पञ्चवर्णाः आनीताः । सितनीलपीतरक्ताः शुद्धाः संकीर्णाश्चेति पञ्चवर्णाः ।

नायकः—हे मित्र ! विचार है कि इसी सुन्दरी की इसशिला पर तसवीर बनाकर चित्रलिखित इससे मैं अपना विनोद करूँ । इसलिये पर्वत के किनारे से लाल गैरकादि धातु के टुकड़े ले आवो ।

विदूषकः—जो आप आज्ञा दें (परिक्रमा कर, लेकर आता है) हे मित्र ! आपने

---

*आलापो (आलापः)—क ।

नायकः । **वयस्य ! साधु कृतम् ।** [गृहीत्वा शिलायामालिखन् सरोमाञ्चम्] **सखे । पश्य,—**

अक्लिष्टबिम्बशोभाधरस्य नयनोत्सवस्य शशिन इव ।
दयितामुखस्य सुखयति रेखाऽपि प्रथमदृष्टेयम् ॥ ८ ॥

[लिखति] ।

चित्रलेखनमारभमाणो नायकस्तद्गतारमणीयतां स्तौति **अक्लिष्टेत्यादिना**— अक्लिष्टबिम्बशोभाधरस्य अक्लिष्टं परिपक्वं यत् बिम्बं बिम्बफलं तच्छोभः तद्वत् कान्तः अधरः अधरोष्ठः यस्मिन् तस्य पक्वबिम्बाधरस्येति भावः । चन्द्रपक्षे अक्लिष्टा मेघाच्छादनेन विरहिता बिम्बस्य मण्डलस्य ["बिम्बोऽस्त्री मण्डलं त्रिषु" इत्यमरः] या शोभा छविः । तस्या धरः धारकः तस्य । धरतीति धरः धृधातोरच प्रत्ययस्ततः षष्ठीतत्पुरुषः । अन्यूनमण्डलशोभां धारयतः इति चार्थः। नयनोत्सवस्य नयनयोः उत्सवस्य इव आनन्ददायकस्य शशिन इव चन्द्रस्येदयितामुखस्य प्रियायाः आननस्य । प्रथमदृष्टा प्रथममवलोकिता । अन्यत्र प्रतिपदि साक्षात्कृता । रेखापि चित्रकर्मविरहादसमग्रा एकापि रेखा । सुखयति मम हृदये आनन्दोल्लासं प्रकटयति । अयं भावः—यथा अखण्डमपि मण्डलं धारयतो नयनानन्दप्रदस्य चन्द्रमसः प्रतिपदि प्रादुर्भूता एकापि कला सर्वेषां जनानां मनो हरति तथैव पक्वबिम्बाधरस्य दयितामुखस्य चित्रणे एकापि रेखा मम मनसि आनन्दमुत्पादयति । आलेख्यस्य पूर्णतायां किमु वक्तव्यमिति । आर्या छन्दः। लक्षणं पूर्वमेव प्रतिपादितमस्माभिः । श्लेषानुप्राणितः पूर्णोपमालङ्कारः । तल्लक्षणं यथा साहित्यदर्पणे—

सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च ।
उपमेयं चोपमानं भवेद्वाच्यम् ॥ ८ ॥

मुझे एकही रंग लाने की आज्ञा दी थी परन्तु मैंने यहाँ सुलभ पाँच रंग के पत्थर लायें हैं। इसलिये आप लिखें—चित्र खींचें। **(ले जाता है)**

नायकः—ऐ मित्र ! तुमने बहुत अच्छा किया। **(लेकर शिलापर चित्र खींचता हुआ रोमाञ्चित होकर)** ऐ मित्र ! देखोः—

जिस तरह से आँखों को सुखदेने वाले चन्द्रमा की पहिले पहल देखीगई रेखा (दूज का चन्द्रमा) हृदय को सुख देती है, उसी तरह से पके बिम्ब फल की शोभा को धारण करने वाले मुख की प्रथम देखी गई रेखा आनन्द देती है। दूज को चन्द्रमा की केवल एक रेखा ही दृष्टि

विदूषकः । [सकौतुकं निर्वर्ण्य] अपच्चक्खेवि एवं णाम रूअं लिहीअदि, अहो अच्छरिअं ! (अप्रत्यक्षेऽपि एवं नाम रूपं लिख्यते, अहो आश्चर्यम् !)

नायकः । [सस्मितम्] वयस्य !—

प्रिया सन्निहितैवेयं सङ्कल्पस्थापिता पुरः ।
दृष्ट्वा दृष्ट्वा लिखाम्येनां यदि तत् कोऽत्र विस्मयः ? ॥ ६ ॥

नायिका । [साक्षम्] चदुरिए । जाणिदं क्खु कहावसाणं, ता एहि दाव मित्तावसुं पेक्खह्म । (चतुरिके ! ज्ञातं खलु कथावसानं, तदेहि तावन्मित्रावसुं प्रेक्षावहे ।)

अपच्चक्खेऽवि इति भो वयस्य ! अप्रत्यक्षेऽपि—अग्रे अविद्यमानेऽपि वस्तुनि । एवं विशदतया रूपं आलिख्यते चित्रे निवेश्यते इति आश्चर्यम्—सत्यमेतत् विस्मयकरम् ।

नायकस्तु स्वचित्रणे उपपत्तिं दर्शयति **प्रियेति**:—

मम प्रिया संकल्पैः तद्विषयकचिन्ताभिः ("संकल्पः कर्म मानसमि"त्यमरः) पुरः स्थापिता निरन्तरचिन्तावशेन तन्मयत्वात् अग्रे स्थापिता सती सन्निहिता एव समीपस्था एव विद्यते । एना दृष्ट्वा दृष्ट्वा मुहुर्मुहुः प्रत्यक्षीकृत्य लिखामि, तदवयवप्रतिकृतिं विरचयामि यदि, तत् तर्हि अत्र अग्रे स्थितस्य प्रत्यक्षस्य वस्तुनः चित्रणे कः विस्मयः । नहि स्वरूपोऽपि आश्चर्यस्यावकाशः । अतिसहजमिदं कर्मेति भावः । एवमेवोक्तं भवभूतिना उत्तररामचरिते—

"चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः" । इति ॥ ६ ॥

गोचर होती है, परन्तु उसे ही—केवल टेढ़ी रेखा को ही—देखकर मनुष्यों के नेत्र आनन्दित हो जाते है । उसी तरह अभी प्रियतमा को समग्र मुख चित्रित नहीं है । तथापि उसकी एकही रेखा देख कर हमारी आँखे आह्लादित हो गई हैं ॥ ८ ॥

विदूषकः—(**आश्चर्य के साथ देखकर**) जिसका चित्र खींचा जाता है उस व्यक्ति के उपस्थित न रहने पर भी ऐसा सुन्दर चित्र ! ऐ आश्चर्य है ।

नायकः—(**मुसकराहट के साथ**) मित्र ! सतत चिन्ता के कारण वह प्रिया हम लोगों के सामने और समीप ही विद्यमान है उसको बार बार देखकर मैं इसे लिख रहा हूं । इसमें कौनसा आश्चर्य है ॥ ९ ॥

नायिका—(**आंसू बहाती हुई**) कथा का अन्त मैंने जान लिया । इसलिये आओ हम दोनों मित्रावसु को देखें ।

चेटी । [सविषादमात्मगतम्] । हं जीविदणिरवेक्खो विअ से *उल्लावो । (प्रकाशम्) भट्टिदारिए ! णं गदा एव्व तहिं मणोहारिआ, ता कदावि भट्टा मित्तावसू इध एव्व आअच्छदि । (जीवितनिरपेक्ष इवास्या उल्लापः । भर्तृदारिके ! ननु गतैव तत्र मनोहरिका, तत् कदापि भर्त्ता मित्रावसुरिहैवागच्छति ।)

(ततः प्रविशति मित्रावसुः) ।

मित्रावसुः । आज्ञापितोऽस्मि तातेन, यथा—"वत्स मित्रावसो ! जीमूतवाहनोऽस्माभिरिहासन्नभावात् सुपरीक्षितोऽयम् । कुतोऽस्माद् योग्यो वरः ? तदस्मै वत्सा मलयवती प्रतिपाद्यताम्" इति । अहन्तु स्नेहपराधीनतया अन्यदेव किमप्यवस्थान्तरमनुभवामि । अन्यच्च, –

'हं' इति विषादद्योतकं प्राकृतभाषायामव्ययम् । अस्याः उल्लापः जीवितनिरपेक्षः । नास्ति अपेक्षा आस्था यस्यासौ । जीविते स्वजीवने निरपेक्षः आस्थापराङ्मुख इव वर्तते । भाषणे मलयवत्याः स्वरविकृतिः स्वजीविते विरागतामेव प्रदर्शयतीति चतुरिकाया आशयः ।

आज्ञापितोऽस्मीति । आसन्नभावात् निकटसंस्थानेन अयं जीमूतवाहनः सुपरीक्षितः वरत्वेन विचारितः । अहं तु स्नेहपराधीनतया स्नेहेन भगिनीगतप्रेम्णा पराधीनः परवशः । तद्भावेन किमपि अनिर्वचनीयं विलक्षणमिति यावत् । अवस्थान्तरं ('अन्या अवस्था' इति अवस्थान्तरम् । मयूरव्यंसकादित्वात् तत्पुरुषः) विषादमिश्रितं हर्षमनुभवामि ।

चेटी—(दुःख के साथ आप ही आप) इसके (मलयवती के) शब्दों से मालूम होता है कि इसे अपने जीवन के लिये कुछ अपेक्षा-आदर-नहीं है, वह अब जीना नहीं चाहती है । (स्पष्ट होकर) राजपुत्री ! मनोहारिका तो वहाँ गई ही है । शायद राजकुमार मित्रावसु यहाँ आते ही होंगे ।

(इसके बाद मित्रावसु प्रवेश करता है)

मित्रावसु—पिताजी ने मुझे आज्ञा दी है "कि हे पुत्र ! मित्रावसु ! जीमूतवाहन को हम लोगों ने नजदीक होने के कारण अच्छी तरह से देख भाल लिया है । क्या इससे कहीं अधिक योग्यवर मिल सकता है ? इसलिये इसके साथ मलयवती का विवाह करदो" । मैं तो प्रेम के वश में होने के कारण किसी अनिर्वचनीय अवस्था का अनुभव कर रहा हूं । अपनी दशा का ठीक २ वर्णन नहीं कर सकता । और भी:—

* आलापो (आलापः)—क ।

यद्विद्याधरराजवंशतिलकः प्राज्ञः सतां सम्मतो
रूपेणाप्रतिमः पराक्रमधनो विद्वान् विनीतो युवा ।
यच्चासूनपि सन्त्यजेत् करुणया सत्त्वार्थमभ्युद्यत-
स्तेनास्मै ददतः स्वसारमतुला* तुष्टिर्विषादश्च मे ॥ १० ॥

तदेवावस्थान्तरं नायकगुणवर्णनमुखेन प्रतिपादयति मित्रावसुः **यद् विद्याधरेत्यादिना**—

जीमूतवाहनः विद्याधरराजवंशतिलकः विद्याधराणां राजवंशस्य अलङ्कारभूतः, *प्राज्ञः* प्रशस्यवान् । *सतां* सज्जनपुरुषाणां ("कृत्य च वर्तमाने" इति षष्ठी) *सम्मतः* माननीयः (मतिबुद्धीत्यादिना वर्तमाने क्तप्रत्ययः) । प्राज्ञोऽपि कुरूपश्चेत् न वरत्वेनाभिलषणीय इत्यत आहः—*रूपेण अप्रतिमः* (नास्ति प्रतिमा सादृश्यं यस्यासौ) अद्वितीयः अलौकिकसौन्दर्यसम्पन्नः इति भावः । *पराक्रमधनः* विक्रमातिशयवान् । *विद्वान्* अखिलविद्यापारीणः *विनीतः* विनयसम्पन्नः *युवा* च वर्तते । अतः 'कन्या वरयते रूपं माता वित्तं पिता श्रुतम् । बान्धवाः कुलमिच्छन्तीति' पद्येन वरे ये ये गुणाः श्लाघनीयत्वेनोपादीयन्ते तेषां सर्वेषामत्र सद्भावात् सर्वथा समीचीनोऽयं वर इति भावः । अथ च यत् यस्मात् कारणात् । *सत्त्वार्थं* प्राणिनां रक्षणार्थं । *अभ्युद्यतः उद्युक्तः सन्* । *करुणया* अनुकम्पया (न तु केनापि आगन्तुकेन हेतुनेति भावः) *असूनपि* प्रियानपि प्राणान् ["पुंसि भूम्न्यसवः प्राणाः" इत्यमरः] (किं पुनः साधारणं द्रव्यजातमित्याशयः) *सन्त्यजेत्* , तेन हेतुना *अस्मै* स्वसारं भगिनीं *ददतः* मे मित्रावसोः *अतुला* तुष्टिः सदृशवरलाभेन निरतिशयः सन्तोषः *विषादश्च* स्नेहाधीनतया अस्य जीवितनिरपेक्षत्वात् दुःखमपि भवतः । अयं भावः—अयं महानुभावः सुरनरतिर्यक्षु कदाचित् कस्यचिज्जन्तोः प्राणरक्षादिकमपेक्ष्य स्वप्रियानपि प्राणान् जह्यात् । एतत् तस्य श्रेय-

अपनी बहन को इस जीमूतवाहन को विवाह में देते हुये मुझे यह समझकर कि यह विद्याधरों के राजवंश में श्रेष्ठ है, चतुर, सज्जनों का माननीय, सुन्दरता में अद्वितीय, वीरता में धनी, विद्वान्, नम्र और युवक है अत्यन्त सन्तोष होता है । परन्तु दूसरी ओर यह जानकर कि यह दयालुता से जीवों की रक्षा के लिये अपने प्राणों को भी देने के लिये तैयार है, मुझे अत्यन्त खेद हो रहा है । [आशय यह है कि मित्रावसु के हृदय में हर्ष और खेद साथ ही

* मतुलां—ग ।

श्रुतञ्च यथा,—जीमूतवाहनो गौर्य्याश्रमसम्बद्धे चन्दनलतागृहे वर्त्तत इति, तदेतत् चन्दनलतागृहं यावत् प्रविशामि । [प्रविशति]।

विदूषकः । [ससम्भ्रममवलोक्य] भो वअस्स ! पच्छादेहि इमिणा कअलीवत्तेण इमं चित्तगदं कण्णअं, एसो क्खु सिद्धजुवराओ मित्तावसू इध आअदो कदावि पेक्खिस्सदि । (भो वयस्य ! प्रच्छादय अनेन कदलीपत्रेण इमां चित्रगतां कन्यकाम् , । एष खलु सिद्धयुवराजो मित्रावसुरिहागतः कदापि प्रेक्षिष्यते ।)

नायकः । (कदलीपत्रेण प्रच्छादयति) ।

मित्रावसुः [प्रविश्य] कुमार ! मित्रावसुः प्रणमति ।

नायकः (दृष्ट्वा) मित्रावसो ! स्वागतम् ? इतः स्थीयताम् ।

चेटी । भट्टिदारिए ! आअदो भट्टा मित्तावसू । (भर्तृदारिके ! आगतो भर्त्ता मित्रावसुः ।)

नायिका । हञ्जे ! पिअं मे । (हञ्जे ! प्रियं मे ।)

स्करमपि बालाया स्वभगिन्याः वैधव्यशङ्कया न मे रोचते इति हेतोः हर्षविषादयोः सम्पर्कात् कामपि विचित्रामवस्थामनुभवामीति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ १० ॥

उत्पन्न हो रहे है । हर्ष तो भगिनीपति के कुलीन, गुणी तथा सुन्दर होने के कारण है और खेद है उसके प्राणियों की रक्षा के लिये अपने प्राणों के दे देने के—जीवित निरपेक्ष व्यवहार से । इन विभिन्न वृत्तियों के समानकालिक आविर्भाव के कारण मित्रावसु अपनी दशा का ठीक ठीक वर्णन नहीं कर सकता]॥ १० ॥

यह सुना भी है कि गौरी के मन्दिर से लगे हुये चन्दन लता के कुञ्ज में जीमूतवाहन वर्तमान है । इसलिये इस कुञ्ज में मैं प्रवेश करता हूं ।

(प्रवेश करता है) ।

विदूषकः—(आश्चर्य के साथ देखकर) ऐ मित्र ! केले के पत्ते से, इस चित्र में बनायी गई स्त्री को ढक दो । यह सिद्धों का युवराज मित्रावसु यहाँ आ रहा है । शायद देख लेगा ।

नायकः—(केले के पत्ते से ढकता है) ।

मित्रावसुः—(प्रवेश कर) कुमार ! मित्रावसु प्रणाम करता है ।

नायकः—(देखकर) मित्रावसु ! तुम्हारा स्वागत है । यहाँ बैठो ।

चेटी—राजकुमारी ! कुमार मित्रावसु यहाँ आगया ।

नायिका—मैं इससे प्रसन्न हूं ।

नायकः। मित्रावसो! अपि कुशली सिद्धराजो विश्वावसुः?

मित्रा। कुशलो तातः। *तातसन्देशेनास्मि त्वत्सकाशमागतः।

नायकः। किमाह तत्रभवान्?

नायिका। सुणिस्सं दाव, किं तादेण कुसलं संदिट्ठं त्ति। (श्रोष्यामि तावत्, किं तातेन कुशलं सन्दिष्टमिति।)

मित्रा। [सास्रम्] इदमाह—"तात! अस्ति मे मलयवती नाम कन्या जीवितमिवास्य सर्वस्यैव सिद्धराजान्वयस्य। सा मया तुभ्यं प्रतिपाद्यते। प्रतिगृह्यताम्" इति।

चेटी। [विहस्य] भट्टिदारिए! किं ण कुप्पसि दाणीं? (भर्तृदारिके! किं न कुप्यसीदानीम्।)

नायिका। [सस्मितं सलज्जञ्च अधोमुखी स्थिता]। हञ्जे! मा हस, किं

किमाहेति। तत्रभवान् पूज्यः सिद्धराजो विश्वावसुः किमाह मां किमाज्ञापयति? ["त्रिषु तत्रभवान् पूज्यस्तथैवात्रभवानपि" इत्यमरः]

इदमाहेति। मे मम मलयवती नाम कन्या अस्य सर्वस्यैव समग्रस्य सिद्धराजान्वयस्य सिद्धराजवंशस्य जीवितमिव प्राणा इव (प्रियेति भावः) विद्यते। यथा शरीरिणां जीवनमेव सर्वेभ्योऽन्येभ्यो वस्तुभ्यः प्रियं विद्यते तथैवेयं मम दुहिता सिद्धराजवंशे सर्वेषां प्रिया विद्यते इति। अत्रार्थे कालिदासः—"सा (शकुन्तला) कुलपतेरुच्छ्वसितमिव"—शाकुन्तले। "कन्येयं (पार्वती) कुलजीवितम्"—कुमारसम्भवे।

नायकः—हे मित्रावसु! सिद्धराज विश्वावसु कुशल पूर्वक तो हैं?

मित्रावसुः—पिताजी कुशल पूर्वक हैं। पिताजी की आज्ञा से मैं आपके पास आया हूं।

नायकः—उन्होंने क्या कहा है?

नायिका—मैं सुनूंगी। पिता जी ने क्या कुशल समाचार भेजे हैं।

मित्रावसुः—(आंसू बहाते हुये) उन्होने यह कहा है कि "पुत्र! सम्पूर्ण सिद्धराज वंश की प्राणों की तरह प्यारी मेरी मलयवती नामकी कन्या है। उसे मैं तुम्हे (जीमूतवाहन) विवाह में देता हूं। उसे लो, स्वीकार करो।"

चेटी—(हँसकर) राजपुत्री इस समय क्यों नही क्रुद्ध होती हो?

नायिका—(मुसकराहट और लज्जा के साथ नीचे मुख करके बैठती है) दासी!

---

*तदादेशेन—क।

विसुमरिदं दे एदस्स अण्णहिअत्तणं ? (हञ्जे ! मा हस, किं विस्मृतं ते एतस्यान्यहृदयत्वम् ।)

नायकः । [अपवार्य ।] **वयस्य ! सङ्कटे पतिताः स्मः ।**

विदूषकः । [अपवार्य ।] **भो ! जाणामि, ण तं वज्जिअ दे अण्णसि चित्तं अहिरमदि जधा, तधा जं किम्पि भणिअ विसज्जीअदु एसो ।** (भो ! जानामि, न तां वर्जयित्वा ते अन्यत्र चित्तमभिरमते यथा, तथा यत् किमपि भणित्वा विसृज्यतामेषः ।)

नायिका । [सरोषमात्मगतम्] **हदास ! को वा एदं ण जाणादि ?** (हताश ! को वा एतन्न जानाति ?)

हञ्जे इति । हञ्जे चेटि मा हस । जीमूतवाहनो ममाभिलषितो वरो भविष्यतीति विचिन्त्य हर्षोद्रेकात् हासं मा विधेहि । यतः एतस्य अन्यहृदयत्वं अन्यस्यां नायिकायां सक्तं हृदयं यस्य स, तत्त्वं अन्यनारीगतचित्तत्वं किं त्वया विस्मृतम् ।

वयस्येति । अपवार्य अपवारितं कृत्वा । तल्लक्षणं यथा—

रहस्यं कथ्यतेऽन्यस्य परावृत्यापवारितम्—दशरूपके ।
... ... तद् भवेदपवारितम् ।
रहस्यं तु यदन्यस्य परावृत्य प्रकाश्यते—दर्पणे ।

वयं संकटे कष्टे पतिताः स्मः । विश्वावसोरादेशात् मलयवती अवश्यमेव मया पत्नीत्वेन स्वीकार्या अन्यथा गुरुजनानामाज्ञोल्लङ्घनं स्यात् । परन्तु मम चित्तं स्वप्ने साक्षात्कृतायामन्यस्यां कस्याञ्चित् सुन्दर्यामासक्तम् । अतोऽस्मिन्नवसरे कार्ययोस्तुल्यबलविरोधात् वयं कामपि कष्टां दशामनुभवाम इति सरलार्थः ।

मत हँसो । क्या तुम भूल गई कि इनका (जीमूतवाहन का) मन किसी दूसरी जगह लगा हुआ है—(यह किसी दूसरी नायिका में आसक्त है) ।

नायकः—(हट कर) मित्र ! हमलोग धर्मसंकट में पड़ गये हैं ।

विदूषकः—(हट कर) ऐ ! मैं जानता हूं कि उसको छोड कर तुम्हारा चित्त किसी दूसरी जगह नहीं लगता है । इसलिये इन्हे (मित्रावसु को) कुछ उत्तर देकर यहाँ से विदा करो ।

नायिका—(क्रोध के साथ आप ही आप) हताश ! इसे कौन नहीं जानता कि तुम्हारा उत्तर केवल बहाना मात्र है ।

नायकः । क इह नेच्छेदु भवद्भिः सह श्लाघ्यमीदृशं सम्बन्धम् ? किन्तु न शक्यते चित्तमन्यतः प्रवृत्तमन्यतः प्रवर्त्तयितुं, ततो नाहमेनां प्रतिग्रहीतुमुत्सहे ।

नायिका । [मूर्च्छां नाटयति]

चेटी । समस्ससदु समस्ससदु भट्टिदारिआ । (समाश्वसितु समाश्वसितु भर्त्तृदारिका ।)

विदूषकः । भो ! पराधीणो क्खु एसो, किं एदिणा अब्भत्थिदेण ? ता गुरुअणं से गदुअ अब्भट्ठेहि । (भोः ! पराधीनः खलु एषः किमनेनाभ्यर्थितेन । ? तद् गुरुजनमस्य गत्वा अभ्यर्थय ।)

मित्रा । [आत्मगतम्] साधूक्तम् ; नायं गुरुजनमतिक्रामति । एष गुरुरस्यस्मिन्नेव गौर्य्याश्रमे प्रतिवसति । तद् यावद् गत्वा अस्य पित्रा मलयवतीं ग्राहयामि ।

क इहेति । भवद्भिः आभिजात्यादिविशिष्टैः युष्माभिः सह । श्लाघ्यं अतिशयेन स्पृहणीयम् । इमं कन्यापरिग्रहरूपं सम्बन्धं क इव नेच्छेत् सर्व एव अभिलषन्ते । किन्तु अन्यत्र प्रवृत्तं अन्यस्यां अनुरक्तं चित्तं । अन्यतः अन्यस्मिन् तव भागिनीरूपे वस्तुनि निवर्तयितुं प्रवर्तयितुं न शक्यते मयेति शेषः । अत्रार्थे कालिदासः कुमारसम्भवे—

"क इप्सितार्थस्थिरनिश्चयं मनः । पयश्च निम्नाभिमुखं प्रतीपयेत्" ॥

अतः एनां प्रतिग्रहीतुं विवाहे स्वीकर्तुं न उत्सहे नैव समीहे ।

नायकः—आपके साथ इस प्रशंसनीय (विवाह) सम्बन्ध को करना कौन नहीं चाहेगा ? परन्तु किसी वस्तु में लगे हुये चित्त को वहाँ से हटा कर अन्यत्र नहीं लगाया जा सकता । इसलिये मैं उसे (मलयवती को) स्वीकार नहीं कर सकता ।

नायिका—(मूर्च्छित हो जाती है)

चेटी—राजपुत्री ! धीरज धरो । धीरज धरो ।

विदूषकः—ऐ ! यह (जीमूतवाहन) पराधीन है । इसलिये इससे मलयवती को स्वीकार करने की प्रार्थना करने से क्या लाभ ? अतः इनके माता पिता के पास जाकर प्रार्थना कीजिये ।

मित्रावसुः—(आपही आप) इसने ठीकही कहा । ये अपने पिता माता की आज्ञा की अवहेलना नहीं कर सकते । इनके मातापिता भी गौरी के मन्दिर के समीप ही रहते हैं । इसलिये इनके पिता से मलयवती को स्वीकार करने की प्रार्थना करूँ ।

नायिका । [समाश्वसिति] ।

मित्रा । (प्रकाशम्) एव निवेदितात्मनोऽस्मान् प्रत्याचक्षाणः कुमार एव बहुतरं जानाति ।

नायिका । [सरोष विहस्य] कहं पच्चाक्खाणलहू मित्तावसू पुणो वि मन्तेदि ? (कथं प्रत्याख्यानलघुर्मित्रावसुः पुनरपि मन्त्रयति ?)

मित्रावसुः । [निष्क्रान्तः] ।

नायिका । [सास्रमात्मान पश्यन्ती आत्मगतम्] किं मम एदिणा दोहग्गकलङ्कमइलेण अच्चंतदुक्खभाइणा अज्जवि सरीरेण *धारिदेण ? ता इध जेव्व असोअपाअवे इमाए अदिमुत्तलदाए उव्बंधिअ अत्ताणं वावादइस्सं, ता एदं एव्वं दाव । [प्रकाशं विलक्ष्यस्मितेन] हञ्जे ! पेक्ख

एवमिति । एव निवेदितात्मनः निवेदितः प्रकटीकृतः आत्मा स्वाभिप्रायो यैस्तान् स्वसम्बन्धापेक्षिणः अस्मान् । प्रत्याचक्षाणः 'नाहमेनां प्रतिग्रहीतुमुत्सहे' इति साक्षान्निषेधेन निराकुर्वन् । कुमार एव [त्वमेवेति वक्तव्ये बहुमानप्रदर्शनाय तटस्थोक्तिः] भवानेव बहुतरं जानाति । ममेयमभ्यर्थना स्वीकरणीया न वेति भवानेव सम्यग् वेत्ति । धर्मादितत्त्वज्ञस्य तवेदं प्रत्याख्यानं न शोभनमिति तन्निषेधेऽनिष्टगर्भोक्तिः पुनरपि तन्मनोव्यावर्तनायेति शिवरामः ।

कहं इति । कथ प्रत्याख्यानलघुः प्रत्याख्यानेन निराकरणेन लघुः हीनः तिरस्कृतः इति यावत् । मित्रावसुः पुनरपि मन्त्रयति प्रार्थनाव्यञ्जकं वचनं कथयतीति समुचिता मानिन्याः सरोषा वचनभङ्गी ।

नायिका— (आश्वासन लेती है)

मित्रावसुः—(स्पष्टरूप से) हम लोगों ने अपनी बात आपके सामने रक्खी है। इसके प्रत्याख्यान (निषेध) करने का कारण आपही अच्छी तरह से जानते हैं ।

नायिका—(क्रोध के साथ हँसकर) क्यों विवाह संबंधी प्रस्ताव के अस्वीकार कर देने से अपमानित होने पर भी मित्रावसु फिर भी बातें कर रहे है ?

मित्रावसुः—(जाता है) ।

नायिका—(आँसू बहाती हुई, अपने को देखती हुई, आपही आप) दुर्भाग्य रूपी कलंक से मलिन, अत्यन्त दुःखभागी इस शरीर को धारण करनेसे मुझे क्या ? (मेरे जीने से अब क्या लाभ ?) । इसलिये यहीं इस अशोक वृक्ष के नीचे अतिमुक्त-लता से गले में फाँसी

---

* धरण (हतकेन)—ख ।

दाव मित्तावसू गदो ण वेत्ति, जेण अहम्पि इदो गमिस्सं । (किं मम एतेन दौर्भाग्यकलङ्कमलिनेन अत्यन्तदुःखभागिना अद्यापि शरीरेण धारितेन ? तदिहैव अशोकपादपे अनया अतिमुक्तलतया उद्बध्य आत्मानं व्यापादयिष्यामि, तदिदमेवन्तावत् । हञ्जे ! प्रेक्षस्व तावत् मित्रावसुर्गतो न वेति, येन अहमपि इतो गमिष्यामि ।)

चेटी । [कतिचित् पदानि गत्वा अवलोक्यात्मगतम्] । **अण्णारिसं से हिअअं पेक्खामि, ता ण गमिस्सं । इध ज्जेव्व ओवारिदा पेक्खामि, किं एसा पडिवज्जदि त्ति** (अन्यादृशमस्यां हृदयं प्रेक्षे, तन्न गमिष्यामि । इहैवापवारिता प्रेक्षे, किमेषा प्रतिपद्यते इति ।)

नायिका । [दिशोऽवलोक्य पाशं गृहीत्वा साश्रुम्] **भअवदि गोरि ! तुए इध ण किदो पसादो, ता जम्मन्तरे जधा ण ईरिसी दुक्खभाइणी होमि, तथा करेसि ।** (भगवति गौरि ! त्वया इह न कृतः प्रसादः, तत् जन्मान्तरे यथा न ईदृशी दुःखभागिनी भवामि, तथा करिष्यसि ।) [इत्यभिधाय कण्ठे पाशमर्पयति] ।

किं ममेति । दौर्भाग्यकलङ्कमलिनेन दौर्भाग्यमेव प्रियस्य स्नेहानवाप्तिरेव कलङ्कः तेन मलिनेन । अत्यन्तक्लेशभागिना अतिशयदुःखावहेन शरीरहतकेन एतेन कुत्सितेन शरीरेण धारितेन किम् ? प्रियतमस्य स्नेहमलब्ध्वत्या मे जीवितं व्यर्थमेवेति भावः । यावत् इहैव रक्ताशोकपादपे अस्मिन्नेव अशोकवृक्षे अतिमुक्तलतया माधवीलतया बन्धनरज्जुभूतया ('अतिमुक्तः पुण्ड्रकः स्याद् वासन्ती माधवीलता' इत्यमरः) आत्मान उद्बध्य बन्धनं विधाय व्यापादयिष्यामि स्वप्राणत्यागं करिष्यामीत्यर्थः ।

डालकर अपनी जान दे दूँगी । मैं ऐसाही करूँ । (**स्पष्ट रूपसे दुःखजनक मुसकराहट के साथ**) दासी ! देखो तो सही, मित्रावसु गये या नहीं जिससे मैं भी यहाँ से चलूँ ।

चेटी—(कुछ दूर चल करके देखकर आपही आप) आज मैं उसके हृदय की किसी दूसरे प्रकार का देखती हूं (जैसा कि उसने पहिले मुझे विश्वास दिलाया उससे भिन्न पाती हू) इसलिये मैं नहीं जाऊँगी । यहीं मैं छिपकर देखूं यह क्या करती है ।

नायिका—(दिशाओं को चारों ओर देखकर फाँस को लेकर आँसू बहाती हुई) ऐ भगवती गौरी ! तुमने मुझे इस जन्म में कुछ सुख नहीं दिया । इसलिये दूसरे जन्म में ऐसी ही दुःख भागिनी न होऊँ ऐसा ही करना । **(ऐसा कह करके अपने गले में फाँसरी लगाती है)** ।

चेटी । [दृष्ट्वा ससम्भ्रममुपसृत्य] **पलित्ताअदु पलित्ताअदु अज्जो । एसा भट्टिदारिआ उब्बन्धिअ अत्ताणअं वावादेदि ।** (परित्रायतां परित्रायतामार्य्यः, एषा भर्तृदारिका उद्बध्य आत्मानं व्यापादयति ।)

नायकः । [ससम्भ्रममुपसृत्य] **कासौ ? कासौ ?**

चेटी । **इअं असोअपादवे** (इयमशोकपादपे ।)

नायकः । [सहर्षमवलोक्य] **सैवेयमस्मन्मनोरथभूमिः !** [नायिका पाणौ गृहीत्वा लतापाशमाक्षिपति] ।—

न खलु न खलु मुग्धे ! साहसं कार्यमीदृक्
व्यपनय करमेतं पल्लवाभं लतायाः ।

सैवेयमिति । सा सुन्दरी एव इयं पुरतो दृश्यमाना अस्मन्मनोरथाना मदीयाभिलाषाणा भूमिः विश्रामस्थानं परममालम्बनमिति यावत् वर्तते । कथमस्यामेव मदीया समग्राभिलाषा निषक्तेति नायकः स्वीयं विस्मयमुद्गिरति नायिका मरणव्यापारात् निवारयति च '**न खलु न खलु**' इत्यादिना ।

हे मुग्धे ! सुन्दरि ! ("मुग्धः सुन्दरमूढयो" रिति विश्वः) [अत्रानिष्टाचरणे मौग्ध्यनेव निमित्तम् ; न तु औचित्यनिरूपणमिति भावः] एवं ईदृशं । साहसं निखिलजनगर्हणीयं प्राणपरित्यागरूपं न खलु न खलु कार्यम् ; कथमपि नैवाचरणीयमित्यर्थः [अत्यन्तानौचित्येन मुहुर्मुहुर्निषेधद्योतनार्थं न खल्विति पदयोर्द्विरुक्तिः । एवमेव कालिदासेन शाकुन्तले प्रयुक्तं-"न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्" ।] लतायाः बन्धनार्थं गृहीतायाः अतिमुक्तलतायाः सकाशात् पल्लवाभं पल्लवनिभं आताम्रसुकुमारं एतत् करं स्वहस्तं व्यपनय दूरीकुरु । पाशग्रहणायो-

---

चेटी—(देखकर घबराहट के साथ जाकर) रक्षा करो । रक्षा करो । यह राजकुमारी अपने गले मे फाँसरी लगाकर अपना प्राण दे रही है ।

नायकः—(घबड़ाहट से जाकर) वह कहाँ है ? वह कहाँ है ?

चेटी—इसी अशोक वृक्ष के नीचे ।

नायकः—(हर्ष के साथ देख कर) यही सुन्दरी तो मेरे मनोरथ की विश्रामभूमि है—मेरी ईप्सित प्रिय वस्तु है । **(नायिका को हाथ से पकड़ कर लता के फाँस को छुड़ाता है)** ।

ऐ सुन्दरी ! ऐसा साहस (फाँसी डालना) मत करो । मत करो । पल्लव की तरह कोमल तथा सुन्दर अपने इस हाथ को लता से हटा लो । मैं समझता हूं, जो तुम्हारा सुकुमार हाथ

कुसुममपि विचेतुं यो न मन्ये समर्थः
कलयति स कथं ते पाशमुद्बन्धनाय ? ॥ ११ ॥

नायिका । [ससाध्वसम्] **हञ्जे ! को उण एसो ?** [निरूप्य सरोषं हस्त-माक्षेप्तुमिच्छति] **मुञ्च मुञ्च अग्गहत्थम्, को तुमं णिवारेदुं ? मरणे वि किं तुमं ज्जेव्वअब्भट्ठणीओ** (**हञ्जे !** कः पुनरेषः ! मुञ्च मुञ्चाग्रहस्तं, कस्त्वं निवारयितुम् ? मरणेऽपि किं त्वमेवाभ्यर्थनीयः ?)

नायकः ।—**नाहं मुञ्चामि**

ग्यता प्रदर्शयतिः—**यः कुसुममपि** सातिशयसुकुमारं पुष्पमपि विचेतुं अवचेतुं न समर्थः इत्यहं मन्ये । (कुसुमावचयेऽपि सौकुमार्येण यस्य शक्तिर्नास्तीति भावः) स ते क्रूरः उद्बन्धनाय बन्धुम् ('तुमर्थाच्च भाववचनात्' इति सूत्रेण चतुर्थी) पाशं कण्ठबन्धनरज्जुं कल्पितु अतिमुक्तलता कथं कलयति कथं धारयति । अतीवसाहसं त्वयारब्धम् ; तस्मात् सद्यो विरम एतस्मात् व्यापारादिति भावः । मालिनीवृत्तम्—"ननमयययुतेयं मालिनी भोगिलोकैः" इति वृत्तरत्नाकरे तल्लक्षणात् । अयमेवार्थः कविना रत्नावल्यामपि निबद्धो दृश्यते—

अलमलमतिमात्रं साहसेनामुना ते ।
त्वरितमपि विमुञ्च त्वं लतापाशमेनम् ॥ ११ ॥

हञ्जे इति—अग्रहस्तं हस्तस्य अग्रभागं मुञ्च मुञ्च । मरणान्मा मा निवारयेति । मरणेऽपि प्राणपरित्यागेऽपि किं त्वमेव अभ्यर्थनीयः प्रार्थनीयः [जीवित एव तव प्रार्थना, परन्तु स्वनैरपेक्ष्यसाध्ये मरणेऽन्यप्रार्थना नापेक्ष्यते इति भावः]

'नाहं मुञ्चामि ते हस्तमिति' चाटुगर्भं वचनं हेतुना नियोजयतिः—

कोमल फूल को भी (परिश्रम के कारण) चुनने में समर्थ नहीं है, वह इस फांस को तुम्हारे गले में कैसे बाँध सकता है ? (कदापि नहीं) (फूल बड़ा ही कोमल होता है । जो हाथ सुकुमार होने के कारण फूल को भी नहीं चुन सकता, वह इस कठोर पाशको गले में कैसे लगा रहा है—यह कार्य अत्यन्त अनुचित है) ॥ ११ ॥

नायिका—(क्रोध के साथ) दासी ! यह कौन है ?

(निरूपण करके क्रोध के साथ हाथ को छुड़ाना चाहती है).

मेरे हाथ को छोड़ो, छोड़ो । तुम हटाने वाले कौन हो । क्या मरने के लिये भी तुम्हारी प्रार्थना करनी पड़ेगी ?

नायकः—मैं नहीं छोड़ूँगा ।

कण्ठे हारलतायोग्ये येन पाशस्त्वयाऽर्पितः ।
गृहीतः सापराधोऽयं कथं ते मुच्यते करः ? ॥ १२ ॥

विदूषकः । भोदु, किं उण से इमस्स मरणव्ववसायस्स कारणं ? ।
(भवतु, किं पुनरस्या अस्य मरणव्यवसायस्य कारणम् ?)

चेटी । णं एसो एव्व दे पिअवअस्सो । (नन्वेष एव ते प्रियवयस्यः) ।

नायकः । कथमहमेवास्या मरणकारणम् ? न खल्ववगच्छामि ।

विदूषकः । भोदि ! कहं विअ ? (भवति ! कथमिव ?)

चेटी । [साकूतम्] जा सा पिअवअस्सेण दे काबि हिअअवल्लहा

कण्ठे इति—

येन हस्तेन । हारलतायोग्ये मौक्तिकहारपरिकलनोचिते तव कण्ठे पाशः बन्धनरज्जुः अर्पितः निहितः । सापराधः अपराधेन सह वर्तमानः विसदृशयोजन-प्रवृत्तत्वात् कृतापराधः स करः मया कथं मुच्यते । सापराधस्य गृहीतस्य नैव सहसा परित्यागो युक्त इति न्यायमनुसृत्य अनिष्टाचरणेन पातकिनं तावकीनं हस्तं नैव मुञ्चामीति नायकस्याशयः ॥ १२ ॥

साकूतं आकूतेन अभिप्रायेण सहितं । साभिप्रायमिति यावत्

जिस (हाथ) ने मुक्ता के हार को पहने योग्य तुम्हारे गले में यह फाँस लगाया है वह अपराधी होने के कारण पकड़ लिया गया है । इस लिये उस अपराधी हाथ को मैं कैसे छोड सकता हूं ?(१) ॥ १२ ॥

विदूषकः—अस्तु, उसके फाँसी डालने का क्या कारण है ?

चेटी—अवश्य ही, यही आपके प्यारे मित्र ।

नायकः—इसके मरने का कारण मैं कैसे हूं ? मै तो इसे नहीं जानता ।

विदूषकः—आर्य्ये ! यह कैसे हो सकता है ।

चेटी—(**अभिप्राय के साथ**) जिस प्राणप्यारी को शिला के ऊपर तुम्हारे प्रियमित्र ने चित्रित किया था उसमें अधिक पक्षपात (अनुराग) होने के कारण जीमूतवाहन ने विवाह

---

(१) हाथ ने बडा भारी अपराध किया है । जिस कण्ठ में मोतियों की माला पहनाई जानी चाहिये, उसी कण्ठ में हाथ ने फाँसी लगाने के लिये लता की फँसरी लटकाई है । भला इससे बडा और कौन अपराध हो सकता है । जिस तरह से कोई राजकर्मचारी किसी खून आदि किये हुये अपराधी को पकड़ लेने पर नहीं छोड़ता उसी तरह नायक (राजा की हैसियत से) उस अपराधी हाथ को पकड़ने पर नहीं छोड़ता है ।

सिलाअले आलिहिदा । ताए पक्खवादिणा एदेण पडिबादअन्तस्सबि मित्तावसुणो णाहं पडिच्छिदे त्ति जादणिव्वेदाए इमाए एव्वं ववसिदं । (या सा प्रियवयस्येन ते काऽपि हृदयवल्लभा शिलातले आलिखिता, तस्याः पक्षपातिना एतेन प्रतिपादयतोऽपि मित्रावसोर्नाहं प्रतीष्टेति जातनिर्वेदया अनया एवं व्यवसितम् ।)

नायकः । [सहर्षमात्मगतम्] । **कथमियमेवासौ विश्वावसोर्दुहिता मलयवती !! अथवा रत्नाकरादृते कुतश्चन्द्रलेखायाः प्रसूतिः ? हा ! कथं वञ्चितोऽस्मि अनया ?**

जा सा इति । सा या तव प्रियवयस्यन जीमूतकेतुनेत्यर्थः । काऽपि अज्ञाताभिधाना । हृदयवल्लभा हृदयानन्दकारिणी प्रियतमा आलिखिता तस्या पक्षपातिना गाढानुसक्तेन तायकेन प्रत्याख्यातस्य निषिद्धस्य मित्रावसोः नाहं प्रतीष्टामि नाहं स्वीकृता, इति वचन श्रुत्वा । जातनिर्वेदया जातः ईर्ष्यावशेन उत्पन्नः निर्वेदः आत्मावमानन यस्याः तथाभूतया अनया एवं व्यवसितं प्राणत्यागरूपे कार्ये उत्साहः प्रदर्शितः ।

कथमियमिति । रत्नाकरात् अमूल्यानां रत्नानां आकरात् निधेः समुद्रात् ऋते विना ('अन्यारादितरर्ते' इत्यादिना 'ऋते' योगे पञ्चमी) चन्द्रलेखायाः चन्द्रकलायाः प्रसूतिः उत्पत्तिः कुतो भवति ? यथा रत्नाकरादेव चन्द्रकलारत्न समुत्पन्नं नान्यस्मात् । एवं गुणानामाकरात् विश्वावसोः सकाशादेव मलयवतीरत्नं जातमिति सम्भाव्यते नान्यस्मात् पुरुषादिति भावः । अत्र चन्द्रकलामलयवत्योः रत्नाकरविश्वावस्वोश्च बिम्बप्रतिबिम्बभावात् दृष्टान्तालङ्कारः 'दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम्' इति तल्लक्षणात् ।

के लिये मित्रावसु की प्रार्थना को स्वीकार नहीं किया था । इसी अपने अपमान के कारण ईर्ष्या वश इस (मलयवती) ने ऐसा किया है ।

नायकः—(हर्षकेसाथ आपही आप) क्या यही विश्वावसु की पुत्री मलयवती है !! अथवा समुद्र छोड़कर चन्द्रलेखा का जन्म और कहाँ हो सकता है(१) ? हा ! मैं इससे क्यों वञ्चित रह गया (मैंने विवाह क्यों नहीं कर लिया) ।

---

(१) सुन्दर वस्तु का जन्मस्थान ऊँचे कुल में ही हुआ करता है । चन्द्रकला का जन्म रत्नोंके आकर समुद्रमें हुआ है । उसी भांति मलयवतीका जन्म उच्च सिद्धवंशमें हुआ है ।

विदूषकः। **भोदि ! जइ एव्वं, ता अणवरद्धो दाणीं पि अवअस्सो। अहवा जइ मम ण पत्तिआअदि, तदा सअं जेव्व सिलाअलं गदुअ पेक्खदु भोदी।** (भवति ! यद्येवं, तदनपराद्ध इदानीं प्रियवयस्यः। अथवा यदि मम न प्रत्येति, तदा स्वयमेव शिलातलं गत्वा प्रेक्षतां भवती।)

नायिका। [सहर्षं सलज्जञ्च नायकं पश्यन्ती हस्तमाकर्षति]।

नायकः। [सस्मितम्] **न तावन्मुञ्चामि यावन्मम हृदयवल्लभां शिलायामालेख्यगतां न पश्यसि।**

[सर्वे परिक्रामन्ति]।

विदूषकः। [कदलीपत्रमपनीय] **भोदि ! पेक्ख एदं से हिअअवल्लहं जणं।** (भवति ! प्रेक्षस्व प्रेक्षस्व एतमस्य हृदयवल्लभं जनम् ।)

नायिका। [निरूप्यापवार्य्य सस्मितम्] **चदुरिए ! अहं विअ आलिहिदा।** (चतुरिके ! अहमिवालिखिता।)

चेटी। [चित्राकृतिं नायिकाञ्च निर्वर्ण्य] **भट्टिदारिए ! किं भणसि ? अहं विअ आलिहिदेत्ति ? ईरिसं सोसारिच्छं, जेण ण जाणीअदि, किं दाव इध जेव्व सिलाअले भट्टिदारिआए पडिबिम्बं सङ्कतं, उद तुमं आलिहिदे त्ति।** (भर्तृदारिके ! किं भणसि ? अहमिवालिखितेति। ईदृशं सौसा-

---

भट्टिदारिए इति। ईदृश एतादृशं सौसादृश्यं सर्वथा तुल्यरूपता येन न ज्ञायते

विदूषकः—देवि ! यदि ऐसा है तो मेरा प्यारा मित्र निरपराधी है। अथवा यदि आप मेरा विश्वास न करें तो स्वयं ही शिला के पास जाकर आप देख लें।

नायिका—(**हर्ष तथा लज्जा के साथ नायक को देखती हुई हाथ को खींचना चाहती है**)।

नायकः—(**मुसकराहट के साथ**) मैं तब तक तेरे हाथ को नहीं छोड़ूँगा जब तक शिला पर चित्रित मेरी प्राण प्यारी को नहीं देखलोगी। (**सब चन्दन लता के कुञ्ज में घुसते हैं**)

विदूषकः—(**केले के पत्ते को हटा कर**) देवि ! देखो देखो। यही इसके हृदय का प्रियजन है।

नायिका—(**देखकर, हटाकर, मुसकराहट के साथ**) ये चतुरिका ! मालूम होता मैं ही इस चित्र में खींची गई हूं।

चेटी—(**खींचे गये चित्र को तथा नायिका को ध्यान पूर्वक देखकर**) राजपुत्री ! क्या कहती हो कि मालूम होता है कि मैं ही इस चित्र में खींची गई हूं ? इन दोनों में इतनी

दृश्यं, येन न ज्ञायते, किं तावदिहैव शिलातले भर्तृदारिकायाः प्रतिबिम्बं सङ्क्रान्तम्, उत स्वमालिखितेति ।)

नायिका । [विहस्य] हञ्जे ! दुज्जणीकिदम्हि इमिणा मं चित्तगदं दंसअंतेण । (हञ्जे ! दुर्जनीकृताऽस्मि अनेन मां चित्तगतां दर्शयता ।)

विदूषकः । णिव्वुत्तो दाणीं दे गन्धव्वो विआहो । ता मुञ्च दाव से अग्गहत्थं । एषा क्खु काबि तुरिदतुरिदा इध ज्जेव्व आअच्छदि । (निर्वृत्त इदानीं ते गान्धर्वो विवाहः । तन्मुञ्च तावदस्या अग्रहस्तम् । एषा खलु काऽपि त्वरितत्वरिता इहैवागच्छति ।)

नायकः । [मुञ्चति] ।

किं तावत् शिलातले तव प्रतिबिम्बं छाया सङ्क्रान्तं पतिता, उत अथवा त्व आलिखिता चित्रिता । किमयं तव मणिशिलातले प्रतिबिम्बः, अथवा चित्रमिदमिति निपुणं न ज्ञायते । अत्र चित्रस्य बिम्बप्रतिबिम्बकल्पनेन अतीवप्रकर्षता द्योत्यते ।

हञ्जे इति । अमुना इदं चित्रं दर्शयता । मयि एतस्य ईदृशोऽनुरागातिशयः मम चास्मिन् एतादृशः कोप इति सद्यो ज्ञात्वा दुर्जनीकृतास्मि प्रतिमूढा कृतास्मि । स्वचेतसि लज्जापितास्मीति यावत् ।

ब्राह्मदैवादिष्वष्टसु विवाहप्रकारेष्वन्यतमो नायकनायिकयोरिच्छामात्रजन्यो **गन्धर्वविवाहः** । यथाह मनुः—

इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च ।
गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः ॥

(२ अ०, १२ श्लो०)

समता मिल रही है कि यह नहीं मालूम होता कि तुम्हारी परिछाँई इस पत्थर में दिखाई देती है या तुम इसमें चित्रित की गई हो ।

नायिका—(हँसकर) दासी ! शिला पर खींचे गये चित्र को दिखा कर इन्होंने मुझे खूब ही लज्जित किया है ।

विदूषकः—तुम्हारा गान्धर्व विवाह हो गया । इसलिये अब इसका हाथ छोड़ दो । कोई स्त्री अवश्य ही बड़ी जल्दी में यहाँ आ रही है ।

नायकः—(उसके हाथ को छोड़ देता है)

द्वितीया चेटी। [प्रविश्य सहर्षम् । **भट्टिदारिए ! दिट्ठिआ वड्ढसि। पडिच्छिदा क्खु तुमं भट्टिओ जीमूदवाहणस्स गुरूहिं।** (भर्तृदारिके ! दिष्ट्या वर्द्धसे । प्रतीष्टा खलु त्वं भर्तृजीमूतवाहनस्य गुरुभिः ।)

विदूषकः । [नृत्यन्] **ही ही भो ! सम्पुण्णा मणोरहा पिअवअस्सस्स । अहवा णहि णहि, भादीए मलअवदीए । अहवा ण एदाणं,** [भोजनमभिनयन्] **मम जेव्व एक्कस्स बम्हणस्स ।** (ही ही भोः ! सम्पूर्णा मनोरथाः प्रियवयस्यस्य । अथवा न हि न हि, भगिन्या मलयवत्याः । अथवा नैतयोः, ममैव एकस्य ब्राह्मणस्य ।)

चेटी । [नायिकामुद्दिश्य] **आणत्तम्हि जुवराजमित्तावसुणा । जह,-"अज्ज जेव्व मलवअदीए विआहो, ता लहुं तं गेण्हिअ आअच्छ"त्ति। ता एहि गच्छम्ह ।** (आज्ञप्ताऽस्मि युवराजमित्रावसुना, यथा,—"अद्यैव मलयवत्याः विवाहः, तल्लघु तां गृहीत्वा आगच्छ" इति । तदेहि गच्छावः)

विदूषकः । **गदा क्खु तुमं दासीए धीए ! इदं गेण्हिअ । वअस्सेण किं इध जेव्व अवत्थिदव्वं ?** (गता खलु त्वं दास्याः पुत्रि ! इमां गृहीत्वा । वयस्येन किमिहैव अवस्थातव्यम् ?)

चेटी । **हदास ! मा तुवर तुवर । तुम्हाणं पि ण्हवणअं आअदं**

हदास इति । युष्माकं स्नपनकं स्नानोचितं देशकालादिकमथवा स्नानसाधनं

द्वितीया चेटी—(प्रवेश कर, हर्ष के साथ) राजपुत्री ! तुम धन्यवाद के पात्र हो। जीमूतवाहन के माता पिता ने तुम्हें अपनी पुत्रवधू स्वीकार कर लिया है।

विदूषकः—(नाचता हुआ) अहा ! हा !! हा !!! हा !! मेरे प्यारे मित्र के सब मनोरथ पूरे हो गये। अथवा नहीं नहीं मलयवती के मनोरथ सफल हुये। अथवा इन दोनों के नहीं (खाने का अभिनय करता हुआ) केवल, मेरे जैसे एक ब्राह्मण के ही।

चेटी—(नायिका को सम्बोधित कर के) युवराज मित्रावसु ने मुझे ऐसी आज्ञा दी है कि "आज ही मलयवती का विवाह है। इसलिये उसे लेकर शीघ्र ही आओ"। इसलिये आवो हम दोनों (चेटी और मलयवती) चलें।

विदूषकः—ऐ दासी की लड़की ! इसे लेकर तुम जा रही हो ? क्या मेरा मित्र यहाँ बैठा रहेगा ?

चेटी—ऐ अभागे ! अधीर मत होवो। अधीर मत होवो। तुम्हलोगों के लिये भी स्नान

उज्जेव्व । (हताश ! मा त्वरस्व त्वरस्व । युष्माकमपि स्नपनकमागतमेव ।)

नायिका । [सानुरागं सलज्जञ्च नायकं पश्यन्ती सपरिवारा निष्क्रान्ता] ।

वैतालिकः । [नेपथ्ये पठति] ।—

वृष्ट्या पिष्टातकस्य द्युतिमिह मलये मेरुतुल्यां दधानः
सद्यः सिन्दूर* दूरीकृतदिवससमारम्भसन्ध्याऽऽतपश्रीः ।
उद्गीतैरङ्गनानां †चलचरणरणन्नूपुरह्लादहृद्यै—

द्रव्यम् । अत्र तु स्नानवेलेत्यर्थः । आगतं प्राप्तमेव । वैतालिकः विविधेन तालेन व्यवहरतीति प्रबोधादिकार्यसूचकः स्तुतिपाठकः ("वैतालिका बोधकरा" इत्यमरः) ।

अथ प्राप्तामेव तां स्नानवेला विशदतया प्रकटयति वैतालिकः—**वृष्ट्येति** ।

पिष्टातकस्य पटवासस्य ('पिष्टातः पटवासकः' इत्यमरः) । ['उत्सवेषु रञ्जनीतण्डुलकुङ्कुमादीना तत्र तत्रोलूखलावहननेन चूर्णप्रसारणं क्रियते, तत् पिष्टातकमित्युच्यते' इति विमर्शिण्या शिवरामः । 'गुलाल'—'बुक्का' इति हिन्दीभाषायाम् ।] वृष्ट्या निरन्तरप्रसरणेन । इह मलयाचले । मेरुतुल्यां सुमेरुसदृशीं । अरुणामिति भावः । द्युतिं शोभां दधानः धारयन् । सद्यः तदानीमेव । सिन्दूरदूरीकृतदिवससमारम्भसन्ध्यातपश्रीः सिन्दूरेण उपर्युपरि विद्धिसेन सिन्दूरचूर्णेन । दूरीकृता तिरस्कृता । दिवससमारम्भस्य प्रातःकालस्य सन्ध्यातपस्य च श्रीः शोभा येन तादृशः । पिष्टातकोपरि सिन्दूरधूलीप्रसरणेन मलयाचले एवारुणसन्ध्यातपकृतशोभां सातिशयं सम्पादयन्निति भावः । सिद्धलोकः अङ्गनानां सुन्दरीणां । चलचरणरणन्नूपुरह्लादहृद्यैः चलचरणेषु चञ्चलचरणकमलेषु रणन्तः शब्दायमानाः ये नूपुराः तेषां ह्लादेन मृदुना स्वनेन हृद्यैः मनोहरैः । (एतेन वाद्यसम्पदुक्ता भवति)

का सामान आना ही चाहता है ।

नायिका—(प्रेम तथा लज्जा के साथ नायक को देखती हुई दासी के साथ बाहर जाती है)

वैतालिक—(नेपथ्य में पढ़ता है)—

चारों ओर अबीर—गुलाल—की वृष्टि हो रही है जिससे इस मलयाचल पर सिद्धलोक मेरु की शोभा धारण कर रहा है । सिन्दूर उड़ाया जाता है जिससे प्रातः तथा सायंकाल के आतप की शोभा फीकी सी जान पड़ती है । सुन्दर स्त्रियाँ गान्धार ग्राम में उच्च स्वर से गा

---

*धूली-ग । †०मरुणमणि-ग ।

उद्वाहस्नानवेलां कथयति भवतः सिद्धये सिद्धलोकः ॥ १३ ॥

विदूषकः । [आकर्ण्य] भो वअस्स ! दिट्ठिआ आगदं ण्हाणअणं । [भो वयस्य ! दिष्ट्या आगतं स्नानकम् ।]

नायकः । [सहर्षम्] यद्येवं किमिदानीमिह स्थितेन ? आगच्छ । तातं नमस्कृत्य स्नानभूमिमेव गच्छावः ॥

*अन्योन्यदर्शनकृतः समागमरूपानुरागकुलवध्वाम् ।

उद्गीतैः उच्चैर्गीयमानैः गीतैः [उद्गीतैः गान्धारग्रामेण गीतैः

"षड्जमध्यमनायानौ ग्रामौ गायन्ति मानवाः ।
न तु गान्धारनामानं न लभ्यो देवयोनिभिः" ॥

इति सङ्गीतशास्त्रनियमादिति जीवानन्दः] सिद्धये बन्धुवर्गस्य मङ्गलाय । भवतः उद्वाहस्नानवेलां विवाहसम्बन्धिनः स्नानस्य कालं कथयति । परितः कुङ्कुमचूर्णमवकीर्यते, अन्यतश्च सिन्दूरचूर्णं प्रक्षिप्यते येन मलयाचलोऽपि सेमरतुल्यमर्घ्यमानं धारयति । येन सन्ध्यातपस्यापि कान्तिः प्रथमं दूरीकृता भवति । रङ्गस्त्रीभिर्नृत्यद्भिः रमणीयोऽपि माङ्गल्यं गीतमुच्चैः स्वरेण गायन्ति । श्रावते आयाता भवतः स्नानवेला । अतोऽहं तत्रावस्थानेन । शीघ्रमित आगम्यतामिति भावः । स्वधवा कीर्तिरियम्" ॥ १३ ॥

इत्थं समीहितसिद्धया हृष्यन् आत्मनः समुचितायां विवाहाय श्लाघमानो नायक आह **अन्योन्येति**—अन्योन्यदर्शनकृतः अन्योन्यदर्शनेन परस्परावलोकनेन कृतः सम्पादितः **समागमः** ('यस्यां मनश्चक्षुषोः प्रवृत्तिस्तस्यामृद्धिः' अधिकरण ३,

---

रही है। चलने में उनके नूपुरों से मीठी मीठी आवाज हो रही है। सुन्दरियों के इस गाने से जान पड़ता है कि सिद्धलोक—सिद्ध लोगों की निवासभूमि—कल्याण के लिये आपके स्नान की वेला की सूचना दे रहा है ॥ १३ ॥

विदूषकः—(सुनकर) ये मित्र स्वागत है। स्नान का सारा सामान [या समय] आ गया।

नायकः—(हर्ष के साथ) यदि ऐसा है तो इस समय यहाँ रहने से क्या लाभ। आओ, पिता जी को प्रणाम करके हम लोग स्नान करने के स्थान पर ही चलें।

नायक तथा नायिका के एक दूसरे के दर्शन होने से उत्पन्न होने वाला समागम-विवाह

---

*पदमिदं ग पुस्तके नैवोपलभ्यते ।

केषाञ्चिदेव मन्ये समागमो भवति पुण्यवताम् ॥ १४ ॥

[इति निष्क्रान्ताः-सर्वे] ।

इति द्वितीयोऽङ्कः ।

अध्याय १, सूत्र १८ इति कामसूत्रानुसारेण दर्शनस्य मुख्यत्वात् तत्कृतस्य संयोगस्य गौरवं प्रतिपादितं भवति) समानरूपानुरागकुलवयसा समानानि सदृशानि रूपं च, अनुरागः स्नेहश्च, कुल वंशश्च, वयः अवस्था च येषां तेषां केषाञ्चिदेव नराणां न तु सर्वेषा अतएव पुण्यवतां जनाना भवतीति मन्ये । ऐहिकानां प्राक्तनानाञ्च पुण्यानां परिपाकेनैव एतादृशः समुचितः समागमो भवतीति भावः । आवयोः पुण्यवत्तयैव एतादृशः सदृशः सम्बन्धो भवतीति मनसि चिन्तयन् नायकः निष्क्रान्तः । पद्यमेतत् 'सवर्णायामनन्यपूर्वायां शास्त्रतोऽधिगतायां धर्मोऽर्धः पुत्राः सम्बन्धः पञ्चवृद्धिरनुपस्कृता रतिश्चेति' अधि० ३, अध्या० १, सू० १ कामसूत्रमनुसरतीति ध्रुवमवगन्तव्यम् । आर्या छन्दः । 'परस्परानुराग एव वरकन्ययोरुद्वाहे सर्वदाभ्यर्थनीयः' इत्यर्थो निबद्धो भवभूतिना मालतीमाधवे यथा—

"इतरेतरानुरागो हि विवाहकर्मणि परार्ध्यं मङ्गलमिति"

कालिदासेनापि मालविकाग्निमित्रे यथा—

अनातुरोत्कण्ठितयोः प्रसिध्यता समागमेनापि रतिर्न मां प्रति ।
परस्परप्राप्तिनिराशयोर्वरं शरीरनाशोऽपि समानुरागयोः ॥ १४ ॥

इति भावार्थदीपिकाख्यायां नागानन्दव्याख्यायां द्वितीयोऽङ्कः समाप्तः ।

सम्बन्ध—समान रूप, प्रेम, कुल तथा उम्र रखनेवाले किसी ही किसी पुण्यात्मा जीवों का हुआ करता है । [सर्व साधारण का नहीं—एक दूसरे को देखकर जो प्रेमबन्धन होता है, वही श्रेष्ठ होता है । यह किसी किसी भाग्यशाली के भाग्य में ही रहता है । सब किसी के नहीं] १४

(सब चले जाते हैं)

इति भाषानुवादे द्वितीयोऽङ्कः ।

अथ तृतीयोऽङ्कः

[ततः प्रविशति मत्तो विचित्र*विह्वलवेशश्चषकहस्तो विटः †स्कन्धारोपितसुराभाण्डश्चेटश्च]।

अथ द्वितीयेऽङ्के उद्बन्धनावधि विप्रलम्भपरिपोषे प्रतिपादिते, विवाहारम्भे च परिसमापिते, अवसरप्राप्तं सम्भोगवर्णनमस्मिन्नङ्के कविना प्रस्तूयते। तत्रापि च 'वृत्तयः काव्यमातृकाः' इत्युक्तत्वात् नाटकस्य सर्ववृत्तिसमाश्रयसर्वरसविशिष्टत्वादत्र।

या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसंयुता या बहुनृत्तगीता।
कामोपभोगप्रभवोपचारा तां कैशिकीं वृत्तिमुदाहरन्ति।
(ना० शा० २२ अध्या० ४७ श्लो०)॥

इति भरतमुनिना निरुक्तलक्षणायाः कैशिकीवृत्त्या अवतारः। तस्यां च शृङ्गाररसवर्णनेऽतीवशोभाधायकत्वात् वेषभाषाचेष्टारूपेण विटचेटादीनां मदहास्यरूपसंवादे स्फुटं प्रतीयमानस्य हास्यनर्मणः प्रस्तावः। तल्लक्षणं यथा नाट्यशास्त्रे—

आस्थापितशृङ्गारं विशुद्धकरणं निवृत्तवीररसम्।
हास्यप्रवचनबहुलं नर्म त्रिविधं विजानीयात्॥ (२२ अ०, ४६ श्लो)

तत इति। चषकहस्तः—चषकं पानपात्रं (चषकोऽस्त्री पानपात्रमित्यमरः) हस्ते यस्यासौ। मत्तः मदपानेन उन्मत्तः। विचित्रः कौतूहलोत्पादकः विह्वलः व्याकुलः शीधुपानेन इतस्ततो विक्षिप्तः, वेशः परिधानं यस्य तथाभूतः।

विटः—नायकस्य शृङ्गारसहायः पुरुषविशेषः। तल्लक्षणं चोक्तं विश्वनाथेन-

सम्भोगहीनसम्पत् विटस्तु धूर्तः कलैकदेशज्ञः।
वेशोपचारकुशलो मधुरोऽथ बहुमतो गोष्ठ्याम्॥

स्कन्धारोपितसुराभाण्डः—स्कन्धे आरोपितं स्थापितं सुराभाण्डं मदिरापात्रं येनासौ। चेटः नायकस्य शृङ्गारसहायकोऽधमः पुरुषविशेषः। यथोक्तं विश्वनाथेन-

शृङ्गारेऽस्य सहाया विटचेटविदूषकाद्याः स्युः।
भक्ता नर्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः॥

(तब मतवाला, विचित्र और विह्वल वेश को बनाये हुये, शराब का प्याला हाथ में लिये हुये विट और कन्धे पर शराब का मटका लेकर चेट दोनों प्रवेश करते हैं।)

*उज्वल—क। † कपुस्तके नास्ति।

विटः । णिच्चं जो पिवइ सुरं जणस्स पिअसंगमञ्च जो कुणइ ।
मह दे दो अवि देवा बलदेओ कामदेओ अ ॥ १ ॥
[घूर्णन्] । सफलं क्खु मे सेहरअस्स जीविदं ।—
वच्छत्थलम्हि दइआ *दिण्णुप्पलवासिआ मुहे मइरा ।
सोक्खम्मि अ सेहरओ णिच्चं विअ संठिआ जस्स ॥ २ ॥
[प्रस्खलन्] अरे ! को मं चालेदि ? [सहर्षम्] अवस्सं णोमालिआ मं परिहसदि ।

(नित्यं यः पिबति सुरां जनस्य प्रियसङ्गमञ्च यः करोति ।
मम तौ द्वावपि देवौ बलदेवः कामदेवश्च ॥
सफलं खलु मे शेखरकस्य जीवितम् ।—
वक्षःस्थले दयिता दत्तोत्पलवासिता मुखे मदिरा ।

× × ×
तथा शकारचेटाद्या अधमाः परिकीर्तिताः ॥

मदिरापानलोलुपः कामी विटो देवताविषये स्वाभिमतं मतं प्रदर्शयति णिच्चं इति । यः नित्यं प्रतिदिनं सुरां मदिरां पिबति स बलदेवः रेवतीरमणो बलभद्रो, यश्च जनस्य सदा प्रियसङ्गमं प्रियजनसमागमं करोति स कामदेवः, तौ द्वौ एव साधुपानमत्तस्य प्रियसङ्गमाभिलाषुकस्य च मम देवौ उपास्यमानौ वर्तेते, नान्यौ इति भावः । गाथा ॥ १ ॥

शेखरक इति विटस्याभिधानम् ।

स्वजीवितसाफल्यमौद्धत्यपूर्णेन वचसा प्रतिपादयति वच्छत्थलेत्यादिना । यस्य वक्षःस्थले दयिता प्रिया वर्तते, मुखे दत्तोत्पलवासिता दत्तैः तत्र निहितैः

विटः—जो नित्य शराब को पीने वाले हैं और जो मनुष्यों का उसके प्रियजन से समागम कराने वाले हैं । येही दोनों देव-बलदेव और कामदेव मुझे मान्य हैं । (यही मेरे उपास्य देव हैं) ॥ १ ॥

(झूमता हुआ) मुझ शेखरक का जीवन सफल है ।

मेरी छाती पर स्त्री रहती है, मुख में सुन्दर कमल से सुवासित शराब है तथा सिर पर ताज नित्य ही स्थापित रहता है । (इन कारणों से मेरा जीवन सफल है) ॥ २ ॥

(गिरता हुआ) अरे ! मुझे कौन धक्का दे रहा है । **(हर्ष के साथ)** अवश्य ही

---

*नीलु०-ग ।

शीर्षं च शेखरको नित्यमिव संस्थिता यस्य ॥

अरे ! को मां चालयति ? अवश्यं नवमालिका मां परिहसति ।)

चेटः । भट्टक ! ण अ दाव सा अज्जवि इहागच्छदि । (भर्तः ! न च तावत् सा अद्यापि इहागच्छति ।)

विटः । [सरोषम्] पढमपहरे ज्जेव मलअवदीए विआहमङ्गलं णिव्वुत्तं । ता कीस सा दाणीं पभादे वि णागच्छदि ? [विचिन्त्य सहर्षम्] अहवा विआहमहोस्सवे सव्वो ज्जेव पिअपणइणीजणसणाहो सिद्धविज्जाहरलोओ कुसुमाअरुज्जाणं आवाणअसोक्खमणुभविस्सदि त्ति तक्केमि । तहिं ज्जेव णोमालिया मं अपेक्खमाणा चिट्ठदि; ता तहिं ज्जेव गमिस्सं । कीरिसो णोमालिआए विणा सेहरओ ? (प्रथमप्रहरे एव मलयवत्या विवाहमङ्गलं निर्वृत्तम् । तत् कथं सा इदानीं प्रभातेऽपि नागच्छति ? अथवा विवाहमहोत्सवे सर्व एव प्रियप्रणयिनीजनसनाथः सिद्धविद्याधरलोकः कुसुमाकरोद्याने आपानसौख्यमनुभविष्यतीति तर्कयामि । तत्रैव नवमालिका मां पेक्षमाणा तिष्ठति; तत्रैव गमिष्यामि । कीदृशो नवमालिकया विना शेखरकः ?)

[प्रस्खलन्निष्क्रमितुमीहते]

उत्पलैः कमलैः वासिता सौगन्ध्यमापादिता मदिरा विद्यते । शीर्षे शिरसि च शेखरकः विटाधिपत्यं चिह्नं संस्थिता स्थापिता विद्यन्ते तस्यैव मे जीवनं सफलं नान्येत्यर्थः । गाथा ॥ २ ॥

पढम इति । निजप्रणयिनीजनसनाथः स्वदयितासंयुतः । सिद्धविद्याधरलोकः सिद्धाना विद्याधराणा च गणः कुसुमाकरोद्याने आपानसौख्यं आ समन्तात् पिबन्ति जनाः यत्रेति आपानं पानगोष्ठी (आपान पानगोष्ठिकमित्यमरः) तस्य सौख्यं आनन्दं अनुभवति । कीदृशो नवमालिकया विना शेखरकः । यथा नव-

---

नवमालिका मुझसे हँसी-मज़ाक-कर रही है ।

चेटी—स्वामी ! वह यहाँ अब तक नहीं आई ।

विटः—(क्रोध के साथ) पहिले पहर में ही मलयवती का विवाह हो गया । इसलिये वह प्रातःकाल के समय तक भी क्यों नहीं आई ? (सोच कर, हर्ष के साथ) अथवा विवाह के उत्सव में सभी सिद्ध और विद्याधर लोग अपनी प्रियतमाओं के साथ कुसुमाकर नामक उद्यान में शराब के पीने के आनन्द का अनुभव करते होंगे । ऐसा मुझे मालूम होता है । वहीं नवमालिका मेरी प्रतीक्षा करती हुई बैठी होगी । इसलिये मैं वहां ही चलूँ ! नवमा-

चेटः । एदु एदु भट्टके । एदं कुसुमाअरुज्जाणं । विसदु भट्टके । (एतु एतु भर्त्ता । एतत् कुसुमाकरोद्यानम् । तत् प्रविशतु भर्ता ।) [उभौ प्रवेशं नाटयतः] ।

[ततः प्रविशति स्कन्धन्यस्तवस्त्रयुगलो विदूषकः] ।

विदूषकः । संपुण्णा मणोरहा पिअवअस्सस्स । सुदं क्खु मए वि पिअवअस्सो कुसुमाअरुज्जाणं गमिस्सदि त्ति । ता जाव तहिं ज्जेव्व गमिस्सं । [परिक्रम्य विलोक्य च] इदं कुसुमाअरुज्जाणं, जाव पविशामि इदं । [प्रविश्य भ्रमरबाधा नाटयन्] अरे ! कीस उण दुट्ठमहुअरामं ज्जेव्व अभिभवंति ! [आत्मानमाघ्राय] भोदु जाणिदं, जं तं मलअवदीबंधुज्जणेण जामातुअस्स पिअवअस्सो त्ति कदुअ सबहुमाणं वण्णकेहिं विलित्तोम्हि । सन्ताणकुसुमसेहरं च मम सीसे पिणद्धं । सो क्खु एसो अच्चाअरो अणत्थीभूदो । किं दाणिं एत्थ करिस्सं ? अहवा एदेण ज्जेव्व मलअवदीसआसादो लद्धेण रत्तंसुअजुअलेण इत्थिआवेसं विहिअ उत्तरीअकिदावगुण्ठणो गमिस्सं । पेक्खामि दाव किं दासीए पुत्ता महुअरा करिस्संति । (सम्पूर्णा मनोरथाः प्रियवयस्यस्य । श्रुतं खलु मयाऽपि प्रियवयस्यः कुसुमाकरोद्यानं गमिष्यतीति । तद् यावत् तत्रैव गमिष्यामि । इदं कुसुमाकरोद्यानं, यावत् प्रविशामीदम् । अरे ! कथं दुर्नुष्टमधुकरा मामेव अभिभवन्ति ! भवतु ज्ञातं, यत् तन्मलयवतीबन्धुजनेन जामातुः प्रियवयस्य इति कृत्वा सबहुमानं वर्णकैर्विलिप्तोऽस्मि । सन्तानकुसुमशेखरकश्च मम शीर्षे पिनद्धः । स खलु

मालिका कुसुमं विना शेखरकः शिरोमाल्य नैव शोभते, तथा स्वदयितया नवमालिकया विरहितः शेखरकनामा विटोऽपि न भातीति भावः ।

संपुण्णा इति । सबहुमानं अतिशयसन्मानेन सह वर्णकैः अङ्गरागैः कुङ्कु-

---

लिका के बिना भला शेखरक का जीवन कैसा ? (उसके बिना मेरा जीवन नीरस है) (गिरता हुआ बाहर जाना चाहता है)

चेटी—स्वामी ! आइये । आइये । यही कुसुमाकर उद्यान है । इसलिये आप प्रवेश करें ।

(दोनों प्रवेश करने का अभिनय करते हैं)

(तब कन्धे पर दो वस्त्रों को रक्खे हुये विदूषक प्रवेश करता है ।

विदूषकः—मेरे प्रिय मित्र के सम्पूर्ण मनोरथ पूरे हो गये । मैंने भी सुना है कि मेरे प्रियमित्र कुसुमाकर नामक बगीचे में जायेंगे । इसलिये वहीं मैं भी चलूँ । (परिक्रमा कर,

एषोऽत्यादरोऽनर्थीभूतः । किमिदानीमत्र करिष्यामि ? अथवा एतेनैव मलयवतीसकाशाल्लब्धेन रक्तांशुकयुगलेन स्त्रीवेशं विधाय उत्तरीयकृतावगुण्ठनो गमिष्यामि । प्रेक्षे तावत् किं दास्याः पुत्रा मधुकराः करिष्यन्ति ।) [तथा करोति] ।

विटः । [निरूप्य सहर्षम्] **अरे चेडा !** [अङ्गुल्या निर्दिश्य सहासम्] **एसा क्खु णोमालिआ आअदा । मं पेक्खिअ चिरस्स आअदो त्ति कुविदा अवगुण्ठणं कदुअ अण्णदो गच्छदि । ता कण्ठे गेण्हिअ पसादेमि णं ।** (अरे चेट ! एषा खलु नवमालिका आगता । मां प्रेक्ष्य चिरस्यागत इति कुपिता अवगुण्ठनं कृत्वाऽन्यतो गच्छति । तत् कण्ठे गृहीत्वा प्रसादयाम्येनाम् ।) [सहसोपसृत्य कण्ठे गृहीत्वा मुखे ताम्बूलं दातुमिच्छति] ।

मादिविलेपनैः (वर्णकं स्यात् विलेपनमित्यमरः) विलिप्तोऽस्मि विशेषेण लिप्ताङ्गोऽहं जातः । सन्तानकुसुमशेखरः च सन्तानस्य कल्पवृक्षस्य ("सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनभि"त्यमरः) कुसुमैः निर्मितः शेखरः शिरोमाल्यं । पिनद्धः बद्धं च । एष मम शीर्षे शिरसि निहितः अत्यादरः अधिकः सत्कार एव अनर्थीभूतः अनिष्टरूपेण परिवृत्तः । मलयवतीसकाशात् प्राप्तेन रक्तांशुकयुगलेन रक्ते रक्तवर्णे अंशुके वस्त्रविशेषे तयोः युगलेन द्वन्द्वेन । उत्तरीयकृतावगुण्ठनः उत्तरीयेन उत्तरीयवस्त्रेण कृतं अवगुण्ठन आवरणं येनासौ उत्तरीयेन स्वाननमाच्छाद्येत्यर्थः । दास्याः पुत्रा इति अधिक्षेपोक्तिः ।

और देखकर) यही कुसुमाकर उद्यान है । इसलिये मैं इसमें प्रवेश करताहूं । **(प्रवेश कर, भौंरे से भय का अभिनय करता हुआ)** अरे ! फिर क्यों ये दुष्ट भौंरे मुझ पर ही आक्रमण करते हैं । **(अपने को सूंघ करके)** मैं जान गया कि मलयवती के बन्धुजनों ने मुझे दामाद (जीमूतवाहन) का प्रिय मित्र समझ कर आदर के साथ मेरा मुँह रँग से रँग दिया है और कल्पवृक्ष के फूल की माला भी मेरे सिर पर बाँध दी है । यही मेरा अत्यन्त आदर इस समय अनर्थ का कारण हो रहा है । (इसी सुगन्ध के कारण भौंरे मेरे ऊपर आक्रमण कर रहे हैं) मैं इस समय क्या करूँ ? अथवा मलयवती से प्राप्त इन्हीं दोनों लाल वस्त्रों से स्त्री का वेष बनाकर और चादर से घूँघट काढ़ कर जाऊँ । अब मैं देखता हूं कि ये बदमाश भौंरे मेरा क्या करते हैं ।

(वैसा ही करता है) ।

विटः—(हर्ष के साथ, देखकर) अरे चेट ! **(अङ्गुली से निर्देश करता हुआ, हँसीके साथ)** यह नवमालिका आगई । देर से आये हुये मुझे देखकर क्रोध से घूंघट निकाल

विदूषकः [मद्यगन्धं सूचयन् नासिकां गृहीत्वा पराङ्मुखः स्थित्वा] **कहं एक्काणं महुअराणं सआसादो परिब्भट्ठो दाणिं अण्णस्स दुट्ठमहुअरस्स मुहे पडिदोम्हि।** (कथमेकेषां मधुकराणां सकाशात् परिभ्रष्ट इदानीमन्यस्य दुष्टमधुकरस्य मुखे पतितोऽस्मि।)

विटः। **कहं कोवेण परम्मुही भूदा?** [प्रणामं कुर्वन् विदूषकस्य चरणमात्मनः शिरसि कृत्वा] **पसीद णोमालिए! पसीद** (कथं कोपेन पराङ्मुखीभूता? प्रसीद नवमालिके! प्रसीद।)

[ततः प्रविशति चेटी]

चेटी। **आणत्तम्हि भट्टिदारिआए,—"हञ्जे णोमालिए! कुसुमाअरुज्जाणं गदुअ उज्जाणपालिअ पल्लविअं भणाहि। अज्ज सविसेसं तमालवीहिअं सज्जीकरेहि। मलअवदीसहिदेण जामाउकेण तत्थ गन्तव्वं" त्ति। आणत्ता मए पल्लविआ। ता जाव रमणीविरहवड्ढिदुक्कण्ठं पिअवअस्सअं सेहरअं अण्णेसामि।** [दृष्ट्वा] **एसो सेहरओ।** [सरोषम्]

कहं इति। कथं एकेषां एकविधानां ["एके मुख्यान्यकेवलाः" इत्यमरः] मधुकराणां भ्रमराणां सकाशात् परिभ्रष्टः इदानीं अधुना अन्यस्य अन्यविधस्य दुष्टमधुकरस्य मधु मदिराकरे हस्ते यस्या सौ मधुकरः सततमदिरासेवी पानमत्तो मद्यपः अथवा मधुकरः विटः। 'मधुकरेति विटस्यापि वाचकः' इति शिवरामः। तस्य दुष्टमद्यपस्य दुष्टविटस्य वा मुखे पतितोऽस्मि।

करके दूसरी ओर जा रही है। । इसलिये इसके गले में बाँह डालकर मैं इसे प्रसन्न करता हूं।

(एकाएक जाकर गलेमें हाथ डालकर मुखमें पान देना चाहता है।)

विदूषकः—(मदिरा के गन्धको जानकर नाक पकड़कर अलग होकर) किसी तरह एक मधुप (भौंरे) से पिण्ड छुडाकर दूसरे मधुप (शराबी) के बन्धन में पड़ गया?

विटः—क्रोध करके क्यों पराङ्मुख हो रही हो।

(प्रणाम करता हुआ विदूषकके चरणको अपने सिरपर रखकर)

ऐ नवमालिका! प्रसन्न होवो! प्रसन्न होवो! ।

(इसके बाद चेटी प्रवेश करती है)

चेटी—राजकुमारी ने मुझे आज्ञा दी है कि "ऐ नवमालिका! कुसुमाकर नामक बगीचे में जाकर वाटिका की रक्षिका पल्लविका से कह दो कि 'आज विशेष प्रकारसे तमावलकी क्यारी को सजाओ। मलयवती के साथ दामाद जीमूतवाहन वहाँ जायेंगे'। मैंने पल्लविका को

कहं भणं कम्पि इत्थिअं पसादेदि ! ता इह ट्ठिदा जेव्व जाणामि का एसेत्ति (आज्ञप्ताऽस्मि भर्तृदारिकया,—"हञ्जे नवमालिके ! कुसुमाकरोद्यानं गत्वा उद्यानपालिकां पल्लविकां भण । अद्य सविशेषं तमालवीथिकां सज्जीकुरु । मलयवतीसहितेन जामात्रा तत्र गन्तव्यम्" इति । आज्ञप्ता मया पल्लविका । तद् यावत् रजनीविरहवर्द्धितोत्कण्ठं प्रियवयस्यं शेखरकमन्विष्यामि । एष शेखरकः । कथमन्यां कामपि स्त्रियं प्रसादयति ! तदिह स्थितैव जानामि कैषेति ।

विटः । [सहर्षम्]

हरिहरपिदामहाणं पि गव्विदो जो ण जाणइ णमिदुं ।
सो सेहरओ चलणेसु तुज्ज णोमालिए ! पडइ ॥ ३ ॥

("हरिहरपितामहानामपि गर्वितो यो न जानाति नन्तुम् ।
स शेखरकश्चरणेषु तव नवमालिके ! पतति ॥")

विदूषकः । दासिप्पुत्ता ! मच्चवालआ ! कुदो एत्थ णोमालिआ ?

आणत्तम्हि इति । पल्लविकां तन्नाम्नीं उद्यानपालिकां उपवनरक्षिकां भण कथय । यत् अद्य तमालवीथिकां तमालतरुविरचितं गृहविशेषं ["वीथी पङ्क्तौ गृहाङ्गे च रूपकान्तरवर्त्मनोः" इति मेदिनी] तमालतरुमध्यस्थितं मार्गं वा । सविशेषं विशेषेण अतिशयेन सह । सज्जीकुरु परिष्कुरु । मलयवतीसहितेन जामात्रा जीमूतवाहनेन । रजनीविरहवर्धितोत्कण्ठं रजन्यां रात्रौ यः विरहः वियोगः तेन वर्धिता उत्कण्ठा समागमाभिलाषा यस्य तथाभूतम् ।

हरिहरेति । यः गर्वितः सन् अहङ्कारात् हरिहरपितामहानामपि ब्रह्मविष्णुमहेशानामपि (सम्बन्धिनमिति शेषः) नन्तुं प्रणाम कर्तुं न जानाति । हे नवमालिके ! स एव शेखरकः तव चरणयोः पतति मानभञ्जनाय पततीति भावः ॥३॥

आज्ञा दे दी है । अब रातमें विरह के कारण अधिक उत्कण्ठासे युक्त प्यारे मित्र शेखरकको खोजूँगी । (देखकर) यही शेखरक है । (क्रोधके साथ) क्यों ? यह किसी दूसरी स्त्री को प्रसन्न कर रहा है ? उससे क्यों प्रेम करता है ?) । इसलिये यहीं ठहरकर मै देखूँ कि वह स्त्री कौन है ?

विटः—(हर्ष के साथ)

जो शेखरक घमण्ड के कारण ब्रह्मा, विष्णु और महेश को भी प्रणाम नहीं करता, वही शेखरक, ऐ नवमालिके ! तुम्हारे पैरों पर पड रहा है ॥ ३ ॥

विदूषकः—बदमाश ! कामान्ध ! यहाँ नवमालिका कहाँ ।

(दास्याः पुत्र ! मत्तपालक ! कुतोऽत्र नवमालिका ?)

चेटी। [निरूप्य सस्मितम्] कधं मं त्ति करिअ मदपरवसेण सेहरएण अज्ज अत्तेओ पसादिअदि ? ता जाव अलीअं कोवं करिअ दुवेवि एदे परिहस्सिं। (कथं मामिति कृत्वा मदपरवशेन शेखरकेण आर्य्यात्रेयः प्रसाद्यते ? तद् यावत् अलीकं कोपं कृत्वा द्वावप्येतौ परिहसिष्यामि।)

चेटः। [चेटीं दृष्ट्वा शेखरकं हस्तेन चालयन्] भट्टका ! सुदं एदं। ण भोदि एसा णोमालिआ। एसा उण रोसारत्तेहिं लोअणेहि पेक्खंती आअदा। (भर्त्तः ! मुञ्चैतम्। न भवत्येषा नवमालिका। एषा पुना रोषारक्ताभ्यां लोचनाभ्यां प्रेक्षमाणा आगता।)

चेटी। [उपसृत्य] सेहरअ ! का उण एसा पसादिअदि ? (शेखरक ! का पुनरेषा प्रसाद्यते ?)

विदूषकः। [अवगुण्ठनमवतार्य] भोदि ! कोवि बम्हणो अहं मन्दभाअधेअपउत्तो। (भवति ! कोऽपि ब्राह्मणोऽहं मन्दभागधेयप्रयुक्तः।)

विटः [विदूषकं निरूप्य] अरे कविलमङ्कडा ! तुमंपि सेहरअं पदा-

मत्तपालक मत्तश्रेष्ठ ! मदान्धेति यावत्।

कधं इति। कथं मामिति कृत्वा स्वप्रिया चेटी एवेयमिति मनसि निधाय मदपरवशेन मदान्धेन शेखरकेण आर्यः आत्रेयः तन्नामा विदूषकः प्रसाद्यते पादपतनेन अनुकूलो विधीयते इति भावः। अलीकं कोपं मृषा क्रोधं विधाय एतौ परिहासयिष्यामि।

भोदि इति। मन्दभाग्यधेयप्रयुक्तः मन्दभाग्यवशग इत्यर्थः।

चेटी—(अच्छी तरह देखकर मुसकराहट के साथ) मदके कारण शेखरक विदूषक को मेरे भ्रमसे कैसे प्रसन्न कर रहा है। इसलिये थोडा सा क्रोध करके इन दोनों की हँसी उड़ाऊँगी।

चेटः—(चेटी को देखकर शेखरक को हाथ से धक्का देता हुआ) स्वामी ! इसको छोड़ दीजिये। यह नवमालिका नहीं है। यह क्रोधके कारण लाल लाल आँखों से देखती हुई आ गई।

चेटी—(जाकर) शेखरक ! यह किसको प्रसन्न कर रहे हो।

विदूषकः—(घूंघट को हटाकर) ऐ ! मैं एक अभागा ब्राह्मण हूं।

विटः—(विदूषक को देखकर) ऐ पीले बन्दर ! तुम भी शेखरक को छल रहे हो। अरे

रेसि ? अरे चेडा ! गेण्ह एदं, जाव णोमालिअं पसादेमि । (अरे कपिलमर्कट ! त्वमपि शेखरकं प्रतारयसि ? अरे चेट ! गृहाणैतम्, यावत् नवमालिकां प्रसादयामि ।)

चेटः । जं भट्टके आणवेदि । (यत् भर्त्ता आज्ञापयति ।)

विटः । [विदूषकं मुक्त्वा चेट्याः पादयोः पतति] पसीद णोमालिए ! पसीद । (प्रसीद नवमालिके ! प्रसीद ।)

विदूषकः । [आत्मगतम्] एसो मे अवक्कमिदुं अवसरो (एष मेऽपक्रमितुमवसरः ।) [पलायितुमीहते]

चेटः । [विदूषकं यज्ञोपवीतं गृह्णाति । यज्ञोपवीतं त्रुट्यति] कहिं कहिं कपिलमंकडा ! पलाअसि ? (क्व क्व कपिलमर्कट ! पलायसे ?) [तदुत्तरीयेणैव गलके बद्ध्वा कर्षति] ।

विदूषकः । भोदि णोमालिए ! पसीद मुञ्चावेहि मं (भवति नवमालिके ! प्रसीद, मोचय माम्)

चेटी । [विहस्य] जइ भूमीए सीसं णिवेसिअ पादेसु मे पडसि । (यदि भूमौ शीर्षं निवेश्य पादयोः मे पतसि ।)

अरे इति । अरे कपिलमर्कट पिङ्गलवर्णवानर । विचित्रवर्णकै रञ्जितगात्रत्वाद् विदूषकं प्रत्यधिक्षेपोक्तिः । प्रतारयसि वञ्चयसि ।

एसो इति । एष मे अपक्रमितुं पलायितुं अवसरः कालः ।

चेट ! इसे पकड़े रहो, तब तक मैं नवमालिका को प्रसन्न करता हूं ।

चेटः—जो स्वामी की आज्ञा हो ।

विटः—(विदूषक को छोड़कर चेटी के पैरों पर गिरता है) ऐ नवमालिका ! प्रसन्न होवो । प्रसन्न होवो ।

विदूषकः—(आपही आप) अब यहाँ से भागने का अच्छा समय आगया है ।

(भागना चाहता है)

चेटी—(विदूषक का यज्ञोपवीत पकड़ लेती है, यज्ञोपवीत टूट जाता है) ऐ !! पीले बन्दर ! कहाँ भागे जा रहे हो ?

(गले में चादर को बांधकर खींचती है)

विदूषकः—ऐ नवमालिका ! प्रसन्न हो तो मुझे छुडावो ।

चेटी—(हँसकर) यदि भूमि पर सिर रख कर मेरे पैर पर गिरो ।

विदूषकः । [सरोषं सप्रकम्पञ्च] **भो ! *राअमित्तो बम्हणो भविअ दासीए धीआए पादेसु पडइस्सं ?** (भोः ! राजमित्रं ब्राह्मणो भूत्वा दास्याः पुत्र्याः पादयोः पतिष्यामि ?)

चेटी । [अङ्गुल्या तर्जयन्ती सस्मितम्] **दाणिं पाडइस्सं । सेहरअ ! उट्ठेहि, पसण्णा दे अहं** [कण्ठे गृह्णाति] **एसो उण जामाहअस्स पिअवअस्सो तुए खलीकिदो । एव्वञ्च सुणिअ कदाचि भट्टा मित्तावसू तव कुप्पइ । ता आदरेण सम्माणेहि णं ।** (इदानीं पातयिष्यामि । शेखरक ! उत्तिष्ठ । प्रसन्ना तेऽहम् । एष पुनर्जामातुः प्रियवयस्यस्त्वया खलीकृतः । एवञ्च श्रुत्वा कदाऽपि भर्ता मित्रावसुस्तुभ्यं कुप्यति । तदादरेण सम्मानयैनम् ।)

विटः । **जं णोमालिआ आणवेदि ।** [विदूषकं कण्ठे गृहीत्वा] । **अज्ज ! तुमं मए सम्बन्धिओ त्ति करिअ परिहसिदो ।** [घूर्णन्] **किं सच्चकं ज्जेव्व सेहरओ ! तुए किदो परिहासो ?** [उत्तरीयं वर्त्तुलीकृत्य आसनं

भो राअमित्ता इति । भो राजमित्रं प्रथममहं राज्ञः जीमूतवाहनस्य मित्र प्रियः सखा । तदुपरि ब्राह्मणः सर्वेषां वर्णानामग्रगण्ये ब्राह्मणकुले जातः एवं सर्वथा-श्रेष्ठोऽहं दास्याः पादयोः कथं पतिष्यामि । पादपतनं ममातीवानुचितमिति भावः । अत्र जीवानन्दपुस्तकस्थो गन्धर्वराजमित्रमिति पाठस्तु न समीचीनः, विद्याधराधिपतेर्जीमूतवाहनस्य गन्धर्वाधिपतित्वाभावादिति ।

दाणीं इति । एष जामातुः प्रियवयस्यः सुहृद् आर्य आत्रेयः त्वया खलीकृत न खलः अखलः, अखलः खलः सम्पद्यमानः कृतः इति खलीकृतः निर्भर्त्सनादिना तिरस्कृतः क्लेशितो वा । अत्र खलशब्दात् अभूततद्भावे च्विप्रत्ययः ।

विदूषकः—(**क्रोध के साथ काँपता हुआ**) ऐ ! राजा का मित्र तथा ब्राह्मण होकर मैं इस दुष्टा दासी के पैर पर गिरूँ !

चेटी—(**अङ्गुली से डराती हुई, मुसकराहट के साथ**) अभी तुझे अपने पैरपर गिराऊँगी । शेखरक ! उठो मैं तुझसे प्रसन्न हूं । (**गले लगाती है**) तुमने जामाता जीमूतवाहन के इस प्रिय मित्र का अनादर किया है । यदि स्वामी मित्रावसु इसे सुन लेगें, तो तुझ पर क्रोध करेगें, । इसलिये आदर से इसे प्रसन्न करो ।

विटः—नवमालिका ! तेरी जो आज्ञा हो । (**विदूषक को गले लगाकर**) आर्य्य !

---

*गन्धव° (गन्धर्व)-ग ।

ददाति] इह उवविसदु सम्बन्धिओ ! (यन्नवमालिका आज्ञापयति । आर्य्य ! त्वं मया सम्बन्धीति कृत्वा परिहसितः । किं सत्यमेव शेखरक ! त्वया कृतः परिहासः ? इह उपविशतु सम्बन्धी ।)

विदूषकः । [स्वागतम्] दिट्ठिआ अवगदो विअ से मदावेगो (दिष्ट्या-पगत इवास्य महावेगः ।) [उपविशतः] ।

विटः । णोमालिए ! उवविस तुमंपि एदस्स पासे, जेण दुवेवि तुम्हे समं ज्जेव्व सम्माणइस्सं । (नवमालिके ! उपविश त्वमपि एतस्य पार्श्वे, येन द्वावपि युवां समेव सम्मानयिष्यामि)

चेटी । [विहस्योपविशति]

विटः । [चषकमादाय] अरे चेडा सुभरिदं क्खु एदं चसअं करेहि अच्छसुराए । (अरे चेट ! सुभृतं खल्वेतं चषकं कुरु अच्छसुरया ।)

चेटी । [नाट्येन चषकमरणं करोति] ।

ज णोमालिआ इति । सम्बन्धीति कृत्वा जामातृपद्वीयः पुरुष उपहसनीयो भवतीति हेतुना त्वं मया परिहसितः ।

दिट्ठिआ इति । दिष्ट्या भाग्यवशात् अस्य मदावेगः मत्ततया जायमानः आवेगः चेतसो विह्वलता अपगत इव दूरीकृत इव लक्ष्यते ।

अरे चेडा इति । एतं चषकं मदिरापात्रं अच्छसुरया शोभनया मदिरया सुभृतं कुरु सुष्ठु पूरितं विधेहि ।

तुम मेरे संबंधी हो, ऐसा समझ कर मैंने तुम्हारे साथ मज़ाक-हँसी-किया है । (झपता हुआ) क्या शेखरक ! सचमुच तुमने मजाक किया है । (चादर को गोलाकर आसन देता है) संबंधीजी बैठिये ।

विदूषकः—(आपही आप) भाग्यवश मालूम होता है कि इसके मद का आवेग उतर गया । (बैठता है)

विटः—नवमालिके । तुम भी इसी की बगलमें बैठो । जिससे मैं दोनों आदमियों का सत्कार एक साथही कर सकूँ ।

चेटी—(हँस करके बैठती है ।)

विटः—(शराब का प्याला लाकर) अरे चेट ! इस प्याले को सुगन्धित शराब से अच्छी तरह भर दे ।

चेटः—(प्याले को भरने का अभिनय करता है) ।

विटः । [स्वशिरःशेखरात् पुष्पाणि गृहीत्वा चषके विन्यस्य जानुभ्यां स्थित्वा नवमालिकाया उपनयति] । णोमोलिए ! चक्खिअ देहि एदं एदस्स । (नवमालिके ! आस्वाद्य देह्येतमेतस्मै ।)

चेटी । [सस्मितम्]-जं सेहरओ भणादि । (यत् शेखरको भणति ।) [तथा कृत्वा विटस्यार्पयति ।]

विटः । [विदूषकस्य चषकमर्पयति] एदं णोमालिआमुहसंसग्गसविसेसवासिअरसं सेहरआअण्णेण केणवि मणासादिदपुरुवं, ता पिबेहि एदं । किं दे अवरं सम्माणं करिसं ? (एतत् नवमालिकामुखसंसर्गसविशेषवासितरसं शेखरकादन्येन केनाप्यन्येनानास्वादितपूर्वं, तत् पिबैतत् । किं ते अतोऽप्यपरं सम्मानं करिष्यामि ?)

विदूषकः । [सवैलक्ष्यस्मितं कृत्वा] सेहरअ ! बम्हणो क्खु अहं । (शेखरक ? ब्राह्मणः खल्वहम् ।)

एदं इति । एतद् नवमालिकामुखसंसर्गसविशेषवासितरसं नवमालिकायाः मुखसंसर्गेण मुखसम्पर्केण (तया प्रथमत एवास्वाद्यमानत्वादिति भावः) सविशेषं अतिशयेन वासितः सुगन्धीकृतः रसः स्वादः यस्य तथाभूतं । शेखरकादन्येन मां विहाय इतरेण केनापि पुरुषेण अनास्वादितपूर्वं पूर्वं नैवास्वादितम्, तत् तस्मात् कारणात् एतत् पिब आस्वादय ।

सेहरअ इति । शेखरक, ब्राह्मणः खलु अहम् । ब्राह्मणत्वात् मदिरापानं ममातीवानुचितमिति भावः । सुरापानं तु सर्वेषामेव वर्णानां निषिद्धत्वात्त्याज्यं, किमुत ब्राह्मणानाम् । अत्रार्थे मनुः—

विटः—(अपने सिर पर के ताज से फूल लेकर के प्याले में रख कर घुटने से बैठ कर नवमालिका के पास ले जाता है ।) नवमालिके इसका स्वाद लेकर इस प्याले को (विदूषक को) दे दो ।

चेटी—(मुसकराहट के साथ) जैसा शेखरक कहे । (वैसा कर के विट को देती है) ।

विटः—(विदूषक को प्याला देता है) तुम इस नवमालिका के मुख के संसर्ग से अच्छी तरह से सुगन्धित रस को पिओ, जिसका आस्वादन शेखरक को छोड़कर किसी दूसरे ने नहीं किया है । इससे बढ़कर मैं तुम्हारा और अधिक सम्मान क्या करूँ ?

विदूषकः—(आश्चर्य के साथ मुसकराता हुआ) शेखरक ! मैं ब्राह्मण हूं ।

विटः। **जदि तुमं बम्हणो, ता कहिं दे बम्ह *सुत्तं ?** (यदि त्वं ब्राह्मणः, तत् क्व ते ब्रह्मसूत्रम् ?)

विदूषकः। **तं क्खु मे इमिणा चेडेण कट्टीअमाणं छिण्णं।** (तत् खलु मेऽनेन चेटेन कृष्यमाणं छिन्नम्।)

चेटी। [विहस्य] **जइ एव्वं, ता वेदक्खराइं पि दाव कति वि उदाहर।** (यद्येवं, तद्वेदाक्षराण्यपि तावत् कत्यपि उदाहर।)

विदूषकः। **भोदि ! इमिणा सीदुगन्धेण† विणद्धाइं वेदक्खराइं ? अहवा किं मम भोदीए समं विवादेण ? एसो दे बम्हणो पादेसु पडदि।** (भवति ! अनेन शीधुगन्धेन पिनद्धानि वेदाक्षराणि ? अथवा किं मम भवत्याः समं विवादेन ? एष ते ब्राह्मणः पादयोः पतति।) [इति पादयोः पतितुमिच्छति]

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥
(अध्या० ९, श्लो० ५४)

जदि इति। यदि त्वं ब्राह्मण, तत् तर्हि ते ब्रह्मसूत्रं यज्ञोपवीतं क्वास्ते ? नवसूत्रमिति पाठे तु स एवार्थो ज्ञेयः। यज्ञसूत्रस्य नवभिः सूत्रैर्निर्मितत्वात्। यज्ञोपवीतस्य नवतन्तुत्वे स्मृतिः—

यज्ञोपवीतं कुर्वीत सूत्राणि नवतन्तुभिः।
एकेन ग्रन्थिना तन्तुर्द्विगुणस्त्रिगुणोऽथवा ॥

भोदि इति। भवति ! अनेन शीधुगन्धेन मदिरागन्धेन वेदाक्षराणि। पिनद्धानि मन्मुखे एव नष्टानि। यत्र मदिरापानाद्यनाचारो विद्यते, तत्र वेदमन्त्राः कथमपि नोच्चारणीयाः इत्याशयः।

विटः—यदि तुम ब्राह्मण हो तो तुम्हारा जनेऊ कहाँ है ?

विदूषकः—मेरे जनेऊ की इस चेट ने खींचकर तोड दिया है।

चेटी—(हँसकर) यदि ऐसा हो तो वेद के मन्त्रों को कहो जिससे तुम्हारा ब्राह्मणत्व सिद्ध हो।

विदूषकः—इस शराब के गन्ध के कारण वेद के अक्षर छिप गये हैं (शराबियों के सामने वेदोच्चारण नहीं करना चाहिये। अतएव मैं उसका उच्चारण तुम्हारे सामने नहीं

*नवसुत्तं नवसूत्रं—ग। †णट्ठाइं (नष्टानि)—क, कहिं (क्व)—ग।

चेटी । [हस्ताभ्यां निवार्य्य] मा क्खु एव्वं करेदु अज्जो । सेहरअ ! ओसर ओसर, बम्हणो क्खु एसो । [विदूषकस्य पादयोः पतति] ! अज्ज ण तुए कुविदव्वं, सम्बन्धिआनुरूवो क्खु एसो मए परिहासो किदो । (मा खल्वेवं कार्षीत्वार्य्यः । शेखरक ! अपसर अपसर, ब्राह्मण खल्वेषः । आर्य्य ! न त्वया कोपितव्यं सम्बन्ध्यनुरूपः खल्वेष मया परिहासः कृतः ।)

विटः । अहंपि णं पसादेमि । [पादयोर्निपत्य] मरिसेदु मरिसेदु अज्जो, जं मए मदवरवसेण अवरद्धं, जेण अहं णोमालिआए सह आबाणअं गमिस्सं । (अहमप्येनं प्रसादयामि । मर्षयतु मर्षयत्वार्य्यः, यत् मया मदपरवशेनापराद्धम् ; येनाहं नवमालिकया सह आपानकं गमिष्यामि ।) मधुशा

विदूषकः । मरिसिदं मए, गच्छ तुम्हे, अहंपि पिअवअस्सं पेक्खामि । (मर्षितं मया, गच्छतं युवाम् । अहमपि प्रियवयस्यं प्रेक्षे ।

[निष्क्रान्तो विटश्चेट्या सह चेटश्च]

विदूषकः । अदिक्कंतो बम्हणस्स मकालमिच्चू । ता जाव अहंपि मत्तवालमसङ्गदूसिदो इध दिग्घिकाए ण्हाइस्सं । [तथाकरोति । नेपथ्याभिमुखमवलोक्य] एसो पिअवयस्सो वि रुक्किणीं विअ हरो मलअवदीं अवलम्बिअ इदो जेव्व आअच्छदि, ता जाव पासपरिवत्तो

अहंपि इति । मर्षयतु क्षमां करोतु आर्यः पूज्यो भवान् । आपानकं आसमन्तात् पीयते मदिरा यत्र तत् सुरापानभूमिमित्यर्थः ।

करूँगा) अथवा आपके साथ शास्त्रार्थ करने से क्या लाभ ? यह ब्राह्मण आपके पैरों पर गिरता है । (ऐसा कह के पैरों पर गिरना चाहता है)

चेटी—(हाथों से रोक कर के) आप श्रेष्ठ पुरुष हैं, ऐसा मत करें । शेखरक ! हटो । हटो । यह ब्राह्मण है । (विदूषक के पैर पर गिरती है) आर्य्य ! आप क्रोध न कीजिये । संबंधी के अनुरूप ही मैंने ऐसा परिहास किया है (आप संबंधी हैं । इसलिये मैंने ऐसा मज़ाक किया, अन्यथा न करती)

विटः—मैं भी इसको प्रसन्न करूँगा । (पैर पर गिर कर के) आर्य्य ! जो कुछ मैंने मद के आवेग में आकर अनुचित कहा है उसे आप क्षमा करें । जिससे मैं नवमालिका के साथ भट्टी में जा सकूँ ।

विदूषकः—ब्राह्मण की अकाल मृत्यु व्यतीत हो गई-टल गई (ब्राह्मण के लिये सुरापान करने से मतवाले दुर्जनों का संग अत्यन्त कष्ट देने से अकाल मृत्युही समझना

ह्वोमि । (अतिक्रान्तो ब्राह्मणस्याकालमृत्युः । तद्यावदहमपि मत्तपालकसङ्कदूषित इह दीर्घिकायां स्नास्यामि । एष प्रियवयस्योऽपि रुक्मिणीमिव हरिर्मलयवतीमवलम्ब्य इत एवागच्छति । तद् यावत् पार्श्ववर्त्ती भवामि ।)

[ततः प्रविशति गृहीतवरनेपथ्यो नायको मलयवती, विभवतश्च परिवारः]।

नायकः । [मलयवतीमवलोक्य सहर्षम्] ।—

दृष्टा दृष्टिमधो ददाति कुरुते नालापमाभाषिता
शय्यायां परिवृत्य तिष्ठति बलादालिङ्गिता वेपते ।

अतिक्रान्तो इति । अतिक्रान्तः व्यतीतः । अकालमृत्युः असामयिको मृत्युः । मदिरामत्तैर्दुर्जनैः सह सज्जनानां समागमोऽकालमृत्युवत् दुःखमुद्गादयति । विटादीनामन्यत्रागमनेन तदपक्रान्तमिति विदूषकवचसां तात्पर्यम् । दीर्घिकायां तडागे । अवलम्ब्य हस्तेन हस्तं गृहीत्वा । पार्श्ववर्ती समीपस्थो भवामीति भावः ।

अधुना नायकस्य सम्भोगशृङ्गारस्य वर्णनोपक्रमः । तत्र जीमूतवाहनः अचिरपरिणीतायाः दयितायाः समागमे स्वपरितोषं प्रकटयति दृष्टेत्यादिना:—अद्य नूतनपरिणयनमङ्गले काले । नवोढा अचिरपरिणीता अतएव मौग्ध्यात् साध्वसम्मज्ञेति भावः । प्रिया वामतया एव विरुद्धाचरणेनैव मे सुतरां प्रीत्यै नितरां सन्तोषाय जाता (प्रिया निसर्गत एव प्रीतिकरी विद्यते, अधुना वामाचरणेन अतीव प्रीतिकरी जातेति भावः) । तद्वामतां प्रदर्शयतिः—दृष्टा सती, मया सानुरागमवलोकिता । अधः दृष्टिं ददाति पश्यति मम सम्मुखं नैव पश्यतीत्यर्थः । आभाषिता स्नेहेन मया भाषितापि आलापं नैव कुरुते । शय्यायां एकत्र उपवेशिता सती परिवृत्य पराङ्मुखीभूय तिष्ठति । बलात् हठात् आलिङ्गिता सती वेपते साध्वसात् कम्पते, नतु प्रत्यालिङ्गनं ददाति । एवं सहजया लज्जया निरुद्धे-

---

चाहिये) । इसलिये मैं भी शराबियों के ससर्ग से दूषित होनेसे इस तालाब में स्नान कर लूँ । (सामने देखकर) जिस तरह से भगवान् विष्णु लक्ष्मी का अवलम्बन कर भ्रमण करते हैं, उसी तरह मेरा प्यारा मित्र भी मलयवती का हाथ पकड़ कर इधर ही आ रहा है । इसलिये मैं यहाँ ही ठहरूँ । (बैठता है)

(इसके बाद मलयवती और नौकरों के साथ नायक प्रवेश करता है) ।

नायकः—(मलयवती को देखकर हर्ष के साथ) ।

यह (मलयवती) देखे जाने पर अपनी दृष्टि नीचे कर लेती है । बोलने पर बातचीत नहीं करती है । शय्या पर अपना मुख दूसरी ओर फेर कर बैठती है तथा हठ पूर्वक आलिङ्गन

निर्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते
याता वामतयैव मेऽद्य सुतरां प्रीत्यै नवोढा प्रिया ॥ ४ ॥

च्छाप्रसरायामस्यां नेयमस्माभिर्बलादपनेतव्या, रागः स्वयमपनेष्यतीति बुद्ध्या वासभवनात् शयनागारात् सखीषु निर्यान्तीषु बहिर्गच्छन्तीषु (यस्य च भावेन भावलक्षणमिति सूत्रेण सप्तमी) निर्गन्तुं बहिर्गन्तुमेव ईहते चेष्टते लज्जायाः प्राबल्यादिति शेषः । एवं वामाचरणेन एतादृशमानन्दोल्लासं मे मनसि जनयति, अनुकूलायामस्यां तस्य पराकाष्ठा किं वर्ण्यतामिति द्योत्यते । अत्र समग्राः मुग्धाया अनुरागचेष्टाः विशदं वर्णिताः । यदाह दर्पणकारः—

दृष्ट्वा दर्शयति व्रीडां सम्मुखं नैव पश्यति ।
प्रच्छन्नं वा भ्रमन्तं वातिक्रान्तं पश्यति प्रियम् ॥
बहुधा पृच्छ्यमानापि मन्दमन्दमधोमुखी ।
सगद्गदस्वरं किञ्चित् प्रियं प्रायेण भाषते ॥
अन्यैः प्रवर्तितां शश्वत् सावधाना च तत्कथाम् ।
शृणोत्यन्यत्र दत्ताक्षी प्रिये बालानुरागिणी ॥

अयमेव श्लोकः रते वामाया मुग्धाया उदाहरणरूपेण दर्पणस्य तृतीये परिच्छेदे विश्वनाथकविराजेनोद्धृतः । ईदृशो मुग्धाया वर्णनप्रकारोऽन्येषां कवीनामपि ग्रन्थेषु समुपलभ्यते । तथा च कालिदासस्य—

हस्तं कम्पयती रुणद्धि रशनाव्यापारलोलाङ्गुलिं
हस्तौ स्वौ नयति स्तनावरणतामालिङ्ग्यमाना बलात् ।
पातुं पक्ष्मलचक्षुरुन्नमयतः साचीकरोत्याननं
व्याजेनाप्यभिलाषपूरणसुखं निर्वर्तयत्येव मे । (मालविकाग्निमित्रे)

श्रीहर्षवर्धनस्यापि—

प्रणयविशदां दृष्टिं वक्त्रे ददाति न शङ्किता,
घटयति घनं कण्ठाश्लेषे रसान्न पयोधरौ ।
वदति बहुशो गच्छामीति प्रयत्नधृताप्यहो,
रमयतितरां संकेतस्था तथापि हि कामिनी ॥ (रत्नावल्याम्)

शार्दूलविक्रीडितम् ॥ ४ ॥

करने पर काँपने लगती है (आलिङ्गन नहीं करती) । शयनगृह से सखियों के चले जाने पर घर से बाहर जाना चाहती है । इन सब प्रतिकूल आचरणों के कारण से ही मेरी नई विवाहिता

[मलयवतीं पश्यन्] प्रिये मलयवति !—



हुङ्कारं ददता मया प्रतिवचो यन्मौनमासेवितं
यद् दावानलदीप्तिभिस्तनुरियं चन्द्रातपैस्तापिता* ।
ध्यातं यत् सुबहून्यनन्यमनसा नक्तन्दिनानि प्रिये !
तस्यैतत् तपसः फलं मुखमिदं पश्यामि यत्तेऽधुना ॥ ५ ॥

एव नायिकायाः विनयानुरोधेन प्राप्तपरितोषां रतिमुद्वहन् उदात्तनायकः कृच्छ्रलभ्यत्वप्रतिपादनद्वारा गुणोन्मीलनेन मृदुपूर्वमावर्जयितुमुपक्रमते **हुङ्कार**-मित्यादिना—हुङ्कारं हुमिति अङ्गीकारसूचकं अव्यक्तवर्णं नादमात्रम् । (हुमित्येतच्छृण्वतामङ्गीकारानुकरणमिति विश्वः) तदनुकरणत्वेन हुङ्कारशब्दः । तं ददता वचनशेषत्वेन प्रमुञ्चता । प्रतिवचः वचसि वचसि । त्वदेकपरतया मया मौनं मौनभावः । आसेवितं पूर्णतया गृहीतम् । यत् दावानलदीप्तिभिः दावस्य वनस्य ("वने च वनवह्नौ च दवो दाव इहेष्यते" इति यादवः) अनलः अग्निः तस्य दीप्तिरिव दीप्तिः तेजः येषां तथाभूतैः (वनाग्निवत् दाहकैरिति भावः) चन्द्रातपैः चन्द्रकिरणैः इय तनुः शरीरं तापिता सन्तापं प्रापिता । (पूर्वरागादावुद्दीपकत्वात् चन्द्रकिरणाः अतीवोष्णा भवन्तीति विरहिणामनुभवः । यथा चोक्तं विरहिणा दुष्यन्तेन "विसृजति हिमगर्भैरिन्दुरग्निं मयूखैः") । अनन्यमनसा अनन्यं अन्यस्मिन् न संलग्नं मनो यस्य तादृशेन त्वदायत्तचेतसेत्यर्थः । बहूनि नक्तं दिनानि रात्रिदिनानि ("कालाध्वनोरत्यन्तसंयोगे" इति सूत्रेण द्वितीया) । यत् ध्यातं त्वदीयं रूपराशिं हृदये निधाय चिन्तितम् । हे प्रिये ! अधुना मत् ते तव इदं मुखं पश्यामि एतत् तस्य चिरपरिगृहीतस्य तपसः फलं परिणामो व र्तते ।

स्त्री मलयवती मेरी अत्यधिक प्रसन्नता का कारण बन गई है ॥ ४ ॥

(मलयवती को देखकर) प्रिये मलयवती !

प्रत्येक बात के उत्तर मे केवल हुँकारी भर कर मैंने मौनव्रत का पालन किया । दावाग्नि की ज्वाला की तरह गरम चन्द्रमा की किरणों से अपने देह को अत्यन्त कष्ट पहुँचाया (तपाया) ये प्रिये ! बहुत दिनों तक मैंने एकाग्रचित्त से तुम्हारा रातोदिन ध्यान किया । मालूम होता है उसी कठोर तपस्या का यह फल है कि मैं तुम्हारे मुख को आज देख रहा हूं । (जिस तरह सेसाधु लोग मौन होकर एकाग्रचित्त से अपने इष्टदेव का ध्यान करते हुये अंत में फल की

*स्नापिता—ग ।

नायिका । [अपवार्य] **हञ्जे चदुरिए ! ण केवलं दंसणीओ, पिअं पि भणिदुं जाणादि जेव्व । (हञ्जे चतुरिके ? न केवलं दर्शनीयः, प्रियमपि भणितुं जानात्येव ।)**

चेटी [विहस्य] **अयि* पडिपक्खवादिणि ! सच्चअं ज्जेव्व एदं । किं एत्थ पिअवअणं ? (अयि प्रतिपक्षवादिनि । सत्यकमेवैतत् । किमत्र प्रियवचनम् ?)**

नायकः । **चतुरिके ! आदेशय मार्गं कुसुमाकरोद्यानस्य ।**

चेटी । **एदु एदु भट्टा । (एतु एतु भर्त्ता ।)** धीरे धीरे

नायकः [परिक्रम्य नायिकां निर्दिश्य] **स्वैरं स्वैरमागच्छतु भवती ।–**

यथा तपस्विनो मौनव्रतावलम्बिनः पञ्चाग्निसाधनतत्परा अनन्यमनसा रात्रिदिवमभीष्टदेवं हृदयदेशे निधाय ध्यायन्तः तं साक्षात्कृत्य परमानन्दलाभेनात्मानं कृतकृत्यं मन्यन्ते, एवमहमपि त्वन्मुखचन्द्रदर्शनेन निरन्तरं क्लेशक्लान्तमप्यात्मानं सफलं मन्ये इति नायकवचसामाशयः । शार्दूलविक्रीडितम् ॥ ५ ॥

अयि इति । अयि प्रतिपक्षवादिनि प्रतिकूलवचनशीले ! सत्यमेव एतत् यत् नायकेन गदितम् । किमत्र प्रियवचनम् ? न कापि तव प्रसादनाय चाटूक्तिः स्वीकृतेति भावः ।

स्वैरमिति । स्वैरं स्वैरं मन्दं मन्दम् ("मन्दस्वच्छन्दयोः स्वैरमि"त्यमरः) ।

प्राप्ति करते हैं । उसीप्रकार उपरोक्त तपस्याओं के करने पर फलस्वरूप तेरा मुख मुझे देखने को मिला है) (१) ॥ ५ ॥

नायिका—(हटकर अलग) दासी ! ये (नायक) केवल दर्शनीय तथा सुन्दर ही नहीं हैं परन्तु मीठा बोलना भी जानते हैं ।

चेटी—(हँसकर) प्रतिकूल कहने वाली (उलटी बात कहने वाली) यह सत्य है । इसमें कौनसा प्रियवचन है ।

नायकः—हे चतुरिके ! कुसुमाकर उद्यान का रास्ता मुझे बताओ ।

चेटी – राजपुत्र ! आइये । आइये ।

नायकः—(परिक्रमाकर नायिका की ओर निर्देश करके) आप धीरे आवें ।

---

*अदि° (अति)–क, ग ।

(१) साधक लोग तप करते समय मौन धारण करते हैं, पञ्चाग्नि से शरीर तपाते हैं; रात दिन ध्यान करते हैं । तब कहीं जाकर फल की सिद्धि होती है । तुम्हारे लिये मैंने भी इन साधनों को किया है । उसी का फल है कि मैं तुम्हारा सुन्दर मुख देख रहा हूं ।

खेदाय स्तनभार एव किमु ते मध्यस्य हारोऽपरः ?
ताम्य*त्यूरुयुगं नितम्बभरतः कञ्च्याऽनया किं पुनः ? ।
शक्तिः पादयुगस्य नोरुयुगलं वोढुं, कुतो नूपुरौ ?
स्वाङ्गैरेव विभूषिताऽसि वहसि क्लेशाय किं मण्डनम् ? ॥६॥

स्तनजघनादिगौरवेन गमनवैषम्यमालक्ष्य भूषणाना वैयर्थ्यप्रतिपादनमुखेन मलयवत्या अङ्गानां सुषमां वर्णयति जीमूतवाहनः खेदायेति—

स्तनभार एव स्तनयोः विशालकुचयोः भार एव अन्यदागन्तुकं विना स्वत एव कृशतरस्य मध्यस्य कटिभागस्य खेदाय श्रमाय कल्पते अपरः हारः मुक्तामाला किमु ? व्यर्थमेव । प्रतिक्षण विजृम्भमाणयोः यौवनदत्तहस्तयोः स्तनयोः भारेण यदा क्षीणः कटिभागः परिक्लान्तो भवति तदा हारारोपणेन सुतरां खेद इति किमु वक्तव्यम् । तथा च नितम्बभरतः नितम्बोद्वहनेन ऊरुयुगं ताम्यति खिद्यते पुनः अनया काञ्च्या जघनस्थलमण्डनभूतया किम् ? काञ्चीधारणेन नितरां खिद्यतीति भावः । पादयुगस्य चरणयुगलस्य । ऊरुयुगलं वोढुं नैव शक्तिः सामर्थ्यं, प्रसाधनाय धार्यमाणौ नूपुरौ कुतः ? व्यर्थमेव प्रतीयते केवलं क्लेशावहत्वेनेतिभावः । त्वं स्वाङ्गैः स्वकीयैः सहजसुकुमारैः अङ्गैरेव विभूषितासि अलङ्कृता वर्तसे । क्लेशाय मण्डनं अलङ्कारं किमर्थं धारयसि ? स्वाङ्गैरेव स्वाभाविकीं शोभामाधुरीं प्रकाशयसु सत्सु, आगन्तुकानामाभरणानां धारणं केवलमायासजनकमेवेति भावः । नहि सहजा कान्तिः बाह्यानलङ्कारानपेक्षते इति नायकस्याभिप्रायः । अत्र भूषणार्थमलङ्कारधारणवैफल्य प्रति स्वाङ्गसौन्दर्यस्यैव कारणत्वेनोपन्यासात् काव्यलिङ्गमलङ्कारः । तल्लक्षणं यथोक्तं साहित्यदर्पणे—"हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते" । शार्दूलविक्रीडितं छन्दः ॥ ६ ॥

तुम्हारे कृश कटिभाग को कष्टदेने के लिये तुम्हारे विशाल स्तनों का भार ही पर्याप्त है, फिर दूसरे हार पहिनने से क्या लाभ ? हार पहनना व्यर्थ ही है । तुम्हारे नितम्ब के भार से ही दोनों जंघे क्लेश पाते हैं पुनः इस मेखला से क्या लाभ ? (मेखलाके पहिनने से अत्यन्त कष्ट पा रही हो) । तुम्हारे दोनों पैरों में इतनी शक्ति नहीं कि वे दोनों जंघे के भार को सहसके फिर नूपुर पहिनने से क्या प्रयोजन ? तुम केवल अपने अंगो से ही अत्यन्त सुन्दर मालूम पड़ती हो अतएव इन आभूषणों को क्लेश सहने के लिये क्यों धारण कर रही हो । [जो स्वभाव से सुन्दर होता है, उसे गहनों की कोई जरूरत नहीं होती—उन गहनों से शरीर को क्लेश

*आम्य° ग, घ ।

चेटी । एदं खलु तं कुसुमाअरुज्जाणं, ता पविसदु भट्टा । (एतत् खलु तत् कुसुमाकरोद्यानं, तत् प्रविशतु भर्त्ता ।)

[सर्वे प्रविशन्ति] ।

नायकः । [विलोक्य] अहो नु कुसुमाकरोद्यानस्य परा श्रीः ! इह हि ।—

निष्यन्दश्चन्दनानां शिशिरयति लतामण्डपे† कुट्टिमान्ता‡·
नाराद्§ धारागृहाणां ध्वनिमनु तनुते ताण्डवं नीलकण्ठः ।

अहो आश्चर्यं खलु कुसुमाकरोद्यानस्य परा श्रीः महती शोभा ।

जीमूतवाहनः विस्मयकरीं पुष्पोद्यानस्य सुश्रीकतां प्रतिपादयति **निःष्यन्द** इतिः—

चन्दनानां शाखादिसंघट्टनेन भिन्नानां । निष्यन्दः रसप्रसरः लतामण्डपे लताभिर्निर्मिते मण्डपे कुट्टिमान्तान् मणिबद्धभूतलान् ("कुट्टिमोऽस्त्री निबद्धा भूः" इति कोशवचनम्) शिशिरयति शीतलान् विधत्ते (शिशिरशब्दात् 'तत्करोति तदाचष्टे' इति सूत्रेण णिच्) । आरात् समीपे (आराद्दूरसमीपयोरित्यमरः ।) धारागृहाणां शीतोपचारार्थं कल्पितानां कृत्रिमधारापातगृहाणां ध्वनिमनु ध्वनिं लक्ष्यीकृत्य ('अनुर्लक्षणे' इति लक्ष्यलक्षणभावे द्योत्ये 'अनु' इत्यस्य कर्मप्रवचनीयसंज्ञा । ततः "कर्मप्रवचनीययुक्ते द्वितीया' इति तद्योगे द्वितीया) धारापातात् जायमानं उच्चैः शब्दं मेघगर्जितमिति शङ्कया नीलकण्ठः मयूरः ताण्डवं नृत्यं ["ताण्डवं नटनं नाट्यं लास्यं नृत्तं च नर्तनमि"त्यमरः] तनुते । (मेघगर्जनप्रियत्वात् मयूराणां समीपस्थधारागृहाणां ध्वनिश्रवणात् मेघगर्जनभ्रमेण नृत्यम् । नीलकण्ठेति नामोचितमेव ताण्डवरूपं कर्मेत्यपि द्योत्यते) ।

ही होता है । तुम स्वयं ही सुकुमारी हो—सुन्दरी हो । भला इन भारी गहनों से क्या लाभ । उन्हें हटा डालो] ॥ ६ ॥

चेटी—यही कुसुमाकर नामक उद्यान है । राजपुत्र । आप प्रवेश करें । (**सब प्रवेश करते हैं**)।

नायकः—(**घूमकर**) अहा ! उद्यान की शोभा क्या ही अच्छी है यहाँ—लताओं से बनाये गये मण्डप में चन्दनों से निकलता हुआ रस इस मणि से बनी वेदी को शीतल करता है । (गर्मी की शान्ति के लिये बनाये गये) प्रपात गृह के समीप ही में ध्वनि को सुनकर

† मण्डपं—ख । ‡ कुट्टिमानां—ग । § तारं—ग ।

यन्त्रोन्मुक्तश्च वेगाद् च*लति विटपिनां पूरयन्नालवालान्
नापातोत्पीडहेलाहृ†तकुसुमरजः पिञ्जरोऽयं जलौघः ॥ ७ ॥
अपि च,—अमी गीतारम्भैर्मुखरितलतामण्डपभुवः
परागैः पुष्पाणां प्रकटपटवासव्यतिकराः ।
पिबन्तः पर्य्याप्तं सह सहचरीभिर्मधुरसं

यन्त्रोन्मुक्तः यन्त्रेभ्यः जलयन्त्रेभ्यः उन्मुक्तः पतितः । आपातोत्पीडहेलाहृतकुसुमरजःपिञ्जरः आपाते यन्त्रेभ्यो निपतने यः उत्पीडः चलनं तेन हेलया सावज्ञं आनायासेनेति यावत् । ("हेला स्त्रियामवज्ञायां विलासे वारयोषिताम्" इति मेदिनी) हृतेन आनीतेन । कुसुमानां रजसा परागेण पिञ्जरः पीतः सन् ("पिञ्जरोऽस्त्रान्तरे पीते" इति मेदिनी) विटपिनां वृक्षाणां आलवालान् पूरयन् अयं पुरतो दृश्यमानः जलौघः जलसमूहः वेगात् चलति प्रसरति । यथावत् वस्तुवर्णनात् स्वभावोक्त्यलङ्कारः । जलौघस्य कुसुमरजसः सम्पर्कात् स्वशौक्ल्यगुणत्यागात् पिञ्जरत्ववर्णनेन तद्गुणालङ्कारश्च । स्रग्धरावृत्तम् । लक्षणन्तु प्रागेवोक्तम्॥७॥

नन्वेतावदेव शोभाकरमन्येऽपि विशेषाः दृश्यन्ते इति तान् प्रकटयति अमी इत्यादिना । गीतारम्भैः आरब्धैः गानैः मुखरितलतामण्डपभुवः मुखरिताः सशब्दाः कृता लतामण्डपानां भुवः यैः तादृशाः । पुष्पाणां परागैः धूलिभिः ("परागः कौसुमेरेणौ स्नानीयादौ रजस्यपि" इत्यमरः) प्रकटपटवासव्यतिकराः ("पटवासः उत्सवेषु हरिद्रातण्डुलादिचूर्णकृतो वसनकेशपाशादिषु उद्वूलनविधिः" इति शिवरामः) प्रकटः स्पष्टतया लक्ष्यमाणः पटवासस्य व्यतिकरः सम्बन्धो येषां तथाभूताना (कुसुमरजसा भूषिताः सन्तः द्विरेफाः पटवासालङ्कृतगात्रा लक्ष्यन्ते इति भावः) सहचरीभिः भ्रमरीभिः । सह पर्याप्तं स्वाभिलषितपूरकं यथेच्छमिति

मयूर (बादल की आवाज समझ कर) ताण्डव नृत्य कर रहा है । जल यन्त्र से छोड़ा गया अतएव गिरने से पीडित कुसुम के पराग को अनायास ही धारण करने से पीला बना हुआ यह जल का समूह वृक्षों के थालों को भरता हुआ अत्यन्त वेग से जा रहा है (वेग से बह रहा है) ॥ ७ ॥

और भौः—अपने गाने से लतासे निर्मित मण्डपों को शब्दायमान करने वाले, फूलों के पराग से (लिप्त होनेके कारण) अङ्गराग धारण करने वाले, अपनी सहचरियों (स्त्रियों, भ्रमरी) के साथ मधुर रसका अच्छी तरह पान करते हुये ये भ्रमर इस बगीचे मे चारो तरफ,

*ग°-ग । † हत°-ग ।

समन्तादापानोत्सवमनुभवन्तीह मधुपाः ॥ ८ ॥

विदूषकः। [उपसृत्य] जेदु जेदु भवं। सोत्थि भोदोए। (जयति जयति भवान्। स्वस्ति भवत्यै।)

नायकः। वयस्य! चिराद् दृष्टोऽसि।

विदूषकः। भो वअस्स! लहुं जेव्व आअदोम्हि। किं उण विआहमहूसवमिलिदसिद्धविज्जाहराणं आपाणदंसणकोदूहलेण परिब्भमंतो एत्तिअं वेलं चिट्ठिदोम्हि। ता तुमं पि दाव पेक्ख। (भो वयस्य। लघु एवागतोऽस्मि। किं पुनर्विवाहमहोत्सवमिलितसिद्धविद्याधराणामापानदर्शनकौतूहलेन परिभ्रमन्नेतावतीं वेलां स्थितोऽस्मि। तत् त्वमपि तावत् प्रेक्षस्व।)

यावत्। मधुरसं मकरन्दं पिबन्तः अमी दृश्यमानाः मधुपा मधुपानरसमत्ताः भ्रमराः। तथा च कालिदासः "मधुद्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः" (कुमारसम्भवे)। (भ्रमरे विटत्वारोपणाय मधुपशब्दोऽत्र प्रयुक्तः। विटरूपाः भ्रमराः इति भावः) समन्तात् दिशि दिशि इह उद्याने। आपानोत्सवं आपानं मद्यपानं ("आपानं स्यात् सुरापानमिति" कोशवचनात्) तद्रूपं उत्सवं हर्षोल्लासकरं उत्सवमनुभवन्ति। यथाद्य विवाहमङ्गलोत्सवे सर्वे विटासिद्धाश्च गीतिनिनादैर्मुखरितदिगन्ताः, पटवासेन रञ्जितकायाः प्रियाभिः सह पर्याप्तं मदनिपीय नन्दन्ति एवमेव भ्रमरा अपि तत्क्रियानुसरणे प्रवृत्ता इत्र लक्ष्यन्ते इति भावः। अत्र अनुभवस्य सम्भाव्यमानत्वात् प्रतीयमानोत्प्रेक्षा। शिखरिणी वृत्तम्। तल्लक्षणं यथा वृत्तरत्नाकरे—

"रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी" ॥ ८ ॥

भो वयस्येति। आपानदर्शनकौतूहलेन आपानं मदिरापानभूमिः। 'आपानं पानगोष्ठिका' इत्यमरः। तस्य दर्शने यत् कौतूहलं आश्चर्यं तेन। वेलां कालम्।

शराब पीने के उत्सव का मानों अनुभव कर रहे हैं। [शराबपीने वाले अपनी प्रियतमाओं के संग शरीर में सुगन्धित पाउडर लगाकर गीत गा गा कर मदिरा पीने का आनन्द उठाते हैं। भौंरे भी उसी भाँति मकरन्द का पान कर रहे हैं। अतएव मद्यप तथा मधुप के कार्यों में समानता होने के कारण ऐसी उत्प्रेक्षा की गई है] ॥ ८ ॥

विदूषकः—(जाकर के) आपकी जय हो। आपका (मलयवती) कल्याण हो।

नायकः—ऐ मित्र! बहुत देर करके आये हो।

विदूषकः—मैं शीघ्र ही यहाँ आ जाता परन्तु विवाहके महोत्सव में लगे हुये सिद्धों और

नायकः। एवं यथाऽऽह भवान्। [समन्तादवलोकयन्] वयस्य! पश्य पश्य,—

*दिग्धाङ्गा हरिचन्दनेन दधतः सन्तानकानां स्रजो
माणिक्याभरणप्रभाव्यतिकरैश्चित्रीकृताच्छांशुकाः।
सार्द्धं सिद्धजनैर्मधूनि दयितापीतावशिष्टान्यमी
मिश्रीभूय पिबन्ति चन्दनतरुच्छायासु विद्याधराः ॥ ९ ॥

विद्याधराणामापानकौतुकं सहर्षं वर्णयति जीमूतवाहनः दिग्धाङ्गा इत्यादिना- हरिचन्दनेन "छेदे रक्तं कषे पीतं हरिचन्दनमुच्यते" इति लक्षितेन सुवर्णद्रव-रूपेण हरिचन्दनरसेन। दिग्धाङ्गाः लिप्तसकलावयवाः। सन्तानकानां कल्पतरुवि-शेषाणां स्रजः पुष्पमाल्यानि। दधतः धारयन्तः प्रसाधनाय केशादिषु दधानाः इति यावत्। तथा माणिक्याभरणप्रभाव्यतिकरैः माणिक्यानां विविधमणीनां यानि आभरणानि आभूषणानि। तेषां प्रभाः निःसरन्त्यः छटाः। तासां व्यति-करैः व्यतिषङ्गैः परस्परमेलनैरित्यर्थः। ("अथ व्यतिकरः पुंसि व्यसनव्यतिष-ङ्गयोः" इतिमेदिनी) चित्रीकृताच्छांशुकाः चित्रीकृतानि शबलीकृतानि (अभूत-तद्भावे च्विः।) अच्छानि निर्मलानि 'अच्छः स्फटिकभल्लूकनिर्मलेषु' इति मेदिनी। अंशुकानि वस्त्राणि येषा तथोक्ताः विद्याधराः सिद्धगणैः सार्द्धचन्दनल-ताच्छायासु चन्दनलतायाः छायासु (पूर्वपदस्य बहुत्वाभावात् 'छाया बाहुल्ये' इति छायाशब्दस्य न नपुंसकत्वम्।) मिश्रीभूय परस्परसंसर्गं प्राप्य मिलित्वेति यावत्। दयितापीतावशिष्टानि दयिताभिः रमणीभिः पीतात् अवशिष्टानि शेषाणि मधूनि मदिरां पिबन्ति। मलयवतीविवाहोत्सवे विद्याधराणां तात्त्विकमापानोत्स-ववर्णनमिदम्। अत एव स्वभावोक्तिरलङ्कारः। शार्दूलविक्रीडितम् ॥ ९ ॥

विद्याधरों के सुरापान को देखने के कौतूहल से (मुझे) इधर उधर घूमते हुये देर हो गई। इसलिये ऐ मित्र तुमभी इसे देखो।

नायकः—जैसा तुम कहो (हर्षके साथ चारों ओर देखता हुआ) देखो। देखो— हरिचन्दन (गले हुये सोने की कान्ति वाले चन्दन) को अपने सारे अङ्गों में लगाकर, कल्पवृक्ष के फूलकी माला को धारण करने वाले, मणियों के गहने की निकलती हुई प्रभाके आपसमें मिलनेसे विचित्र (अनेक) रंगवाले वस्त्रों को धारण करने वाले ये विद्याधर लोग सिद्धजनों के साथ आपस में मिल कर के प्रियाओं के पीनेके बाद बचे हुये जूठे शराब को चन्दन वृक्ष की शीतल छाया में बैठ कर पी रहे हैं ॥ ९ ॥

* स्निग्धाङ्गा—ग।

तदेहि वयमपि तां तमालवीथिं गच्छामः । [परिक्रामति] ।

विदूषकः । एसा क्खु तमालवीहिआ । एदं संचरंतो दाव परिखेदिदा विअ भोदी दीसई । ता इध ज्जेव फटिअमणिसिलाअले उवविसिअ वीसमम्ह । (एषा खलु तमालवीथिका । एतां सञ्चरन्ती तावत् परिखेदितेव भवती दृश्यते । तदिहैव स्फटिकमणिशिलातल उपविश्य विश्राम्यामः ।)

नायकः । वयस्य ! सम्यगुपलक्षितम् ;—

एतन्मुखं प्रियायाः शशिनं जित्वा* कपोलयोः कान्त्या ।
तापानुरक्तमधुना कमलं ध्रुवमीहते जेतुम् ॥ १० ॥

[नायिकां हस्ते गृहीत्वा] प्रिये ! इहोपविशामः ।

नायिका । जं अज्जउत्तो आणवेदि । (यदार्य्यपुत्र आज्ञापयति ।)

[सर्वे उपविशन्ति] ।

नायक आरक्तं नायिकामुखं चाटगर्भेण वचसा स्तोतुमीहते एतन्मुखमित्यादिना—प्रियायाः दयितायाः एतत् पुरोवर्ति मुखं कपोलयोः करिदन्तशुभ्रयोः गण्डस्थलयोः कान्त्या शोभया रात्रौ शशिनं शशलाञ्छितं पूर्णेन्दुं स्वयं निष्कलङ्कत्वात् जित्वा । 'शशी वदनावयवमात्रेण जेतव्यो न तु वदनसमग्रेण' इति कपोलपदेन द्योत्यते' इति विमर्शिणीकाराः । अधुना कमलविकाशकाले । तापाभिताम्रं तापेन घर्मजनितसन्तापेन अभिताम्रं रक्तवर्णं भूत्वा कमलं जेतुं ईहते चेष्टते इति ध्रुवं मन्ये । तापेन रक्तवर्णतां दधानं दयितानन पङ्कजजयाय एवोद्यतं वर्तते तथा चन्द्रकमलयोः जितयोः निःसपत्नं सौन्दर्यराज्यमनेनानुभूयते इति भावः ।

इसलिये आओ, हम लोग भी तमाल की क्यारी की ओर चलें । (सब जाते हैं)

विदूषकः—यही तमाल की क्यारी है । यही चन्दन लता का मण्डप है । यह शरद् कालीन सूर्य की गर्मी से पीड़ित आपका मुख दिखाई दे रहा है । इसलिये आप (मलयवती) इस स्फटिक शिला के ऊपर बैठें ।

नायकः—मित्र ! तुमने अच्छा कहा ।

दोनों कपोलों (गाल) की शोभा से युक्त यह प्रिया का सुन्दर मुख चन्द्रमा को जीतकर गर्मी के कारण कुछ लाल होकर अब कमलको भी जीतना चहता है ॥ १० ॥

(मलयवती को हाथ से पकड़कर) प्रिय ! हम लोग यहाँ बैठें ।

नायिका—जैसी आपकी आज्ञा (सब बैठते हैं) ।

---

* विप्रस्था०—ग ।

नायकः । [नायिकाया मुखमुन्नमय्य पश्यन्] प्रिये ! वृथैव त्वमस्माभिः कुसुमाकरोद्यानकुतूहलिभिः खेदिता । कुतः ?—

एतत्ते भ्रूलतोल्लासि पाटलाधरपल्लवम् ।
मुखं नन्दनमुद्यानमतोऽन्यत् केवलं वनम् ॥ ११ ॥

उत्प्रेक्षालङ्कारः । ध्रुवमित्यस्य तस्या वाचकत्वेन वाच्या । आर्या छन्दः ॥१०॥

नायको मलयवत्याः कमनीयानने नन्दनकाननत्वमारोपयति एतदित्यादिना । एतत् नेत्रगोचरीक्रियमाणं । भ्रूलतोल्लासि भ्रुवौ एव सुकुमारत्वात् लम्बायमानत्वाच्च लते । ताभ्यां उल्लासते शोभते इति तथोक्तम् । पाटलाधरपल्लवं पाटलः श्वेतरक्तः अधरः एव पल्लवः आताम्रवर्णत्वात् नूतनं किसलयं यस्मिन् तथाभूतं ते त्वदीयं मुखं नन्दनमुद्यानं नन्दनं वनं नन्दयतीति नन्दनं निखिलजनमनोह्लादकं वनं वर्तते । (अन्यत्र सुरराजस्य मनोहरं नन्दनामकं वनं विद्यते) ("हय उच्चैःश्रवाः सूतो मातलिर्नन्दनं वनमि"त्यमरः)। त्वदीयमाह्लादकं मुखमेव उद्यानेषु मुख्यं देवेन्द्रस्य नन्दनं वनं विद्यते इति भावः । अतः अन्यत् तव मुखं विहाय अन्यत् सर्वं केवलं वनमेव कण्टकाकीर्णमरण्यमेव । ("वनति उपतापयतीति वनं, वन उपतापे इति धातोः पचाद्यच्" इति नवीनचन्द्रमहोदयाः) भ्रुवोः लतायाः, अधरे पल्लवस्य, मुखे काननस्यारोपणात् साङ्गं रूपकम् । "रूपकं रूपितारोपाद्विषये निरपह्नवे" इति । 'अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत्' इति च दर्पणे तल्लक्षणात् । ततोऽन्यत् केवलं वनमिति व्यतिरेकालङ्कारः । तल्लक्षणं यथा कुवलयानन्दे—

व्यतिरेको विशेषश्चेदुपमानोपमेययोः ।
शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः ।

नन्दनपदे श्लेषोऽपि नन्दनशब्दस्य नन्दनवनाह्लादकत्वार्थत्वात् । तल्लक्षणं यथा कुवलयानन्दे—

नानार्थसंश्रयः श्लेषो वस्त्वर्थयोर्भयाश्रितः ।
सर्वदो माधवः पायात् स योऽगं गामदीधरत् ॥

नायकः—(नायिका के मुखको उपर उठाकर देखता हुआ) प्रिय ! कुसुमाकर उद्यान को देखने की उत्सुकता से हम लोगों ने तुम्हे व्यर्थ ही कष्ट दिया ।

क्योंकि:—भ्रू रूपी लता तथा लाल अधर रूपी पल्लव से शोभित होने वाला तुम्हारा यह मुखही नन्दन (सब मनुष्यों का आनन्द देने वाला तथा इन्द्रभगवान् का प्रसिद्ध उद्यान)

चेटी । [सस्मित विदूषकं निर्दिश्य] **सुदं तुए, भट्टिदारिअ कहं वण्णेदि ? अज्ज उण अहं तुमं वण्णेमि ।** (श्रुतं त्वया, भर्तृदारिकां कथं वर्णयति ? आर्य पुनरहं त्वां वर्णयामि ।)

विदूषकः । [सहर्षम्] **भोदि । जाविदोम्हि । ता करेदु भोदी पसादं, जेण एसो मं पुणोवि ण भणादि, जहा तुमं ईरिसो तारिसो कविलमक्कडाआरोत्ति ।** (भवति ! जावितोऽस्मि । तत् करोतु भवती प्रसादं, येनैष मां पुनरपि न भणति, यथा त्वमीदृशः कपिलमर्कटाकार इति ।

चेटी । **अज्ज ! तुमं मए विआहजाअरणे णिज्जाअमाणणिमीलिअ-**

एतेषां परस्परानुग्राह्यानुग्राहकत्वादत्र सङ्कराल्ङ्कारः । त्वदीयमाह्लादकरं मुखं पश्यतामस्माकमत्रागमनं केवलमायासकरमेवेति भावः ।

एवं शाकुन्तले कालिदासः—

"अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्" ॥ ११ ॥

सुदं तए-इति । श्रुतं त्वया भर्तृदारिकां नायकः कथं सुचारुरूपेण वर्णयति ।

आर्य अहं त्वां वर्णयामि गुणवर्णनं करोमि । पक्षान्तरे विचित्रैः वर्णैः मुखं ते चित्रितं करोमीत्युभयार्थसमर्थं चतुरिकया प्रयुक्तं वचनमिदम् ।

वन है । इन्द्र का नन्दन वन तो केवल कण्टकाकीर्ण वन (जंगल) है ॥ ११ ॥

चेटी—(**मुसकराहट के साथ विदूषक की ओर निर्देश करके**) नायिका का कैसा वर्णन किया गया, क्या यह तुमने सुना ? आर्य्य ! मैं तुम्हारा वर्णन (१) करतीहूं ।

विदूषकः—(हर्ष के साथ) मेरा भाग्य अच्छा है । आप मुझ पर प्रसन्नता दिखलावें जिससे मेरा मित्र मुझे ऐसा वैसा पीला बन्दर फिर न कहे । (बन्दर कह कर अब मेरी वह दिल्लगी न उडावे) ।

चेटी—आर्य मैंने, विवाहोत्सवमें जागने के कारणसे तुम्हें निद्रा लेते हुये तथा आँख आधी

---

(१) मूलमें 'वर्णयामि' पद है जो दो अर्थों को सूचित कर रहा है । एक अर्थ तो गुणों का वर्णन करना है । दूसरा अर्थ है—रंगना । चेटी के कथन का अभिप्राय रंगने से है—वह उसके मुखको रंगों से रंगने को कहती है । परन्तु विदूषक इस अर्थ को समझ नहीं पाता । वह समझता है कि चेटी उसका गुणवर्णन करेगी । इसी भ्रमके कारण वह मान जाता है । परन्तु पीछे अपनी भूल समझ जाता है । यहां श्लिष्ट पद का प्रयोग बड़ा ही रसानुकूल हुआ है ।

अच्छो सोहणो दिट्ठो । ता तह ज्जेव चिट्ठ, जेण वण्णेमि । (आर्य्य ! त्वं मया विवाहजागरणे निद्रायमाणनिमीलिताक्षः शोभनो दृष्टः । तत्तथैव तिष्ठ, येन वर्णयामि ।)

[विदूषकः तथा करोति] ।

चेटी । [स्वगतम्] **जाव एसो णिमीलिमअच्छो चिट्ठदि, दाव णीलरसाणुआरिणा तमालपल्लवरसेण मुहं कालीकरिस्सं ।** (यावदेषा निमीलिताक्षस्तिष्ठति , तावन्नीलरसानुकारिणा तमालपल्लवरसेन मुखं कालीकरिष्यामि ।) (ग)

[उत्थाय तमालपल्लवं निष्पीड्य विदूषकस्य मुखं कालीकरोति ।]

[नायको नायिका च विदूषकं पश्यतः] ।

नायकः । **वयस्य ! धन्यः खल्वसि, योऽस्मासु तिष्ठत्सु भवानेवं वर्ण्यते ।** (घ)

नायिका । [सस्मितं विदूषकं दृष्ट्वा नायकं पश्यति] ।

जाव इति । यावत् एष विदूषकः निमीलिताक्षः निमीलिते अक्षिणी येनासौ तथाभूतः नेत्रे निमील्य तिष्ठति । तावत् नीलरसानुकारिणा नीलरससदृशेन तमालपल्लवरसेन मुखं कालीकरिष्यामि कृष्णवर्णं विधास्यामि ।

वयस्येति । भो मित्र त्वं धन्योऽसि, अस्मासु तिष्ठत्सु उपस्थितानपि अस्माननादृत्य ('षष्ठी चानादरे' इति सूत्रेण चकारादनादरे **सप्तमी**) भवान् एवं स्फुटं वर्ण्यते ।

बन्द किये हुये देखा है । इसलिये इसी अवस्था में बैठो रहो । जरा मैं तुम्हारा वर्णन तो करूँ ।

(विदूषक वैसा ही करता है)

चेटी—(आपही आप) जब तक यह आँख बन्दे किये हुये हैं, तब तक मैं नील के रसकी अनुकरण करने वाले (उसके समान) तमालके पत्तेके रससे इसके मुखको काला कर दूंगी ।

(उठकर तथा तमालके पत्ते को लेकर उसे मीसकर विदूषक के मुँह को रँग देती है)

(नायक और नायिका विदूषक के मुखको देखते हैं)

नायकः—ऐ मित्र तुम धन्य हो क्योंकि हम लोगों के बैठे रहने पर भी तुम्हारा (ही) इस तरह से वर्णन किया जा रहा है (तुम इस तरह से रँगे जाते हो) !

नायिका—(मुसकराहट के साथ विदूषक को देखकर नायक को देखती है)

नायकः । [नायिकामुखं दृष्ट्वा] ।

स्मितपुष्पोद्गमोऽयं ते दृश्यतेऽधरपल्लवे ।
फलं त्वन्यत्र मुग्धाक्षि ! चक्षुषोर्मम पश्यतः ॥ १२ ॥

विदूषकः । **भोदि ! किं तुए किदं ?** (भवति ! किं त्वया कृतम् ?)

चेटी । **णं वण्णिदोसि ।** (ननु वर्णितोऽसि ।)

नायको मलयवत्याः स्मितमधुरं वदनमवलोक्य स्वदृष्टिसाफल्यं वर्णयति **स्मितेनेत्यादिना**—

हे मुग्धाक्षि ! मुग्धे सुन्दरे अक्षिणी नेत्रे यस्याः तत्सम्बोधने । ते अधरपल्लवे अधर एव सुकुमारतया पल्लवः तस्मिन् । अयं स्मितपुष्पोद्गमः स्मितं ईषद्धसनमेव पुष्पं तस्य उद्गमः आविर्भावः दृश्यते । आताम्रे त्वदीयाधरे विशदं स्मितं निरीक्ष्य ध्रुवं परिज्ञायते नवकिसलये पुष्पोदयो जातः किल । परन्तु फलं सामान्यं फलं साफल्यं च अन्यत्र किसलयादन्यस्मिन् स्थाने । पश्यतः त्वामवलोकयतः मम चक्षुषोः नेत्रयोः जातं खलु । स्मितावलोकनेन मम नेत्रयोः साफल्यं जातमिति भावः । कारणस्थल एव कार्योत्पत्तिर्भवितुमर्हतीति सहजं नियममुल्लङ्घ्य पुष्पोदयस्थानं विहायान्यत्र नायकनेत्रयोः फलमुत्पन्नमिति वर्णयता कविना असङ्गतिरलङ्कारः उदाहृतः 'कार्यकारणयोर्भिन्नदेशतायामसङ्गतिरि'' ति तल्लक्षणात् । फलमित्यस्योभयार्थकत्वात् अधरपल्लवादिष्वारोपसद्भावाच श्लेषरूपकाश्यामनुप्राणिता असङ्गतिरियमिति स्फुटमेव प्रतीयते ॥ १२ ॥

नायकः—(नायिका के मुखको देखकर)

तुम्हारे अधररूपी पल्लवमें स्मित (मुसकराहट) रूपी पुष्प का आविर्भाव दिखाई पड़ता है । किन्तु ऐ सुन्दर नेत्रवाली ! इस (पुष्पके उदय) का फल मेरे देखने वाली आँखो में हो रहा है (तुम्हे देखकर मेरे नेत्र सफल होगये (१) ॥ १२ ॥

विदूषकः—ऐ तुमने क्या किया ।

चेटी—तुम वर्णित किये गये हो ।

---

(१) साधारण नियम तो यही है कि जिस स्थान पर फूल लगता है उसी जगह फलभी लगता है । परन्तु कविने यहाँ भिन्न प्रकारसे वर्णन किया है । अधरमें तो मुसकराहट का फूल उगता है परन्तु फल फलता है उसे देखने वाली मेरी आखों में । इसे 'असंगति' अलङ्कार कहते हैं । आशय है कि तुम्हारे मुसकाने वाले होठों को देखकर आज मेरे नेत्र सफल हुये ।

विदूषकः। [हस्तेन मुखं प्रमृज्य दृष्ट्वा सरोषं दण्डकाष्ठमुद्यम्य]। आः दासीए धीए! रामउलं क्खु एदं किं तव करिस्सं? [नायकं निर्दिश्य] भो! तुम्हाणं पुरदो अहं दासीए धीआए खलीकिदो! ता किं मम इध ट्ठिदेण? अण्णदो गमिस्सं (आः दास्याः पुत्रि! राजकुलं खल्वेतत् किं तव करिष्यामि? भोः! युवयोः पुरतोऽहं दास्याः पुत्र्या खलीकृतः! तत् किं ममेह स्थितेन! अन्यतो गमिष्यामि। [निष्क्रामति]।

चेटी। कुविदो मे अज्ज अत्तेओ, जाव णं गदुअ पसादइस्सं। (कुपितो मे आर्य्य आत्रेयः, यावदेनं गत्वा प्रसादयिष्यामि)।

नायिका। हज्जे चदुरिए! किं मं एआइणीं उज्झिअ गच्छसि? (हञ्जे चतुरिके! किं मामेकाकिनीमुज्झित्वा गच्छसि?)

चेटी। [नायकं निर्दिश्य सस्मितम्] एव्वं एआइणी चिरं होहि। (एवमेकाकिनी चिरं भव।) [इति निष्क्रान्ता]।

नायकः। [नायिकाया मुखं पश्यन्]।

दिनकरकरामृष्टं बिभ्रत् द्युतिं परिपाटलां

खलीकृतः भवत्समक्षमेव अनादृतः इत्यर्थः।

एवमिति। नायकेन सहावस्थानं सूचयन्त्याः चतुरिकायाः वक्रोक्तिरियम्—एवमेव प्रियतमेन सङ्गता चिरमेकाकिनी भव।

अथ 'द्व्यर्थैः पदैः पिशुनपेच्च रहस्यवस्तु' इति कामशास्त्रानुसारेण एकान्ते नायिकामुपगच्छन् नायकः प्रकारान्तरेण चुम्बनं प्रार्थयते दिनकरेत्यादिना दिन-

---

विदूषकः—(हाथसे मुखको पोंछकर, क्रोधके साथ देखकर, छड़ी को हाथ से उठाता हुआ) हरामजादी! यह राजा का महल है! मैं यहाँ तुम्हारा क्या कर सकता हूं। (नायक की ओर) ऐ! आप लोगों के सामने ही इस हरामजादी ने मेरा अपमान किया है। मेरे यहाँ रहने से क्या लाभ। मैं दूसरी जगह जाता हूं। (बाहर जाता है)।

चेटी—आर्य आत्रेय मेरे ऊपर क्रुद्ध हो गये। इसलिये जाकर उन्हें प्रसन्न करूँगी।

नायिका—दासी! चतुरिका तुम मुझे अकेली छोड़कर क्यों जा रही हो?

चेटी—(नायक की ओर देखकर मुसकराहट के साथ) इसी तरह से (नायक के संगमें) चिरकाल तक अकेली रहो। (बाहर जाती है)

नायकः—(नायिका के मुखको देखता हुआ)

सूर्य की किरणों के स्पर्श होने से रक्त वर्ण की शोभा को धारण करने वाला, इधर उधर

दशनकिरणैरुपसर्पद्भिः स्फुटीकृतकेसरम् ।
मयि मुखमिदं मुग्धे ! सत्यं समं कमलेन ते
मधु मधुकरः* किन्त्वेतस्मिन् पिबन्न विभाव्यते ? ॥ १३ ॥

नायिका । [विहस्य मुखमन्यतो नयति]

नायकः । [तदेव पठति] ।

करकरामृष्टं दिनकरस्य सूर्यस्य करैः किरणैः ["किरणोऽस्रमयूखांशुगभस्तिवृणिरश्मयः । भानुः करः" इत्यमरः] आमृष्टं संस्पृष्टं । अतएव परिपाटलां, परितः सर्वतः । पाटलां रक्तवर्णं । द्युतिं शोभां । बिभ्रत् दधानं । उपसर्पद्भिः इतस्ततः निःसरद्भिः दशनकिरणैः दशनानां अत्युज्ज्वलानां दन्तानां किरणैः प्रभापटलैः स्मितप्रकाशितैरिति शेषः । स्फुटीकृतकेसरं स्फटीकृताः विशदीकृताः केसराः किंजल्का यत्र तत् तथोक्तं इदं ते मुखं त्वयि मुग्धे ! 'मौग्ध्यात् उचितकार्यानभिज्ञे' इति भावः । सत्यं निश्चयेन कमलेन समं सदृशं दृश्यते । किन्तु कमलसमतायामेका विप्रतिपत्तिरनुभूयते यत् तस्मिन् मधु पिबन् पुष्परसमास्वादयन् मधुकरः भ्रमरः न विभाव्यते न साक्षात्क्रियते । 'स्वाभाविकमरुणिमानं दधानं प्रसरद्स्मितच्छटाशोभितं चेदं मुखं सूरश्मिनाऽऽमृष्टं स्फुटलदयकेसरं प्रफुल्लं पद्मं सर्वथाऽनुकुर्यात् यदि कश्चिन्मधुकरोऽत्र निषद्य पिबेत्' अतः मधुकररूपोऽहं तवाधरपानाय प्रवृत्तोऽनुमतिं प्रतीक्षे; इति सरलार्थः । कमलसमतायाः परिपूरणार्थं न कापि तव विप्रतिपत्तिर्भविष्यतीति प्रकारान्तरमुपन्यस्य चुम्बनोपक्रमः सूचितः । हरिणीवृत्तं लक्षणन्तु पूर्वमेवोक्तम् ॥ १३ ॥

निकलने वाली दाँतो की किरण (प्रभा) से स्पष्ट रूपसे केसरको धारण करने वाला तेरा मुख ये सुन्दरि ! वास्तवमें कमल की समताको धारण कर रहा है । (क्योंकि कमल भी सूर्य किरणों के पडने पर खिलता है और उसमें केसर भी होता है) किन्तु अन्तर केवल इतना ही है कि इसे तुम्हारे मुख रूपी कमल में मधुको पीता हुआ भौंरा नहीं दिखाई देता है । (मैं तेरे मुख कमलको भौंरे की तरह चुम्बन करना चाहता हूं । अतः मुझे तुम आज्ञादो । इससे यही अभिप्राय सूचित किया गया है) ॥ १३ ॥

नायिका—(हंसकर मुख हटा लेती है)

नायकः—('दिनकर' इत्यादि वैसाही पढ़ता है) (घुम करके)

---

* लिहः—ग ।

चेटी। [पटाक्षेपेण प्रविश्य उपसृत्य]। **एसो क्खु अज्जमित्तावसू कज्जेण केणवि कुमारअं पेक्खिदुमिच्छदि।** (एष खल्वार्य्यमित्रावसुः कार्य्येण केनापि कुमारं प्रेक्षितुमिच्छति।)

नायकः। **प्रिये! गच्छ त्वमात्मनो गृहम्। अहमपि मित्रावसुं दृष्ट्वा त्वरितमागत एव।**

नायिका। [चेट्या सह निष्क्रान्ता]।

[ततः प्रविशति मित्रावसुः]।

मित्रा।—**अनर्हित्य तं सपत्नं कथमिव जीमूतवाहनस्याहम्।**
कथयिष्यामि हृतं तव राज्यं रिपुणेति निर्लज्जः? ॥ १४ ॥

अनिवेद्य च न युक्तं गन्तुमिति निवेद्य गच्छामि। कुमार! मित्रावसुः प्रणमति।

पटाक्षेपेण पटस्य जवनिकायाः आक्षेपेण दूरीकरणेन जवनिकामपसार्येति भावः। अथाङ्गरवेन परिशोषं गतस्य सम्भोगश्रृङ्गारस्य परिपूर्तौ अङ्गिनि वीररसे नायकस्य प्रवेशाय नायिकासोदरस्य मित्रावसोः प्रवेशः। मतङ्गवृत्तान्तं मनसि निधाय स कथयति **अनर्हित्येति**—समर्थः प्रकृष्टबलशाली भूत्वा। तं शत्रुभूतं मतङ्गराजं अनर्हित्य संग्रामे तत्प्राणान् अपरिहृत्य। निर्लज्जः सन् तव राज्यं शत्रुणा हृतं वशीकृतं इति जीमूतवाहनस्य वीराग्रेसरस्य सम्बन्धित्वात् प्रियस्य च (सम्बन्धविवक्षायां षष्ठी) कथं कथयिष्यामि। आर्या छन्दः॥ १४॥

तथापि अनिवेद्य वृत्तान्तमकथयित्वा गमनं अयुक्तरूपं अनुपपन्नं तदाज्ञयहानेरिति शेषः। इति हेतोः सर्वं वृत्तान्तजातं तस्मै निवेद्य गच्छामि।

चेटी—(**सहसा जा करके**) सिद्धों के युवराज मित्रावसु किसी काम से कुमारको देखने के लिये यहाँ आ ही रहे हैं।

नायकः—प्रिये! तुम अपने घर चली जावो। मैं भी मित्रावसु को देखकर शीघ्र आताही हूं।

नायिका—(**चेटी के साथ बाहर जाती है**)

(**इसके बाद मित्रावसु प्रवेश करता है**)

मित्रावसुः—उस शत्रु मतङ्गराज को रणक्षेत्र में बिना मारे मैं निर्लज्ज होकर वीर जीमूतवाहन के सामने 'तुम्हारे राज्य को शत्रुने हरण कर लिया है' ऐसा कैसे कह सकता हूं ॥१४॥

चूंकि बिना सूचना दिये जाना उचित नहीं है, इस लिये उसकी सूचना देकर आती हूं कुमार! मित्रावसु आपको प्रणाम करता है।

नायकः । [मित्रावसुं दृष्ट्वा] **मित्रावसो ! इत आस्यताम् ।**

मित्रावसुः । [निरूप्य उपविशति] ।

नायकः । [निरूप्य] **मित्रावसो ! संरब्ध* इव लक्ष्यसे ?**

मित्रा । **कः खलु मतङ्गहतके संरम्भः ?**

नायकः । **किं कृतं मतङ्गेन ?**

मित्रा । **स्वनाशाय किल युष्मदीयं राज्यमाक्रान्तम् ।**

नायकः । [सहर्षमात्मगतम्] **अपि नाम सत्यमेतत् स्यात् ?**

मित्रा । **अतस्तदुच्छित्तये आज्ञां दातुमर्हति कुमारः । किं बहुना ?-**

संसर्पद्भिः समन्तात् कृतसकलवियन्मार्गयानैर्विमानैः

मित्रावसो इति । सरब्धः-संरम्भेण सहितः । कोपयुक्त इव लक्ष्यसे मुखरागादिभिरिति भावः ।

कः खल्विति—मतङ्गहतके हत एव हतकः (स्वार्थे कः) दुर्भाग्यशालीति यावत् । तथाभूते मतङ्गे कः संरम्भः कोपेन किम् । "संरम्भः संभ्रमे कोपे" इत्यमरः । सामान्यस्य तस्य शत्रोर्नाशो मया लीलयैव विधेय इति भावः ।

अत इति । तदुच्छित्तये तद्विनाशाय कुमारः आज्ञां दातुमर्हति ।

"शत्रौ जयप्राप्तिः सिद्धैव, न तु साध्या" इति तस्याः सिद्धत्वमेव मित्रावसुः प्रतिपादयति **संसर्पद्भिरिति**—

समन्तात् सर्वासु दिक्षु । संसर्पद्भिः धावद्भिः । कृतसकलवियन्मार्गयानैः कृतं सम्पादितं सकलस्य समग्रस्य वियन्मार्गस्य आकाशमार्गस्य यानं गमनं यैः तैः व्या-

---

नायकः—(**मित्रावसुको**) मित्रावसु ! यहाँ बैठिये ।

मित्रावसुः—(**देखकर बैठता है**)

नायकः—(**देखकर**) तुम घबराये हुये की तरह मालूम पड़ते हो ।

मित्रावसुः—अभागे मतङ्ग के विषयमें घबराहट कैसी ?

नायकः—मतङ्गने क्या किया ?

मित्रावसु.—अपने नाश के लिये उसने आपके राज्यपर चढाई की है ।

नायकः—(**हर्ष के साथ आपही आप**) क्या यह सत्य है ?

मित्रावसुः—तुम मुझे उसके नाशकरने के लिये आज्ञा दो । अधिक क्या ?

चारो तरफ इधर उधर दौडते हुये सारे आकाशमें भ्रमणकरने विमानों से वर्षाकालीन

---

* ससंरम्भ—ख । † मध्यम—ग, घ । ‡ मानैः—ग, घ ।

कुर्वाणाः प्रावृषीव स्थगितरविरुचः श्यामतां वासरस्य ।
एते याताश्च सद्यस्तव वचनमितः प्राप्य युद्धाय सिद्धाः
सिद्धश्रोद्वृत्तशत्रुक्षयभयविनमद्राजकं ते स्वराज्यम् ॥ १५ ॥

सनभोमयडलैः जलदैरिव दृश्यमानैरिति भावः । विमानैः व्योमयानैः । स्थगितरविरुचः स्थगिता आच्छादिता रवेः सूर्यस्य रुचः प्रभाः यस्मिन् तादृशस्य आच्छादितसूर्यस्येत्यर्थः । वासरस्य दिवसस्य । प्रावृषि जलदसमये इव । श्यामतां कृष्णवर्णतां कुर्वाणाः विदधतः । यथा प्रावृषि सूर्ये जलदैराच्छन्ने हीनप्रभो दिवसः श्यामो भवति, तथैव विमानैः सूर्यप्रभामाच्छाद्य दिनं कृष्णवर्णं कुर्वन्तः इति भावः । एते सिद्धाः । तव वचनं त्वदीयामाज्ञां प्राप्य आज्ञाप्रतिक्षण एव । इतः मलयपर्वतात् युद्धाय शत्रुणा सह संग्रामं कर्तुं याताः न तु यास्यन्ति तवाज्ञाप्रतिरेव विलम्बहेतुर्नान्यत् किञ्चिदिति भावः । उद्वृत्तशत्रुक्षयभयविनमद्राजकं उद्वृत्तस्य प्रसभमुद्धृतस्य । शत्रोः मतङ्गाभिधानस्य क्षयेण नाशेन जातात् भयात् विनमत् प्रणमत् पश्यतामापद्यमानं राजकं राजसमूहो यत्र एवम्भूतं स्वायत्तसकलनरपतिचक्रमित्यर्थः । ते स्वराज्यं सिद्धं वशीकृतमेव न तु साध्यत्वेन वर्तते । आज्ञामात्रापेक्षया एव विलम्बः तन्नियुज्यतामिति कार्यस्येषत्करत्वं प्रकाशितम् । अत्र सिद्धानां यानरूपस्य राज्यसिद्धिरूपस्य च क्रियाद्वयस्य यौगपद्यकथनात् समुच्चयालङ्कारः । तल्लक्षणं यथा कुवलयानन्दे—

बहूनां युगपद्भावभाजां गुम्फः समुच्चयः ।
नश्यन्ति पश्चात्पश्यन्ति त्रस्यन्ति च भवद्द्विषः ॥

अत्र 'याताः' 'सिद्धं' चेति पदद्वयेन भाविनोः सिद्धियानयोश्च भूतकालिकगणनेन राज्यसिद्धेः नितान्तं निष्पन्नता सूच्यते । स्रग्धरावृतम् ॥ १५ ॥

मेघों की तरह सूर्य की किरणों को (कान्ति) रोक देने से दिनको (प्रकाश रहित होने से) अन्धकारमय करते हुये, ये सिद्ध लोग आप के वचन (आज्ञा) को प्राप्त कर यहाँ से (मलयपर्वत) शत्रुसे युद्ध करने के लिये गये हैं । (इस तरह से) बलात्कार शत्रु के नाश हो जाने से डरे हुये सब राजागण नम्र होकर आपके अधीन हो जायेंगे और आपका स्वराज सिद्ध ही है । (इस मतङ्ग नामक शत्रु के नाशको देखकर फिर कोई राजा डर के मारे आपके विरुद्ध कोई उपद्रव नहीं करेगा) ॥ १५ ॥

अथवा, किं बलौघैः ?—

एकाकिनाऽपि हि मया रभसावकृष्ट-
निस्त्रिंशदीधितिसटाभरभासुरेण ।
आरान्निपत्य हरिणेव मतङ्गजेन्द्र-
माजौ मतङ्गहतकं हतमेव विद्धि ॥ १६ ॥

नायकः । [कर्णौ पिधाय आत्मगतम्] अहह ! दारुणमभिहितम् ,

अथवा बलौघैः किं, काऽऽवश्यकता सेनासमूहस्य । अहमेकाकी एव शत्रुविजयरूपं कार्यं कर्तुं सर्वथा समर्थः इति स्वबलवत्तां प्रकटयति एकाकिनापित्यादिना—

एकाकिनापि असहायेनापि । रभसावकृष्टनिस्त्रिंशदीधितिसटाभरभासुरेण रभसेन अतिशयवेगेन । अवकृष्टः निष्काशितः कोशादिति शेषः । यो निस्त्रिंशः निर्गतः त्रिंशतः अङ्गुलिभ्यः इति निस्त्रिंशः खड्गः ("खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः" इत्यमरः) तस्य दीधितयः प्रभाः सटाः सिंहस्य केसरा इव उज्वलाः । ताभा भरेण समूहेन भासुरः प्रकाशमानः तथाभूतेन (सिंहरूपतामापद्यमानेनेति गूढं द्योत्यते) मया आजौ सङ्ग्रामे । आरात् निपत्य समीपं (आराद् दूरसमीपयोरित्यमरः) सेनादिकं पश्चात् त्यक्त्वा तत्समीपमागत्य । हरिणा सिंहेन मतङ्गजेन्द्रं हस्तिराजमिव । तं मतङ्गहतकं नीचं मतङ्गराजं हतमेव न तु अधुना हन्यमानं, नापि भविष्ये हनिष्यमाणं, विद्धि जानीहि । यथा सटालङ्कृतकलेवरः सिंह एकाकी एव गजाधिपमपि हन्ति, तथैव असहायेनापि मया खड्गसाहाय्यात् बलवानपि मतङ्गराजो हतः' इति भवतावगन्तव्यम् । तद् झटिति आज्ञापय । सिद्धौ सन्देहलेशोऽपि नास्तीति भावः । वसन्ततिलकावृत्तं 'उक्ता वसन्ततिलका तभजा जगौ गः' इति वृत्तरत्नाकरे तल्लक्षणात् ॥१६॥

अहह इति । परद्रोहप्रस्तावस्याऽश्रवणीयत्वात् हस्ताभ्यां कर्णावच्छाद्य ।

अथवा सेना के समूह से क्या लाभः—

अकेले भी (सहायता रहित होने पर भी) वेग के साथ निकाली गई तलवार के सिंह की ग्रीवा के बालकी तरह उज्वल कान्ति (प्रभा) के समूह से प्रकाशित होता हुआ मुझ से, समीप में आकर जैसे सिंह के द्वारा हस्तीराज मार डाला जाता है उसी तरह, लड़ाई में नीच मतङ्ग को मारा गया ही समझिये । (जैसे सिंह कितने ही बलवान् हाथी को मार डालता है उसी तरह से तलवार को लेकर सिंह की तरह आवेश में आकर मैं उस मतङ्गको अकेले ही मार डालूंगा) ॥ १६ ॥

नायकः—(कान को बन्दकर आपही आप) हा हा हा ! तमने बड़ी निर्दयवात-

अथवा एवं तावत् । [प्रकाशम्] मित्रावसो ! कियदेतत् ? बहुतरमतोऽपि बाहुशालिनि त्वयि सम्भाव्यते ।

स्वशरीरमपि परार्थे यः खलु दद्यादयाचितः कृपया ।
राज्यस्य कृते स कथं प्राणिवधक्रौर्य्यमनुमन्ये ? ॥ १७ ॥

अपि च ।—क्लेशान् विहाय मम शत्रुबुद्धिरेव नान्यत्र । यदि

बाहुशालिनि अतिशयवीर्यसम्पन्ने त्वयि । अतोऽपि पूर्वं वर्णितादपि । बहुतरं अधिकतरं शौर्य्ये सम्भाव्यते तथापि प्राणिहिंसायां नास्ति मेऽनुमतिरिति नायकः स्वाभिप्रायं प्रकाशयति **स्वशरीरमिति** —

अयाचितः—याच्ञां विनापि स्वेच्छयैवेति यावत् । योऽहं परार्थे अन्यस्य रक्षणाय । स्वशरीरमपि प्रियतरं स्वीयं देहमपि । कृपया करुणया दद्यात् दातुं शक्नुयात्, ('शकि लिङ् च' इति लिङ्) अप्रार्थितः प्राणानपि दद्याम्, प्रार्थने सति किमु वक्तव्यमिति भावः । स एवाहं राज्यस्य नाशशीलस्य बहिरङ्गस्य च ('कृते' इत्येकारान्तमव्ययपदम्) प्राणिवधक्रौर्यं क्रूरस्य भावः कर्म वा क्रौर्यं निर्दयत्वमित्यर्थः (भावे ष्यञ् प्रत्ययः) प्राणिनां जीवानां वधरूपं हिंसारूपं क्रूरत्वं कथं अनुमन्ये कथं स्वीकरोमि । कथमित्यतिशयविरोधं प्रतिपादयति । पद्येनानुना नायकस्य जीवदयारूप उत्कृष्टो गुणः प्राधान्येन सूचितः । आर्या ॥१७॥

अपि चेति । अपि च क्लेशान् योगशास्त्रे प्रसिद्धान् अविद्यास्मितारागद्वेषाभिनिवेशान् पञ्च क्लेशान् । [अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः योगसूत्र २ पाद, ३ सूत्र । तल्लक्षणानि यथा तत्रैव—अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या । दृग्दर्शनशक्त्योरेकात्मतेवास्मिता । सुखानुशयी रागः । दुःखानुशयी द्वेषः । स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः ।] विहाय त्यक्त्वा अन्यत्र जीवमात्रे । मे शत्रुबुद्धिः अयं मे अनर्थकारी रिपुरित्येवं

कष्ट जनक बात—कही । अथवा यह हो । (स्पष्ट होकर मुसकराहट के साथ) मित्रावसु ! यह तुम्हारे लिये क्या है (तुम्हारे जैसे मजबूत शरीर वाले के लिये यह लड़कों के खिलवाड़ जैसा है) । तुम्हारे जैसे बली से इससे अधिक भी संभव है । इससे अधिक वीरता का कार्य कर सकते हो । किन्तु:—जो बिना माँगे भी दया के कारण दूसरे के हित के लिये अपने प्राणों को भी दे सकता है । वह भला राज्य के लिये जीवों को मारने की निर्दयता को कैसे कर सकता है—प्राणिहिंसा के लिये कैसे अनुमति दे सकता है ॥ १७ ॥

और भी क्लेशों को छोड़कर मैं किसी को शत्रु ही जानता । यदि तुम मेरा हित

त्वमस्मत्प्रियं कर्तुमीहसे, तदनुकम्प्यतामसौ राज्यस्य कृते क्लेशदासीकृतस्तपस्वी।

मित्रा। [सामर्षम्] कथं नानुकम्पनीय ईदृशोऽस्माकमुपकारी कृपणश्च !!

नायकः। [स्वगतम्] अनिवार्य्यसंरम्भः प्रत्यग्रकोपाक्षिप्तचेता न तावदयं शक्यते निवर्त्तयितुम्; तदेवं तावत्। [प्रकाशम्] मित्रवसो!

बुद्धिः न वर्तते। दुःखबहुलेऽस्मिन् जगति क्लेशा एवास्माकं शत्रवो नान्ये इति मदीयं मतमिति भावः। यदि अस्मत्प्रियं कर्तुं त्वं ईहसे चेष्टसे तत् तर्हि क्लेशदासीकृतः क्लेशैः शत्रुभूतैः दासीकृतः नितरां वशीकृतः अविद्यातत्कार्येष्वेव भ्रमन्नित्यर्थः। तपस्वी शोच्यः ('मुनिशोच्यौ तपस्विनौ' इति विश्वः) अयं मतङ्गराजः अनुकम्प्यताम्, तस्मिन् दया प्रदर्श्यताम्। भवता मद्राज्यरक्षणप्रयासो न सोढव्यः, अधुना मतङ्गराजो राज्यसुखमनुभवन् मोहग्रस्तः क्लेशैः नितरां क्लान्तो वर्तते। अतोऽस्मद्राज्यापहरणेन तस्योदयबुद्धिं मा कृथाः इति नायकस्याभिप्रायः।

तद्वचः श्रुत्वा कोपेनाभिप्रायमजानन् हासमवलम्ब्याधिक्षिपति **कथमिति**—अस्माकं ईदृश उपकारी अनुकूलकारी कृपणः दीनश्च वर्तते तदा कथं नानुकम्प्यते। अत्र विरुद्धलक्षणया प्रकाश्यते यदयं महान् अपकारी उद्धतश्चेति हेतोः कथमपि न दयनीयः प्रत्युत सर्वथा उच्छेतव्य इति।

अनिवार्येति। प्रत्यग्रकोपाक्षिप्तचेताः प्रत्यग्रेण नूतनेन। ('प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः' इत्यमरः) कोपेन तन्मनोरथभङ्गजातेन क्रोधेन। आक्षिप्तं आक्रान्तं ग्रस्तमिति यावत्। चेतः मनः यस्य तथाभूतः 'कोपाविष्टचेताः' इत्यर्थः। असौ मित्रावसुः निवर्तयितुं स्वव्यापारात् निवारयितुं न शक्यते।

करना चाहते हो तो इस अभागे पर, जो राज्य के क्लेशों(१) का दास बन गया है, दया करो।

मित्रावसुः—(क्रोध तथा हँसी के साथ) यह हम लोगों का उपकार करने वाला तथा कृतज्ञ है। इसलिये इसपर दया क्यों नहीं करनी चाहिये ? (अवश्य करनी चाहिये)।

नायकः—(आपही आप) नवीन क्रोध से आक्रान्त इसके चित्तको दूसरी ओर फेरना

---

(१) यहां 'क्लेश' शब्द* योगसूत्र में वर्णित अविद्या अस्मिता राग द्वेष अभिनिवेशको प्रकट करता है। इसके लिये संस्कृत टीका देखिये।

उत्तिष्ठ, अभ्यन्तरमेव प्रविशावः। तत्रैव तावत् त्वां बोधयिष्यामि। सम्प्रति परिणतमहः। तथाहि—

निद्रामुद्राऽवबन्धव्यतिकरमनिशं पद्मकोषादपास्य-
आशापूरैककर्मप्रवणनिजकरप्राणिताशेषविश्वः।
दृष्टः सिद्धैः प्रसक्तस्तुतिमुखरमुखैरस्तमप्येष गच्छु-

सम्प्रति अधुना अहः परिणतं दिनमवस्थितम्। सन्ध्यावेला जातेत्यर्थः।

इमं सुभगं नरदेहलाभमामरणं परोपकारसाधनत्वेन सफलयामीति जीमूतवाहनः आत्मसंकल्पं दिवाकरस्य परोपकारव्रतवर्णनेन द्रढयति **निद्रेत्यादिना**—

पद्मकोशात् कमलकुड्मलात्। निद्रामुद्रावबन्धव्यतिकरं निद्रायां दलानां संकोचे। यः मुद्राया अवबन्धः दृढसंश्लेषः पत्राणा परस्परं गाढाश्लेष इति यावत्। (दलानामवयवसंश्लेषदोःस्थ्येन पिण्डीभूय वर्तनं मुद्रावबन्धः इति शिवरामः) तस्य व्यतिकरं सम्बन्धं संकोचजनित गाढबन्धनमित्यर्थः। अनिशं प्रतिदिनं। अपास्यन् दूरीकुर्वन् विकासनेति शेषः। [अन्योऽपि परोपकारपरायणः पुरुषः पद्मकोशात् पद्मादिनिधीनां धारकात् भाण्डागारात्। निद्रां राजपुरुषाणामालस्यं मुद्रां च राजचिह्नं तद्बन्धसम्बन्धञ्च अपाकरोति दूरीकरोति कोशस्य याचकानामभिलषितपूरणाय सदैव विवृतत्वात्] तथा च आशापूरैककर्मप्रवणनिजकरप्रीणिताशेषविश्वः आशानां दिशा ('दिशस्तु हरितः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः) पूरः तेजसा पूरणमेव, एकं प्रधानं कर्म तस्मिन् प्रवणैः प्रवृत्तैः निजकरैः स्वरश्मिभिः प्रीणितं प्रकाशेनाह्लादितं अशेषं समग्रं विश्वं येनासौ तादृशः। [तथा चान्योऽपि याचकानामभिलषितपूरणाख्ये प्रधाने कर्मणि प्रवृत्ताभ्यां हस्ताभ्यां समग्रं विश्वमानन्दयति]। अस्तमपि गच्छन्। अस्तसमयेऽपि सिद्धैः स्तूयते किं पुनरभ्युदयकाले इति भावः। प्रसक्तस्तुतिमुखरमुखैः प्रसक्ताभिः अविश्रान्ताभिः स्तुतिभिः स्तोत्रैः मुखराणि शब्दायमानानि मुखानि

उचित नहीं है। इसलिये मैं ऐसा कहता हू। **(स्पष्ट रूप से)** मित्रावसु! उठो। आओ हम लोग भीतर चलें। वहाँ मैं इस विषय में अधिक बातें कहूंगा। इस समय दिन ढल गया, दिवस का अवसान हो गया (दिन बीत गया)। देखोः—

कमल के कोश से संकोच के कारण पत्तों के गाढ़ आश्लेष को प्रति दिन दूर करने वाले, दिशाओं को प्रकाश से भरपूर कर देने के मुख्य काम में लगे रहने वाली अपनी किरणों से

अनेकः श्लाघ्यो विवस्वान् परहितकरणायैव यस्य प्रयासः*१८

[इति निष्क्रान्ताः सर्वे]।

इति तृतीयोऽङ्कः।

येषां तादृशैः सिद्धैः दवयोनिविशेषैः ("पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः" इत्यमरः) दृष्टः अवलोकितः। (अन्योऽपि पापीडानाशकः स्वमृत्युकालेऽपि सिद्धैः सिद्धिमिर्हेतुभूताभिः स्तुतिशतं पठद्भिर्जनैः सादरमवलोक्यते)। तथा परहितकरणाय अन्येषां कल्याणसाधनाय एव यस्य प्रयासः उदयसञ्चरणादिपरिश्रमो वर्तते तथाभूतः एष एकः अद्वितीयः (तथाविधस्यान्यस्याभावात् केवलः) विवस्वान् सूर्यः ["भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः" इत्यमरः] एव श्लाघ्यः। अयमेको भानुरेव सर्वेषां प्रशंसाभाजनं वर्तते। अत्र पद्मकोशादिश्लिष्टैः पदैः स्फुटं प्रतीयमानः परार्थं देहत्यागमपि कुर्वतः कस्यचिदुपकारशीलस्य वदान्यस्य व्यवहारसमारोपः विवस्वेति समासोक्तिच्छायया कविना क्रियते। अतः समासोक्तिरलङ्कारः। तल्लक्षणं यथा साहित्यदर्पणे—

समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः॥

य उदयसमये पद्मकुड्मलानां संकोचमपाकरोति, अनन्तरं स्वकिरणैरन्धं तमो निरस्यन् सकलं विश्वमाह्लादयति, यश्चास्तसमये सिद्धैः स्तूयते, स एव परोपकारव्रती विवस्वान् श्लाघनीय इति प्रतिपादयता नायकेनाङ्कान्तरे भावी नागानां रक्षणार्थं स्वदेहपाताध्यवसायः स्फुटं प्रकटीकृतो भवतीत्यवगन्तव्यम्। स्रग्धरावृत्तम्॥ १८॥

इति भावार्थदीपिकाख्यायां नागानन्दव्याख्यायां तृतीयोऽङ्कः समाप्तः।

समग्र संसार को आनन्दित बनाने वाले, मुख से लगातार स्तुति करने वाले सिद्ध जनों के द्वारा दर्शन किये जाने वाले, सायंकाल अस्ताचल को जाने वाले केवल भास्वान् (सूर्य) ही एक धन्य है जिसका प्रयत्न दूसरों का हित करना ही है(१)॥१८॥ (सभी बाहर जाते हैं)

इति नागानन्दे भाषानुवादे तृतीयोऽङ्कः।

---

* प्रसादः—ग।

(१) यह श्लोक समासोक्ति के द्वारा परोपकार परायण पुरुष का समुचित वर्णन करता है। जिसप्रकार सूर्य कमलकोष के संकोच के कारण जुटे हुये पत्तों को अलग कर देते हैं, उसी प्रकार परोपकारी पुरुष याचकों की अभिलाषा पूरण करने के लिये खजाने से अधि-

अथ चतुर्थोऽङ्कः

[ततः प्रविशति कञ्चुकी गृहीतरक्तवस्त्रयुगलः प्रतिहारश्च]।

कञ्चुकी। अन्तःपुराणां विहितव्यवस्थः पदे पदे सं*स्खलितानि रक्षन्†।

अथाङ्कावसानसूचितस्य परमसाध्यस्य नायकगतजीवदयारूपस्य कार्यस्य प्रवृत्तये ऽपेक्षितमपि वस्तु नीरसत्वाद् विष्कम्भादिभिः सूचनीयमिति हेतोस्तद्-र्थनाय कञ्चुकीप्रतीहारयोरत्र विष्कम्भके प्रवेशकः।

कञ्चुकी—अन्तःपुरचारी स्त्रीसम्भोगविवर्जितो वृद्धो ब्राह्मणः। यदुक्तं—

अन्तःपुरचरो वृद्धो विप्रो गुणगणन्वितः।
सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते।
जरा वैक्लव्ययुक्तेन विशेद् गात्रेण कञ्चुकी॥ (भरतः)

अन्यच्च—ज्ञानविज्ञानसम्पन्नाः स्त्रीसम्भोगविवर्जिताः।
अमत्सरा ये पुरुषा काञ्चुकीयास्तु ते स्मृताः॥ (मातृगुप्ताचार्यः)

प्रतिहारः दौवारिकः द्वारपालः इति यावत्। ["प्रतीहारो द्वारि द्वाःस्थे द्वाःस्थितायान्तु योषिति" इति मेदिनी] इदं रक्तवस्त्रयुगलं मलयवत्याः मात्रा जीमूतवाहनाय आचारप्रासमिति प्रेषितम्।

अन्तःपुरसंचरणशीलः कञ्चुकी स्वकीयां वृद्धावस्थां प्रकाशयति अन्तः पुराणामित्यादिना—

अन्तःपुराणां राज्ञामवरोधानाम् ("स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरो-

[उसके बाद दो लाल वस्त्रों को लेकर के कञ्चुकी और प्रतीहार प्रवेश करते है]

कञ्चुकी—मैंने राजा के अन्तः पुर की पूरी व्यवस्था कर दी है—पग पग पर मैं ठोकरों

कारियों की नींद तथा मुहर लगाने के कार्य को निकाल देता है जिससे राज्यपुरुष स्वेच्छा-पूर्वक दान दें। वह अपने हाथों से दीन जनकी आशा को पूरा कर संसार को प्रसन्न कर देता है। अन्तकाल में सिद्धियों के कारण लोग उसकी स्तुति करते हैं तथा दर्शनकर अपने को कृतार्थ करते हैं। सूर्य के परोपकारी के रूप में वर्णन से नायक की परोपकार-परायणता का आभास मिलता है जो अगले अङ्क में दिखाई जायगी।

* ऽहं—ब। † पश्यन्—ग।

जरातुरः सम्प्रति दण्डनीत्या सर्वां नृपस्यानुकरोमि वृत्तिम् ॥ १ ॥

धनम्" इत्यमरः ।) विहितव्यवस्थः विहिता सम्पादिता व्यवस्था स्वयैवं वर्तित व्यमिति चेटी मूकवामनादीनां नियमनिर्देशो येनासौ । (राजपक्षे पुराणां अन्तः नगरेष्वित्यर्थः । विहितव्यवस्थः विहिता सुष्ठु कृता व्यवस्था वर्णाश्रमादिकृत्यमर्यादा येनासौ सम्पादितमण्डलकृत्यः इति भावः) । पदे पदे प्रतिपादविक्षेपे संस्खलितानि वार्धक्यवशात् निरूपितस्थानात् अन्यत्र सिद्धानि गतिस्खलनानि रक्षन् (पक्षे पदे पदे दण्डनादिविधेयकृत्येषु । ["पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः] । स्खलितानि अधिकारिपुरुषाणां प्रमादजनितानि विरुद्धाचरणादीनि निवारयन्) सम्प्रति विश्रामयोग्येऽस्मिन् वृद्धत्वकाले । जरातुरः जरया वृद्धतया आतुरः क्लेशितोऽहम् । दण्डनीत्या दण्डस्य वंशयष्टेः नीत्या परिग्रहेण नृपस्य सर्वां वृत्तिं व्यवस्थादिरूपं निखिलं चरितमनुकरोमि । (दण्डं विना पदमपि चलितुं नैव शक्नोमीति हेतोः दण्डग्रहणं स्वीक्रियते । राजापि दण्डनीत्या अपराधिनामुचितदण्डप्रदानेन स्वराज्यकार्यं सम्पादयति) । 'यथा राजा नगरेषु वर्णाश्रमस्य विशदां मर्यादां स्थापयति, अधिकारिणां प्रमादानुन्मूलयति दण्डस्य प्रयोगेण च निखिलं राज्यं साधु शास्ति, एवमहमपि स्वगतेः स्खलनानि रक्षन् वंशयष्ट्याश्रयेण स्वाधिकारकार्यं सम्पादयामि' इति सरलार्थः । अर्थश्लेषानुप्राणितः उपमालङ्कारः ।

कालिदासेनापि एवमेव जरातुरः कञ्चुकी शाकुन्तले उपन्यस्तो दृश्यते । यथा—

आचार इत्यधिकृतेन मया गृहीता या वेत्रयष्टिरवरोधगृहेषु राज्ञः ।
काले गते बहुतिथे मम सैव जाता प्रस्थानविक्लवगतेरवलम्बनार्था ॥

इन्द्रवज्रोपेन्द्रवज्रयोः सङ्करूपा उपजातिः । तल्लक्षणानि यथा वृत्तरत्नाकरे—

स्यादिन्द्रवज्रा यदि तौ जगौ गः । उपेन्द्रवज्रा प्रथमे लघौ सा ।
अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥ १ ॥

को बचा रहा हूं । अब मैं बुड्ढा हो चला । हाथ में दण्ड लिये हुये हूं । मैं इस लाठी के सहारे चलता हूं । मैं राजा के चरित्र का अनुकरण कर रहा हू । (राजा भी गाँवो में चारों वर्णों की व्यवस्था कर देता है—मर्यादा ठीक कर देता है । हर एक काम में नौकरों की गलतियाँ दूर करता है । राजा दण्डनीति का आश्रय लेकर अपराधियों को उचित दण्ड देकर राजकाज चलाता है । अतः वृद्ध कञ्चुकी अपने कार्यों से राजा का अनुकरण कर रहा है) ॥ १ ॥

प्रतीहारः । आर्य्य वसुभद्र ! क नु खलु भवान् प्रस्थितः ?

कञ्चुकी । आदिष्टोऽस्मि देव्या मित्रावसुजनन्या,—"कञ्चुकिन् ! दशरात्रं त्वया यावन्मलयवत्या जामातुश्च रक्तवासांसि नेतव्यानि" । दुहिता च श्वशुरकुले वर्त्तते । जीमूतवाहनोऽपि युवराजेन सह समुद्रवेलां द्रष्टुमद्य गत इति श्रूयते, तन्न जाने, किं राजपुत्र्याः सकाशं गच्छामि, अथवा जामातुरिति ।

प्रती । आर्य्ये ! वरं राजपुत्र्याः सकाशं गन्तव्यम् । तत्र हि कदाचिदस्यां वेलायां जामाता स्वयमेवागतो भविष्यति ।

कञ्चुकी । साधूक्तम् । अथ भवान् पुनः क्व प्रस्थितः ?

प्रती । आदिष्टोऽस्मि महाराजविश्वावसुना, यथा—"भो सुनन्द ! गच्छ, मित्रावसुं ब्रूहि, अस्मिन् दीप*प्रतिपदुत्सवे मलयवत्या जामातुश्च

आदिष्टोऽस्मीति । दशरात्रं—दशानां रात्रीणां समाहारः इति दशरात्रम् । ('अहः सर्वैकदेशे'त्यादिना समासान्तोऽच्प्रत्ययः सङ्ख्यापूर्वं रात्रं क्लीबमिति क्लीबत्वं च ।)

आदिष्टोऽस्मीति । प्रतिपदुत्सवे—गृह्यसूत्रणिते स्थालीपाकाख्ये कर्मणि ।

प्रतीहारः—आर्य वसुभद्र ! आपने कहाँ के लिये प्रस्थान किया है ।

कञ्चुकी—मित्रावसु की माता ने मुझे आज्ञा दी है कि ऐ कञ्चुकी ! तुम्हें दस रात तक मलयवती और जामाता जीमूतवाहन के पास लाल कपड़े ले जाने पड़ेंगे । लड़की (मलयवती) तो ससुराल में है । सुना है कि आज जीमूतवाहन भी युवराज के साथ समुद्र के किनारे को देखने गये हैं । अतः मैं नहीं जानता कि मुझे राजपुत्री के पास जाना चाहिये या जामाता के पास ।

प्रतीहारः—आर्य ! राजपुत्री के ही पास जाना अच्छा है । बहुत संभव है कि इस समय तक जामाता (जीमूतवाहन) लौट आये होंगे ।

कञ्चुकी—तुमने ठीक कहा । तुम कहाँ जा रहे हो ?

प्रतीहारः—विश्वावसु ने मुझे आज्ञा दी है कि "ऐ सुनन्द ! जाओ और कुमार मित्रावसु से कहो कि इस दीप प्रतिपद् (दिवाली) के उत्सव पर मलयवती और जामाता को कुछ भेंट भेजना है । उत्सव के अनुरूप कौन चीज़ भेजी जानी चाहिये । इसका आकर विचार

---

* दिवसे ख ।

यत् किञ्चित् प्रदीयते, तदुत्सवानुरूपं किञ्चिदागत्य चिन्त्यताम्' इति* तद्गच्छतु राजपुत्र्याः सकाशमार्यः । अहमपि मित्रावसोराह्वानाय गच्छामि ।

(निष्क्रान्तौ) इति विष्कम्भकः ।

[ततः प्रविशति जीमूतवाहनो मित्रावसुश्च] ।

नायकः ।—

शय्या शाद्वलमासनं शुचिशिला सद्म द्रुमाणामधः
शीतं निर्झरवारिपानमशनं कन्दाः सहाया मृगाः ।

प्रतिपदि दीपदानरूपो हर्षजनक उत्सवविशेषः । स च कार्तिकमासि दीपावलीति नाम्नाऽधुनापि सर्वेषां जनानामानन्दमहोत्सवाय भवतीति सुप्रसिद्धमेतत् ।

विष्कम्भकलक्षणं यथा दर्पणे—

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः ॥
शुद्धः स्यात्, स तु सङ्कीर्णो नीचमध्यमकल्पितः ॥

अत्र मध्यमपात्राभ्यामेव प्रयुक्तत्वात् शुद्ध एवायं विष्कम्भकः इति वेदितव्यम् ।

जीमूतवाहनः परोपकारस्यावसरालाभेन खिन्नः वनवासस्य वैपरीत्यं प्रतिपादयन् मनोगतं भावं प्रकाशयति शय्येत्यादिना—

शाद्वलं शादः शष्पं विद्यतेऽस्मिन्निति शाद्वलं हरितृणपूर्णस्थानं ('शाद्वले शादहरिते' इत्यमरः) ("नडशादाद् ड्वलच्" इति सूत्रेण मत्वर्थीयो ड्वलच् प्रत्ययः) शय्या वर्तते 'वनवासे' इति शेषः । शुचिशिला पवित्रप्रस्तरखण्ड आसनं उपवेशनाय विद्यते । द्रुमाणां वृक्षाणाम् अधःतले सद्म गृहम् । शीत निर्झरवारि स्वतः प्रवहतः स्रोतसो जलं पानं पीयते इति पानं पेयं वस्तु । कन्दाः

करो" । अतः आप राजपुत्रीके पास जाइये। मैं भी मित्रावसु को बुलाने जा रहा हूं ।

(दोनों जाते हैं) इति विष्कम्भकः

(जीमूतवाहन और मित्रावसु का प्रवेश)

नायकः—घास की जहाँ पर शय्या है, शीतल शिला जहाँ आसन है, पेड़ों के नीचे घर है, पीने के लिये ठंडा झरने का पानी है, खाने के लिये जहाँ मूल फल है, मित्र मृग है,—

* इत्येतत् सर्वं गद्यं कपुस्तके नास्ति ।

इत्यप्रार्थितलभ्यसर्वविभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत् परार्थघटनावन्ध्यैर्वृथा स्थीयते ॥ २ ॥

मित्रा० । [ऊर्ध्वमवलोक्य] कुमार ! त्वर्य्यतां त्वर्य्यताम् ; समयोऽयं चलितुमम्बुराशेः ।

नायकः । [आकर्ण्य] सम्यगुपलक्षितम् ।—

उद्गर्ज*ज्जलकुञ्जरेन्द्ररभसाऽऽस्फालानुबन्धोद्धतः

मूलानि अशन भोजन, मृगाः सहायाः बान्धवा वर्तन्ते । तादृशैरनुद्वेगकरैः प्रतिवेशिभिः सह वासं कुर्वतः आश्रमधर्मः निर्बाधः इति भावः । इति एवं प्रकारेण अप्रार्थितलभ्यसर्वविभवे अप्रार्थितेन प्रार्थनामन्तरेण अयत्नेनेति यावत् । लभ्याः प्रापणीयः सर्वः विभवः भोजनादि साधनं यस्मिन् तथाभूते अस्मिन् वने, अयम् एव एको दोषः । यत् दुष्प्रापार्थिनि दुष्प्रापः कष्टेन लभ्यः अर्थी याचको यस्मिन् तथाभूते अस्मिन् अरण्ये । परार्थघटनावन्ध्यैः परेषां अर्थः प्रयोजनं तस्य घटना सम्पादनं, तस्यां बन्ध्याः निरुद्यमाः तादृशः अस्माभिः वृथा निष्प्रयोजनं स्थीयते । याचकजनाभावात् वनवासो न मह्यं रोचते इति प्रतिपादयन् नायकः उत्सवहानुगुणमौत्सुक्यं प्रकटीकरोति । वृत्तं शार्दूलविक्रीडितम् ॥ २ ॥

कुमार इति । अम्बुराशेः समुद्रस्य चलितुं अ समयः—समुद्रस्य उत्प्लवने नियमसिद्धोऽयं कालः ।

नायकः—मित्रावसुवचनक्रमेण समुद्रक्षोभप्रकारमवलोक्य तमनुवदति **उद्गर्जदि**-त्यादिना—

उद्गर्जज्जलकुञ्जरेन्द्ररभसास्फालानुबद्धोद्धतः उद्गर्जतां मदेन तारं नदता । जल-

---

इसप्रकार वनमें बिना किसी प्रार्थना के ही सब सामग्री मिल जाती है, परन्तु यहाँ याचकों के कष्ट से मिलने के कारण यही एक दोष है कि परोपकार बिना किये ही हुये व्यर्थ ही जीवन बिताना पड़ता है ॥ २ ॥

मित्रावसुः—(ऊपर देखकर) कुमार ! जल्दी कीजिये । जल्दी कीजिये । समुद्र में ज्वार आने का समय आगया ।

नायकः—(सुनकर) तुमने ठीक ही समझा ।

ज़ोर से गर्जने वाले जलहस्तिओं के वेग से चलाये गये कूदों के तरंगों के ऊपर पटकने से

---

* उन्मज्ज—ग ।

सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनीः*
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथाऽयं तथा ।
प्रायः प्रेङ्खदसङ्ख्यशङ्खवलया† वेलेयमागच्छति ॥ ३ ॥

मित्रा । नन्वियमागतैव, पश्य ।—

कवलितलवङ्गपल्लवकरिमकरोद्गारिसुरभिणा पयसा ।

कुञ्जरेन्द्राणां जलहस्तिश्रेष्ठानां । रभसेन वेगेन । ये आस्फालाः शुण्डादण्डेन तरङ्गाणां ताडनानि । तदनुबद्धः तैः सह मिश्रितः अतएव उद्धतः प्रचण्डः 'गम्भीरतां प्रापितः' इति भावः । सर्वाः पर्वतकन्दरोदरभुवः पर्वतकन्दराणां पर्वतगुहानां उदरभुवः अभ्यन्तरस्थानानि । प्रतिध्वानिनीः प्रतिध्वनिताः मुखरिताः कुर्वन् । श्रुतिपथोन्माथी श्रुतिपथं शब्दग्राहकं कर्णविवरं तत् उन्मथ्नाति उद्वेजयतीति नितरां कर्णकटुः अयं ध्वनिः यथा उच्चैः उच्चस्वरेण उच्चरति उद्गच्छति । तथा तद्वेतोः प्रायः प्रेङ्खदसंख्यशङ्खवलया प्रायः बाहुल्येन प्रेङ्खन्ति इतस्ततः भ्रममाणानि असङ्ख्यानां गणनातीतानां शङ्खानां वलयानि मण्डलानि यस्यां सा तथोक्ता । इयं वेला समुद्रस्य जलसमूहः ('अब्ध्यम्बुविकृतौ वेला' इत्यमरः) उत्प्लुताम्बुराशिः आगच्छति । समुद्रे यदा यदा ईदृशः उच्चैर्ध्वनिर्भवति, तदा तदा अम्बुविकृतिर्भवति । अधुनापि तथा अत एव नूनं जलराशिरयमागच्छतीति साधनेन साध्यस्य ज्ञानात् अनुमानालङ्कारः । "अनुमानन्तु विच्छित्त्या ज्ञानं साध्यस्य साधनात्" इति तल्लक्षणात् । अनुप्रासालङ्कारोऽपि । अत्र समासस्य बहुलतया बन्धस्य च विकटतया चित्तस्य विस्तारकरणात्मा ओजो नाम गुणः । तथोक्तं- "ओजश्चित्तस्य विस्तररूपं दीप्तत्वमुच्यते" । शार्दूलविक्रीडितं छन्दः ॥ ३ ॥

कुमार ! ननु वेला आगता एव । तदागमनमेव समर्थयति कवलितेत्यादिना-

कवलितलवङ्गपल्लवकरिमकरोद्गारसुरभिणा कवलिताः चर्विताः लवङ्गानां

यह आवाज़ और भी प्रचण्ड मालूम पड़ती है। पर्वतों की समस्त गुफाओं से इस शब्द की प्रतिध्वनि निकल रही है जिससे जान पड़ता है कि उछलते हुये असंख्य संखों को धारण करने वाले समुद्र में ज्वार आ गया है ॥ ३ ॥

मित्रावसुः—यह तो आपही आ गया। देखिये:—

रत्नों की प्रभा से रञ्जित होनेवाली इस समुद्र वेला की अच्छी शोभा है। इसका जल

---

* ताः—ग । † वलां—ग ।

एषा समुद्रवेला रत्नद्युतिरञ्जिता भाति ॥ ४ ॥

तदेह्यस्माज्जलप्रसरणमार्गादपक्रम्यानेनैव निरिसानुसमीपमार्गेण परिक्रमावः ।

नायकः । मित्रावसो ! पश्य पश्य, शरत्समयपाण्डुभिः पयोदपटलैः प्रावृताः प्रालेयाचलशिखरश्रियमुद्वहन्त्येते मलयसानवः ।

समुद्रोद्भवानां लवङ्गलतानां पल्लवाः नूतनकिसलयानि यैः तादृशाः ये करिणः जलहस्तिनः मकराः जलजन्तुविशेषाश्च ("मकरो यादसां भेदे निधिराशिप्रभेदयोः" इति मेदिनी) तेषां उद्गारेण चर्वितकिसलयसौगन्ध्योच्छ्वासेन सुरभिणा सुगन्धिना पयसा जलेन । उपलक्षितेति शेषः (इत्थम्भूतलक्षणे तृतीया) तथा रत्नद्युतिरञ्जिता रत्नानां रत्नाकरे उपलभ्यमानानां मुक्तादीनां द्युतिभिः प्रभाभिः रञ्जिता लिप्ता । एषा स्पष्टं प्रतीयमाना समुद्रवेला भाति शोभते । उद्गारशब्दस्यात्र वमनार्थत्वाभावात् ग्राम्यतादोषो नाशङ्कनीयः । यथोक्तं काव्यादर्शे आचार्यदण्डिना-

निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् ।
अतिसुन्दरमन्यत्र ग्रामकत्वं विगाहते' ॥ इति ॥

आर्या जातिः ॥ ४ ॥

पश्येति । मित्रावसो ! पश्य ! शरत्समयपाण्डुभिः शरत्कालसमुद्भवपटलैः मेघसमूहैः । प्रावृताः सर्वत आच्छादिताः । अचलसानवः मलयाचलस्य शिखराणि । प्रालेयाचलशिखरश्रियं प्रालेयं हिमं ("तुषारस्तुहिनं हिमम् । प्रालेयं मिहिका" इत्यमरः) प्रालेयाचलस्य हिमालयस्य शिखराणां श्रियं शोभां अतिशयशौक्ल्यादिति शेषः उद्वहन्ति धारयन्ति । शरत्कालीनैर्मेघैराच्छन्ना मेरुसानवः शुक्लतया हिमाचलशिखराणीव प्रतीयन्ते इत्यर्थः ।

श्री लवंग लता के पल्लव को खाने वाले जलहस्तिओं और जलजन्तुओं के उद्गार के कारण क्या ही सुगन्धित हो गया है ॥ ४ ॥

इसलिये पानी के फैलने के मार्ग से हटकर हमलोग पहाड़ की चोटी के समीप वाले रास्ते पर टहलें ।

नायकः—ऐ मित्रावसु ! देखो । देखो । शरतकाल में उजले उजले बादलों के समूह से आच्छादित ये मलयपर्वत की चोटियां हिमालय पहाड़ की चोटियों की शोभा को धारण कर रही हैं ।

मित्रा । नैवामी मलयसानवः, नागानामस्थिसंघाताः खल्वमी ।

नायकः । [सोद्वेगम्] कष्टम् ! किं निमित्तममी संघातमृत्यवो जाताः ?

मित्रा । कुमार । नैवामी संघातमृत्यवः । श्रूयतां यथैतत् । पुरा किल स्वपक्षपवनापास्तसमस्तसागर*जलस्तरसा रसातलादुद्धृत्य †भुजङ्गमाननुदिनमाहारयति स्म वैनतेयः ।

कष्टमिति । किन्निमित्तं कस्मै प्रयोजनाय । अमी सङ्घातमृत्यवः सङ्घातेन समूहेन एककालमिति यावत् । मृत्यवः येषां तादृशाः 'युगपदवाप्तमरणाः' इत्यर्थः । जाताः । अन्यथा कथमेतादृशः अस्थिसञ्चयः इति भावः ।

कुमारेति । पुरा किलेति ऐतिह्ये । वैनतेयः विनतायाः अपत्यं पुमानिति वैनतेयः गरुडः ('स्त्रीभ्यो ढक्' इति विनताशब्दात् ढक् प्रत्ययः) स्वपक्षपवनापास्तसागरजलः स्वरक्षयोः पवनेन उद्भयनेन सञ्जातप्रचण्डवायुना अपास्तं अपसारितं सागरस्य जलं येन तथाभूतः सन् । अनुदिनं प्रतिदिनं । रसातलात् पाताललोकात् । तरसा बलेन । भुजङ्गमान् नागान् उद्धृत्य आहारयति स्म भक्षयति स्म । आहारं करोतीत्यर्थे तत्करोतीति आहारशब्दात् णिच् प्रत्ययः ।

गरुडस्य नागैः सह सन्ततविरोधविषये पौराणिकी कथात्रानुसन्धेया ।

मित्रावसुः—ये मलयपर्वत की चोटियां नहीं हैं बल्कि ये सर्पों की हड्डियों के समूह हैं।

नायकः—(उद्वेग के साथ) हाय ! यह एकसाथ मृत्यु किस कारण से हुई है ?

मित्रावसुः—इनकी एक साथ मृत्यु नहीं हुई है । इसके रहस्य के बारे में मुझ से सुनिये । प्राचीनकाल में, अपने पाँखों की वायु से समुद्र के जल को दूर फेंक कर वेग से रसातल से सर्पों को निकालकर प्रतिदिन गरुड़ खाता था । (१)

---

* जलपूरं—ग । † प्रतिदिनमेकैकं नागं—ग ।

(१) गरुड और सर्पों का विरोध बड़ा पुराना है । कहा जाता है कि कश्यप की दो स्त्रियाँ थी—कद्रू और विनता । पहले की सन्तान नाग हैं दूसरे की गरुड़ । दोनों स्त्रियों में सूर्य के घोड़ों के पुच्छ के बाल के रंग के बारे में झगड़ा लगा । नाग पूंछ में लिपट गये जिससे पूंछ का रंग काला हो गया । कद्रू जीत गई । विनता को उसकी दासी होना पड़ा । अन्त में गरुड़ ने अमृत लाकर किसी प्रकार अपनी माता को इस काम से छुड़ाया । अनन्तर गरुड़ विष्णु भगवान् के वाहन बने और उन्हीं के वरदान से नागों को सदा खाने लगे ।

नायकः [सोद्वेगम्] कष्टम् ! अतिदुष्करं करोति, ततस्ततः ?

मित्रा । ततः सकलनागविनाशाऽऽशङ्किना वासुकिना गरुत्मानभिहितः ।

नायकः । [सादरम्] किं, मां प्रथमं भक्षयेति ?

मित्रा । न हि न हि ।

नायकः । किमन्यत् ?

सेव कथा सङ्क्षेपेण बृहत्कथामञ्जर्यामपि जीमूतवाहनाख्यायिकायामुपलभ्यते । तद् यथा—

कद्रूश्च विनता चेति कश्यपस्य प्रिये पुरा ॥
बालधौ भास्कराश्वानां सितासितविवादतः ।
पणं दास्याय चक्राते प्रतिज्ञाकृतनिश्चये ॥
कृष्णबालान् विधायाश्वान् कद्रूपुत्रैर्भुजङ्गमैः ।
दास्यं विनाय विनतां व्याजाद् गरुडमातरम् ॥
तस्या निशम्य दास्यं तत् पीयूषाहरणावधिः ।
वैनतेयो वहन्नागान्मातुर्दास्यमवारयत् ॥
जवात् पीयूषमाहृत्य जित्वा शक्रं खगेश्वरः ।
प्रदाय काद्रवेयेभ्यो दासभावादमुच्यत ॥
धृतं पीयूषकलशं कुशेष्वभ्येत्य वासवः ।
जहार तत्क्षणाद्रांश्च लिलिहुः पन्नगाः कुशान् ॥
ततो द्विजिह्वतां प्राप्ताः खरदर्भावलेहनैः ।
विष्णोर्वरात् सुपर्णस्य भक्ष्यतां पन्नगा ययुः ॥

(चतुर्थलम्बके पृ० ११०)

गुरुत्मान्=गरुडः ("गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः" इत्यमरः)

नायकः—(उद्वेग के साथ) हाय ! बड़ा बुरा करता है । इसके बाद, इसके बाद ?

मित्रावसुः—इसके बाद समस्त सर्पों के नाश की आशंका करने वाले वासुकी ने गरुड़ से कहा ।

नायकः—(आदर के साथ) क्या मुझे पहिले खाओ ?

मित्रावसुः—नहीं, नहीं ।

नायकः—फिर दूसरा क्या ?

मित्रा । इदमुक्तम् ,—"त्वदभिसम्पातसन्त्रासात् सहस्रशः स्रवन्ति भुजङ्गमाङ्गनानां गर्भाः, शिशवश्च पञ्चत्वमुपयान्ति, एवञ्च सन्ततिविच्छेदादस्माकं तवैव स्वार्थहानिर्भवेत् यदर्थमभिपतति भवान् नागलोकम् । तमिह नागमेकैकमनुदिनं प्रेषयामि ।"

नायकः । कष्टमेव रक्षिता नागराजेन पन्नगाः ?—

जिह्वासहस्रद्वितयस्य मध्ये नैकाऽपि सा तस्य किमस्ति जिह्वा ।
एकाहिरक्षार्थमहिद्विषेऽद्य दत्तो मयात्मेति यया ब्रवीति ?—॥ ५ ॥

इदमिति । तव अभिसम्पातत्रासात् अभिसम्पातेन वेगात् चलनेन जातात् त्रासात् भयात् । सहस्रशः सहस्राणि सहस्राणि । भुजङ्गाङ्गनाना नागस्त्रिया गर्भाः गर्भस्थाः पोताः स्रवन्ति च्युताः भवन्ति । पञ्चत्वमुपयान्ति म्रियन्ते इति यावत् । एवं च अस्माकं सन्ततिसमुच्छेदात् सन्तानविनाशात् तव भवतः एव स्वार्थहानिः भवेत् अनिष्टपातः भविष्यति, यदर्थं यत्प्रयोजनमभिलक्ष्य भवान् पातालं अभिपतति वेगेन आगच्छति ।

कष्टमिति—अतितुच्छमभिहितमिति शेषः । एव स्ववर्ग्याणां जीवनोत्सर्गेण पन्नगाः नागाः । पन्नं पतित गच्छन्तीति पन्नगाः सर्पाः (सर्वत्र पन्नयोरुपसंख्यानमिति पन्नोपपदात् गमेर्डप्रत्ययः) । किलेति पदेन रक्षायाः केवल भ्रमत्वं ख्याप्यते ।

तदेव नागराजस्य अनौचित्यं प्रतिपादयन् तमधिक्षिपति **जिह्वासहस्रेत्या** दिना—तस्य मुखसहस्र धारयतः नागानामधिपतित्वेन प्रख्यातस्य शेषस्य । जिह्वासहस्रद्वितयस्य जिह्वनां सहस्रद्वितय तस्य मध्ये । 'द्विसहस्रजह्वायु' इत्यर्थः । सा एकापि जिह्वा नास्ति किम् ? यया जिह्वया स वासुकिः । अद्य अस्मिन्नेवाहनि एकाहिरक्षार्थं एकस्य केवलस्य अहेः सर्पस्य रक्षार्थं रक्षणाय । मया आत्मा स्वकीयो देहः अहिद्विषः नागकुलविध्वंसकस्य गरुडस्य दत्तः इति ब्रवीति कथ-

मित्रावसुः—उसने यह कहा कि ऐ गरुड ! तुम्हारे ऊपर से जोर से गिरने के भय से सर्पों की स्त्रियों के सैकड़ों गर्भ गिर जाते हैं, बालक मर जाते हैं और इस तरह से हम लोगों की सन्तान के नष्ट होने से आपके ही स्वार्थ में हानि पड़ती है जिसलिये आप नागलोक जाते हैं । इसलिये मैं यहाँ एक एक सर्प को आपके भोजन के लिये प्रतिदिन भेज दूंगा ।

नायकः—हाय ! नागराज ने सर्पों की केवल झूठी ही रक्षा की ।

क्या नागराज के उन दो हजार जीभों में से कोई भी ऐसी एक भी जीभ नहीं है जो

मित्रा । प्रतिपन्नं तत् पक्षिराजेन ।—

इत्येष भोगिपतिना विहितव्यवस्थो
यान् भक्षयत्यहिपतीन् पतगाधिराजः ।
यास्यन्ति यान्ति च गताश्च दिनैर्विवृद्धिं
तेषाममी तुहिनशैलरुचोऽस्थिकूटाः ॥ ६ ॥

नायकः । आश्चर्यम् !!!—

यति । स्वाश्रितानां जीवनव्ययेन स्वामिनो रक्षणमतीव गर्ह्यणीयम् , एकस्यापि नागस्य रक्षणार्थं प्राणान् ददतः शेषस्य जन्मसाफल्यं भवेत् । परन्तु स एकस्यापि रक्षणाय नैव प्रतिजानाति इति हेतोः नागराजस्य वत्सलता निष्प्रयोजनेति सरलार्थः । इन्द्रवज्रा वृत्तम् । "स्यादिन्द्रवज्रा यदि तौ जगौ गः" इति च वृत्तरत्नाकरस्थं तल्लक्षणम् ॥ ५ ॥

प्रतिपन्नं अङ्गीकृतम् ।

प्रस्तुतमेव विशदयति—**इत्येष** इत्यादिना । इति उक्तप्रकारेण प्रतिदिनं एकशः एकमेव भक्षयामि नान्यमिति विहितव्यवस्थः विहिता विशेषेण कृता व्यवस्था स्वकार्यमर्यादा येन तादृशः पतगाधिराजः पक्षिराजो गरुडः । यान् अहिपतीन् नागराजान् भक्षयति, तेषां सर्पाणां अमी तुहिनशैलरुचः हिमालयवत् उज्ज्वलकान्तिसम्पन्नाः अस्थिकूटाः अस्थिराशयः (कूटोऽस्त्री निश्चले राशौ' इति मेदिनी) दिनैः गच्छता कालेन । विवृद्धिं उपचयं गताः 'अतीते काले' इति शेषः । यान्ति अधुनापि वृद्धिमुपगच्छन्ति, यास्यन्ति—आगामिनि काले च अतिशयां विशालतां गमिष्यन्ति । आप्रलयमेतेषां नागानां पक्षिराजेन कृतः संहारः प्रवर्तिष्यते इति भावः । वसन्ततिलकाः ॥ ६ ॥

आश्चर्यम्—अतीवविस्मयावहमिद स्वामिनश्चेष्टितमिति । तदनौचित्यमेव

ऐसा कह सके कि 'एक सर्प की रक्षा के लिये मैं अपने को गरुड़ को समर्पित कर दूँगा' ॥६॥

मित्रावसुः—पक्षिराज गरुड़ ने उस बात को स्वीकार कर लिया है:—

इस तरह से वासुकि से व्यवस्था कर दिये जानेपर पक्षिराज गरुड़ जिन सर्पों को खाता है उन्हीं का, बर्फ की चोटी की शोभा को धारण करने वाले यह हड्डियों का समूह दिनपर दिन वृद्धि को प्राप्त हुआ है, होता है और होगा ॥ ६ ॥

नायकः—आश्चर्य है !!!

सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥ ७ ॥

अहो ! कष्टमनवसानेयं विपत्तिर्नागानाम् [आत्मगतम्] अपि शक्नुयामहं स्वशरीरसमर्पणेन एकस्यापि नागस्य प्राणपरित्राणं कर्त्तुम् ?

[ततः प्रविशति प्रतीहारः] ।

विशदयति सर्वाशुचीत्यादिना—

मूढाः विवेकशून्याः जन्तवः सर्वाशुचिनिधानस्य सर्वेषां विण्मूत्रादीनां अशुचीनां अपवित्रपदार्थानां । निधानस्य एकाश्रयस्य । तथा कृतघ्नस्य कृतं कार्यं हन्तीति तादृशस्य (सायमाशाभावे प्रातराशकृतं षण्मनादृत्य शार्षं प्रयाति; सर्वदा घृताप्लुते भोजने सिद्धे एकवारमपि अन्यथात्वे पूर्वफलं उत्तरफलेन निरस्यतीति सर्वत्र कृतघ्नता शरीरस्येति साधु प्रकटितं विमर्शिणीकारेण) विनाशिनः सदा नाशशीलस्य । शरीरकस्य । कुत्सितः शरीरः शरीरकः (कुत्सार्थे कन् प्रत्ययः) तस्य विशरणशीलस्य देहस्य कृते शरीरस्य पोषणार्थं पापानि अशुचिकर्माणि कुर्वते । (नश्वरस्य अशुचीनामागारस्य च शरीरस्य रक्षणार्थं हिंसनादिपापकर्मसु जन्तवो लग्ना भवन्तीति अहो विवेकशून्यत्वं प्राणिनामिति भावः) । अत्र सर्वाशुचिनिधानेत्यादिविशेषणत्रयेण अतितुच्छस्य शरीरस्य कृते पापकर्म नैवाचरणीयमित्यभिप्रायप्रदर्शनात् परिकरालङ्कारः । तल्लक्षणं यथा कुवलयानन्दे—

अलङ्कारः परिकरः साभिप्राये विशेषणे ।
सुधांशुकलितोत्तंसस्ततां हरतु वः शिवः ॥ ७ ॥

अहो इति । अनवसाना—नास्ति अवसानं अन्तो यस्याः सा नित्यं स्थायिनी नागानां इयं विपत्तिः विद्यते ।

सब अपवित्रताओं के घर, कृतघ्नी और नष्ट हो जाने वाले इस शरीर के लिये मूर्ख लोग कितना पाप करते हैं ? ॥ ७ ॥

हाय ! नागों की इस विपत्ति का अन्त नहीं होने वाला है (आप ही आप) क्या मैं अपने शरीर के समर्पण करने से एक भी नाग की प्राण रक्षा कर सकता हूं ?

(इसके बाद प्रतीहार प्रवेश करता है)

प्रती । आरूढोऽस्मि गिरिशिखरं, यावन्मित्रावसुमन्विष्यामि । [परिक्रम्य] अयं मित्रावसुर्जामातुः समीपे तिष्ठति । [उपसृत्य] विजयेतां कुमारौ ।

मित्रा । सुनद ! किं निमित्तमिहागमनम् ?

प्रतीहारः । [कर्णे कथयति] ।

मित्रा । कुमार ! ततो मामाह्वयति ।

नायकः । गम्यताम् ।

मित्रा । कुमारेणापि बहुप्रत्यवायेऽस्मिन् प्रदेशे न चिरं स्थातव्यम् । [इति निष्क्रान्तः] ।

नायकः । यावदहमप्यस्माद्गिरिशिखरादवतीर्य्य समुद्रतटमवलोकयामि । [परिक्रामति] ।

[नेपथ्ये] । हा पुत्तअ संखचूड ! कहं वावादिज्जमाणो अज्ज किल तुमं मए पेक्खिदव्वो ? (हा पुत्रक शङ्खचूड ! कथं व्यापाद्यमानोऽद्य किल त्वं मया प्रेक्षितव्यः ?)

कुमारेणापीति । बहुप्रत्यवाये—बहवः प्रत्यवायाः विघ्नानि यस्मिन् तस्मिन् 'अनर्थबहुले' इति यावत् । 'बहुविधविघ्नसंकुले' इत्यर्थः ।

व्यापाद्यमानः—वध्यमानः । योषितः अबलाया इव आर्तप्रलापः करुणक्रन्दनमिव भाति । स्फुटीकरिष्ये अनुसन्धानेन ज्ञास्यामीत्यर्थः ।

प्रतीहारः—पर्वत की चोटी पर मैं चढ़ा हूं, तबतक मित्रावसु को खोजता हूं । (**चारों तरफ घूमकर**) यह मित्रावसु जामाता (जीमूतवाहन) के समीप में बैठा है (**जाकर**) दोनों कुमारों की जय (जीत) हो ।

मित्रावसुः—ऐ सुनन्द ! यहाँ तुम किस लिये आये हो ?

प्रतीहारः—(**कान में कहता है**)

मित्रावसुः—ऐ कुमार ! पिता जी मुझे बुला रहे हैं ।

नायकः—जाइये ।

मित्रावसुः—आप भी (कुमार) अत्यन्त विघ्न से युक्त इस स्थान में अधिक देर तक न ठहरें (**जाता है**)

नायकः—तब तक मैं भी इस पर्वत की चोटी से उतर कर समुद्र के किनारे को देखता हूं । (**जाता है**)

(**नेपथ्य में**) हा पुत्र शङ्खचूड ! मारे जाते हुये तुम्हें आज मैं कैसे देखूँगी ?

नायकः । [आकर्ण्य] अये ! योषित इवार्त्तप्रलापः ! केयम् ? कुतो वाऽस्या भयमिति स्फुटीकरिष्ये । [परिक्रामति]

[ततः प्रविशति रुदत्या वृद्धयाऽनुगम्यमानः शङ्खचूडो गोपायितवस्त्रयुगलश्च किङ्करः]

वृद्धा । [साश्रम्] हा पुत्तअ संखचूड ! कहं वावादिअमाणो अज्ज किल तुमं मए पेक्खिदव्वो ? [चिबुकं गृहीत्वा] इमिणा मुहचंदेण विरहिअं दाणीं अंधआरीभविस्सदि पाआलं । (हा पुत्रक शङ्खचूड ! कथं व्यापाद्यमानोऽद्य किल त्वं मया प्रेक्षितव्यः ? अनेन मुखचन्द्रेण विरहितमिदानीमन्धकारीभविष्यति पातालम् ।

शङ्ख । अम्ब ! किमिति वैकल्यत्वेन सुतरां न पीडयसि ?

वृद्धा । [निर्वर्ण्य पुत्रस्याङ्गानि स्पृशन्ती] हा पुत्त ! कहं दे अदिट्ठसूरकिरणं सुउमारं सरीरं णिग्घिणहिअओ गलुडो आहालइस्सदि ? । (हा पुत्र ! कथं ते अदृष्टसूर्यकिरणं सुकुमारं शरीरं निर्घृणहृदयो गरुड

गोपायितवस्त्रयुगलः—गोपायितं रक्षितं वस्त्रयोः वासुकिना प्रेषितयोः वध्यचिन्हभूतयोः युगलं येन तादृशः ।

हा पुत्तअ इति । हा पुत्रक ! (अनुकम्पार्थे कन्) निर्घृणहृदयः नास्ति घृणा दया (जुगुप्सा करुणे घृणा' इत्यमरः) यस्मिन् तादृशं हृदयं यस्य तथाभूतः क्रूरहृदयः गरुडः ते अदृष्टसूर्यकुमारं न दृष्टः सूर्यः येन तथाभूतं अज्ञातसूर्यसन्तापमित्यर्थः । तथा सुकुमारं स्वभावत एव मृदुलं शरीरं कथं

नायकः—(सुनकर) ये ! यह किसी स्त्री का कातर आलाप मालूम पड़ रहा है । यह कौन है ? किस वस्तु से इसे भय है इसे स्पष्ट मालूम करूँगा । (जाता है)

(इसके बाद शङ्खचूड़ रोती हुई बुढ़िया को पीछे लिये हुये और दो वस्त्रों को छिपाकर किङ्कर प्रवेश करता है)

वृद्धा—हाय पुत्र ! मारे जाते हुये तुम्हें आज मैं कैसे देखूँगी ? (ठुड्डी को पकड़ कर) तुम्हारे इस मुख रूपी चन्द्रमा से रहित (विहीन) पाताल लोक अवश्य ही आज अन्धकारमय हो जायेगा ।

शंखचूडः—माता ! इस विकलता से मुझे और अधिक पीड़ा क्यों दे रही हो ?

वृद्धा—(आंसू के साथ पुत्र के अङ्गों को छूती हुई) हा पुत्र ! तेरे सुकुमार शरीर को, जिसे सूर्य की किरणों ने नहीं देखा है, दया रहित हृदय वाला गरुड़ कैसे खायेगा ?

आहारयिष्यति ?) [कण्ठे गृहीत्वा रोदिति]।

शङ्ख । अम्ब ! अलं परिदेवितेन, पश्य ।-

क्रीडीकरोति प्रथमं यदा जातमनित्यता ।
धात्रीव जननी पश्चात् तदा शोकस्य कः क्रमः ? ॥ ८ ॥

[गन्तुमिच्छति]।

वृद्धा । पुत्तअ ! चिट्ठ मुहुत्तअं, जाव दे वअणं पेक्खामि । (पुत्र ! तिष्ठ मुहूर्तं, यावत् ते वदनं प्रेक्षे)

आहारयिष्यति कथं भक्षयिष्यति ।

अम्बेति । अलं परिदेवितेन शोकप्रकटितेन । मा शोकं कुरु ।

अनर्थबहुले मरणशीले जगति शोकप्रकटनं निष्फलमेवेति स्वाभिप्रायं समर्थयति क्रीडीकरोत्यादिना—

प्रथमं (मातुरिति शेषः ।) जनन्याः पूर्वमेव । अनित्यता नश्वरता धात्री इव उपमातेव ("धात्री जनन्यामलकी वसुमत्युपमातृषु" इति मेदिनी) जातं गर्भाशयात् सद्यो निष्क्रान्तं शिशुं । नित्यं अव्यभिचारेण सर्वदैवेति यावत् । क्रीडीकरोति स्वाङ्के निदधाति; आक्रामतीत्यर्थः । पश्चात् जननी बालं क्रोडे धारयति । तदा शोकस्य कः क्रमः क्रावसरो वर्तते । "यथा जन्मनि प्रसवशूलेन मातरि मूर्च्छितायां प्रथममुपमाता शिशुं गर्भाशयान्निष्क्रमणसमय एव स्वहस्तेन सन्धार्य गर्भक्लेदाद्यपनयेन मातुः प्रबोधं यावत् धारयति, तथा अनित्यता प्रथममाक्रामति, पश्चाज्जननी स्वाङ्कस्तनतटादिषु निदधाति; एवं वस्तुविचारेणैव शोकः कार्यः" इति श्लोकस्याभिप्रायो विमर्शिणीकारैर्निपुणं विशदीकृतः । "जातस्य हि ध्रुवो मृत्युः" इति गीतोक्तिः, "मत्युर्जन्मवतां वीरदेहेन सह जायते । अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिना ध्रुवः" इति श्रीमद्भागवतोक्तिश्चात्र साधु स्मर्तव्ये ॥ ८ ॥

(कण्ठ से लगा कर रोती है)

शंखचूड़ः—माता ! बस । बस ! विलाप मत करो । देखोः—

पहिले पैदा होनेपर दाई (उपमाता) की तरह अनित्यता ही बच्चे को अपनी गोदी में लेती है और उसके बाद माता लेती है । इसलिये इस समय शोक करने का क्या काम है॥८॥

(जाना चाहता है)

वृद्धा—पुत्र ! क्षण भर ठहरो, जब तक मैं तुम्हारे मुख को देखलूँ ।

किङ्करः । एहि कुमाल संखचूड ! किं ते एदाए भणंतीए ? पुत्तसिणेहमोहिदा क्खु एसा, ण जाणेदि लाअकज्जं । (एहि कुमार शङ्खचूड ! किं ते एतया भणन्त्या ? पुत्रस्नेहमोहिता खल्वेषा, न जानाति राजकार्यम् ।)

शङ्ख । अयमागच्छामि ।

किङ्करः । [अग्रतोऽवलोक्य आत्मगतम्] आणीदो क्खु एसो मए वज्झसिलासमीवे । ता वज्झचिण्हं दाइस्सं । (आनीतः खल्वेष मया वध्यशिलासमीपे, तद् वध्यचिह्नं दास्यामि ।

नायकः । इयमसौ योषित् । [शङ्खचूडं दृष्ट्वा] नूनमनेन अस्याः सुतेन भवितव्यम् ; तत् किमाक्रन्दति ? [समन्तादवलोक्य] न खल्वस्या भयकारणं किञ्चित् पश्यामि, कुतोऽस्या भयमिति ? यावदुपसर्पामि । प्रसक्त एवायमेतेषामालापः, कदाचिदत एवास्याभिव्यक्तिर्भविष्यति । तद्विटपान्तरितस्तावच्छृणोमि । (तथा करोति)

किङ्करः । [सास्रं कृताञ्जलिः] कुमाल संखचूड ! एसो सामिणो आदेशो त्ति करिअ ईरिसं णिट्ठुरं मन्तीअदि । (कुमार शङ्खचूड ! एष स्वामिन आदेश इति कृत्वा ईदृशं निष्ठुरं मन्त्र्यते)

इयमिति । आलापः प्रसक्त एव प्रारब्ध एव । कदाचित् अत एव एतस्मात् आलापादेव । भयकारणस्य अभिव्यक्तिः स्फुटता भविष्यति ।

किङ्करः—ऐ कुमार शङ्खचूड ! आवो ? तेरी माता के ऐसा कहने से क्या ? यह पुत्रप्रेम के कारण मोहित हो गयी है तथा राजा के कार्य को नहीं जानती है ।

शंखचूड़ः—मैं आ रहा हूं ।

किङ्करः—(आगे देखकर आपही आप) वध्यशिला के पास में यह मुझ से लाया गया है इसलिये इसे वध्यचिन्ह (वध्यशिलापर लालवस्त्र पहिन कर बैठने पर गड़ खाता था) दे दूँ ।

नायकः—क्या यह कोई स्त्री है ? (शङ्खचूड़ को देखकर) अवश्य ही यह इसका पुत्र होगा । अत एव यह (वृद्धा) क्यों रो रही है ? (चारों तरफ देखकर) इसके भय का कोई कारण मैं नहीं देखता । फिर इसे किससे डर है ? इसलिये मैं जाता हूं । इनकी बातचीत अभी प्रारम्भ ही हुई है, कदाचित् इससे इनका अभिप्राय स्पष्ट हो जाय । इसलिये पेड़ के नीचे छिपकर तब तक सुनूँ (वैसा ही करता है)

किङ्करः—(आँसू भर, हाथ जोड़ कर) ऐ कुमार शङ्खचूड़ ! यह स्वामी की आज्ञा है । इसीलिये मैं तुम्हें ऐसी निष्ठुर सलाह देता हूं ।

शङ्खः । भद्र ! कथय ।

किङ्करः । नागलाओ वासुई आणवेदि-(नागराजो वासुकिः आज्ञापयति)

शङ्खः । [शिरस्यञ्जलि बद्ध्वा सादरम्] किमाज्ञापयति देवः ?

किङ्करः ।—"एदं लत्तंसुअजुअलं परिहिअ आलुह वज्झसिलं, जेण लत्तंसुअं उवलक्खिअ गलुडो आहालइस्सदि"त्ति । ("इदं रक्तांशुकयुगल परिधाय आरोह वध्यशिलां, येन रक्तांशुकमुपलक्ष्य गरुड आहारयिष्यति" इति ।)

नायकः—[श्रुत्वा] कथमसौ वासुकिना परित्यक्तः ?

किङ्करः । कुमाल ! गेण्ह एदं वसणजुअलं । (कुमार ! गृहाणैतत् वसनयुगलम् ।)

[इत्यर्पयति] ।

शङ्खः । [सादरम्] उपनय । [गृहीत्वा] शिरसि स्वाम्यादेशः ।

वृद्धा । [पुत्रस्य हस्ते वाससी दृष्ट्वा सोरस्ताडम्] हा वच्छ एदं खु वज्जपाडसरिसं संभावीअदि । (हा वत्स ! इदं खलु वज्रपातसन्निभं सम्भाव्यते ।)

[मोहं गता] ।

किङ्करः । आसण्णा गलुडस्स आगमणवेला, ता लहुं गच्छामि ।

शङ्खचूडः—श्रेष्ठ ! कहिये ।

किङ्करः—नागों के राजा वासुकि आज्ञा देते हैं ।

शङ्खचूडः—(हाथ जोड़कर आदर के साथ) वे क्या आज्ञा देते हैं ?

किङ्करः—इन दोनों लाल वस्त्रों को पहिनकर वध्यशिला पर चढ़ जावो जिससे लाल वस्त्र देखकर गरुड़ तुम्हें खायेगा ।

नायकः—(सुनकर) क्या इसे वासुकीने छोड दिया है ?

किङ्करः—ऐ कुमार ! इन दोनों वस्त्रोंको लो ।

(ऐसा कहकर देता है) ।

शंखचूडः—(आदर के साथ) लाइये । (लेकर) स्वामी की आज्ञा मेरे सिर पर है । (मैं आज्ञाको पालने के लिये तैयार हूं) ?

वृद्धा—(पुत्रके हाथ में दोनों वस्त्रों को देखकर छाती पीटती हुई) हा पुत्र ! यह तो वज्रपात के समान मालूम पड़ता है । (मूर्छित होजाती है)

किङ्करः—गरुड़ के आने का समय समीप आगया है । अतएव मैं शीघ्रही जाता हूं ।

(आसन्ना गरुडस्यागमनवेला, तल्लघु गच्छामि ।)

इति निष्क्रान्तः ।

शङ्खः । अम्ब ! समाश्वसिहि ।

वृद्धा । [समाश्वस्य साश्रम्] हा पुत्तअ ! हा मणोरहसदलद्ध ! कहिं पुणो तुमं पेक्खिस्सं ? (हा पुत्रक ! हा मनोरथशतलब्ध ! क्व पुनस्त्वां प्रेक्षिष्ये ?)

[कण्ठे गृह्णाति] ।

नायकः । अहो नैर्घृण्यं गरुडस्य ! अपि च,—

मूढाया मुहुरश्रुसन्ततिमुचः कृत्वा प्रलापान् बहून्
कस्त्राता तव पुत्रकेति कृपणं दिक्षु क्षिपन्त्या दृशम् ।
अङ्के मातुरवस्थितं*शिशुमिमं त्यक्त्वा घृणामश्नतः

अहो इति । अहो गुरुस्मतः गरुडस्य नैर्घृण्यं क्रूरत्वम् ।

तामेव विस्मयकरीं पक्षिराजस्य क्रूरहृदयतां वृद्धायाः करुणवर्णनोपन्यासेन वर्णयति जीमूतवाहनः **मूढाया** इत्यादिना—

मूढायाः पुत्रशोकासन्नत्वेन विह्वलचित्तायाः । मुहुः वारं वारं । अश्रुसन्ततिमुचः अश्रुसन्ततिं बाष्पधारां मुञ्चतीति तस्याः 'अविरतं क्रन्दन्त्याः' इत्यर्थः । हे पुत्रक ! हे सर्वैर्दयनीय ! मदीयपुत्र ! तव त्राता रक्षकः को वर्तते इति बहून् अनेकविधान् प्रलापान् परिदेवितानि कृत्वा । दिक्षु सर्वतः । दृशं दृष्टिं कृपणं कातरं यथा स्यात् तथा । क्षिपन्त्याः 'इतस्ततः आकुलां दृष्टिं प्रेरयन्त्याः' इति भावः । मातुः अङ्के क्रोडे । अवस्थितं वर्तमानं (स्वयमपि मातृस्नेहपरवशमिति भावः ।)

(जाता है)

शङ्खचूड़ः—माता ! धीरज धरो ।

वृद्धा—(**धीरज धर रोती हुई**) हा पुत्र ! हा सैकड़ों मनोरथोंसे पाये गये पुत्र ! मैं तुम्हें फिर कहाँ देखूँगी ? (**गले लगाती है**)

नायकः—अहा । गरुड़की निष्ठुरता कैसी है ? और भी:—

'हे मेरे प्यारे बच्चे, इस समय तुझे कौन बचायेगा' इस प्रकार बहुत से प्रलाप करती हुई यह वृद्धा बारबार आँसुओं को थोरा बहा रही है । कातरता से चारों ओर अपनी आँखे दौडा रही है । ऐसी विह्वल जननीकी गोदमें बैठे हुये शिशुको दया छोडकर खाने वाले पक्षि-

---

* °रूपागतं—ख ।

*चञ्चुर्नैव खगाधिपस्य हृदयं वज्रेण मन्ये कृतम् ॥ ६ ॥

शङ्खः । [†आत्मनोऽश्रूणि निवारयन्] । अम्ब ! किमतिवैक्लव्येन ?

‡यैरत्यन्तदयापरैर्न विहिता वन्ध्यार्थिनां प्रार्थना
यैः कारुण्यपरिग्रहान्न गणितः स्वार्थः परार्थं प्रति ।
ये नित्यं परदुःखदुःखितधियस्ते साधवोऽस्तं गता

इमं शिशुं अप्रौढवयसं बालं, घृणां दयां त्यक्त्वा । अश्नतः भक्षयतः खगाधिपस्य गरुडस्य चञ्चुः नैव, प्रत्युत हृदयं वज्रेण कृतं मन्ये । गरुडस्य चञ्चुः अतिकठिना वज्रसारेति प्रसिद्धिमात्रमेव, वस्तुतस्तु अस्य हृदयमेव वज्रवत् कठिनमिति भावः । 'मन्ये' इति पदेन साक्षादभिधीयमानतया वाच्योत्प्रेक्षालङ्कारः । वृत्तं तु शार्दूलविक्रीडितम् ॥ ६ ॥

शङ्खचूडः परोपकारव्रतिनां साधूनामभावप्रतिपादनमुखेन जनन्याः धीरतां बध्नाति यैरत्यन्तेत्यादिना—

अत्यन्तदयापरैः अतिशयकृपालुभिः यैः पुरुषैः अर्थिनां याचकानां प्रार्थना वन्ध्या निष्फलान्न विहिता न कृता । कारुण्यपरिग्रहात् कारुण्यस्य दयालुतायाः परिग्रहात् स्वीकारात् ["परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः" इत्यनेकार्थसंग्रहे हेमचन्द्रः] यैः परार्थं प्रति परेषां अन्येषां अर्थं प्रयोजनं प्रति स्वार्थः न गणितः (परोपकाराय स्वार्थमपि ये त्यजन्तीति भावः) । तथा च ये नित्यं सदैव परदुःखदुःखितधियः परेषां जनानां [दुःखैः सांसारिकैः क्लेशैः दुःखिता क्लिश्यमाना धीः बुद्धिर्येषां ते तथोक्ताः (परदुःखकातरा इति यावत्) विद्यन्ते । ते साधवः परकार्यसाधनशीलाः सज्जनाः अस्तं याता विनष्टा इत्यर्थः । अतः हे

राज—गरुड़—की केवल चोंच ही नहीं, प्रत्युत मैं समझता हूं कि उसका हृदय भी वज्र का बना हुआ है (चोंच तो मजबूत है ही परन्तु इस बालक को भक्षण करने से निर्दय गरुड़का हृदय भी कठोर जान पड़ता है-वज्र का बना मालूम पड़ता है) ॥ ६ ॥

शङ्खचूडः—(अपने आंसुओं को रोकता हुआ) माता ! अत्यन्त विकलता दिखलाने से क्या लाभ ?

जिन अत्यन्त दयालु पुरुषों ने अर्थियों की प्रार्थना कभी निष्फल नहीं किया—सदैवही उसे सफल बनाया; जिन्होंने दयालुता को स्वीकार कर परार्थ के लिये अपने स्वार्थ का कभी विचार नहीं किया (परार्थ के लिये स्वार्थ को छोड दिया); जो सदैव दूसरे के दुःख से दुःखित

* चञ्चुर्वज्रेण—ग. घ. । † मातुः—ख । ‡ पद्यमिदं 'क' 'ग' पुस्तकयोर्नोपलभ्यते ।

मातः संहर बाष्पवेगमधुना कस्याग्रतो रुद्यते ॥ १० ॥

ननु समाश्वसिहि समाश्वसिहि ।

वृद्धा । [सासम्] । कहं समस्ससिस्सं ? किं एक्कपुत्तओ त्ति कदुअ साणुकंपेण णाअराएण पेसिदोसि ? हा ! कहं अविच्छिण्णे जीअलोए मम पुत्तओ सुमरिदो ? सव्वधा अहं म्हि मंदभग्गा । (कथं समाश्वसिष्यामि ? किमेकपुत्रक इति कृत्वा सानुकम्पेन नागराजेन प्रेषितोऽसि ? हा ! कथमविच्छिन्ने जीवलोके मम पुत्रकः स्मृतः ? सर्वथाऽहमस्मि मन्दभाग्या ।) [मूर्च्छति] ।

नायकः । [सकरुणम्] ।

आर्तं कण्ठगतप्राणं परित्यक्तं स्वबन्धुभिः ।
त्रायेनैनं यदि ततः कः शरीरेण मे गुणः ? ॥ ११ ॥

मातः अधुना बाष्पवेगं बाष्पस्य अश्रुणः वेगं पतन्तीं धारां संहर संस्थापय । कस्य अग्रतः रुद्यते (परार्थाय स्वार्थमप्यगणयतां सतां तिरोधानादधुना तव विलापोऽकिञ्चित्कर एव । अतः मा रोदनं विधेहीति सरलार्थः ॥ १० ॥

अथ वृद्धायास्तस्या मूर्च्छापर्यन्तं करुणप्रकर्षं दयोद्दीपकत्वेनावलम्ब्य व्यतिरेकमुखेन स्वाध्यवसायं वर्णयति आर्तमित्यादिना—आर्तं बहुविधैर्दुःखैः पीडितं । कण्ठगतप्राणं आसन्नमरणं । स्वबान्धवैः बन्धुगणैः त्यक्तं, अत एव नितरामसहायमिति भावः । एनं यदि न त्रायेऽहं नैव रक्षयामि तदा मे शरीरेण विशरणशीलेन देहेन कः गुणः को लाभः । एतच्छरीरं साधनीकृत्यैनं रक्षन् जीवितव्यास्य साफल्यमुपार्जयामीति स्वाध्यवसायः प्रकटीकृतो नायकेनेति ॥ ११ ॥

ये, ऐसे साधु लोग अब संसारसे उठ गये—चल बसे । अतएव हे माता ! अब अपने आँसुओं को रोको । किसके आगे रो रही है ? (परोपकारी सज्जनों के अभाव के कारण तुम्हारा रोना अब व्यर्थ है) ॥ १० ॥

वृद्धा—(आँसू बहाती हुई) मैं कैसे धीरज धरूँ ? क्या तुम अपनी माता के एकलौते पुत्र हो, ऐसा समझ कर दयासहित नागराज ने तुम्हें भेजा है ? हाय ! इस समग्र जीवलोक (संसार) में मेरा लड़काही कैसे स्मरण किया गया ? मैं सब तरह से मन्दभाग्यवाली हूं ।

(मूर्छित हो जाती है)

नायकः—(करुणा के साथ)

यदि अपने बन्धुओं से छोड़े गये और कण्ठगत प्राण वाले इस कातर जन की रक्षा नहीं की, तो मेरे शरीर धारण करने से क्या लाभ ? (कुछभी लाभ नहीं) ॥ ११ ॥

तद् यावदुपसर्पामि ।

शङ्खः । अम्ब ! संस्तम्भयात्मानम् ।

वृद्धा । हा पुत्तअ ! जदा णाअलोअपरिरक्खएण वासुइणा परिच्चत्तोसि, तदा को दे अवरो परित्ताणं करिस्सदि ? । (हा पुत्रक ! यदा नागलोकपरिरक्षकेण वासुकिना परित्यक्तोऽसि, तदा कस्ते अपरः परित्राणं करिष्यति ?)

नायकः । [उपसृत्य] । नन्वहमहम् ।

वृद्धा । [नायकं दृष्ट्वा ससम्भ्रममुत्तरीयेण पुत्रकमाच्छाद्य नायकमुपसृत्य जानुभ्यां स्थित्वा] । विणदाणंदण ! वावादेहि मं । अहं दे णाअराएण आहारणिमित्तं परिकप्पिदा । (विनतानन्दन ! व्यापादय मामहं ते नागराजेनाहारनिमित्तं परिकल्पिता ।)

नायकः । [सास्रम्] । अहो ! पुत्रवात्सल्यम् ।

अस्या विलोकय मन्ये पुत्रस्नेहेन विक्लवत्वमिदम् ।

अम्बेति । हे अम्ब ! मातः ! आत्मानं स्वहृदयं संस्तम्भय दृढीकुरु । चित्ते धैर्यं धेहीत्यर्थः ।

अहो इति । अहो विस्मयावहः अस्याः पुत्रवात्सल्यं पुत्रस्नेहः । वत्से कामः अस्यास्तीति वत्सलः । "वत्साशाभ्यां कामबले" इति वत्सशब्दात् लच् प्रत्ययः । वत्सलस्य भावः वात्सल्यम् ।

विशुद्धस्य मातृप्रेम्णो गरुडोपरि सम्भाव्यमानं प्रभावं प्रकटयति नायकः 'अस्याः' इत्यादिना —

इसलिये वहां जाता हूं ।

शङ्खचूडः—माता ! अपने को दृढ़ करो ।

वृद्धा—हा पुत्र ! जब नागलोक की रक्षा करने वाले वासुकी ने तुम्हें छोड़ दिया तो फिर दूसरा कौन आदमी तुम्हारी रक्षा कर सकता है ?

नायकः—(**समीप जाकर**) अवश्यहो, मैं । मैं । (रक्षा कर सकता हूं)

वृद्धा—(**नायक को देखकर सम्भ्रमके साथ अपने पुत्रको चादर से आच्छादित कर नायकके पास जाकर घुटने के बल बैठकर**)

ऐ विनतानन्दन ! (गरुड़) मुझे मार डालो । मुझे ही नागराज ने तुम्हारे आहार के लिये भेजा है ।

नायकः—(**आंसू बहाते हुये**) अहो ! कैसा पुत्रप्रेम है ?!!

मैं समझता हूं कि इस वृद्धाकी पुत्रके प्रेम के कारणसे इस विकलता को देखकर निर्दय-

अकरुणहृदयः करुणां कुर्वीत* भुजङ्गशत्रुरपि ॥ १२ ॥

शङ्खः । मातः ! अलं त्रासेन । न नागशत्रुः । पश्य,—

महाहिमस्तिष्कविभेदमुक्तरक्तच्छटाचर्चितचण्डचञ्चुः ।
क्वासौ गरुत्मान् ? क्व च सोमसौम्यस्वभावरूपाकृतिरेष साधुः ?॥ १३॥

अस्याः शङ्खचूडजनन्याः । पुत्रस्नेहेन सुतप्रेम्णा इदं प्रतिक्षणमनुभूयमानं । विक्लवत्वं आकुलतां विलोक्य अहं मन्ये सम्भावयामि । यत् अकरुणहृदयः अनुकम्पाशून्यः भुजङ्गशत्रुरपि सर्पाणां सहजरिपुरपि गरुडः दयां कुर्वीत अनुकम्पां विदध्यात् । सम्भावनायां लिङ् । 'पूर्वं मया पक्षिराजस्य क्रूरत्वं शङ्कितम्, अधुना एषा कठिनमपि तच्चित्तं स्वपुत्रवियोगदुःखैर्द्रावयिष्यतीत्यहं सम्भावयामि'

उभयोर्विभक्राकारवर्णनेन शङ्खचूडो मातुर्हृदयाद् गरुडशङ्कां निरस्यति **महाहिमस्तिष्केत्यादिना**—

महाहिमस्तिष्कविभेदमुक्तरक्तच्छटाचर्चितचण्डचञ्चुः । महतां दुर्विषहाणां स्थूलानां च । अहीनां सर्पाणां । मस्तिष्कभेदेन शिरोविदारणेन । मुक्ताः निर्गताः या रक्तस्य शोणितस्य छटाः धाराः । ताभिः चर्चिते म्रक्षिते 'सुतरां रक्ततामानीते' इति यावत् । चण्डे च भयजनकत्वात् प्रचण्डे च । चञ्चू त्रोटी ('चञ्चुस्त्रोटिरुभे स्त्रियौ' इत्यमरः) यस्य तथोक्तः अतिभीषणत्रोटिसदृशनः इति भावः । असौ अस्मत्सहजशत्रुः । गरुत्मान् गरुडः क्व । सोमसौम्यस्वभावाकृतिः । स्वभावः च आकृतिः स्वरूप चेति स्वभावाकृती । सोमवत् चन्द्रतुल्ये सौम्ये मधुरशीतले स्वभावाकृती यस्य तादृशः । मधुरस्वभावः सुभगरूपवांश्च असौ साधुसज्जनः क्व । 'द्वौ क्वशब्दौ महदन्तरं सूचयतः' इति हेतोर्भीषणाकृतेः पक्षिराजस्य सुभगस्वरूपस्यास्य साधोश्च महदन्तरं वर्तते । अतः गरुड इति नायं शङ्कनीयः इति भावः।

हृदय नागों का शत्रु गरुड़ भी इस पर अवश्य दया करेगा ॥ १२ ॥

शङ्खचूड:—माता ! मत डरो । मत डरो । यह नागों के शत्रु नहीं है । देखोः—

बड़े बड़े सर्पों के मस्तकों के विदारण करने से उछलती हुई रक्तकी धारासे विभूषित प्रचण्ड चन्चुको धारण करनेवाला गरुड़ कहाँ और चन्द्रमा के समान सौम्य स्वभाव, रूप तथा आकृति धारण करने वाले ये साधु कहाँ ? (अर्थात् दोनों में बड़ा अन्तर है । गरुड़ जितना भयङ्कर है, यह महानुभाव उतनेही सौम्य हैं । अतः इन्हें देख गरुड की आशंका क्यों कर रही हो ?)॥१३॥

*करिष्यति—ख । नाम—ख, ङ ।

वृद्धा। अहं खलु तुज्झ मरणभीआ सव्वं जेव्व लोअं गलुडमअं पेक्खामि। (अहं खलु तव मरणभीता सर्वमेव लोकं गरुडमयं प्रेक्षे।)

नायकः—अम्ब मा भैषीः। नन्वयमहं विद्याधरस्त्वत्सुतसंरक्षणार्थमेवायातः।

वृद्धा [सहर्षम्] पुत्तअ पुणो पुणो एव्वं भण। (पुत्रक! पुनः पुनरेवं भण।)

नायकः। अम्ब! किं पुनःपुनरभिहितेन? ननु कर्म्मणैव सम्पादयामि।

वृद्धा। [शिरस्यञ्जलिं बद्ध्वा] पुत्तअ! चिरं जीव। (पुत्रक! चिरं जीव।)

अत्र कशब्दद्योत्यो विषमालङ्कारः "विरूपयोः सङ्घटना या च तद्विषमं मतम्" इति विश्वनाथोक्तलक्षणात्। कुवलयानन्देऽपि च तल्लक्षणं यथा—

विषमं वर्ण्यते यत्र घटनाऽननुरूपयोः।
क्वेयं शिरीषमृद्वङ्गी क्व तावन्मदनज्वरः॥

अथ चात्र पूर्वार्द्धे सर्पाणां कालभूतस्य गरुडस्य प्रचण्डतां द्योतयितुमोजोव्यञ्जकवर्णानां संघटना अनुप्रासप्रकर्षश्च नितरां समीचीनौ। परार्द्धे तु जीमूतवाहनस्य साधुतां सूचयितुं सुकुमारवर्णानामौचित्यात् शब्दाडम्बरत्यागेन पतत्प्रकर्षतापि गुण एव, न दोषः। यथा प्रतिपादितं विश्वनाथेन—

"गर्भितत्वं गुणः क्वापि पतत्प्रकर्षता तथा"

उपजातिः॥ १३॥

वृद्धा—तुम्हारी मृत्युके डर से भयभीत हुये मुझे सारा संसार गरुडमय मालूम पड़ता है।

नायकः—माता! डरो मत। मैं विद्याधर हूं और तुम्हारे लड़के की रक्षा करने ही के लिये यहाँ आया हूं।

वृद्धा—(हर्षके साथ) पुत्र! बार बार ऐसा कहो।

नायकः—माता! बार बार कहने से क्या लाभ? मैं काम (प्राणरक्षा) करके ही दिखला देता हूं।

वृद्धा—(सिरपर हाथ जोड़कर) हे पुत्र! चिरंजीवी होवो।

नायकः—ममैतदम्बार्पय वध्यचिह्नं प्रावृत्य यावद्विनताऽऽत्मजाय ।
पुत्रस्य ते जीवितरक्षणाय स्वदेहमाहारयितुं ददामि ॥ १४ ॥

वृद्धा । [कर्णौ पिधाय] । पडिहदं अमंगलं । तुमं पि संखचूडणिव्विसेसो पुत्तो । अहवा संखचूडादो वि अहिअरो, जो एव्वं बंधुजणपरिच्चत्तं वि पुत्तअं मे सरीरपदाणेण रक्खिदुमिच्छसि । (प्रतिहतमङ्गलम् । त्वमपि शङ्खचूडनिर्विशेषः पुत्रः, अथवा शङ्खचूडादप्यधिकतरः, य एवं बन्धुजनपरित्यक्तमपि पुत्रकं मे शरीरप्रदानेन रक्षितुमिच्छसि ।)

शङ्खः । अहो !! जगद्विपरीतमस्य महासत्त्वस्य चरितम् । कुतः ?—

नायकः सामगर्भं वध्यचिह्नं प्रार्थयते **ममेत्यादिना**—

हे अम्ब हे मातः ! **एतत्** वध्यचिह्नं रक्तांशुकयुगलं **मम** मह्यं (विवक्षया षष्ठी) **अर्पय** देहि । **यावत्** आवृत्य अनेन स्वदेहमाच्छाद्य अनुत्पादितगरुडशङ्कः सन् । **ते** पुत्रस्य **जीवितरक्षणार्थं** प्राणान् रक्षितुं । **विनतात्मजाय** विनतेति गरुडमातुर्नाम । तस्याः आत्मजाय पुत्राय गरुडायेति यावत् । ["वैनतेयः खगेश्वरः" इत्यमरः ।] **स्वं देहं** आहारयितुं भोजयितुं **ददामि** । उपजातिः ॥ १४ ॥

प्रतिहतमिति । अमङ्गलं नष्टं भवतु । त्वमपि मे शङ्खचूडनिर्विशेषः । नास्ति विशेषः भेदः यस्य स निर्विशेषः सदृशः । शङ्खचूडतुल्यः पुत्रक एव ।

अहो इति । अहो इति आश्चर्यद्योतकमव्ययपदम् । अस्य महासत्त्वस्य महत् उदारं सत्त्वं स्वभावो यस्य तादृशस्य ("सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः" इति मेदिनी) महापुरुषस्य चरितं व्यवहारः जगद्विपरीतं सर्वलोकविलक्षणं विद्यते ।

तदेव जीमूतवाहनस्य समधिकाश्चर्यकरं लोकोत्तरं सत्त्वं दृष्टान्तमुखेन समर्थ-

---

नायकः—ऐ माता ! मुझे यह वध्यचिन्ह (दोनों लाल कपड़े) दो, जिससे मैं तुम्हारे पुत्र के जीवन की रक्षा करने के लिये, अपने अङ्गों को ढककर, गरुड़ के भोजन के लिये अपने शरीर को दे सकूं ॥ १४ ॥

वृद्धा—(दोनों कान बन्द कर) अमंगल नष्ट हो । तुम भी शङ्खचूड ही की तरह मेरे पुत्र हो, अथवा उससे भी कहीं बढ़कर हो, क्योंकि तुम बन्धुजनों से छोड़े गये भी मेरे पुत्र को अपना शरीर देकर बचाना चाहते हो ।

शङ्खचूड़ः—अहा ! इस महासत्त्वशाली का चरित्र जगत से बिल्कुल ही उलटा है । क्योंकि:—

विश्वामित्रः श्वमांसं श्वपच इव पुराऽभक्षयद् यन्निमित्तं
नाडीजङ्घो निजघ्ने कृततदुपकृतिर्यत्कृते गौतमेन ।

यति "विश्वामित्रः" इत्यादिना—

यन्निमित्तं येषां प्राणानां रक्षणार्थं । विश्वामित्रः धर्माधर्मविचक्षणः ब्रह्मर्षिः विश्वामित्रोऽपि । ['मित्रे चर्षौ' इति ऋषिवाचकत्वे विश्वेति पूर्वपदस्य दीर्घः] पुरा दुर्भिक्षकाले । श्वपचः चाण्डाल इव ('चण्डालश्चण्डमातङ्गदिवाकीर्तिजनङ्गमाः । निषादश्वपचौ' इत्यमरः) श्वमासं शुनः कुक्कुरस्य मासं भक्षितवान् (यथा चण्डालः स्वकुलधर्ममनुसरन् श्वमासं भक्षयति, तद्वत् प्राणान् रक्षितुं ब्रह्मर्षिरपि भूत्वा विश्वामित्रस्तन्मांसमखादयत्) [पुरा किल दुर्भिक्षसमये क्षुधार्तो विश्वामित्रो भोजनाय किमप्यपश्यन् निशि चण्डालस्य गृहं निभृतं समुपेत्य प्रतिबुद्धेन तेनातितरां प्रतिषिद्धोऽपि प्राणानां सर्वथा रक्षणीयत्वं युक्तिभिः समर्थ्य श्वमांसं भक्षितवानिति पौराणिकी कथाऽत्रानुसन्धेया । तथा च मनुः—

जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः ।
आकाशमिव पङ्केन न स पापेन लिप्यते ॥ (अध्या० १०।श्लो०१०४)
क्षुधार्तश्चात्तुमभ्यागात् विश्वामित्रः श्वजाघनीम् ।
चण्डालहस्तादादाय धर्माधर्मविचक्षणः ॥ अध्याय १०। श्लोक १०८]

गौतमेन तन्नामकेन केनापि ब्राह्मणेन । यत्कृते येषां प्राणानां रक्षार्थं । कृततदुपकृतिः कृता सम्पादिता तस्य उपकृतिः उपकारो येनासौ (एतेन गौतमस्य कृतघ्नदोषः प्रकाशितो भवति) नाडीजङ्घः नाम कश्चित् बकः निजघ्ने मारितः ।

जिन प्राणों की रक्षा के लिये महर्षि विश्वामित्र (१) ने चाण्डाल की तरह कुत्ते के मांस को किसी समय में खाया था, जिनके लिये गौतम (२) ने उपकार करने वाले भी नाडीजंघ को

---

(१) सुना जाता है कि किसी जमाने में बड़ा अकाल पड़ा। खाद्य पदार्थ का मिलना असम्भव हो गया। महर्षि विश्वामित्र भूख के मारे बेचैन हो गये। भोजन के लिये कुछ भी न मिल सका। लाचार रात के समय चाण्डाल की झोपड़ी में घुस पड़े और कुत्ते के मांसको चुराकर खाने लगे। विश्वामित्र को पहचान कर धर्मशास्त्र की दुहाई दे चण्डाल ने बहुत रोकना चाहा परन्तु आपद्धर्म का रहस्य समझाकर विश्वामित्रने वह मांस खाया और अपने प्राणों की रक्षा की।

(२) गौतम की कथा महाभारत के अनुशासन पर्व में दी गयी है। कहा जाता है कि गौतम नामका कोई ब्राह्मण बड़ा निर्धन था। धन कमाने के लिये वह बाहर निकला। उसे

पुत्रोऽयं काश्यपस्य प्रतिदिनमुरगानत्ति तार्क्ष्यो यदर्थं
प्राणांस्तानेष साधुस्तृणमिव कृपया यः परार्थं ददाति ॥१५॥

[नायकमुद्दिश्य] । भो महासत्त्व ! त्वया दर्शिता एवात्मप्रदानव्यवसायान्निर्व्याजा मयि कृपालुता । तदलमनेन निर्बन्धेन । पश्य ।—

[गौतमनामा कश्चिदतिदरिद्रो ब्राह्मण इतस्ततो भ्रमन् नाडीजङ्घनाम्ना बकाधिपेन वदान्यस्य विरूपाक्षनाम्नः कस्यचिद्ब्राह्मणस्य सकाशं प्रेषितः । ततः लब्धाशेषधनराशिरपि स गौतमो निवृत्य तत्समीपे रात्रिमयापयत् । क्षुधार्तः सन् बकमांसलोभं निरोद्धुमक्षमः विस्रब्धसुप्तं तं निहत्य भक्षितवानिति भारतानुशासनपर्वणः कथानुसन्धेया] तथा च यदर्थं येषां परिपालनाय । अयं काश्यपस्य पुत्रः काश्यपनाम्नः प्रजापतेः पुत्रः तार्क्ष्यः गरुडः ('सुपर्णगरुडौ तार्क्ष्यौ' इत्यमरः) प्रतिदिनं उरगान् नागान् अत्ति भक्षयति । चित्रं आश्चर्यमेतत् तानेव सर्वथा रक्षणीयान् प्राणान् योऽयं परार्थे अन्यस्य जीवितरक्षणाय । तृणमिव किञ्चिदपि गौरवमनाकलय्य । कृपया अनुग्रहबुद्ध्या जहाति त्यजति । स्पृहणीयचरितैरपि विश्वामित्रादिमुनिभिरन्यायाचरणेनापि परिपालितान् प्राणान् तृणाय मत्वा तान् त्यक्तुमुद्यतोऽयं साधुरलौकिकसत्त्वसम्पन्नः इति किमु वक्तव्यमिति भावः । स्रग्धरा वृत्तम् ॥१५॥

भो महासत्त्वेति । हे महात्मन् उदाराशय ! त्वया आत्मप्रदानाध्यवसायात् आत्मनः स्वदेहस्य प्रदानं अर्पणं तस्य अध्यवसायः चेष्टा तस्मात् मयि निर्व्याजा अकपटा दयालुता (दया + आलुच् + तल्) दर्शिता । तत् अनेन निर्बन्धेन स्वशरीरार्पणाभिनिवेशेन अलम् । 'देहत्यागरूपं साहसं मा कुरु' इत्यर्थः ।

मार डाला था, जिन्हें बचाने के लिये काश्यप का यह बेटा तार्क्ष्य=गरुड़ प्रतिदिन सर्पों को खा डालता है, उन्हीं प्राणों को यह साधु दया से दूसरों के लिये तृणकी तरह दे रहा है (अनायास ही अपने प्यारे प्राणों को भी मेरे लिये दे रहा है । अतः इसका चरित अलौकिक है—संसार के आचरणसे सर्वथा विरुद्ध है) ॥ १५ ॥

(नायक की ओर) ऐ धीर ! आपने अपने शरीर के अर्पण करने के कार्य से मुझ पर

नाडीजंघ नामक वगुलों के राजा से भेंट हुई । नाडीजंघ बड़ा परोपकारी था । ब्राह्मणकी दिर्धन दशाको देख उसे दया आई और उसने गौतमको अपने मित्र विरूपाक्ष के पास भेजा । विरूपाक्षने ब्राह्मणको बड़ी सम्पत्ति दी । रुपया पैसा लेकर गौतम रातको लौटा । उसे बड़ी भूख लगी । उसने नाडीजंघको ही मारकर इस दुष्ट उदर की शान्तिकी तथा अपने जीवनको बचाया । अन्याय से भी प्राण बचाने के लिये यह दृष्टान्त दिया गया है ।

जायन्ते च म्रियन्ते च मादृशा* क्षुद्रजन्तवः ।
परार्थे बद्धा† कक्ष्याणां त्वादृशामुद्भवः कुतः ? ॥ १६ ॥

तत् किमनेन निर्बन्धेन ? मुच्यतामयमध्यवसायः ।

नायकः । शङ्खचूड ! न मे चिरात्प्राप्तावसरस्य परार्थसम्पादनामनोरथस्यान्तरायं कर्तुमर्हसि । तदलं विकल्पेन । दीयतामेतद् वध्यचिह्नम् ।

तामेवायोग्यतां प्रकटयति **जायन्ते** इत्यादिना—

मादृशाः मत्सदृशाः क्षुद्रजन्तवः जीवनोद्देशरहिताः अकिञ्चित्करत्वात् लघवो जन्तवः जायन्ते अवरिज्ञातं बहुशः प्रतिदिनमुत्पद्यन्ते, म्रियन्ते च तथा विलीयन्ते च । परन्तु परार्थे परप्रयोजनाय । बद्धकक्ष्याणां बद्धः कृतः कक्ष्या उद्योगः ("कक्ष्या गृहप्रकोष्ठे स्यात् सादृश्योद्योगकान्तिषु" इति हैमः) यैः तादृशानां । त्वादृशां तव तुल्यानां साधूनां (साध्नोति परकार्यमिति विग्रहे औणादिकः उण्प्रत्ययः) परकार्यसाधनव्रतानां उद्भवः उत्पत्तिः कुतो भवति ? सुलभजन्ममरणानां मादृशानां कृते दुर्लभोत्पतेस्तव प्राणत्यागो नैवोचित इति भावः । क्षेमेन्द्रकृताया अवदानकल्पलतायास्तत्सूनुना सोमेन्द्रेण विरचितेऽन्तिमे जीमूतवाहनाख्येऽवदानेऽयमेवार्थः पद्येन नेन विशदतया निबद्धो दृश्यते—

भवन्ति नित्यं भवकाननेऽस्मिन्नस्मद्विधाः काशपलाशतुल्याः ।
भवद्विधस्यामृतसोदरस्य न पारिजातस्य पुनःप्र सूतिः ॥ १६ ॥

शंखचूड इति । चिरात् लब्धावसरस्य लब्धः प्राप्तः अवसरः समयः यस्य तादृशस्य परार्थसम्पादनामनोरथस्य परहितानुष्ठानरूपस्य मनोभिलषितस्य अन्तरायं विघ्नं कर्तुं त्वं न अर्हसि । तत् विकल्पेन युक्तायुक्तविचारविलम्बेन अलम् ।

अपनी छल रहित दयालुता दिखा दी । इसलिये ऐसा अभिनिवेश (अपना प्राणत्याग करना) न कीजिये । देखिये:—

मेरे जैसे क्षुद्रजीव इस संसार में पैदा होते हैं और मरते हैं परन्तु दूसरे के उपकार के लिये दृढ़ उद्योग करने वाले आप जैसे पुरुषों का जन्म कहाँ होता है ? (आप जैसे परोपकारी पुरुष बहुत कम पैदा होते हैं) ॥ १६ ॥

इसलिये इस प्राणत्यागस्वरूप अभिनिवेश से क्या लाभ ? इस काम को छोड़िये ।

नायकः—शङ्खचूड ! बहुत दिनों पर अवसर को पाये हुये और दूसरे के उपकार करने के लिये मनोरथ रखने वाले मेरे इस कार्य में विघ्न मत डालो । इसलिये अब विकल्प (आगा पीछा) मत करो । यह वध्यचिह्न मुझे दो ।

*मद्विधाः-ग । † °कक्षाणां-ग ।

शङ्खः । भो महासत्त्व ! किमनेन वृथाऽऽत्मायासेन ? न खलु शङ्खधवलं शङ्खपालकुलं शङ्खचूडो मलिनीकरिष्यति । यदि ते वयमनुकम्पनीयाः, तदियमस्मद्विपत्तिविक्लवा न यथा जीवितं जह्यात्, तथाऽभ्युपायश्चिन्त्यताम् ।

नायकः । किमत्र चिन्त्यते ? चिन्तित एवाभ्युपायः । स तु त्वदायत्तः ।

शङ्खचूडः—कथमिव ।

नायकः—म्रियते म्रियमाणे या त्वयि जीवति जीवति ।
तां यदीच्छसि जीवन्तीं रक्षात्मामं ममासुभिः ॥ १७ ॥

भो महासत्त्वेति । शङ्खपालकुलं-शङ्खराजो नाम मुख्यानामष्टानां नागानामन्यतमः । यथा—

अनन्तं वासुकिं शेषं पद्मनाभं च कम्बलम् ।
धृतराष्ट्रं शङ्खपालं तक्षकं कालियं तथा ॥

शङ्खचूडोऽपि महामर्षाणां महाभोगिनां नागानामेकतमः । भागवते पञ्चमस्कन्धे चतुर्विंशतितमाध्याये तथा वर्णनात् ।

जीमूतवाहनः वृद्धायाः जीवितोपायं स्फुटयति 'म्रियते' इत्यादिना—मा तव जननी त्वयि म्रियमाणे प्राणत्यागं कुर्वति, म्रियते असून् त्यजति । त्वयि जीवति या जीवति (त्वद्गतजीवितमरणेति भावः) तां यदि जीवन्तीं इच्छसि तर्हि मम असुभिः प्राणैः ("पुसि भूम्न्यसवः प्राणाः" इत्यमरः) आत्मानं स्वदेहं रक्ष त्रायस्व ॥ १७ ॥

शङ्खचूडः—ऐ महाधैर्यसम्पन्न ! व्यर्थ ही अपनी आत्मा को कष्ट देनेसे क्या लाभ ? शङ्खकी तरह उज्ज्वल (निष्कलंक) शङ्खपालके कुलको यह शङ्खचूड़ मलिन नहीं करेगा (अपने लिये मैं तुम्हें गरुड़ को खाने के लिये देना नहीं चाहता हूं) । यदि हम लोगों पर आप दया करना चाहते हैं तो इस विपत्ति से अधीर तथा व्याकुल मेरी माता जिस तरह से अपने प्राणों को न छोडे वही उपाय कीजियेगा ।

नायकः—इसमें क्या सोचना है । उपाय तो सोचही लिया गया है और वह उपाय तुम्हारे अधीन है ।

शङ्खचूडः—कैसे ?

नायकः—यह वृद्धा तुम्हारे मर जाने पर मर जावेगी और जीने से जीवेगी । अत एव यदि इसे जीवित रखना चाहते हो तो मेरे प्राणों से अपनी रक्षा करो (यदि मैं तुम्हारे स्थान पर अपना प्राण दे दूँगा तो तुम्हारे रहने से वृद्धा भी जीती रहेगी) ॥ १७ ॥

अयमभ्युपायः। तदर्पय त्वरितं वध्यचिह्नं, यावदनेनात्मानं प्रच्छाद्य वध्यशिलामारोहामि; त्वमपि जननीं पुरस्कृत्य अस्माद् देशान्निवर्त्तस्व, कदाचिदम्बा अवलोक्य सन्निकृष्टं घातस्थानं स्त्रीस्वभावकातरत्वेन जीवितं जह्यात्; किं न पश्यति भवानिदं विपन्नपन्नगानेककङ्कालसङ्कुलं महाश्मशानम्? तथाहि,—

चञ्चच्चञ्चूद्धृता*र्धच्युतपिशितलवग्राससंवृद्धगर्द्धै-

अयमिति। कदाचित् इय वृद्धा अम्बा ते माता। सन्निकृष्टं समीपस्थं। आघातस्थानं वध्यभूमिं आलोक्यैव। स्त्रीसहभुवा स्त्रीस्वभावसुलभेन कातरत्वेन भयाकुलतया प्राणान् जह्यात् जीवितं त्यजेत्। सम्भावनायां लिङ्। किं भवान् विपन्नपन्नगानेककङ्कालसङ्कुलं विपन्नानां गरुडेन भक्षितानां। पन्नगानां सर्पाणां "उरगः पन्नगो भोगी जिह्मगः पवनाशनः" इत्यमरः। अनेकैः बहुभिः कङ्कालैः अस्थिपञ्जरैः "स्याच्छरीरास्थि कङ्कालः" इत्यमरः। सङ्कुलं व्याप्तं। इदं महाश्मशानं महतीं वध्यभूमिं न पश्यति।

नायको भीषणाकृतिं श्मशानं बीभत्सरसोत्पादकैः वर्णैः विशदं वर्णयति—'चञ्चच्चञ्चू' इत्यादिना—चञ्चच्चञ्चूद्धृतार्द्धच्युतिपिशितलवग्राससंवृद्धगर्द्धैः चञ्चन्त्या भोजनान्वेषणाय इतस्ततो भ्रमन्त्या। चञ्च्वा उद्धृतस्य निःसारितस्य। तथा च अर्धच्युतस्य चञ्चुचाञ्चल्येन अर्धमार्गे परिभ्रष्टस्य। पिशितलवस्य मांसखण्डस्य। ग्रासे पुनरादाने संवृद्धा प्रवृद्धा गर्धा स्पृहा 'अभिलाषातिशयः' इत्यर्थः। येषां तैः तथोक्तैः। आरब्धपक्षद्वितयविधुतिभिः आरब्धाः पक्षद्वितयस्य पक्षद्वयस्य विधुतयः इतस्ततश्चलनानि यैः तादृशैः मांसभक्षणाय पक्षद्वयं विधुन्वद्भिरित्यर्थः।

यही उपाय है। इसलिये वध्यचिन्ह को शीघ्र ही दो, जिससे इन वस्त्रों से अपने को ढँक कर वध्यशिला पर मैं चढ़ूँ। तुम भी अपने माता को साथ लेकर इस स्थान से चले जाओ, नहीं तो कदाचित् माता (वृद्धा), इस वध्य भूमि को निकट देखकर स्त्रियों के स्वभाव में सुलभता से पाये जाने वाले भय तथा व्याकुलता से अपने प्राण को छोड़ देगी। क्या आप मरे हुये सर्पों की बहुत ही अधिक हड्डियों से भरे इस महाश्मशान को नहीं देखते हैं। वैसे ही:—

चलती हुई चोंचों से उठाये गये, परन्तु आधे रास्ते में गिरे हुये, मांस के टुकड़ों को खाने के लिये फिर पकड़ने की अभिलाषा धारण करने वाले गृध्र आकाश में उड़ रहे हैं। वे

---

* 'ध्रुवप्रकृत्त'—क, ग, घ।

गृध्रैराबद्धपक्षद्वितयविधुतिभिर्बद्धसान्द्रान्धकारे ।
वक्त्रोद्वान्ताः पतन्त्यश्छुमिति* शिखिशिखाश्रेणयोऽस्मिन् शिवाना-
मस्रस्रोतस्यजस्रस्रुतिबहलवसावासविस्रे स्वनन्ति ॥ १८ ॥

गृद्धैः बद्धसान्द्रान्धकारे बद्धः कृतः सान्द्रः गाढतमः अन्धकारः यस्मिन् तथाभूते । 'गाढान्धकारच्छन्ने' इति यावत् । अजस्रस्रुतबहलवसावासविस्रे अजस्रं निरन्तरं स्रुतया क्षरितया बहलया वसया मेदसा धातुविशेषेण । यः बासः गन्धसंस्कारावानं तेन विस्रे आमदुर्गन्धदुःसहे । ('विस्रं स्यादामगन्धि यत्' इत्यमरः) अस्मिन् अस्रस्रोतसि रुधिरधारायां ('रुधिरेऽसृक्कीलोहितास्रक्षतजशोणितम्' इत्यमरः) छुमिति शब्दं कृत्वा पतन्त्यः (जले अग्निनिपतनात् 'छम्' 'छम्' इति शब्द उत्पद्यते तद्वत् । शब्दं कुर्वन्त्यः' इति भावः) शिवानां शृगालीनां । ('स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः । शृगालवक्रकोष्टुफेरुफेरवजम्बुकाः' इत्यमरः) वक्त्रोद्वान्ताः वक्त्रेभ्यः मुखेभ्यः उद्वान्ताः गलिताः शिखिशिखाश्रेणयः शिखिनः अग्नेः ("शिखी वह्नौ बलीवर्दे", इति मेदिनी) शिखानां ज्वालाङ्कुराणां श्रेणयः पङ्क्तयः स्वनन्ति शब्दं कुर्वन्ति । शिवा वै उल्कामुखा भवन्ति । अतएव तन्मुखेभ्योऽग्निशिखानां वमनमौचित्येन सम्भाव्यते इति कविना ज्वालावमनं तथा वर्णितमिति स्फुटमवगंतव्यम् । समन्तादन्धकारबहुलेऽस्मिन् श्मशाने शृगालीनां मुखेभ्यो निःसरन्त्योऽग्निज्वाला आमगन्धिनि रुधिरस्रोतसि पतन्त्यः छुंछुमिति शब्दं कुर्वन्तीति श्लोकस्याशयः । अत्र जुगुप्सास्थायिभाववान् दुर्गन्धमांसाद्यालम्बनो गृध्रचञ्चूद्वरणादिनोद्दीपितो बीभत्सो नाम रसः । तल्लक्षणं यथा-साहित्यदर्पणे—

जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते रसः । नीलवर्णो महाकालदैवतोऽयमुदाहृतः ॥
दुर्गन्धमांसपिशितमेदास्याजम्बनं मतम् । तत्रैव कृमिघाताद्युद्दीपनमुदाहृतम् ॥

अपने दोनों पांखों को लगातार हिला रहे हैं, जिससे श्मशान घोर अन्धकार से घिरा हुआ जान पड़ता है । यहाँ सदा चूने से वसा (मेदा) की बहुलता के कारण खून के सोतों से बड़ी दुर्गन्ध आ रही है । शृगालियों के मुखसे वमन की गई ज्वाला जब रक्त की धारा में गिरती है, तब छन छन शब्द उत्पन्न करती है । (सियारिनों के मुँह से आग निकल रही है । इसका इस पद्य में उल्लेख है ।) ॥ १८ ॥

*'शमित'—ग, घ ।

शङ्खः । कथं न पश्यामि?—

प्रतिदिनमहिनाहारेण विनायकाहितप्रीति ।
शशिधवलास्थिकपालं वपुरिव रौद्रं श्मशानमिदम् ॥ १६ ॥

निष्ठीवनास्यवलननेत्रसंकोचनादयः । अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः ।
मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः ॥

अत्र बीभत्से विकटया संघटनया सरेफैः संयुक्तैर्वर्णैश्च व्यञ्जितस्यौजो गुणस्याधिक्यमतिशयेन गुणः । स्रग्धरा वृतम् ॥ १८ ॥

शङ्खचूडोऽपि स्वप्रतीत्यनुरोधेन श्मशानस्य भयानकतां वर्णयति **प्रतिदिन**मित्यादिना—

प्रतिदिनं दिने दिने इति प्रतिदिनं सर्वेष्वेव दिवसेषु वीप्साया अव्ययीभावः आहारेण गरुडस्य भोजनभूतेन । अहिना सर्पेण अशून्यं सर्वथा युक्तम् (शिवपक्षे हारभूतेन अहिना सर्पेण सुशोभितम्) । विनायकाहितप्रीति वीनां पक्षिणां नायकः राजा विनायकः गरुडः गणेशश्च ("विनायकस्तु हेरम्बे तार्क्ष्ये विघ्ने जिने गुरौ" इति मेदिनी) तस्य आहिता समुत्पादिता प्रीतिः सन्तोषः येन तत् तादृशं नागभक्षणाय आगच्छतो गरुडस्य प्रीतिप्रदम् । (अन्यत्र गणेशस्यातीवानन्दकरम्) तथा च शशिधवलास्थिकपालं शशिवत् चन्द्रवत् । धवलानि शुभ्राणि अस्थिकपालानि यस्मिन् तथाभूतं शशिशुभ्रैः अस्थिभिः नरकपालैश्चोपशोभितं (अन्यत्र शशिना हरस्य ललाटस्थितया चन्द्रकलया धवलानि समधिकमुज्वलीकृतानि भूषणाय धार्यमाणानि कपालास्थीनि यत्र तादृशम्) इदं श्मशानं रौद्रं भयावहं अन्यत्र रुद्रस्येदं रौद्रं (तस्येदमित्यणप्रत्ययः) हरसम्बन्धि वपुः शरीरमिव दृश्यते । श्मशानमिदं नोद्वेगकरं, प्रत्युत स्वामिनियोगनिर्वाहस्थानतया शिवविग्रहवत् अनुग्राहकमेवेति भावः । किंच मरणोद्यतस्य तस्य परमशैवस्य महेश्वरानुसन्धानानुबन्धेन तथाविधदृष्टान्तपरिग्रहस्तस्य भीषिकानिरासार्थः इति विमर्शिनी । विनायकादिपदानामुभयार्थकत्वात् श्लेषेणानुप्राणिता पूर्णोपमा । आर्या ॥ १६ ॥

शङ्खचूडः—मैं क्यों नहीं देखता हूं ?

प्रतिदिन यहाँ भोजन के लिये नाग आते हैं जिससे पक्षियों के राजा (वि—नायक) को यह श्मशान अत्यन्त प्रीति देता है । यहाँ चन्द्रमा की तरह सफेद हड्डियाँ तथा खोपड़ियाँ पड़ी हुई हैं। वास्तव में यह भयङ्कर श्मशान रुद्र के शरीर की भाँति जान पड़ता है(१) ॥१६॥

(१) इस श्लोक में श्लेषोपमा अलङ्कार है । अतः कई शब्दोंके दो दो अर्थ हैं । रुद्र के

नायकः। शङ्खचूड ! तद् गच्छ, किमेभिः सामोपन्यासैः ?

शंखः। आसन्नः खलु गरुडस्यागमनसमयः।

[मातुरग्रतो जानुभ्यां स्थित्वा]। अम्ब ! त्वमपि निवर्त्तस्वेदानीम्।—

समुत्पत्स्यामहे मातर्यस्यां यस्यां गतौ वयम्।
तस्यां तस्यां प्रियसुते ! माता भूयास्त्वमेव नः ॥ २० ॥

[पादयोः पतसि]।

वृद्धा। [सास्रम्]। कहं पच्छिमं से वअणं ? पुत्तअ ! ण क्खु तुमं उज्झिअ मे पाआ अण्णदो वहंति। इह जेव्व तुए सह चिट्ठिसं। (कथमस्य पश्चिमं वचनम् ? पुत्रक ! न खलु त्वामुज्झित्वा मे पादावन्यतो वहतः, तदिहैव त्वया सह स्थास्यामि।)

शंखचूडेति। सामोपन्यासैः सानुनयवचनैः किम्। व्यर्थमेवैतानि तव वचनानि।

समुत्पत्स्यामहे इति। हे मातः यस्यां यस्यां गतौ योनौ समुत्पत्स्यामहे जन्मग्रहणं करिष्यामः वयं (अस्मदो द्वयोश्चेति सूत्रेण एकत्वेऽपि बहुवचनम्) हे प्रियसुते प्रियः सुतः पुत्रः न तु स्वजीवितं यस्याः तत्सम्बोधने, जीवितादप्यधिकं सुतं लालयन्ती त्वमेव तस्यां तस्यां योनौ नः अस्माकं माता भूयाः। प्रार्थनायां लिङ् ॥ २० ॥

कहं इति। एतत् अस्य पश्चिमं अन्तिमं वचनम्। अतः परमस्य वचनं नैव मया श्रोतव्यमिति तात्पर्यम्।

नायकः—शङ्खचूड ! इसलिये जाओ, इन विनीतवचनों से क्या लाभ ?

शङ्खचूडः—गरुड के आने का समय समीप आ गया। (माता के सामने घुटने के बल बैठ कर) माता ! अब तुम भी चली जा।

ऐ माता ! जिस जिस योनि में मैं फिर पैदा होऊँ, ऐ ! अपने प्राणों से भी पुत्र को अधिक प्यार करने वाली ! उस उस योनि में तुम्हीं मेरी माता होवो ॥ २० ॥

(पैरों पर गिरता है)

वृद्धा—(आंसू बहाती हुई) क्या यह इसका अन्तिम वचन है। ऐ पुत्र ! तुम्हें छोड़कर जाने के लिये मेरे पैरों में सामर्थ्य नहीं है। अतएव मैं तुम्हारे साथ यहीं रहूंगी।

गले में सर्पों का हार—माला—रहता है जिससे विनायक (गणेश जी तथा भूत प्रेत गण) को बड़ा आनन्द प्राप्त होता है। मस्तक पर चन्द्रमा होने के कारण उजली खोपड़ियों के गहने शिव के शरीर को शोभायमान करते रहते हैं। अतः यह श्मशान रुद्र के शरीर की भाँति रौद्र है—भयङ्कर है।

शङ्खः । [उत्थाय] । जवाद्*हमप्यदूरे भगवन्तं दक्षिणगोकर्णं प्रदक्षिणीकृत्य स्वाम्यादेशमनुतिष्ठामि ।

[उभौ निष्क्रान्तौ] ।

नायकः—कष्टम् । न सम्पन्नमभिलषितम् । तत् कोऽत्रास्त्युपायः ।

कञ्चुकी—(तरसा प्रविश्य) इदं वासोयुगम् ।

नायकः । [दृष्ट्वा सहर्षमात्मगतम्] । दिष्ट्या सिद्धमभिवाञ्छितमनेन अतर्कितोपनतेन रक्तांशुकयुगलेन ।

कञ्चुकी । इदं वासोयुगं देव्या मित्रावसुजनन्या कुमाराय प्रेषितम् तदेतत् परिधत्तां कुमारः ।

नायकः । [सादरम्] । उपनय ।

कञ्चुकी । [उपनयति] ।

जवादिति । गोकर्णं दक्षिणोदधेर्नातिदूरे रोधसि गोकर्णाख्ये स्थाने भगवतो भुजङ्गभूषणस्य शिवस्य लिङ्गविशेषो वर्तते । अत्र गोकर्णपदेन तल्लिङ्गमेवोच्यते । भागवते यथा "गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः" । कालादासेनापि गोकर्णेश्वरस्य रघुवंशे नामनिर्देशः कृतः । यथा—"अथ रोधसि दक्षिणोदधेः श्रितगोकर्णनिकेतमीश्वरम्' इति ।

दिष्ट्येति । दिष्ट्या सौभाग्येन । अतर्कितोपनतेन अतर्कितं अचिन्तितं उपनतं उपस्थितं तेन । सहसोपस्थितेनेति यावत् । रक्तांशुकयुगलेन रक्तवस्त्रद्वयेन । अभिवाञ्छितं परोपकारकरणरूपो मनोरथः सिद्धं सफलीभूतः ।

शङ्खचूडः—(**उठकर**) तब तक मैं भी समीप ही में स्थित भगवान् दक्षिण गोकर्ण की प्रदक्षिणा करके स्वामी की आज्ञा का पालन करता हूं । (**दोनों जाते हैं**)

नायकः—हाय ! मेरी ईप्सित वस्तु पूरी नहीं हुई । इसलिये अब यहाँ कौन सा उपाय है ।

कञ्चुकी—(**वेग के साथ प्रवेश करके**) ये दो वस्त्र हैं ।

नायकः—(**हर्ष के साथ देखकर आप ही आप**) भाग्य से बिना चिन्ता किये हुये लाये गये इन दोनों लालवस्त्रों से मेरी अभिलषित वस्तु सिद्ध हो गई ।

कञ्चुकी—इन दोनों वस्त्रों को देवी मित्रावसु की माता ने कुमार (जीमूतवाहन) के लिये भेजा है । इसलिये आप इन दोनों वस्त्रों को पहनिये ।

नायकः—(**आदर के साथ**) लाओ ।

कञ्चुकी—(**ले जाता है**) ।

---

* यावत्—ख ।

नायकः। [गृहीत्वा आत्मगतम्]। सफलीभूतो मे मलयवत्याः पाणिग्रहः। [प्रकाशम्] किञ्चुकिन्! गम्यतां, मद्वचनादभिवादनीया देवी।

कञ्चुकी। यदाज्ञापयति कुमारः। [इति निष्क्रान्तः]।

नायकः।—

वासोयुगमिदं रक्तं प्राप्ते काले समागतम्।
महतीं प्रीतिमाधत्ते परार्थे देहमुज्झतः ॥ २१ ॥

[दिशोऽवलोक्य]। यथाऽयं चलितमलयाचलशिखरशिलासञ्चयः प्रचण्डो नभस्वान्, तथा तर्कयामि, आसन्नीभूतः खलु पक्षिराज इति। तथाहि—

तुल्याः संवर्त्तकाभ्रैः पिदधति गगनं पङ्क्तयः पक्षतीनां

जीमूतवाहनोऽवसरे प्राप्तं वस्त्रयुगलं स्तौति **वासोयुगमित्यादिना**—

इदं रक्तं रक्तवर्णं। वासोयुगं वाससोः वस्त्रयोः युगं द्वयं। प्राप्तकाले उचितसमये आगतं समानीतं सत्। परार्थं अन्यस्य जीवितरक्षणाय देहं स्वशरीरं उज्झतः त्यजतः मम महतीं प्रीतिं समधिकमानन्दं करोति ॥ २१ ॥

यथेति। यथा चलितमलयाचलशिखरशिलासञ्चयः चलितः कम्पितः मलयाचलस्य मलयगिरेः शिखरेषु शिलासञ्चयः प्रस्तरसमूहो येन तादृशः। प्रचण्डः नभस्वान् वायुः (वातीति शेषः)। तथा तर्कयामि सम्भावयामि पक्षिराजः असन्नीभूतः समीपमागत एव।

पक्षिराजस्यासन्नागमनं तत्पक्षतिशब्दादिभिः समर्थयति 'तुल्याः' इत्यादिना—

संवर्तकाभ्रैः प्रलयकालिकमेघैः, संवर्तकशब्दस्य प्रलयकालवाचित्वात्। तथा

नायकः—(लेकर आपही आप) मलयवती का पारिग्रहण (विवाह) आज सफल हो गया। (प्रकाश) कञ्चुकी! जाओ। देवी से मेरा अभिवादन कह देना।

कञ्चुकी—कुमार जो आप आज्ञा दें (जाता है)

नायकः—उचित समय पर आये हुये ये दो लाल वस्त्र दूसरे के उपकार के लिये अपने शरीर को त्यागने वाले मेरे अत्यन्त हर्ष को धारण कर रहे हैं। (प्राण देने के लिये तैयार मुझे इन वस्त्रों से बडा आनन्द मालूम पड़ता है) ॥ २१ ॥

(दिशाओं को देखकर) मलयपर्वत के चोटी पर के शिलाओं के समूह को छिन्न भिन्न करने वाला यह प्रचण्ड वायु दीख पड़ता है। अतएव मैं सोचता हूं कि पक्षिराज गरुड़ समीप आगया। देखियेः—

प्रलयकाल के मेघों के तरह काली काली पांखों के झुण्ड आकाश को ढक रहे हैं। जोर

*तीरं वेगान्निरस्तं क्षिपति भुव इव प्लावनायाम्बु सिन्धोः†।
कुर्वन् कल्पान्तशङ्कां सपदि च समयं वीक्षितो दिग्द्विपेन्द्रैः‡

चामरः—"संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि"। अभ्राणि मेघाः। ["अभ्रं मेघो वारिवाहः" इत्यमरः] अथवा संवर्तकाः बहुजलाः प्रलयकालोदिताः मेघाः "संवर्तश्च बहूदकः" इत्युक्तत्वात्। तैः तुल्याः प्रलयकालोदितैः मेघैः सदृश्यः। पक्षतीनां पक्षमूलानां प्रसूतानां पक्षाणामित्यर्थः ["पक्षतिस्तु भवेत् पक्षमूले च" इति मेदिनी] पक्षक्षयः श्रेयः। गगनं आकाशमण्डलं पिदधति आच्छादयन्ति। दृष्टान्तेनानेन आच्छादकस्य व्याप्तिः, तेनाच्छाद्यस्य बहुदेशावरणं च प्रकाशितम्। वेगात् पक्षजनितात् प्रचण्डवायुवेगात् निरस्तं स्वस्थानादुत्थापितं। सिन्धोः समुद्रस्य। अम्बु जलराशिः भुवः प्लावनाय निखिलां पृथिवीं स्वस्मिन् निमज्जयितुमिव। तीरं तटप्रदेशं क्षिपति आक्रामति। स तैः तीरदेशमभिव्याप्नोत्यर्थः। कल्पान्तशङ्का कल्पान्तस्य प्रलयस्य शङ्का सम्भावनां सपदि शीघ्रमेव कुर्वन् उत्पादयन्। दिग्द्विपेन्द्रैः दिगन्तस्थाः येऽष्टौ गजेन्द्राः। तन्नामानि यथा अमरकोशे—

ऐरावतः पुण्डरीको वामनो कुमुदो ऽञ्जनः।
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः॥

तैः समयं शङ्कासहितं वीक्षितः अवलोकितः। द्वादशादित्यदीप्तिः द्वादशादित्यानां प्रलये समुदितानां द्वादशानां सूर्याणामिव दीप्तिः प्रकाशो यस्य स तथाभूतः। [शिशुद्वादशादित्यदीप्तिरिति पाठमङ्गीकृत्य "शिशुः अल्पः द्वादशादित्यानां प्रलयकाले युगपत्समुदितानां द्वादशसूर्याणां दीप्तिः प्रकाशः येन तादृशः। प्रलयकालोदितानां द्वादशानामपि दिवाकराणां दीप्तिभ्योऽधिकप्रकाशवानिति भावः" इति प्रतिपादयन्ति विमर्शिणीकाराः। परन्तु पाठोऽयं नातिसमीचीनः

से आने के कारण वेग से उछाला गया समुद्र का जल सम्पूर्ण पृथ्वी को बहाने के लिये मानो तट से टकराता है। प्रलय काल की शंका को शीघ्र ही उत्पन्न करता हुआ, दिग्गजों से डर से देखा गया बारह सूर्यों की कान्ति की तरह कान्ति वाला यह गरुड अपने देह की प्रभा से

* तीरे-क, ग, घ। † वेगानिलोऽम्भः-क, ग, घ। ‡ ०राशेः-क, ग, घ।

देहोद्योतैः*तैर्दशाऽऽशाः कपिशयति मुहुर्द्वादशादित्यदीप्तिः ॥२२॥
तद् यावदसौ नागच्छेत् शङ्खचूडः, तावत् त्वरिततरमिमां वध्यशिलामारोहामि । [तथा कृत्वा, उपविश्य स्पर्शं नाटयति] । अहो स्पर्शोऽस्याः ॥ ।—
न तथा सुखयति मन्ये† मलयवती मलयचन्दनरसाऽऽर्द्रा ।
अभिवाञ्छितार्थसिद्धये वध्यशिलेयं यथा स्पृष्टा‡ ॥ २३ ॥

प्रतिभाति)] देहोद्योतैः शरीरप्रकाशैः दश आशाः दिशः ('दिशस्तु ककुभः काष्ठा आशाश्च' इत्यमरः) अखिलं विश्वं कपिशयति सुवर्णरुचीः ईषत्पीताभाः करोति । गरुडागमने प्रथमं पक्षदर्शनं, ततो वेगकार्यतया समुद्रक्षोभदर्शनं, ततो देहप्रभावलोकनमिति प्रतीतिक्रमेणैव श्लोके वर्ण्यमानं समुपलभ्यते । 'स्वर्णवर्णं सुपर्णम्' इत्युक्तदिशा कनकप्रभाच्छुरितस्य विष्णुतेजोवहनधुरन्धरस्य गरुडस्य देहप्रभया दिशानां कपिशीकरणमत्यन्तमुचितमिति सुधीभिरवगन्तव्यम् । गरुडागमनेन प्रलयस्याऽऽशङ्का समुपस्थितेति पद्यस्य साराशः । स्रग्धरा वृत्तम् ॥ २२ ॥

वध्यशिलायाः स्पर्शजनितमानन्दं विशदयति जीमूतवाहनः न तथेत्यादिना—मलयचन्दनरसार्द्रा मलयचन्दनस्य रसेन आर्द्रा उपलिप्तसकलावयवा (अत एव संस्पर्शे नितरामानन्दप्रदेति भावः) मलयवती मे प्रियापि सती तथा न सुखयति नैवानन्दयति । यथा अभिवाञ्छितार्थसिद्धये अभिवाञ्छितस्य ईप्सितस्य अर्थस्य परप्राणरक्षणप्रयोजनस्य सिद्ध्यै उपलब्धये स्पृष्टा (मदीयैरङ्गैरिति शेषः) शिला स्वभावतः कठिनस्पर्शापि प्रस्तरशिला आनन्दमुद्भावयति । चन्दनचर्चितमलयवतीस्पर्शादप्यधिकः शिलायाः संस्पर्शो नितरामानन्दप्रद इति भावः । आर्या ॥२३॥

दसों दिशाओं को बारंबार पीला बना रहा है । (गरुड का रंग सोने की तरह चमकीला है । अतः दसो दिशाओं के अकस्मात् पीले हो जाने से यही सूचित होता है कि गरुड अब आही रहे हैं) ॥ २२ ॥

इसलिये जब तक यह शङ्खचूड नहीं आता, तब तक शीघ्र ही इस वध्यशिला पर चढ़ूं । (वैसा करके, बैठकर स्पर्श करने का अभिनय करता है) अहा ! इस शिला का कैसा स्पर्श है ।

मैं समझता हूं कि मलयचन्दन के रस से सिक्त मलयवती का शरीर मुझे इतना सुख नहीं देता जितना कि ईप्सित वस्तु की सिद्धि के लिये छुई हुई यह वध्यशिला मुझे सुख तथा आनन्द दे रही है ॥ २३॥

* ०तः-क । † शिशु०-क । ‡ ननो-क, ग, घ । § ०र्पिता-क, ग, घ ।

अथवा किं मलयवत्या ?—

शयितेन मातुरङ्के विश्रब्धं शैशवे न तत् प्राप्तम् ।
लब्धं सुखं मयाऽस्या वध्यशिलाया यदुत्सङ्गे ॥ २४ ॥

तदयमागतो गरुत्मान्, यावदात्मानमाच्छादयामि !

गरुडः ।- [तथा करोति] ।

क्षिप्त्वा* बिम्बं हिमांशोर्भयकृतवलयां संहरन्† शेषमूर्त्तिं

अथवा मातुरङ्कस्पर्शादप्यधिकं लोभनीयोऽस्याः संस्पर्श इति प्रतिपादयन्नाह शयितेनेत्यादिना—

अस्याः वध्यशिलायाः उत्सङ्गं अङ्के शयितेन मया यत् सुखं लब्धं प्राप्तम् । तत् सुखं शैशवे जनन्या सततं चिन्त्यमानयोगक्षेमे शिशुकाले । मातुः स्वजनन्याः अङ्के क्रोडे विश्रब्धं विस्रस्तं पतनादिभयरहितत्वेन निःशङ्कमिति भावः । शयितेन (कर्तरि क्तः) सुप्तवता मया न प्राप्तं नानुभूतम् । परोपकारार्थं वध्यशिलाशयनसुखं मातृक्रोडशयनसुखं सहस्रेण गुणैरतिशेते इत्यर्थः ॥२४॥

गरुत्मान् । गरुत् पक्षमस्यास्तीति गरुत्मान् गरुडः । "गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः" इत्यमरः ॥

अथ गरुड आत्मीयागमनवेगं प्रकाशयति क्षिप्त्वेतिः—

हिमांशोः शीतलकिरणधारिणः चन्द्रस्य । बिम्बं मण्डलं ["बिम्बोऽस्त्री मण्डलं त्रिषु" इत्यमरः] । क्षिप्त्वा पक्षजातवायुवेगेन सुतरां निरस्य । भयकृतवलयां भयेन कृतं निष्पादितं वलयं स्वजात्युचितमण्डलीभावो यया तथोक्तां शेषमूर्त्तिं सर्पराजस्य शरीरं । संहरन् संकोचमापादयन् । एवमात्मनो विपद्भीति-

अथवा मलयवती से क्या:—

(गिरने आदि की) आशंका से रहित होकर लडकपन में माता की गोद में सोने से मुझे वह आनन्द नहीं प्राप्त हुआ, जो इस वध्यशिला की गोद में सोने से मुझे मिल रहा है ॥ २४ ॥

अब यह गरुड़ आगया। इसलिये अपने शरीर को आच्छादित कर लूँ । (वैसा ही करता है)

गरुडः—चन्द्रमा के बिम्ब को स्थान से हटाता हुआ, डर के मारे कुण्डलना (गेंडुर)

* दृष्ट्वा—ग, घ । †सस्मरन्—क, ग, घ ।

सानन्दं स्यन्दनाश्वत्रसनविचलिते पूष्णि दृष्टोऽग्रजेन ।
एष प्राप्तावसज्जज्जलधरपटलात्यायतीभूतपक्षः
प्राप्तो वेलामहीध्रं मलयमहमहिग्रासगृध्नुः क्षणेन ॥ २५ ॥

नायकः । [सपरितोषम्] ।—

करत्वमुक्त्वा स्वपक्षप्रीतिकरत्वमाह—पूष्णि जगत्पोषणकर्तरि सवितरि । स्यन्दनाश्वत्रसनविचलिते स्यन्दनस्य रथस्य ("याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः" इत्यमरः) अश्वानां त्रसनेन महद्दर्शननिबन्धनेन भयेन विचलिते स्वस्थानात् किञ्चिदपसृते सति । अग्रजेन ज्यायसा भ्रात्रा सूर्यस्य सारथिभूतेन अरुणेन ("सूरसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः" इत्यमरः) सानन्दं सोदरदर्शनात् सहर्षं दृष्टः अवलोकितः । तथा प्रान्तावसज्जज्जलधरपटलात्यायतीभूतपक्षः । प्रान्तेषु अङ्गप्रान्तेषु । अवसज्जद्भिः वायुवेगात् श्लिष्यद्भिः । संमिलद्भिरित्यर्थः । जलधरपटलैः मेघसमूहैः [जलधरेति पदं वर्षाकालिकस्य जलभारावनतस्य मेघस्य वाचकम् । "जलधरशब्देन विद्युदुन्मेषात् कनकप्रभत्वं पक्षसाम्यार्थं सिद्धम्" इति साधु प्रतिपादितं जलधरपदस्य स्वारस्यं विमर्शिणीकारैः] अत्यायतीभूतौ दीर्घायमाणौ । 'अतिविस्तृतौ' इति यावत् । पक्षौ यस्य तथाभूतः एषः अहं अहिग्रासगृध्नुः अहीनां सर्पाणां ग्रासः ग्रसनं ग्रद्गृध्नुः तदभिलाषुकः सन् । (गृधेः क्नुप्रत्ययः) । वेलामहीध्रं महीं धरतीति महीध्रः पर्वतः ('कप्रकरणे मूलविभुजादिभ्य उपसंख्यानमिति' वार्तिकेण धरतेः कप्रत्ययः) ('महीधे शिखरिण्मामृदहार्यधरपर्वताः' इत्यमरः) वेलायाः समुद्रतीरेस्थितं ["वेला काले च सीमायामम्बोः कूलविकारयोः" इति मेदिनी] पर्वतं मलयं क्षणेन शीघ्रतरमेव । प्राप्तः समायातः । स्रग्धरावृत्तम् ॥ २५ ॥

एवमस्यागमनं ज्ञात्वा स्वपरोपकारव्रतस्य सिद्धप्रायतां विचिन्त्य कृतार्थः सन्

को प्राप्त होने वाली शेषनाग के शरीर को संकुचित बनाता हुआ, रथ के घोड़ों के (मुझे देख कर) डरने से सूर्य भगवान के अपने स्थानसे विचलित होने पर जेठे (भाई) अरुण के द्वारा आनन्द पूर्वक देखा गया, अंगों के प्रान्त में मेघसमूह से मिलने के कारण अत्यन्त विस्तृत पंखों को धारण करने वाला मैं समुद्र के किनारे पर विद्यमान इस मलय पहाड़ के ऊपर सांपों के खाने की अभिलाषा से एक ही क्षण में (बहुत जल्दी) पहुंच गया ॥ २५ ॥

नायकः—(संतुष्टि के साथ)

संरक्षता पन्नगमद्य पुण्यं मयाऽर्जितं यत् स्वशरीरदानात्।
भवे भवे तेनम मैवमेवं भूयात् *परार्थः खलु देहलाभः॥ २६॥

गरुडः। [नायकं निर्वर्ण्य]—

अस्मिन् वध्यशिलातले निपतितं शेषानहीन् रक्षितुं

नायकः पुण्यपात्रतामाशास्ते संरक्षतेत्यादिना—अद्य पन्नग शङ्खचूड नाग। संरक्षता तत्प्राणान् सम्यक् रक्षता। मया स्वशरीरदानात् प्रियस्यापि निजदेहस्य समर्पणेन। यत् पुण्यं अर्जितं लब्धं, तेन भवे भवे प्रत्येकं जन्मनि। ("जन्महरौ भवौ" इत्यमरः) मम एवमेवं परार्थः परः अन्यः अर्थः प्रयोजनं यस्य तथाभूतः 'परोपकारकारणशीलः' इति यावत्। देहलाभः शरीरप्राप्तिः भूयात्। अनेन अभिव्यक्तैर्मतिधृतिप्रहर्षैरुपोद्बलितस्यामोघाध्यवसायस्थाय्यात्मनो दयावीरस्योत्कर्षः प्रतिपादितः। उपजातिः॥ २६॥

वध्यशिलायां निपतितं जीमूतवाहनमवलोक्य गरुडो स्वमनोगतमभिप्रायमिव्यनक्ति अस्मिन्नित्यादिना—

अस्मिन् वध्यशिलातले वध्यशिलायां। शेषान् स्वव्यतिरिक्तान् अहीन् सर्पान् स्वजात्यानिति भावः। रक्षितुं तज्जीवितरक्षणार्थं। निपतितं निश्चेष्टं पतितं। रक्ताम्बरप्रावृतं रक्ताम्बरेण रक्तवस्त्रेण प्रावृतं आच्छादिताखिलावयवं। न किञ्चिदपि अङ्गं दृश्यते। सर्वावरणेन नैश्चल्येन च भयप्रकर्षः कल्प्यते। अतः कविनोत्प्रेक्ष्यते—मद्भयदीर्यमाणहृदयप्रस्यन्दिना मद्भयेन मम भोजनाशङ्कया। दीर्यमाणात् स्वतो विभिद्यमानात् हृदयात् प्रस्यन्दिना क्षरता अस्रुजा शोणितेन। ('रुधिरेऽस्रक्कूलोहितास्रक्षतजशोणितम्' इत्यमरः) वहता रुधिरप्रवाहेणेत्यर्थः। दिग्धं उपलिप्तमिव लक्ष्यमाणम्। भोगिनं भोगः फणाः ["भोगस्तु, राज्ये वेश्यामृतौ सुखे। धनेऽहिकायफणयोः पालनाभ्यवहारयोः" इत्यनेकार्थसंग्रहः।]

सर्प को बचाने की इच्छा से अपने शरीर के दान करने से जो मुझे पुण्य मिला है उससे (पुण्य से) प्रत्येक जन्म में मेरा शरीर लाभ इसी तरह दूसरे के कल्याण के लिये हो (मैं दूसरे के उपकार करने के लिये ही प्रत्येक जन्म में शरीर धारण करूँ)॥ २६॥

गरुडः—(नायक को देखकर)

इस वध्यशिला (वह पत्थर जिसके ऊपर गरुड़ के भोजन के लिये नाग बैठते थे) उसके ऊपर अन्य सर्पों की रक्षा करने के लिए पड़े रहने वाले जन्तु को अब मैं अपनी

*परोपकाराय शरीरलाभः—ख, परार्थहेतोः—ग।

निर्भिद्याशनिदण्डचण्डतरया चञ्च्वाधुना वक्षसि ।
भोक्तुं भोगिनमुद्धरामि तरसा रक्ताम्बरप्रावृतं
दिग्धं मद्भयदीर्यमाणहृदयप्रस्यन्दिनेवासृजा ॥ २७ ॥

[इत्यभिपत्य नायकं गृह्णाति । नेपथ्ये पुष्पाणि पतन्ति । दुन्दुभयश्च स्वनन्ति ।]

गरुडः—[ऊर्ध्वं दृष्ट्वाऽऽकर्ण्य च । अये पुष्पवृष्टिर्दुन्दुभिध्वनिश्च । सविस्मयम्] अये—!

आमोदानन्दितालिर्निपतति किमियं पुष्पवृष्टिर्नभस्तः ?

विद्यते अस्येति भोगिनं सर्पं वक्षसि हृदयस्थले । अशनिदण्डचण्डतरया अशनि-दण्डवत् दण्डाकारकुलिशवत् चण्डतरया अतितीक्ष्णदीर्घया । (दण्डपदं चञ्च्वाः दीर्घतां प्रतिपादयति) । चञ्च्वा अधुना निर्भिद्य विदार्य । भोक्तुं एकान्ते यथेष्टं भक्षितुं । तरसा बलेन ('तरसी बलरंहसी' इत्यमरः) उद्धरामि उद्धृत्य गृह्णामि । उत्प्रेक्षालङ्कारः । इवशब्देन वाच्योत्प्रेक्षा । शार्दूलविक्रीडितम् ॥ २७ ॥

गरुड ऊर्ध्वावलोकनेन पुष्पवृष्टिं निश्चित्य दुन्दुभिस्वनस्वरूपेण शङ्कते **आमोदेत्यादिना**—

आमोदानन्दितालिः । आमोदेन कल्पतरुकुसुमानां घ्राणसन्तर्पणेन गन्धेन । 'आमोदः सोऽतिनिर्ह्रादी' इत्यमरः । आनन्दिताः प्रसन्नतया समाकृष्टाः अलयः भ्रमराः यया तथाभूता इयं नेत्रगोचरीभूता । पुष्पवृष्टिः कुसुमवृष्टिः नभस्तः आकाशात् ('पञ्चम्यास्तसिल्' इति सूत्रेण पञ्चम्यर्थे तसिल् प्रत्ययः ।) निपतति किम् ?

वज्र की तरह कठोर चोंच से इसके छाती को फाड़ूंगा और बहुत जल्दी इस साँप को मैं खाने के लिये लूंगा । यह जन्तु लाल कपड़े से ढका हुआ है । जान पड़ता है कि इसका शरीर मेरे डर के मारे फटे हुये हृदय से बहते हुये लोहू से सराबोर—रक्त से उपलिप्त—हो गया है ॥ २७ ॥

(इसी तरह नीचे आकर नायक को पकड़ता है । नेपथ्य में—पुष्प वृष्टि होती है और नाना प्रकार के बाजे बजते हैं ।

गरुडः—(ऊपर देखकर तथा सुनकर) । ऐ ! पुष्पों की वृष्टि और दुन्दुभी का शब्द ! [विस्मय के साथ] ऐ !

सुगन्ध से भ्रमरों को आनन्दित करने वाली क्या यह फूल की वृष्टि आकाश से गिर रही है ? क्या स्वर्ग में यह दुन्दुभी बज रही है जिससे सब दिशायें मुखरित हो रही हैं । **(हँसकर)**

स्वर्गे किं वैष चक्रं मुखरयति दिशां दुन्दुभीनां निनादः ?।

[विहस्य]।—

आं ज्ञातं सोऽपि मन्ये मम जवमरुता कम्पितः पारिजातः
सर्वैः संवर्त्तकाभ्रैरिदमपि रसितं जातसंहारशङ्कैः ॥ २८ ॥

स्वर्गे दुन्दुभीनां वाद्यविशेषाणां । एषः श्रूयमाणः । निनादः गम्भीरध्वनिः । दिशां चक्रं मण्डलं दिक्चक्रवालमिति यावत् । किं किमर्थं मुखरयति प्रतिध्वनिना शब्दायमानं करोति ? स्मरणमभिनीय उभयमपि स्वविकत्थनपूर्वकमन्यथाऽवधारयति—आमिति स्मरणार्थकमव्ययपदम् । ['आं प्रगृह्यं स्मृतौ वाक्ये' इति मेदिनी]। ज्ञानं सम्यक् मयाऽवधारितम् । न केवलं समुद्र एव, अपि तु सोऽपि स्वर्लोके नन्दनवनस्थोऽपि । पारिजातः कल्पवृक्षः मम गरुडस्य । ममेति औद्धत्यगर्भं वचनम् । जवमरुता वेगोच्चलितवायुना । कम्पितो वर्तते । अतः स्वतः कुसुमानि वर्षन्तीति भावः । तत्कम्पनेन अयं कुसुमपातो न तु केनापि अन्येन कारणेनेति तात्पर्यम् । द्वितीयस्वरूपं विमृशति—इदमपि सर्वत्रानुभूयमानं । ध्वननमिति शेषः । जातसंहारशङ्कैः जाता उत्पन्ना संहारस्य मदागमनेन प्रलयकालस्य आशङ्का भयं येषां तैः मज्जवानिलस्य वेगानुमानेन जनितप्रलयकालापातबुद्धिभिरित्यर्थः । संवर्तकाभ्रैः कल्पान्तमेघैः । सार्धं युगपदेव मिलित्वा । (प्रत्येकं नादे एवं मांसलत्वं न स्यादिति सम्भूयेत्युक्तम्) रसितं गर्जितं क्रियते । ("स्तनितं गर्जितं मेघनिर्घोषे रसितादि च" इत्यमरः) इति मन्ये अहं तर्कयामि । नायमाकाशे दुन्दुभीनां मांसलो ध्वनिः, मदागमनजनितया आशङ्कया संवर्तकानां प्रलयगर्जनमिदमित्यात्मनः प्रचण्डं वेगं श्लाघमानो गरुडः स्वं निरूढमहङ्कारं द्योतयति । जीमूतवाहनस्यावदानतोषितैर्देवैः पुष्पवृष्टिदुन्दुभिनादश्चाकारि, गरुडेन अजानता अन्यथा सम्भावितमिति । 'मन्ये' इति शब्देनात्र वाच्योत्प्रेक्षाऽलङ्कारः ॥ २८ ॥

अहा ! मुझे अब स्मरण आया ! मेरे वेग चलने के कारण से उत्पन्न हुये वायु से कम्पित किया गया कल्पवृक्ष आप से आप फूल वर्षा रहा है और ये प्रलयकाल के मेघ संसार के संहार होने के डर से गरज रहे है (स्वर्ग में दुन्दुभी नहीं बज रही है, बल्कि प्रलयकाल के मेघ गरज रहे हैं) ॥ २८ ॥

नायकः । [आत्मगतम्] । दिष्ट्या कृतार्थोऽस्मि ।
गरुडः । [नायकं कलयन्] ।—

नागानां रक्षिता भाति गुरुरेष यथा मम ।
तथा सर्पाशना*काङ्क्षां व्यक्तमद्यापनेष्यति ॥ २९ ॥

अथ एतदुद्धरणोऽसाधारणं महापुरुषोचितं देहगौरवं स्वसाध्यानुगुण्येन कल्पयन् गरुडो निरूपयन्नाह नागानामित्यादिना—

एषः नागानां रक्षिता स्वप्राणव्ययेन सर्पाणां जीवनरक्षकः । यथा येन प्रकारेण गुरुः अन्येभ्यो नागेभ्यः दुर्धरः भाति उद्धारणकर्मणि राजते । तथा ज्ञायते अद्य मम सर्पाशनाकाङ्क्षां सर्पाणा अशने भोजने आकाङ्क्षां अभिलाषां [सर्पाशनाशङ्कामिति पाठे तु सर्पाणां भक्षणे आशङ्का अद्य मम उदरपूर्तिर्भविष्यति न वेति सन्देहमित्यर्थोऽवगन्तव्यः ।] व्यक्तं निश्चयेन अपनेष्यति । अयं नागः हृष्टपुष्टाङ्गतया मम क्षुधानिवृत्तयेऽलं भविष्यति, अस्य पुष्कलमांसमश्नन् अहं परितृप्तो भविष्यामीति सरलार्थः । अत्र—

"प्रस्तुतागन्तुभावस्य वस्तुनोऽन्योक्तिसूचकम् ।
पताकास्थानकं तुल्यसंविधानविशेषणम् ॥"
"द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः ।
प्रधानार्थान्तरक्षेपी पताकास्थानकं परम्"

इति च प्राकरणिकस्य भाविनो वस्तुविशेषस्य अन्योक्त्या अन्यार्थप्रतिपादिक-

---

नायकः—(आप ही आप) भाग्य से मैं कृतार्थ हो गया ।

गरुड़ः—(नायक को देखता हुआ)

साँपों का रक्षा करने वाला यह श्रेष्ठ नाग जिस प्रकार से शोभित हो रहा है, उससे जान पड़ता है कि वह आज मेरी सापों के खाने की अभिलाषा को अच्छी तरह से दूर कर देगा। (इस श्रेष्ठ नाग के खाने से आज मेरी उदरपूर्ति अच्छी तरह से होगी । यह मेरा पूरा निश्चय है(१) ॥ २९ ॥

---

* ०शङ्का-क ।

(१) यह श्लोक आगे आने वाली घटना की सूचना दे रहा है । इससे यह भी [illegible] निकलता है कि नागों का यह रक्षक जीमूतवाहन मेरा गुरु है-मुझे धर्म का उपदेश करेगा। नागों के खाने के विषय में मेरे सन्देह को अहिंसा का उपदेश करके सदा के लिये दूर करेगा। अतः इसे 'पताकास्थानक' कहेंगे ।

तदु यावदेनं गृहीत्वा मलयपर्वतमारुह्य यथेष्टमाहारयामि ।

[इति निष्क्रान्तः] (इति निष्क्रान्ताः सर्वे)

इति चतुर्थोऽङ्कः ।

अथ पञ्चमोऽङ्कः ।

[ततः प्रविशति प्रतीहारः] ।

प्रतिहारः ।

स्वगृहोद्यानगतेऽपि स्निग्धे पापं विशङ्क्यते स्नेहात् ।

योक्त्या सूचनरूपं पताकावत् शोभाकरं पताकास्थानकमिति लक्षितस्य नाटकाङ्गस्य सामाजिकमनःसु वस्तुस्फुरणार्थं प्रकाश्यस्य तुल्यसंविधानरूपो भेदोऽत्र प्रतिपादितः । तथा चान्यार्थतया प्रस्तुतः श्लोकः आगामिनं वस्तु स्फुटं लक्षयति—नागाना सर्वेषामेव सर्पाणां रक्षिता जीवनदानादिति शेषः । गुरुरेष मम धर्मोपदेष्टा यथा भाति प्रकाशते, तथा सर्पाशने नागभक्षणे आशङ्का सन्देहः कार्यो न वेति विकल्पं ध्रुवमद्य अपनेष्यति 'प्राणिनो न हन्तव्याः' इत्युपदेशेनेति । वक्तृप्रतीतिं विनापि भाविवृत्तान्तानुसारेण सामाजिकैरेवमनुसन्धातुं शक्यत्वात् सूचितस्वार्थस्य भाविवृत्तान्तयोजने शोभाकरत्वाच्चेति आगामिन्याः सर्पभक्षणत्यागात्मिकायाः गरुडप्रतिज्ञायाः स्फुटं अभिव्यक्तया पताकास्थानकमेतत् ॥ २६ ॥

इति भावार्थदीपिकायां नागानन्दव्याख्यायां चतुर्थोऽङ्कः समाप्तः ।

एवं परार्थं देहत्यागरूपे परमसाध्ये निर्व्यूढेऽपि, नाटकेऽस्मिन् प्रतिपादयिष्यमाणां गरुडविनयननायकजीवितलाभादीनां साध्यान्तराणां नान्तरीयकतया सिद्धिप्रतिपादनाय अङ्कान्तरप्रस्तावः । तत्रापि देव्याः वरेण जीमूतवाहनस्य प्रत्युज्जीवनं दर्शयितुकामः कविः प्रथमं प्रतीहारं प्रवेशयति । प्रविष्टः सन् प्रतीहारः

अतएव इसे पकड़ कर मैं [illegible] पर चढ़ करके अपने पेट भर भोजन करूं ।

(जाता है) (इस तरह सब जाते हैं

इति नागानन्दे भावानुवादे चतुर्थोऽङ्कः ।

(इसके बाद प्रतीहार प्रवेश करता है)

प्रतीहारः—यदि प्रियजन अपने [illegible] की वाटिका (उद्यान) में भी टहलने के लिये जाते

किमु दृष्टबहूपायप्रतिभयकान्तारमध्यस्थे ? ॥ १ ॥
तथाहि,--जीमूतवाहनो जलनिधिवेलाऽवलोकनकुतूहली निष्का-

स्वकार्यानुगुणं विशेषं प्रकाशयितुं सामान्यं निर्दिशति—स्वगृहोद्यानेत्यादिना।

स्निग्धे स्नेहावलम्बने प्रिये । स्वगृहोद्यानगतेऽपि स्वस्यैव आत्मन एव गृहस्य उद्यानं गते प्राप्तेऽपि (गृहलग्नमुद्यानं समधिकरमणीयतया सर्वदैव निरापदं भवति । परकीये गृहोपवनेऽपरिचयात् शङ्काविषयत्वं भवतु नाम, परन्तु स्वकीये गृहोद्याने दयिते प्राप्ते सति न कश्चित् शङ्कायाः अवसरो विद्यते इति भावः)। स्नेहात् वात्सल्यातिशयात् । पापं किमप्यनिष्टं । विशङ्कयते स्नेहस्य कारणात् वायुना वृक्षशाखापतनादिरूपं किमप्यशुभं सम्भाव्यते । प्रियजनैरिति शेषः । तथा च शाकुन्तले कालिदासः—"अतिस्नेहः पापशङ्की"। दृष्टबहूपायप्रतिभयकान्तार-मध्यस्थे किमु ? दृष्टाः पूर्वं परिचिताः । बहवः अपायाः अनर्थाः यस्मिन् तादृशस्य अतएव प्रतिभयस्य सातिशयभयङ्करस्य कान्तारस्य अरण्यस्य ("कान्तारोऽस्त्री महारण्यमि" ति मेदिनी) मध्ये तिष्ठतीति तस्मिन् ('सुपि स्थः' इति सूत्रेण तिष्ठतेः कप्रत्ययः) किमु वक्तव्यम् । सर्वथा विघ्नरहितेऽपि स्वगृहोद्याने स्थिते अनर्थं सम्भावयन्ति प्रियजनाः, तदा भयङ्करं महारण्यं प्राप्ते प्रियतमे हृदयं स्नेहात् सुतरामनिष्टमाशङ्कते इति भावः । स्वगृहोद्यानगतेऽपि प्रिये यदा भयस्याशङ्का संजायते, तदा महारण्यं प्राप्ते सति तस्य सुतरां प्राप्तिरित्यर्थान्तरावबोधनादत्र अर्थापत्तिनामालङ्कारः । तल्लक्षणं यथा दर्पणे—"दण्डापूपिकयाऽन्यार्थागमोऽर्थापत्ति रिष्यते" । आर्या जातिः ॥ १ ॥

तथाहीति । जलनिधिवेलावलोकनकुतूहली जलनिधेः समुद्रस्य । वेलायाः तटस्य अवलोकने कुतूहली कौतुकाक्रान्तचित्तः । सन्निहितगरुडप्रतिभयं सन्निहि-

---

है, तो भी स्नेह के कारण उनके विषय में पाप (नाश, विघ्न आदि) की आशंका होने लगती है । अनेक विघ्न और भय से घिरे वन में जाने पर तो कहना ही क्या ? (जब घरके समीप वाली वाटिका में जाने पर विघ्न की शंका होती है तब विपत्तियुक्त वनमें जाने पर हानि की आशंका करना स्वाभाविक ही है) ॥ १ ॥

और भी—समुद्र के किनारे को देखने को कौतूहल से जीमूतवाहन वहाँ गया है परन्तु

स्तिश्चिरयतीति दुःखमास्ते महाराजविश्वावसुः। समादिष्टश्चास्मि तेन, यथा—"सुनन्द! श्रुतं मया सन्निहितगरुत्प्रतिभयमुद्देशं जामाता जीमूतवाहनो गत इति शङ्कित एवास्मि अनेन वृत्तान्तेन। तत् त्वरितं विज्ञायागच्छ किमसौ स्वगृहमागतो न वा" इति। यावत् तत्र गच्छामि। [परिक्रामन्नग्रे दृष्ट्वा]। अयमसौ राजर्षिर्जीमूतवाहनहस्य पिता जीमूतकेतुरुटजाङ्गणे सह स्वधर्मचारिण्या राजपुत्र्या वध्वा च पर्य्युपास्यमानस्तिष्ठति। तथाहि।—

क्षौमे भङ्गवती *तरङ्गितदृशे फेनाम्बुतुल्ये वहन्
जाह्नव्येव विराजितः सुपयसा देव्या महापुण्यया।

तेन गरुडेन प्रतिदिनं गरुडसन्निधानेन भयावहं। उद्देशं प्रदेशं गतः। उटजाङ्गणे उटजस्य पर्णनिर्मितकुटीरस्य। ("मुनीना तु पर्णशालोटजोऽस्त्रियाम्" इत्यमरः) अङ्गणे पर्युपास्यमानः सेव्यमानः। श्वशुरस्य सेवा वध्वा कर्तव्येति निजौचित्येन अन्वास्यमानः इत्यर्थः।

राज्ञः जीमूतकेतोः स्थितिप्रकारं सम्यक् वर्णयितुमुपक्रमते 'क्षौमे' इत्यादिना। भङ्गवती भङ्गा विद्यते ययोः ते। विचित्रविन्यासेन रेखासमन्विते। तरङ्गितदेशे तरङ्गिता; मृदुलतया निश्वासपवनादिना विचलिताः। दशाः अञ्चलानि ययोस्ते। ('स्त्रियां बहुत्वे वस्त्रस्य दशा स्युर्वस्तयोर्द्वयोः' इत्यमरः। 'दशावस्थादीपवर्त्योः वस्त्रान्ते भूम्नि योषिति' इति च मेदिनी) अतः फेनाम्बुतुल्ये फेनयुक्तजलसदृशे। क्षौमे धवलिते परिधानीयोत्तरीयवस्त्रे ["क्षौमं स्यादतसीवस्त्रे दुकूलेऽट्टालकेऽपि च" इत्यनेकार्थसंग्रहः] वहन् धारयन्। तथा सवयसा समवयस्कया (अन्यत्र जाह्नवीपक्षे वयोभिः पक्षिभिः सहितया। 'खगबाल्यादिनोर्वयः' इत्य-

विलम्ब कर रहा है (अभी तक नहीं आया) इसलिये महाराज विश्वावसु दुःखी हैं। उन्होंने मुझे यह आज्ञा दी है कि 'ऐ सुनन्द! मैंने सुना है कि गरुड़ के प्रतिदिन आने से भयावह उस स्थान पर जीमूतवाहन गया है। अतएव इस वृत्तान्त से मैं बहुत शंकित हूं। इसलिये तुम शीघ्र जावो और यह पता लगा कर आवो कि वह अपने घर आया कि नहीं'। अतएव मैं वहाँ जाता हूं। (चलकर आगे देखकर) यह राजर्षि जीमूतवाहन के पिता जीमूतकेतु पर्णकुटी के आँगने में अपनी धर्मचारिणी स्त्री और पुत्र वधू से सेवा किये जाते हुये दिखाई पड़ते हैं। और भी:—

तट वाले, (तरङ्ग की तरह) चञ्चल अञ्चलवाले तथा फेनसे युक्त जलकी तरह सफेद

* तरङ्गतरले—ग।

धत्ते तोयनिधेरयं सुसदृशीं जीमूतकेतुः श्रियं
यस्यैषान्तिकवर्तिनी मलयवत्याभाति वेला यथा ॥ २ ॥
तद् यावदुपसर्पामि ।

[ततः प्रविशति पत्नीवधूसमेतो जीमूतकेतुः] ।

जीमूतकेतुः । भुक्तानि यौवनसुखानि यशोऽवकीर्णं

मरः) महापुण्यया एतन्नामविशिष्टया । (अन्यत्र महत् समधिकं पुण्यं पावनत्वं यस्यां तादृश्या ।) जाह्नव्या गंगया इव । देव्या स्वीयधर्मपत्न्या । विराजितः । स्वयं द्योतमानः राज्ञ्या विशेषेण विभूषिः सन् । अयं जीमूतकेतुः जीमूतवाहनस्य पिता । तोयनिधेः समुद्रस्य सुसदृशीं तुल्यां श्रियं शोभां धारयति । यस्य अन्तिकवर्तिनी समीपस्था एषा मलयवती तत्स्नुषा पक्षे मलयाचलसंयुता वेला यथा तटभूमिरिव आभाति शोभते । यथा शुभ्रतोयेन जाततरङ्गेण गंगाप्रवाहेण आलिङ्गितः मलयवतीवेलानुरक्षणपरः सफेनपुञ्जः समुद्रो विराजते, तथा वायुसञ्चालितेन रेखाङ्कितेन धवलेन वस्त्रयुगलेन प्रावृतस्तुल्यवयसा धर्मपत्न्यानुगतो निजवध्वा मलयवत्या समुपास्यमानोऽयं राजर्षिः शोभते । इति भावः । श्लेषानुप्राणितः उपमालङ्कारः । शार्दूलविक्रीडितम् ॥ २ ॥

जीमूतकेतुर्वृद्धावस्थोचितं निजं मनोभावं प्रकाशयति **भुक्तानीत्यादिना**—

यौवनसुखानि यौवने तारुण्ये सुलभानि सुखानि वैषयिकसुखानि । भुक्तानि अनुभूतानि । 'भुजिः पालनकौटिल्याभ्यवहारानुभूतिषु' इति भोजः । न केवलं

रेशमी कपड़ों को धारण करने वाला, सुन्दर जलवाली तथा अत्यन्त पुण्यवाली गङ्गा की तरह अपनी महापुण्यशालिनी रानी से सुशोभित यह जीमूतकेतु समुद्र की तरह सुन्दर शोभा को धारण कर रहा है । और इसके समीप में बैठने वाली मलयवती समुद्र के किनारे की तरह शोभा दे रही है(१) ॥ २ ॥

अब मैं जाता हूं ।

(इसके बाद जीमूतकेतु पत्नी तथा वधू के साथ प्रवेश करते हैं)

जीमूतकेतुः—मैंने जवानी के सुखों का उपभोग किया, यश का विस्तार किया, स्थिर

---

(१) जीमूतकेतु ने जो कपडा पहना है वही लहर की तरह मालूम होता है। साथ में रानी पवित्र गंगा की तरह शोभा दे रही है । और पास में रहने वाली मलयवती मलयपर्वत को धारण करने वाली समुद्र की वेला की तरह सुशोभित हो रही है । इसतरह से जीमूतकेतु समुद्र की सारी समता को धारण कर रहा है ।

राज्ये स्थितं स्थिरधिया चरितं तपोऽपि ।
श्लाघ्यः सुतः सुसदृशान्वयजा स्नुषेयं ।
चिन्त्यो मया ननु कृतार्थतयाऽद्य मृत्युः ॥ ३ ॥

सुनन्दः । [सहसोपसृत्य] । जीमूतवाहनस्य—"

जीमूतकेतुः । [कर्णौ पिधाय] । शान्तं पापम् ।

वृद्धा । पडिहदं क्खु पदं अ मंगलं । (प्रतिहतं खल्वेतदमङ्गलम् ।)

मलयवती । वेवदि मे हिअअं इमिणा दुण्णिमित्तेण । (वेपते मे हृदयमनेन दुर्निमित्तेन ।)

विषयानुभवे एव गतो यौवनकालः, अपि तु यशः सर्वेषा चेतोहारिणी कीर्तिः । अवकीर्णं सर्वासु दिक्षु विस्तारितम् । राजा 'राजा प्रकृतिरञ्जनादिति' कालिदासोक्तदिशा प्रकृतीनां रञ्जकस्य नृपतेः शासनकर्मणि । मया स्थितं प्रकृतीनां सम्यक्प्रकारेण परिपालनं कृतमित्यर्थः । स्थिरधिया स्थिरा अनुसन्धेयतत्त्वविवेके निश्चला धीः बुद्धिर्यस्य तादृशेन चित्तस्यैकाग्र्यं धारयतेति भावः । मया ततोऽपि सुकुमारशरीरत्वात् नृपतिभिरवहेलितप्रायं तपश्चरणमपि कृतम् । मनःसमाधानेन विना तपश्चरणमुन्मत्ताण्डवप्रख्यमेव । तथा चोक्तं—

समाधिस्थानकस्थस्य चेतश्चेद् वृतिचञ्चलम् ।
तत्तस्य तत्समाधानं समुन्मत्तताण्डवैः ॥ इति ॥

तथा पुत्रः श्लाघ्यः विद्याविनयादिगुणसम्पन्नः । इयं स्नुषा पुत्रवधू सुसदृशान्वयजा सुसदृशे समुन्नते अन्वये कुले सिद्धेन्द्रवंशे ["अभिजनान्वयौ । शोऽन्व, वाचः" इत्यमरः] जाता वर्तते । अद्य अस्मिन् वार्धक्ये । कृतार्थतया कृताः सम्पादिताः अर्थाः मनुष्यसमुचितानि प्रयोजनानि येन तस्य भावः तया । 'सर्वथा कृतकृत्यतया' इति यावत् । मृत्युः मरणमेव । मया चिन्त्यः स्पृहणीयतया वाञ्छनी-

---

बुद्धि से राज्य किया, तप किया, प्रशंसनीय पुत्र और अपने सदृश कुल में उत्पन्न होने वाली इस वधू को पाया (प्राप्त किया) अब मैं सब तरह से कृतार्थ हो गया हूं । मुझे अब केवल मृत्यु ही की चिन्ता है ॥ ३ ॥

सुनन्दः—(**सहसा जाकर**) जीमूतवाहन का

जीमूतकेतुः—(**कान बन्द कर**) राम ! राम !!

वृद्धा—इस अमंगल का नाश हो ।

मलयवती—इस बुरी बात (निमित्त) से मेरा हृदय काँप रहा है ।

जीमू । [वामाक्षिस्पन्दनं सूचयित्वा] । भद्र ! किं जीमूतवाहनस्य ?

सुनन्दः । जीमूतवाहनस्य वार्त्तामन्वेष्टुं महाराजविश्वावसुना युष्मदन्तिकं प्रेषितोऽस्मि ।

जीमू । किमसन्निहितस्तत्र मे वत्सः ?

वृद्धा । [सविषादम्] । महाराअ ! जइ तहिं ण सण्णिहिदो, ता कहिं गदो मे पुत्तओ भविस्सदि ? (महाराज ! यदि तत्र न सन्निहितः, तत् क्व गतो मे पुत्रको भविष्यति ?)

जीमू । नूनमस्मत्प्राणयात्रार्थं नितान्तं दूरं गतो भविष्यति ।

मल । [सविषादमात्मगतम्] । अहं उण अज्जउत्तं अपेक्खंती अणणं

यः । उपलब्धेष्टवस्तुजातस्य मम मरणमेवाधुना सुखाय भविष्यतीति भावः । अत्र मृत्योः स्पृहणीयतया चिन्तने प्रथमपादश्रयप्रतिपादितऽर्थो हेतुत्वं भजते । अतः काव्यलिङ्गमलङ्कारः । लक्षणन्तु प्रागेवोक्तम् । वसन्ततिलका वृत्तम् ॥ ३ ॥

'जीमूतवाहनस्य वार्तामन्वेष्टुं प्रेषितोऽस्मीति' प्रस्तुते वचनोपक्रमे 'चिन्त्यो मया ननु कृतार्थतयाद्य मृत्युः' इति वाक्यानन्तरमव्यवधानेन समुच्चार्यमाणात् जीमूतवाहनस्येति पदात् नायकस्य भावी मृत्युः सूच्यते । तेन गण्डनामा नाटकाङ्गविशेषोऽयमित्यवगन्तव्यम् । तल्लक्षणं यथा दशरूपके—

"*गण्डः प्रस्तुतसम्बन्धि भिन्नार्थं सहसोदितम्*" ।

किमिति । असन्निहितः अनुपस्थितः तत्र मे वत्सः प्रियः सुतो जीमूतवाहनः ।

नूनमिति । नियतं अवश्यं अस्मत्प्राणयात्रार्थं मम प्राणयापनाय फलमूला-

---

जीमूतकेतुः—(बांई आंख का फड़कना सूचित कर) श्रेष्ठ ! जीमूतवाहन का क्या ? (जीमूतवाहन के बारे में क्या कहते हो ?)

सुनन्दः—महाराज विश्वावसु ने जीमूतवाहन के बारे में खोज करने के लिये मुझे आप लोगों के पास भेजा है ।

जीमूतकेतुः—क्या मेरा पुत्र वहाँ पर उपस्थित नहीं है ?

वृद्धा—(दुःख के साथ) महाराज ! यदि वह वहाँ नहीं है तो मेरा पुत्र फिर कहाँ गया होगा ?

जीमूतकेतुः—अवश्य ही, वह हम लोगों के लिये खाने पीने की सामग्री लाने के लिये बहुत दूर गया है ।

मलयवती—(दुःख के साथ आपहीआप) आर्यपुत्र को न देखकर मुझे दूसरी

जेव्व किंपि आसंकामि । (अहं पुनरार्य्यपुत्रमप्रेक्षमाणा अन्यदेव किमपि आशङ्के ।)

सुनन्दः । आज्ञापय । किं मया स्वामिने निवेदनीयम् ?

जीमू । [वामाक्षिस्पन्दनं सूचयित्वा] । जीमूतवाहनश्चिरयतीति पर्य्याकुलोऽस्मि हृदयेन ।—

स्फुरसि किमु दक्षिणेतर ! मुहुर्मुहुः सूचयन्ममानिष्टम् ।
हतचक्षुरपहृतं ते *स्फुरितं मम पुत्रकः कुशली ॥ ४ ॥

[ऊर्द्धमवलोक्य] । अयमेव त्रिभुवनैकचक्षुर्भगवान् सहस्रदीधितिः स्फुटं जीमूतवाहनस्य श्रेयः करिष्यति ।

न्याहर्तुमित्याशयः । दूरं गता भविष्यति । 'यात्रा स्यात् यापने गतौ' इत्यमरः ।

जीमूतकेतुर्दुर्निमित्तान्तरं वामाक्षिस्पन्दनं सूचयति स्फुरसीत्यादि—

हे अदक्षिणोत्तम ! हे वामनेत्र ! (पुरुषस्य वामनयनस्फुरणममङ्गलं सूचयतीत्यनेन भाव्यनर्थस्याशङ्का विधीयते । अन्यच्चायुक्तकारिणस्तव अदाक्षिण्यं प्रातिकूल्यमुचितमिति अधिक्षेपगर्भोक्तिः ।) मम अनिष्टं अनभिलषितं वस्तु । कथयितुं सूचयितुं किं किमर्थं मुहुर्मुहुः वारंवारं स्फुरसि स्पन्दसे ? हे हतचक्षुः कुत्सितनेत्र ! ते स्फुरितं अपहृतं निरर्थकमेव । यतः मे पुत्रकः कुशली क्षेमवान् विद्यते । 'कुशलिनो मत्सुतस्य वामनेत्रस्फुरणेन न किमपि अनिष्टं सम्भाव्यते' इति भावः । आर्या ॥ ४ ॥

अयमिति । अयमेव मे त्रिभुवनैकचक्षुः त्रिभुवनस्य चराचरस्य जगतः एकं

बात की ही आशंका हो रही है ।

सुनन्दः—आज्ञा दीजिये । मैं स्वामी (विश्वावसु) से क्या कहूंगा ?

जीमूतकेतुः—(बाँई आंख का फड़कना सूचित कर) जीमूतवाहन देर कर रहा है (अभीतक नहीं आया) । इसलिये मेरा हृदय व्याकुल हो रहा है ।

ऐ मेरी बाँई आँख ! बार बार मेरा अमंगल सूचित करते हुए तुम क्यों फड़क रही हो। ऐ दुष्टनेत्र ! तेरा फडकना व्यर्थ है, क्योंकि मेरा पुत्र तो कुशल पूर्वक है ॥ ४ ॥

(ऊपर देख कर के) यही तीनों भुवन के नेत्र स्वरूप हजार किरणों वाले भगवान् सूर्य जीमूतवाहन का कल्याण करेंगे ।

---

* स्फुरितमिहायं करिष्यते भानुः—ग ।

[विलोक्य सविस्मयम्]।—

आलोक्यमानमतिलोचनदुःखदायि-
रक्तच्छटा निजमरीचिरुचो विमुञ्चत् ।
उत्पात*वाततरलीकृततारकाभ-
मेतत्पुरः पतति किं सहसा नभस्तः ? ॥ ५ ॥

केवलं चक्षुः नेत्रभूत । तद्विरहे विश्वस्य गाढान्धकाराच्छन्नत्वादिति भावः । भगवान् ज्ञानमयः । सहस्रदीधितिः सहस्रं दीधितयः रश्मयो यस्य तथाभूतः सूर्यः । स्फुरन् प्रकाशमानः सन् । जीमूतवाहनस्य श्रेयः कल्याणं विधास्यति करिष्यति ।

आकाशात् पतन्तं नायकस्य चूडामणिमवलोक्य भ्रान्त्या जीमूतकेतुरन्यथा सम्भावयति **आलोक्यमानमित्यादिना**—

आलोक्यमान वस्तुनो निर्णयाभावेऽपि सद्यो दृश्यमाणं । अतिलोचनदुःखदायि अतिशयेन लोचनयोः दुखं ददातीति तत् । स्वरुचां प्रतिघातकरत्वात् नेत्रयोः पीडाजनकमिति भावः । निजमरीचिरुचः निजमरीचीनां किरणानां रुगिव रुक् कान्तिः यासां तथाभूताः ["रुक् शोभाकिरणेच्छासु" इति हेमचन्द्रः] रक्तच्छटाः शोणितधाराः विमुञ्चत् अधः पातयत् । उत्पातवाततरलीकृततारकाभं उत्पातकाले प्रलयकाले वातेन तरलीकृतायाः वायुवेगवशात् स्वस्थानाच्च्युतायाः तारकायाः नक्षत्रस्य आभा इव आभा शोभा यस्य तादृशं (कल्पान्ते समुपस्थिते सति, तारकाः स्वस्थानेभ्यः प्रच्यवन्तीति शास्त्रकाराणां मतमिदम्) किमेतत् अनिर्वचनीयं वस्तु ! नभस्तः आकाशात् । पञ्चम्याः तसिलिति सूत्रेण तसिल्प्रत्ययः । सहसा वेगेन पुरः अग्रे अस्माकमिति शेषः पतति । प्रखरकान्त्या लोचनयोः पीडाकरं, शोणितधारा मुञ्चदिव प्रलयकाले स्वस्थानाच्च्युतं नक्षत्रमिव, किमेतत् सहसा पततीति जीमूतकेतोरनिष्टाशाङ्कि वचनमेतदिति । उपमालङ्कारः । वसन्ततिलका वृत्तम् ॥ ५ ॥

(देखकर, विस्मय के साथ)

देखने पर आँखों को अत्यन्त कष्ट देने वाला अपनी मरीचि (किरण) की शोभा की तरह रक्त की छटा को फैलता हुआ और प्रलयकाल के वायु के चलने से चञ्चल कर दिये गये (अपने स्थान से गिरा दिये गये) तारा की कान्ति की तरह यह आकाश से सामने एकाएक क्या गिर रहा है ? ॥ ५ ॥

* काल-क ।

कथं चरणयोरेव पतितम् ?

[[सर्वे निरूपयन्ति]] ।

जीमू० । **अये ! कथं लग्नसरसमांसकेशश्चूडामणिः ? कस्य पुनरयं स्यात् ?**

वृद्धा । [सविषादम्] । **महाराअ ! पुत्तअस्स विअ मे एदं चूडारअणं ?** (**महाराज ! पुत्रकस्येव मे एतच्चूडारत्नम् ।**)

मल० । **अम्ब ! मा एव्वंभण** । (**अम्ब ! मैवं भण** ।)

सुनन्दः । **महाराज ! मैवमविज्ञाय विक्लवीभूः । अत्र हि—**

***तार्क्ष्येण भक्ष्यमाणानां पन्नगानामनेकशः ।**
उल्कारूपाः पतन्त्येते शिरोमण्य ईदृशाः ॥ ६ ॥

अये इति । अये इति विषादे । लग्नसरसमांसकेशः लग्नं संश्लिष्टं सरसं रुधिरार्द्रं मांसं केशाश्च यस्मिन् तथाभूतः । चूडामणिः चूडायां प्रसाधनार्थं स्थापितो भूषणविशेषः ।

महाराजेति । मा विक्लवीभूः व्याकुलो मा भव । 'माङि लुङ्' इति माङ्योगे भूधातोर्लङ् । प्रतीहारो विषीदतो जीमूतकेत्वादीन् आश्वासयति **तार्क्ष्येणेति** वचनोपन्यासेन—

तार्क्ष्येण गरुडेन भक्ष्यमाणानां निरन्तरं खाद्यमानानां पन्नगानां सर्पाणां । ईदृशाः ज्वलन्तः । उल्कारूपाः उल्काग्रहवत् भयावहाः शिरोमणयः शिरःसुस्थिताः प्रकाशमाना मणयः अनेकशः निरन्तरोत्पन्नत्वात् बहुशः पतन्ति । अतोऽयं सर्पमणिरिति सर्वथा सम्भाव्यते इत्याश्वासकरं वचनमिदम् ॥ ६ ॥

क्यों चरणों ही पर गिरा । (सब अच्छी तरह से देखते हैं)

जीमूतकेतुः—अये ! सरस मांस और बाल से युक्त यह चूडामणि कहाँ से गिरा ? यह किसका हो सकता है ?

वृद्धा—(**दुःख के साथ**) यह मेरे लड़के का ही चूड़ामणि है ।

मलयवती—माता ! ऐसा मत कहिये ।

सुनन्दः—महाराज ! ऐसा समझकर आप व्याकुल न हों । यहाँ तो—

गरुड़ से खाये गये अनेकों सापों के ये शिर के मणि इस प्रकार उल्का के रूप में पृथ्वी पर गिरा करते हैं ॥ ६ ॥

---

* अस्य श्लोकस्य स्थाने खगपुस्तकयोरेतदर्थकं गद्यं समुपलभ्यते—तार्क्ष्येण भक्ष्यमाणानां नागाधिपानामनेके नखमुखोत्खाताः पतन्त्येते शिरोमण्यः ।

जीमू । देवि ! सोपपत्तिकमभिहितम् । कदाचिदेवमपि स्यात् ।

वृद्धा । सुणंदअ ! जाव इमाए वेलाए ससुरसदणं ज्जेव्व आमदो मे पुत्तओ भविस्सदि । ता गच्छ, जाणिअ लहुं संपादेहि । (सुनन्दक ! यावदनया वेलया श्वसुरसदनमेवागतो मे पुत्रको भविष्यति । तद्गच्छ, ज्ञात्वा लघु सम्पादय ।)

सुनन्दः । यदाज्ञापयति देवी । [इति निष्क्रान्ता] ।

जीमू । देवि ! अपि नागचूडामणिः स्यात् ।

[ततः प्रविशति रक्तवस्त्रसंवीतः शङ्खचूडः]।

शङ्ख । [सास्रम]—

गोकर्णमर्णवतटे त्वरितं प्रणम्य
प्राप्तोऽस्मि तां खलु भुजङ्गमवध्यभूमिम् ।
आदाय तं नखमुखक्षतवक्षसञ्च

देवीति । देवि ! अनेन प्रतीहारेण सोपपत्तिक उपपत्त्या युक्त्या सहित यथा स्यात् तथा अभिहितं कथितम् । सयुक्तिकमस्य कथनमित्यर्थः ।

अथाधुना समायातः शङ्खचूडो महापुरुषविनाशाशङ्क्या स्वीयां कष्टावस्थां प्रतिपादयन्नाह गोकर्णमित्यादि—अर्णवतटे समुद्रतीरे स्थितं गोकर्णं शिवं त्वरितं शीघ्रतरमेव, न तु कश्चित् विलम्बः । प्रणम्य प्रणतिं विधाय । तां सर्वथा प्रख्यातां भुजङ्गमवध्यभूमिं भुजङ्गमानां (भुजोपपदात् गच्छतेः गमश्चेति सूत्रेण खच् प्रत्ययः खित्वान्मुमागमः) सर्पाणां वध्यभूमिं वधस्थानं प्राप्तोऽस्मि प्रत्यावृत्य आगतोऽहम् । खलु इत्यवधारणे । प्राप्त एवेति यावत् । नखमुखक्षतवक्षसं नखैः

जीमूतकेतुः—देवि ! तुमने युक्तियुक्त ही बात कही । शायद ऐसा ही हो ।

वृद्धा—सुनन्दक ! इस समय तक शायद श्वसुर के घर पर ही मेरा लड़का गया होगा । इसलिये जाओ इसका शीघ्र पता लगाओ ।

सुनन्दः—माता ! आप जैसी आज्ञा दें । (जाता है)

जीमूतकेतुः—देवि ! यह सर्प का चूडामणि भी हो सकता है ।

(इसके बाद रक्तवस्त्र को लिये हुये शंखचूड़ प्रवेश करता है)

शङ्खचूडः—(रोता हुआ)

समुद्र के तट पर स्थित गोकर्णेश्वर महादेव को शीघ्र ही प्रणाम करके मैं उस स्थान पर आ गया जहाँ सर्प मारे जाते हैं । परन्तु मैं देखता हूं कि गरुड़ अपने नख के अगले भाग से

विद्याधरं गगनमुत्पतितो गरुत्मान् ॥ ७ ॥

[रुदन्] । हा महासत्त्व ! हा परमकारुणिक ! हा निष्कारणैकबान्धव ! हा परदुःखदुःखित ! क्व गतोऽसि ? प्रयच्छ मे प्रतिवचनम् । हा शङ्खचूडहतक ! किं कृतं त्वया ?—

नाहित्राणात् कीर्त्तिरेका मयाप्ता
नापि श्लाघ्या स्वामिनोऽनुष्ठिताऽऽज्ञा ।

भयङ्करैः नखैः मुखेन च क्षतं विदीर्णं वक्षः उरःस्थलं यस्य तादृशं तं विद्याधरं जीमूतवाहनं आदाय स्वचञ्च्वा गृहीत्वा । गरुत्मान् गरुडः गगनं आकाशतलं उत्पतितः उत्पत्य नभस्तलमारुढः । ममागमनसमकालमेव पक्षिराजः तस्य वक्षःस्थलं विदार्य आदाय च आकाशमुत्पतितः । किमधुना मया वराकेण कर्तव्यमिति स्वकष्टं प्रकाशयतीति भावः । वसन्ततिलका वृत्तम् ॥ ७ ॥

हा इति निरतिशयखेदे । निष्कारणैकबान्धव ! निष्कारणं हेतुं विनापि एकः प्रधानः । अन्यार्थं स्वप्राणदानात् बन्ध्वन्तरात् जीमूतवाहनस्य विशेषः । अतएव मुख्यो बन्धुः । बान्धवः हितचिन्तकः सुहृद् तत्सम्बोधने ।

शङ्खचूडोऽधिक्षेपोक्तिभिः स्ववञ्चितत्वं समर्थ्य कथयति—**नाहित्राणादिति** । मया शङ्खचूडेन । अहित्राणात् सर्पाणां कृते स्वाधीनं देहत्यागं कुर्वता । एका केवला अयत्नसाध्यापीति भावः । कीर्तिः यशः न आप्ता नैव प्राप्ता । स्वामिनः प्रभोः शेषराजस्य । श्लाघ्यापि कुलरक्षणविषयत्वात् नितरां स्पृहणीयापि (अतः तस्या अकरणे प्रत्यवायश्चेति प्रकाशितं भवति) आज्ञा गरुडाय देहत्यागरूप आदेशः अनुष्ठिता न सम्पादिता । एवं स्वामिनियोगमुल्लङ्घयन् अतिपातकमपि कृतवानस्मीति भावः । [न मया कीर्तेरेव लोपो विहितः, अपि तु स्वामिनियोग-

---

इसकी छाती को चीरकर इस विद्याधर को आकाश में ले गया ॥ ७ ॥

(रोता हुआ) हा महासत्त्व ! हा अत्यन्त दयालु ! हा बिनाकारण मित्र हा, दूसरे के दुःख से दुःखित होने वाले ! तुम कहाँ गये हो ? मेरे वचन का उत्तर दो । हा शङ्खचूड को मारने वाले ! (गरुड) तुमने क्या किया ?

साँप की रक्षा करके मैंने कुछ भी कीर्त्ति नहीं प्राप्त की और न हमने स्वामी की प्रशंसनीय आज्ञा ही मानी । दूसरे ने अपना प्राण देकर मेरी रक्षा की । अतः मेरी दशा शोचनीय

दत्त्वात्मानं रक्षितोऽन्येन शोच्यो
हा धिक् ! कष्टं ! वञ्चितो वञ्चितोऽस्मि ॥ ८ ॥
तन्नाहमेवंविधः क्षणमपि जीवन्नुपहास्यमात्मानं करोमि । यावदे-
तदनुगमनं प्रति यतिष्ये । [परिक्रामन् भूमौ दत्तदृष्टिः]
आदावुत्पीडपृथ्वीं प्रविरलपतितां स्थूलबिन्दुं ततोऽग्रे

स्याननुष्ठानात् महान् अधर्मोऽपि सञ्चित इति तात्पर्यम् ।] अथ च आत्मानं शरीरं दत्त्वा । अन्येन रक्षितः प्राणव्ययेन परित्रातः । अतः उच्छ्वासोमयलोकत्वात् शोच्यः शोचनीयजन्मलाभोऽहं सञ्जातः । हा खेदे ["हा विषादे च शोके च कृत्सादुःखार्थयोरपि" इति मेदिनी] धिक् मां, कष्टमिति खेदप्रदर्शकमव्ययपदम् । अकीर्तेरुदयात् इह लोके परत्र चापि वञ्चितः वञ्चितोऽस्मि अहं अतितरां वञ्चितोऽस्मि । जीवितस्य निष्प्रयोजतयेति शेषः । शालिनी वृत्तम् । तल्लक्षणं अयोक्तं छन्दोमञ्जर्यां-"मात्तौ गौ चेच्छालिनी वेदलोकैः" ॥ ८ ॥

अथ शङ्खचूडः स्वमार्गानुसरणप्रकारमुद्भावयति आदावित्यादिना—तां-क्ष्यं गरुडं दिदृक्षुः दर्शनाभिलाषुकः सन् (दृशेः सन्नन्तात् उः । अतः 'न लोका-व्ययनिष्ठाखलर्थतृनामिति' सूत्रेण षष्ठीप्रतिषेधः) आदौ वक्षोविदारणसमनन्तर-मेव । उत्पीडपृथ्वीं उत्पीडेन वक्षःस्थलादुच्छ्वलतः शोणितस्य समूहेन पृथ्वीं स्थूलां (देहभेदसमनन्तरं रुधिरस्य बाहुल्यात् धारायाः पृथुत्वमौचित्येन सम्भाव्यते । भावः । पृथ्वीति रक्तधारायाः विशेषणात् पृथुशब्दात् स्त्रियां ङीप् प्रत्ययः । ततः किञ्चिदुत्पतनानन्तर प्रविरलपतितां प्रविरलं यथा स्यात् तथा पृथ्व्यां पतितां रुधिरप्रवाहस्य क्रमेण क्षीणत्वात् विच्छिद्य विच्छिद्य पतितामिति भावः । तथापि स्थूलबिन्दुं स्थूलाः नूतनत्वात् शोणितप्रवाहस्य बृहदाकाराः बिन्दवो यस्यां तथा-भूतां (रक्तधारामित्यस्य विशेषणमेतत्) । अन्यच्च अग्रे पर्वतशिखराग्रे ।

है । हाय ! कष्ट है ! दुःख है ! मैं बिल्कुल वञ्चित ही रहगया । वञ्चित ही रह गया । (मनुष्य का जीवन सफल है जो कीर्ति कमाता है या स्वामीकी आज्ञा का पालन करता है मुझ से एक भी न बन पड़ा, उलटे दूसरे ने मेरी जान बचाई । अतः मेरा जीवन व्यर्थ गया, बिल्कुलही व्यर्थ गया) ॥ ८ ॥

इसलिये इसतरह एक क्षण भी जीकर मैं अपनी हँसी नहीं कराऊँगा । अब मैं इसके (जीमूतवाहन) पीछे जाने का प्रयत्न करता हूं (मैं भी अब मर जाऊँगा) ।

(भूमि में आंख लगाकर चलकर के)

धारा पहिले पहल अधिक रक्त के गिरने से रेखा की तरह मोटी दीख पड़ती

आवस्वापातशीर्णप्रसृततनुकणां कीटकीर्णां स्थलीषु ।
दुर्लक्ष्यां धातुभित्तौ घनतरुशिखरे *गह्वरे स्त्यानरूपा-
मेनां तार्क्ष्यं दिदृक्षुर्निपुणमनुसरन् रक्तधारां व्रजामि ॥ ९ ॥

वृद्धा । [ससाध्वसम्] । महाराअ ! एसो ससोओ विअ †रुदिदव-
अणो इदो ज्जेव्व तुरिदं आअच्छंतो हिअअं मे आकुलीकरेदि । त

आवसु प्रस्तरशिलासु । आपातशीर्णप्रसृततनुकणा आपातेन सद्यो निपतनेन । शीर्णाः प्रस्तरकाठिन्यात् शकलीकृताः। ततः प्रसृताः इतस्ततो व्याप्ताः। तनवः सूक्ष्माः कणाः यस्याः तथाभूतां । स्थलीषु तृणकुशादिभिराच्छादितासु अकृत्रिमासु उपत्यकासु । (जानपदकुण्डगोणस्थलभाजनागेत्यादिना सूत्रेण स्थलशब्दात् अकृत्रिमार्थे ङीष्) कीटकीर्णां कीटैः पिपीलिकादिभिः कीर्णां स्थलबुद्ध्या व्याप्ताम् । धातुभित्तौ धातुभिः मनःशिलादिभिः निचितायां पर्वतभूमौ । दुर्लक्ष्यां धातुसाङ्कर्येण कृच्छ्रोन्नेयाम् । (गैरिकधातोः शोणितस्य च एकरूपत्वादापाततो गैरिके पतिता रक्तधारा नैव ज्ञायते । अतस्तस्याः दुर्लक्ष्यत्वमुक्तं कविनेति भावः)। तथा च घनतरुशिखरे घनानि निबिडानि तरुशिखराणि वृक्षाग्रभागाः यस्मिन् तस्मिन् । गह्वरे गुहासन्नभूमौ । स्त्यानरूपां घनीभूतां (तरूणा स्निग्धच्छायत्वात् तदधः पतितानां रुधिरबिन्दूनां शैत्यात् झटिति घनीभावः समुचित एव) । उत्तरोत्तरक्रमेण दुर्लक्ष्यां दुर्विज्ञेयां एतां रक्तधारां रक्तप्रवाहं निपुणं प्रयत्नेन अनुसरन् व्रजामि गच्छामि । (विदार्योन्नीयमानात् जीमूतवाहनस्य शरीरात् पतिता रक्तबिन्दवो भिन्नेषु स्थलेषु भिन्नाकारतां धारयन्तः क्रमेण दुर्लक्ष्याः भवन्ति, तेषामनुसरणक्रमेण शङ्खचूडस्यैव गमनोद्योग इत्यर्थः । स्रग्धरा वृत्तं लक्षयन्तु प्राग्वोपन्यस्तम् ॥ ९ ॥

है। उसके बाद कहीं कहीं थोड़ी गिरी हुई है और वहाँ के बिन्दु बड़े बड़े हैं। पत्थर पर गिरने से छिन्न भिन्न होकर (इसके) छोटे छोटे कण चारों तरफ फैल गये हैं। और जमीन पर गिरने से इसमें चीटियाँ लग गई हैं। लाल गैरिकादि धातु की भित्ति पर गिरने से यह दिखाई नहीं पड़ती तथा घने और ऊँचे पेड़ोंसे युक्त गुफाओं के द्वार पर गिरने से बिल्कुल जमगई है। ऐसी इस रक्त की धारा का अनुसरण करता हुआ (इसके पीछे पीछे जाकर) मैं गरुड को देखने की इच्छा से जाता हूं ॥ ९ ॥

वृद्धा—(क्रोध के साथ) महाराज ! शोक से युक्त की तरह रोता हुआ इधर शीघ्रता से आने वाला यह मेरे चित्त को व्याकुल कर रहा है। इसलिये पता लगाइये कि यह कौन है!

* स्त्याननीलस्वरूपां-ग । † अरुण-ग ।

जाणीअदु दाव को एसो त्ति । (महाराज ! एष सशोक इव रुदितवदन इष एव त्वरितमागच्छन् हृदयं मे आकुलीकरोति । तत् ज्ञायतां तावत् क एष इति ।)

जीमूतकेतुः । यथाऽऽह देवी ।

शङ्खः । (साक्रन्दम्) हा त्रिभुवनैकचूडामणे क्व मया द्रष्टव्योऽसि । मुषितोऽस्मि भो मुषितोऽस्मि ।

जीमूत [आकर्ण्य सहर्षं विहस्य]। देवी ! मुञ्च शोकम् । अस्यायं चूडामणिर्नूनं मांसलोभात् केनापि पक्षिणा मस्तकादुत्क्षायानीयमानोऽस्यां भूमौ पपात ।

वृद्धा । [सपरितोषं मलयवतीं समालिङ्ग्य]। अविधवे धीरा होहि । ण क्खु ईरिसी आकिदी वेहव्वदुक्खं अणुहोदि । (अविधवे ! धीरा भव । न खल्वीदृशी आकृतिर्वैधव्यदुःखमनुभवति ।)

मल । [सहर्षम्] । अम्ब ! तुम्हाणं आसिसं पभावेण । (अम्ब ! युष्माकमाशिषां प्रभावेण । [पादयोः पतति ।]

'अविधवे' इति । अविधवे जीवद्भर्तृके । धीरा भव । अविधवेतिशब्दः कालिदासेन मेघदूते प्रयुक्तो दृश्यते-"भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहम्" तत्सञ्जीविन्यां मल्लिनाथः 'अविधवे' इत्यनेन भर्तुर्जीवनसूचनादनिष्टशङ्कां वारयतीति प्रतिपादयति । न खलु ईदृशी परमरमणीया आकृतिः भर्तृमरणजन्यस्य वैधव्यस्य दुःखमनुभवति । यत्राकृतिस्तत्र गुणा वसन्तीति हेतोरिति भावः ।

जीमूतकेतुः—देवि ! आप जैसी आज्ञा दें ।

शङ्खचूडः—(जोर से रोता हुआ) हा तीनों भुवनों के एकमात्र चूड़ामणि अब मैं तुम्हें कहाँ देखूँगा । तुम चुरा लिये गये । चुरा लिये गये ।

जीमूतवाहनः—(सुनकर हर्ष के साथ हँसकर) हे देवि ! शोक को छोड़ो । इस चूड़ामणि को मांस के लोभ से किसी पक्षी ने इसके मस्तक से उठाकर ले आकर इस भूमि पर गिरा दिया है ।

वृद्धा—(संतोष के साथ मलयवती को आलिङ्गन कर) हे अविधवे ! (सुहागिनि) शान्त होवो । तुम्हारी जैसी सुन्दर तथा रमणीय आकृति वैधव्य (पति के मरने के) दुःख का अनुभव नहीं कर सकती ।

मलयवती—(हर्ष के साथ) माता ! आप लोगों के आशीर्वाद के प्रभाव से (ऐसा ही हो) । (पैरों पर गिरती है)

जीमूत । [शङ्खचूडमुपसृत्य] वत्स ! किं तव चूडामणिरपहृतः ।

शङ्खः । आर्य न ममैकस्य त्रिभुवनस्यापि ।

जीमू । [शङ्खचूडमवलोक्य] । वत्स ! कथमिव ?

शङ्खः । दुःखातिभारात् बाष्पोपरुध्यमानकण्ठो न शक्नोमि कथयितुम् ।

जीमू । [आत्मगतम्] हन्त हतोऽस्मि । [प्रकाशम्]

आवेदय ममात्मीयं पुत्र दुःख सुदुःसहम् ।
मयि सङ्क्रान्तमेतत्ते येन सह्यं भविष्यति ॥ १० ॥

दुःखातिभरादिति । दुःखस्य अतिभरात् आधिक्यात् हेतोः । बाष्पोपरुध्यमानकण्ठः बाष्पेण अन्तर्गलितां अश्रुणा उपरुध्यमानः अवरुद्धः कण्ठः कण्ठस्वरो यस्य तादृशः अहं वृत्तान्तं कथयितुं न पारयामि ।

जीमूतकेतुर्वृत्तान्तावगतये करुणागर्भेण वचसा शङ्खचूडमामन्त्रयते आवेदयेत्यादिना—हे पुत्र ! वात्सल्यातिशयात् पुत्रेति सम्बोधनपदमुपन्यस्तम् । आत्मीयं । आत्मनः इदमिति आत्मीयं स्वकीयं । सुदुःसहं अतितरां दुर्भरं । दुःखं मम मह्यं आवेदय कथय । येन मयि सङ्क्रान्तं कथनेन भारस्य संविभागादिव संविभक्तं एतत् दुःखं ते तव सह्यं भविष्यति । कथनेन स्वकीयं दुःखभारं लघूक्रियतामिति भावः । 'स्निग्धजनसंविभक्तं दुःखं सह्यवेदनं भवति' इति शाकुन्तले, 'तुल्याद् विभागादिव तन्मनोभिर्दुःखातिभारोऽपि लघुः स मेने' इति किरातार्जुनीयेऽप्यस्यैव श्लोकस्य निखिलजनसंवेद्यः सिद्धान्तः स्फुटीकृतो दृश्यते ॥ १० ॥

जीमूतकेतुः—(शङ्खचूड के पास जाकर) पुत्र ! क्या तुम्हारे चूड़ामणि को किसी ने चुरालिया है ?

शङ्खचूडः—आर्य ! मेरा ही नहीं, बल्कि तीनों लोक का ।

जीमूतकेतु—(शंखचूड को देखकर) पुत्र ! यह कैसे ?

शंखचूडः—दुःख के अत्यन्त भार तथा आँसू से कण्ठ के रुँध जाने से मैं कुछ कहने में असमर्थ हूं (कुछ कह नहीं सकता)

जीमूतकेतुः (आपही आप) हाय ! मुझपर वज्रपात होगया । (प्रकाश) ।

हे पुत्र ! अपने दुःख को मुझसे कहो । यह तुम्हारा दुःख अधिक होने से बड़ी कठिनता से दोया-सहा-जा सकता है । मुझे उसका कुछ भाग दे दो जिससे वह सहने लायक हो जाय

शङ्ख । श्रूयताम् । शङ्खचूडो नाम नागः खल्वहम् । आहारार्थं वासुकिना वैनतेयाय प्रेषितः । किं बहुना विस्तरेण ? कदाचिदियं रुधिरधारापद्धतिः पांसुभिरवकीर्यमाणा दुर्लक्ष्यतामुपयाति, तत् सङ्क्षेपतः कथयामि ।—

विद्याधरेण केनापि करुणाऽऽविष्टचेतसा ।
मम संरक्षिताः प्राणा दत्त्वात्मानं गरुत्मते ॥ ११ ॥

जीमू । कोऽन्य एवं परहितव्यसनी ? वत्स ! ननु स्पष्टमेवोच्यतां जीमूतवाहनेनेति । हा ! हतोऽस्मि मन्दभाग्यः ।

वृद्धा । हा पुत्तअ ! कहं तुए एदं किदं ? (हा पुत्रक ! कथं त्वयैतत् कृतम् ?)

श्रूयतामिति । कदाचित् इय रुधिरधारापद्धतिः । 'पादाभ्यां हतिः' इति पद्धतिः मार्गः । पांसुभिः धूलिभिः अवकीर्यमाणा समन्तात् आच्छादिता दुर्लक्ष्यतां उपयाति कष्टेन विज्ञातुं शक्या भविष्यति । तस्मात् संक्षेपेण कथयामि ।

शङ्खचूडः संक्षेपेण स्ववृत्तान्तं निवेदयति विद्याधरेणेति–करुणाविष्टचेतसा करुणया दीनजनेषु दयया आविष्टं आक्रान्तं चेतः हृदयं यस्य तादृशेन । मम तावस्थाविलोकनात् जातकरुणेनेत्यर्थः । केनापि अज्ञातकुलाभिधानेन विद्याधरेण गरुत्मते पक्षिराजाय । आत्मानं स्वदेहं । दत्त्वा मम प्राणाः संरक्षिताः सम्यक् त्राताः ॥ ११ ॥

कोऽन्येति । परहितव्यसनी परेषां अन्येषां हिते कल्याणसाधने व्यसनं आसक्तिर्यस्य तथाभूतः । परोपकारव्रतीति यावत् ।

शंखचूड:—सुनिये ! मैं शङ्खचूड नामक सर्प हूं । मुझे वासुकि ने गरुड़ के भोजन के लिये भेजा है । अधिक विस्तार से कहने से क्या लाभ ? कदाचित् यह रक्त की धारा का मार्ग धूल से बिल्कुल आच्छादित होगया है और कष्ट से दिखाई पड़ सकता है । अतएव मैं संक्षेप में इसका वर्णन करता हूं:—

करुणा से आर्द्र चित्तवाले किसी विद्याधर ने गरुड़ को अपने प्राण देकर मेरे प्राणों को बचाया है ॥ ११ ॥

जीमूतकेतु:—दूसरों के उपकार करने मे प्रेम रखने वाला यह दूसरा कौन पुरुष हो सकता है ? पुत्र ! स्पष्ट ही कहदो कि यह जीमूतवाहन है । हाय ! मन्दभागी मैं नष्ट हो गया ।

वृद्धा—हाय पुत्र ! तुमने ऐसा क्यों किया ?

मल० । कहं, सच्चीभूदं ज्जेव्व दुच्चिंतिदं ? (कथं, सत्यीभूतमेव दुश्चिन्तितम् ?)

[सर्वे मोहं गच्छन्ति] ।

शङ्ख० । [सास्रम्] । नूनमेतौ पितरौ तस्य महासत्त्वस्य । कथमप्रियवादिना मया इमामवस्थां नीतौ ? अथवा विषादृते विषधरस्य मुखात् किमन्यन्निःसरति ? अहो ! प्राणप्रदस्य सुसदृशं प्रत्युपकृतं जीमूतवाहनस्य शङ्खचूडेन । तत् किमधुनैवात्मानं व्यापादयामि ? अथवा समाश्वासयामि तावदेतौ । तात ! समाश्वसिहि । अम्बा समाश्वसितु ।

[उभौ समाश्वसितः] ।

वृद्धा० । वच्छे ! उट्ठेहि, मा रोअ । अम्हे किं जीमूदवाहणेण विणा जिवम्ह ? ता समस्सस दाव । (वत्से ! उत्तिष्ठ, मा रुदिहि । वयं किं

नूनमिति । अथवा विषात् ऋते विषं विहाय ('अन्यारादितरर्ते' इत्यादिना सूत्रेण ऋतेयोगे पञ्चमी) किमन्यत् वस्तुविषधरस्य । धरतीति धरः (पचाद्यचवदच्) विषस्य धरः विषधरः सर्पः तस्य । मुखात् निःसरति निष्क्रामति । पुत्रमरणशङ्कितो विषधरस्य नागस्य मम मुखान्निःसृतेन वचसा यत् जीमूतवाहनस्य पितरौ कामपि असहनीयामवस्थां नीतौ, तन्मम मुखान्निर्गमनत्वमस्य विषस्योचितमेवेति भावः । अधुना विरुद्धलक्षणया स्वापकारातिशयं द्योतयति—प्राणप्रदस्य मद्रक्षणाय जीवितमपि त्यजतः । जीमूतवाहनस्य सदृशं प्रत्युपकृतं मया । एवमाचरता मया जीमूतवाहनस्य नितरामपकृतमिति भावः ।

मलयवती—क्यों, मेरी दुश्चिन्ता आज सत्य हो गयी ? (सब मूर्छित हो जाते हैं)

शङ्खचूड:—(रोता हुआ) अवश्य ही, ये दोनों उस महानुभाव (जीमूतवाहन माता और पिता हैं । अप्रिय वचन बोल कर मैंने ही इन्हें इस अवस्था में पहुंचाया है ? अथवा विष को छोड़कर विषधर (सर्प) के मुख से दूसरा और क्या निकलता है ? अहो ! मेरे लिये प्राण को भी देने वाले जीमूतवाहन का मैंने कैसा अच्छा प्रत्युपकार किया ! (जीमूतवाहन ने मेरे लिये अपने प्राण तक भी दे डाले, परन्तु मैंने अपने विषतुल्य वचनों से उसके माता पिता को मूर्छित कर उपकार के स्थान पर अपकार ही किया) । तो क्या मैं अभी अपने को मार डालूँ ? अथवा इन दोनों (वृद्धा और जीमूतकेतु) को धीरज बधाऊँ । पिताजी धीरज रखिये । माताजी ! धीरज रखिये । (दोनों सचेत होते हैं)

वृद्धा—वत्स ! बच्चे ! मत रोओ । क्या हम लोग जीमूतवाहन के बिना जी सकते हैं ?

जीमूतवाहनेन विना जीवामः ? तत् समाश्वसिहि तावत् ।)

मल । [समाश्वस्य] । अज्जउत्त ! कहिं मए तुमं पेक्खिदव्वो ? (आर्य्यपुत्र ! क्व मया त्वं प्रेक्षितव्यः ?)

जीमू । हा वत्स ! गुरुचरणशुश्रूषाविधिज्ञ !

चूडामणिं चरणयोर्मम पातयता त्वया ।
लोकान्तरगतेनापि नोज्झितो विनयक्रमः ॥ १२ ॥

[चूडामणिं गृहीत्वा] । हा वत्स ! कथमेतावन्मात्रदर्शनः । संवृत्तोऽसि ? [हृदये दत्वा] । अहह !!!—

भक्त्या विदूरविनताननन्नमौलेः

जीमूतकेतुः पितृपरायणस्य नायकस्य श्लाघनीयां पितृभक्तिं वर्णयति चूडामणिमित्यादिना—

मम चरणयोः चूडामणिं स्वशिरोभूषणं । पातयता त्वया लोकान्तरगतेनापि अन्यो लोकः लोकान्तरं (मयूरव्यंसकादित्वात् तत्पुरुषः) । तद्गतेन परलोकं प्राप्तेनापि । विनयक्रमः 'गमनागमनयोः गुरूणां पादवन्दनं कर्तव्यमिति' आचारस्य परिपाटी । न उज्झितः नैव त्यक्तः । यथा त्वया देशान्तरं गन्तुं प्रवृत्तेन मच्चरणस्पर्शं कुर्वता विनयपद्धतिः रक्षिता, तथाद्य लोकान्तरं गच्छता तादृशविधाचारावसरमलभमानेनापि शिरोरत्नं मच्चरणयोर्निक्षिपता त्वया सैव पद्धतिः सम्यक् रक्ष्यते इति सरलार्थः ॥ १२ ॥

जीमूतकेतुरात्मजस्य चूडामणिदर्शनादाविर्भूतां स्वकीयां हृदयविह्वलतां सकरुणं प्रकटयति भक्त्येत्यादिना—

इसलिये तबतक धीरज धारण करो ।

मलयवती—(सचेत होकर) आर्य्यपुत्र ! मैं अब तुम्हें कहाँ देखूंगी ।

जीमूतकेतुः—हा पुत्र ! पिता के चरणों की सेवा में चतुर !

मेरे चरणों पर चूडामणि को गिराकर तुमने दूसरे लोक (स्वर्ग) में चले जाने पर भी विनयके क्रमको नहीं छोड़ा । (जैसे तुम मेरे पास रहने पर नित्य चरणों पर चूडामणि से विभूषित मस्तक नवाते थे, वैसेही स्वर्ग लोक जाने पर भी तुमने वैसा ही किया) ॥ १२ ॥

(चूडामणि को लेकर) हा पुत्र ! बस तुम्हारा दर्शन अब इतना ही होगा (इससे अधिक अब तुम्हारा दर्शन न हो सकेगा) ! (हृदयसे लगाकर) अहह !!!

भक्ति के साथ दूरसे अपने मुख तथा सिरको नवाकर मेरे दोनों चरणों पर तुम सदा

शश्वत्तव प्रणमतश्चरणौ मदीयौ ।
चूडामणिर्निकषणैर्मसृणोऽप्ययं हि
गाढं विदारयति मे हृदयं कथं नु ? ॥ १३ ॥

वृद्धा । हा पुत्र जीमूतवाहण ! जस्स दे गुरुअणसुस्सूसं वज्जिअ अण्णं सुहं ण रोअदि, सो कहि दाणिं पिदरं उज्झिअ सग्गसुहमणुहोदुं गदोसि ? (हा पुत्र जीमूतवाहन ! यस्य ते गुरुजनशुश्रूषां वर्जयित्वा अन्यत् सुखं न रोचते, स कुत्रेदानीं पितरमुज्झित्वा स्वर्गसुखमनुभवितुं गतोऽसि ?)

जीमू [सास्रम्] । देवि ! किं जीमूतवाहनेन विना जीवामो वयं, येनैवं प्रलपसि ?

शश्वत् सदैव । भक्त्या पूज्येषु समुचितेन अनुरागेण । मदीयौ चरणौ प्रणमतः । अतएव विदूरविनताननन्नमौलेः विदूरात् अशातात् लोकान्तरात् । विनतं प्रणतिव्यापारे अवनामितं । आननं मुखं यस्य । अतः नम्रमौलेः नतशिरसः तव मसृणोऽपि स्पर्शे स्निग्धोऽपि । अयं मे हृदि विनिहितः । चूडामणिः शिरोरत्नं । निकषणैः सङ्घर्षैः । मे हृदयं कथं तु केन कारणेन । गाढं यथा स्यात् तथा । अतिमात्रमित्यर्थः । विदारयति सद्यः खण्डशः करोति । 'स्पर्शसुखेनापि ते चूडामणिना हृदि विनिहितेन शोकातिशयात् मे मानसं नितरां दूयते इति वक्तुरभिप्रायः । कर्कशत्वरूपविदारणकारणाभावेऽपि पुत्रमरणरूपमनुक्तं निमित्तमवलम्ब्य विदारणकथनात् अनुक्तनिमित्ता विभावना । तल्लक्षणं यथा—

विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते ।
उक्तानुक्तनिमित्तत्वात् द्विधा सा परिकीर्तिता ॥

वसन्ततिलका । तल्लक्षणं यथा "उक्ता वसन्ततिलका तभजा जगौ गः" ॥ १३ ॥

प्रणाम करने वाले हो—हमेशा प्रणाम करते हो । तुम्हारा यह चूडामणि चिकना होने परभी (मेरे पैरों को) रगड़ रहा है । यह मेरे हृदय को न जाने किस तरह टूक टूक किये डालता है ॥ १३ ॥

वृद्धा—हा पुत्र जीमूतवाहन ! तुम्हें तो माता पिता की सेवा छोड़कर दूसरा सुख कभी अच्छा नहीं मालूम होता था, परन्तु तुम आज अपने मातापिता को छोड़कर स्वर्ग के सुखका अनुभव करने के लिये क्यों चले गये हो ?

जीमूतकेतुः—(रोता हुआ) देवि ! क्या हम लोग जीमूतवाहन के बिना जी सकते हैं ? तब फिर ऐसा क्यों विलाप करती हो ! ऐसे विलाप करने से क्या लाभ ?

मल० । [पादयोर्निपत्य कृताञ्जलिः] । ता देहि मे अज्जउत्तचिण्हं चूडामणिं, जेण एदं हिअए कदुअ जलणपवेसेण अवणेमि हिअअस्स संदावदुक्खं । (तद् देहि मे आर्य्यपुत्रचिह्नं चूडामणिं, येनैनं हृदये कृत्वा ज्वलनप्रवेशेन अपनयामि हृदयस्य सन्तापदुःखम् ।)

जीमू० । पतिव्रते ! किमेवमाकुलयसि ? ननु सर्वेषामेवास्माकमेष निश्चयः ।

वृद्धा । महाराअ ! ता किं अम्हेहिं पडिपालीअदि ? (महाराज ! तत् किमस्माभिः प्रतिपाल्यते ?)

जीमू० । न खलु देवि ! किञ्चित् । किन्त्वाहिताग्नेर्नान्येनाग्निना

न खल्विति । किन्तु आहिताग्नेः आहिताः स्थापिताः अग्नयः गार्हपत्यादयः त्रयः अग्नयो येन तस्य अग्निहोत्रिण इत्यर्थः । ["वाऽऽहिताग्न्यादिषु" इति सूत्रेण आहितशब्दस्य पूर्वनिपातो वैकल्पिकविधिना विधीयते] अग्नयस्त्रिविधाः । तद्यथा मनुस्मृतौ—

पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः
गुरुराहवनीयस्तु साग्निस्त्रेता गरीयसी—२ अध्या०, श्लो०२३१ ।

साग्निकस्य मम अन्येन अग्निना स्वाग्निहोत्रं विहाय न केनापि अन्येन वह्निना । संस्कारः मृतकसंस्कारः विहितः । अग्नीनादधानस्य गृहस्थस्य मृतकसंस्काराः स्वाग्निभिरेव विधातव्या इत्येवमामनन्ति गृह्यसूत्रकाराः । तथा च आश्वलायनगृह्यसूत्रे "अथैतां दिशमग्नीन् नयन्ति यज्ञपात्राणि च" "प्रैष्यति युगपदग्नीन् प्रज्वालयत" इत्यादिसूत्रैः स्वाग्निनैव साग्निकस्य दाहसंस्कारविधिः प्रदर्शितः । मनुरपि तथैव प्रतिपादयति—

मलयवती—(चरणों पर गिरकर हाथ जोड़कर) मुझे आर्य्यपुत्र का चूड़ामणि दीजिये जिस से मैं उसे छाती से लगाकर तथा अग्नि में प्रवेश कर अपने हृदय के सन्ताप को दूर कर सकूँ ।

जीमूतकेतुः—पतिव्रते ! इस तरह से क्यों व्याकुल हो रही हो ! अवश्य ही, हम सब लोगों का भी यही निश्चय है ।

वृद्धा—महाराज ! तब हम लोग किसकी प्रतीक्षा कर रहे हैं ।

जीमूतकेतुः—देवि ! किसी की नहीं । किन्तु अग्निहोत्रियों का संस्कार किसी दूसरी

सस्कारो विहितः । अतोऽग्निहोत्रशरणादग्नीनादायात्मानमुद्दीपयामः ।

शङ्ख । [आत्मगतम्] । कष्टं !! ममैकस्य कृते सकलमेवेदं विद्याधर-कुलमुच्छिद्यम् । तदेवं तावत् । [प्रकाशम्] । तात ! न खल्वनिश्चित्यैव युक्तमिदमीदृशं साहसमनुष्ठातुम् । विचित्राणि हि दैवविलसितानि । कदाचिन्नायं नाग इति ज्ञात्वा परित्यजेन्नागशत्रुः । तदनयैव दिशा वैनतेयमनुसरामस्तावत् ।

वृद्धा । सव्वहा देवदाणं पसादेण जीवंतस्स पुत्तअस्स मुहं दंसेम । (सर्वथा देवतानां प्रसादेन जीवतः पुत्रस्य मुखं पश्यामः ।)

मल । [आत्मगतम्] । दुल्लहं क्खु एदं मम मंदभग्गाए । (दुर्लभं खल्वेतत् मम मन्दभाग्यायाः ।)

जीमू । वत्स ! अवितथैषा तव भारती भवतु । तथाऽपि साग्नोना-

आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः ।
अनाहिताग्निरेकेन लौकिकेनापरो जनः ॥

अग्निहोत्रशरणात् अग्निहोत्रस्य शरणात् गृहात् । 'अग्न्यागारात्' इत्यर्थः । 'शरणं गृहरक्षित्रोः' इत्यमरः ।

विचित्राणीति । दैवविलसितानि भाग्यस्य विलासाः । विचित्राणि अनिश्चेतव्यानि भवन्ति । तथा च माघः—"हतविधिलसितानां हि विचित्रो विपाकः"

वत्सेति । अवितथा तथा सत्यरूपा न विद्यते इति वितथा मृषा । तद्-

---

अग्नि से नहीं किया जा सकता । इसलिये अग्निहोत्रके गृह से—अग्निशाला से—आग लाकर हम लोग अपनेको जला डालें ।

शंखचूडः—(आपही आप) हाय ! केवल एक मेरे ही लिये सब विद्याधर कुल नष्ट हो जायगा । तो मैं ऐसा करूँ । (प्रकाश) तात ! बिना निश्चय किये इस तरह का साहस का काम (अपने को जला डालना) करना उचित नहीं है । भाग्यके खेल विचित्र होते हैं । कदाचित "यह नाग नहीं है" ऐसा समझ कर गरुड़ इसे छोड़दे । इसलिये इसी ही दिशा में हम लोग गरुड के पीछे चलें ।

वृद्धा—अब मैं सब तरह से देवताओं की प्रसन्नता से ही अपने जीते हुये पुत्रका मुख देख सकती हू ।

मलयवती—(आपही आप) मुझ जैसी अभागिनी के लिये यह बात दुर्लभ है ।

जीमूतकेतु—वत्स ! तुम्हारी वाणी सत्य हो । तथापि अग्नि को लेकर ही हमलोगों का

मेवास्माकं युक्तमनुसर्त्तुम्। तदनुसरतु भवान्। वयमप्यग्निशरणादग्निमादाय त्वरितमेवानुगच्छामः।

[पत्नीवधूसमेतो निष्क्रान्तः]।

शङ्खः। तद् यावद् गरुडमनुसरामि। [अग्रतो निर्वर्ण्य]।—

कुर्वाणो रुधिरार्द्रचञ्चुकषणैर्दोणीरिवाद्रेस्तटीः*
प्लुष्टोपान्तवनान्तरः स्वनयनज्योतिःशिखासञ्चयैः।

भिन्ना अवितथा नितरां सत्यरूपा भवतु ते वाणी।

गरुत्मतो रोमोद्भेदकारि भीषणं भक्षणप्रकारभोजोव्यञ्जकैर्वर्णैः स्फुटं प्रकाश्यते 'कुर्वाणः' इत्यादिना—

रुधिरार्द्रचञ्चुकषणैः रुधिरेण रक्तेन। आर्द्रायाः सिक्तायाः चञ्चवाः (हृदयविदारणक्रमे शोणितेन चञ्चवाः लिप्तस्य सुतरां सम्भाव्यते) कषणैः पेच्छिल्यापनोदनाय पार्श्वयोः मुहुर्मुहुः संघर्षणैः। अद्रेः मलयाचलस्य तटीः प्रान्तभूमीः द्रोणीः नौसंस्थानाः इव। 'द्रोणी काष्ठाम्बुवाहिनी' इत्यमरः। कुर्वाणः 'चञ्च्वा एकत्र कषणं, पुनरन्यत्र तत्रैव वा, भिदुरतीक्ष्णचञ्चुपुटभेदने प्रान्तयोरनुत्खातत्वेन मध्यस्योत्खातत्वेन च प्रान्तभूमयः द्रोण्यः इव संलक्ष्यन्ते' इति विमर्शिणीकारेण प्रदर्शितोऽस्य भावार्थः। स्वनयनज्योतिश्शिखासञ्चयैः स्वनयनयोः ज्योतिः-

---

गरुड़ का अनुसरण करना (पीछे पीछे जाना) उचित है। इसलिये तुम चलो। हमलोग भी अग्निहोत्र वाले घर से—यज्ञशाला से—अग्नि ले शीघ्र ही पीछे आते हैं(१)।

(जीमूतकेतु स्त्री और वधू के साथ जाता है)

शंखचूड़—अब मैं गरुड़ के पीछे चलूं। (आगेदेखकर)

लहू से भींगी अपनी चोंच के रगडने से पर्वत के तट को नाव की तरह बनाता हुआ, (२) अपने नेत्रों से निकलने वाली ज्वाला के समूह से दोनों तरफ के जङ्गलों को जलाता हुआ,

---

* नवाः—ग। शिलाः—ख।

(१) यह धर्मशास्त्र का नियम है कि अग्निहोत्र लेने वाले पुरुषों का दाह संस्कार अपनी ही अग्नि से किया जाता है। जीमूतकेतु ने अग्नि का आधान किया है। इसलिये वह अपने संस्कार के लिये यज्ञशाला से अग्नि लाने का उद्योग करता है।

(२) लहू से चोंच भीग गई है। गरुड़ उसे सुखाना चाहता है। अतः उसे वह पर्वत पर रगड़ता है जिसके कारण पर्वत का कोई भाग ऊँचा हो जाता है और कोई भाग नीचा। अतः वह पहाड़ का किनारा नाव की तरह मालूम पड़ता है।

मज्जद्वज्रकठोरघोरनखरप्रान्तावगाढावनिः
शृङ्गाग्रे मलयस्य पन्नगरिपुर्दूरादसौ दृश्यते ॥ १४ ॥

[ततः प्रविश्यासनस्थः पुरःपतितनायको गरुडः]

गरुडः । जन्मनः प्रभृति भुजङ्गपतोनशनता नेदमाश्चर्यं मया दृष्टपूर्वं, यदयं महासत्त्वो न केवलं न व्यथते, प्रत्युत प्रहृष्ट इव किमपि दृश्यते । तथाहि.—

शिखाना नेत्रेभ्यो निःसरतः तेजसः ज्वालानां सञ्चयैः समूहैः । प्लुष्टोपान्तवनान्तरः प्लुष्टं दग्धं उपान्ते नयनगोचरे वनान्तरं वनमध्यं येन तथाभूतः । (स्वनेत्रज्योतिषा वनमध्यं दहन्नित्यर्थः) । तथा च मज्जद्वज्रकठोरघोरनखरप्रान्तावगाढावनिः मज्जतां नायकोरसि 'वदारणाय निमज्जतां । वज्रवत् कठोराणां घोराणां च नखराणां नखाना । प्रान्तैः अग्रभागैः । अवगाढा पर्वतेन सह पाताले निमग्नप्राया । अवनिः मही येन तथाभूतः । (नखाना नायकशरीरं गाढ निभिद्य बहिर्भूमौ निपातवर्णनात् प्रचण्डत्वं द्योत्यते) पन्नगरिपुः नागानां रिपुः । गरुडः मलयस्य शृङ्गाग्रे भृङ्गस्य शिखरस्य अग्रभागे दूरात् ('दूरान्तिकार्थैभ्यो द्वितीया च' इति सूत्रेण पञ्चमी) दृश्यते लक्ष्यते । शिखराग्रे उपविष्टत्वात् दर्शनसौकर्यं विद्यते । (मलयशिखरे उपविष्टोऽयं पक्षिराजः रुधिरसिक्तायाः चञ्च्वाः पिच्छिलतामपनेतुं विहितैः कर्षणैः पर्वतभूमीः नतोन्नताः विधत्ते, अनलायमानायाः स्वचञ्चुः प्रभायाः पुञ्जेन वनमध्यं नितरां दग्ध्वा विरचयतिः । कुलिशवत् कठिनैः नखप्रान्तैश्च मृतशरीरं विदार्य पृथ्वीं पातालतलावसक्तां रचयन्नास्ते इति अहो विस्मयकरी गरुडस्य भक्षणरीतिरिति श्लोकस्य सरलार्थः ।) शार्दूलविक्रीडितम् ॥१४॥

जन्मन इति । महासत्त्वः "महासत्त्वः क्रोधशोकाद्यनभिभूतान्तःसत्त्वः" इति धनिकः । जीमूतवाहनः अपकारिण्यपि पक्षिराजेनैव प्रदर्शयति कमपि क्रोधोद्भूतं भावं, प्रत्युत हर्षातिशयमेव व्यनक्ति ।

(नायक की छाती में) डूबनेवाले वज्र की तरह कठोर नखों की नोकों से जमीन को नवाता हुआ यह सर्पों का शत्रु-गरुड-मलयपर्वत की चोटी पर दूर से दिखाई पड रहा है ॥ १४ ॥

[इसके बाद आगे गिरे हुए नायक के साथ गरुड़ बैठा हुआ प्रवेश करता है]

गरुड़—(आप ही आप) जन्म से ही नागराजों को खाते हुए मैंने कभी भी पहिले ऐसा आश्चर्य नहीं देखा था । क्यों कि यह महाधैर्यसम्पन्न प्राणी केवल व्यथा रहित ही नहीं दखाई पड़ता, बल्कि कुछ कुछ प्रसन्न की तरह मालूम पड़ता है । और भी—

ग्लानिर्नाधिकपीयमानरुधिरस्याप्यस्ति धैर्योदधे-
र्मांसोत्कर्त्तनजा रुजोऽपि वहतः प्रीत्या प्रसन्नं मुखम्।
गात्रं यन्न विलुप्तमेष पुलकस्तत्र स्फुटो लक्ष्यते
दृष्टिर्मय्युपकारिणीव निपतत्यस्यापकारिण्यपि ॥ १५ ॥
ततः कुतूहलमेव जनितमस्यानया धैर्यवृत्त्या। भवतु, न भक्ष्या-

नायकस्य विलक्षणां दुःखसहनपरिपाटीं कविर्वर्णयति ग्लानिरित्यादिना—

धैर्योदधेः धैर्यस्य विघ्नेष्वपि अचञ्चलायाः स्थिरात्मिकायाः चित्तवृत्तेः उदधिः समुद्रवत् अगाधः तस्य (अपरिमेयं धैर्यं दधानस्येति भावः) अस्य मया भक्ष्यमाणस्य नागस्य। अधिकपीयमानरुधिरस्य अधिकं पीयमानं रुधिरं रक्तं यस्य तादृशस्यापि। ग्लानिः वैवर्ण्यादिनुभावविरहात् हर्षक्षयो नास्ति नैव दृश्यते। "रत्यायासतृट्तन्द्रिग्लानिनिःश्वासतेह च" इति दशरूपके ग्लानेः स्वरूपमुक्तम्। अन्यच्च मांसोत्कर्तनजा मांसस्य उत्कर्तनं इतस्ततः चञ्चित्वा मर्मादिभ्यः छेदनं। तेन जाताः रुजः पीडाः वहतः धारयतोऽपि। अस्य मुखं प्रीत्या अन्तरानन्देन प्रसन्नं विकाररहितं लक्ष्यते। यत् गात्रं न विलुप्तं अधुनापि अभक्षितं विद्यते। तत्र एष स्फुटः पुलकः रोमोद्भेदः आनन्दातिरेकात् स्पष्टतया रोमाञ्चोऽवलोक्यते। अपकारिणि प्रियमाणानां प्राणानां संहारकत्वात् शत्रुभूतेऽपि मयि उपकारिणीव क्रियमाणोपकारे पुरुषे इव। अस्य महासत्त्वस्य दृष्टिः निपतति। 'अधिकं पीयमानेऽपि शोणिते हर्षोद्गमः, मांसोत्कर्तनेऽपि प्रसादः, भुक्तावशिष्टे अवयवे रोमाञ्चः, अपकारिण्यपि मयि सुभगो दृष्टिपातः—एतत् सर्वमस्य महासत्त्वस्य स्वरूपसूचने प्रमाणभूतं वर्तते' इति भावः। शार्दूलविक्रीडितम् ॥ १५ ॥

यह तो धीरता का सागर है—धैर्य का समुद्र है। यद्यपि इसके लहू को मैंने खूब ही पी डाला है, तथापि इसको ग्लानि नहीं मालूम पड़ती। मांस के काटने—नोचने—की पीड़ा को धारण करने पर भी इसका मुख आनन्द से प्रसन्न है। इसका जो अङ्ग अभीतक नष्ट नहीं हुआ है, वहाँ यह रोमाञ्च साफ़ तौर से दिखाई पड़ रहा है। यद्यपि मैंने इसका अपकार ही किया है परन्तु वह उपकारी व्यक्ति के भाँति मुझे देख रहा है। (आशय यह है कि क्लेश के साधन विद्यमान होने पर भी वह तनिक भी दुःखित नहीं होता, प्रत्युत प्रसन्न होता है। इसलिये इसमें बड़ी धीरता है) ॥ १५ ॥

इस (जीमूतवाहन) की इस धैर्यवृत्ति से मुझे कौतूहल सा पैदा हो गया है। अस्तु, मैं

म्येवैनम् । पृच्छामि तावत् कोऽयमिति । [अपसर्पति]

नायकः । [मांसोत्कर्तनविमुखमुपलक्ष्य]

शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि *तवापि तावत्किं भक्षणात् त्वं विरतो गरुत्मन् । ॥१६॥

स्वशरीरे मांसादीना सद्भावं प्रतिगद्य नायकः पक्षिराजं भक्षणाय समुत्साहयति **शिरामुखैरित्यादिना**—

शिरामुखैः शिराः धमनयः । 'नाडी तु धमनिः शिरा" इत्यमरः । तासां मुखैः अग्रभागेभ्यः । रक्तं स्यन्दते एव बहुमार्गं स्रवत्येव, न तु विच्छिन्नम् । अद्यापि अवयवानां भक्षणेऽपि मम देहे मांसं अस्ति । इह भोजने तावत् तव तृप्ति भोक्षणजन्यं सन्तोषं नैव पश्यामि (कुक्षिवृंहणाद्यदर्शनादिति शेषः) । हे गरुत्मन् ! 'सन्ततोद्यनशीलस्य प्रशस्तपक्षधारकस्य च तव तन्द्रालुता नैवोचिता' इत्यनेन गूढं ध्वन्यते । त्वं मम शरीरभक्षणात् किं किमर्थं विरतः विश्रान्तः । 'विरामे नैव किञ्चित् कारणं पश्यामि, अतः निद्रां विहाय स्वोदरपूर्तिं यदृच्छया कुरु' इति भावः । अत्रोत्साहस्थायिभावको वीररसः । तत्रापि च नागानां कृते जीमूतवाहनस्य निरतिशयदयाभाववर्णनात् दयावीरः । वीररसवर्णनं यथा साहित्यदर्पणे—

उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकृत् ।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः ॥

मैं इसे न खाऊँगा । तबतक मैं पूँछू कि यह कौन है ? (हटता है) ।

नायकः—(गरुड़ को मांस के काटने में विमुख देखकर) ।

सिरा के मुखों से अभीतक रक्त चू रहा है । अभीतक मेरे देह में मांस है । तुम्हारी तृप्ति भी मैं नहीं देखता । हे गरुत्मन्—तो क्या कारण है कि तुमने भोजन करना बन्द कर दिया है (१) ॥ १६ ॥

---

* च ते महात्मन्—ग ।

(१) इस पद्य से नायक के चरित्र का पता चलता है कि वह कितना धीर है तथा अपने सिद्धान्त का कितना पक्का है । कष्ट पाने पर भी वह अपना धैर्य नहीं छोड़ता है, प्रत्युत गरुड को भोजन से विरत देख उसे क्लेश हो रहा है । सचमुच जीमूतवाहन के हृदय में प्राणियों के बचाने के लिये सच्चा उत्साह है—वह 'दयावीर' है—अत एव 'धीरोदात्त' है । दशरूपक तथा साहित्यदर्पण में यह पद्य उद्धृत किया गया है ॥

गरुडः । [आत्मगतम्] । आश्चर्यमाश्चर्यम् !! कथमस्यामप्यवस्थायामेवमूर्जितमभिधत्ते ? [प्रकाशम्] । अहो महासत्त्व—

आवर्जितं मया चञ्च्वा हृदयात् तव शोणितम् ।
अनेन धैर्य्येण पुनस्त्वया हृदयमेव नः ॥ १७ ॥

आलम्बनविभावास्तु विजेतव्यादयो मताः ।
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः ॥
सञ्चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः ।
स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात् ॥

पद्यमिदं जीमूतवाहनस्य धीरोदात्तनायकत्वख्यापनार्थं "प्रियोक्त्याजीवितादानमौदार्यं सदुपग्रहः" इत्येवंलक्षितस्य औदार्याभिधानस्य सात्त्विकगुणस्य चोदाहरणविधया दशरूपकावलोके धनिकेनोपन्यस्तम् । साहित्यदर्पणेऽपि विश्वनाथकविराजेन दयावीरस्य दृष्टान्तरूपेणोदाहृतमेतदिति । इन्द्रवज्रोपेन्द्रवज्रयोः सम्मिलनात् उपजातिः ॥ १६ ॥

आश्चर्यमिति । अत्यूर्जितं—अलौकिकं तेजोव्यञ्जकं वचनं । अभिधत्ते कथयति । उत्साहातिशयपूर्णं वचनमुच्चारयतीति भावः । ["ऊर्जस्तु कीर्तिकोत्साहबलेषु प्राणनेऽपि च" इति मेदिनी] ।

एवं निरूप्य प्रशंसां पुरस्कृत्य पृच्छति आवर्जितमित्यादिना—मम चञ्च्वा तव हृदयात् शोणितं रुधिरमात्रं । आवर्जितं उत्कृत्य किञ्चिन्मात्रं स्वीकृतम् । पुनः त्वया अनेन लोकोत्तरेण धैर्य्येण धीरतया । नः अस्माकं हृदयं एव आवर्जितं वशीकृतम् । ग्रहणव्यापारेऽपटुना मया त्वद्धृदयगतं किञ्चिदेव शोणितमात्रमपहृतम्, त्वया तु मदीयं समग्रं हृदयमेवाहृतमिति अहो तावकीना प्रयोगचातुरी ! 'विलक्षणेन धैर्य्येण त्वया ममात्मा प्रसभं वशीकृतः' इतिपक्षिराजस्याशयः । वस्तुक्षालङ्कारः ॥ १७ ॥

गरुड—(आपही आप) आश्चर्य है । आश्चर्य है !! कैसे यह इस दशा में भी उत्साहपूर्ण वचन बोल रहा है (प्रकाश) हे धीरजधारी !

मैंने अपनी चोंच से आपके हृदय से केवल रुधिर ही निकाला है परन्तु इस धीरता से आपने मेरे पूरे हृदय को निकाल लिया है (आशय है कि मैंने आपके हृदय के एकभाग—रुधिरमात्र—को निकाला है । परन्तु आपने धैर्य से मेरे समग्र हृदय को अपने वश में कर लिया है) ॥ १७ ॥

तत् कस्त्वमिति श्रोतुमिच्छामि ।

नायकः । एवं क्षुदुपतप्तो न श्रवणयोग्यस्त्वम् । कुरुष्व तावत् मम मांसशोणितेन तृप्तिम् ।

शङ्ख । [सहसोपसृत्य] । तार्क्ष्य ! न खलु न खलु साहसमनुष्ठेयम् । नायं नागः । परित्यजेनम् । मां भक्षय । अहं तवाहारार्थं प्रेषितोऽस्मि वासुकिना [उरो ददाति] ।

नायकः । [शङ्खचूड दृष्ट्वा सविषादमात्मगतम्] । कष्टं ! विफलीकृतो मे मनोरथः शङ्खचूडेनागच्छता ।

गरुडः [उभौ निरूप्य] द्वयोरपि भवतोर्वध्यचिह्नम् । कः खलु नाग इति नावगच्छामि ।

शंख । *अस्थान एव भ्रान्तिः ।

एवमिति । एव क्षुदुपतप्तः एवं क्षुधा बुभुक्षया उपतप्तः प्रपीडितः पुरुषः । न श्रवणयोग्यः प्रश्नोत्तरश्रवणस्य क्षमः न (क्षुधया पीडितेन पुरुषेण स्वोदरपूर्तिरेव प्रथमं विधातव्या । बुभुक्षाक्रान्ते चेतसि न वर्ततेऽन्यवचनानां श्रवणे विचारणे च योग्यतेति भावः) । मांसशोणितेन मांसेन रक्तेन च (प्राणितूर्यसेनाङ्गानामिति सूत्रेण प्रायशङ्खत्वादेकवचनम्) तृप्तिं कुरु ।

अस्थान इति । अस्थाने अयोग्यस्थले एव । ते विज्ञस्यापि तव भ्रान्तिः

अतएव यह मैं सुनना चाहता हूं कि आप कौन हैं ।

नायकः—इस तरह भूखे हुये तुम मेरी बात सुनने के योग्य नहीं हो । तबतक मेरे मांस और रक्त से अपनी तृप्ति करो ।

शङ्खचूडः—(सहसा पास जाकर) ऐ गरुड ! ऐसा साहस मत करो । मत करो । यह (जीमूतवाहन) सर्प नहीं है । इसे छोड दो । मुझे खाओ । वासुकि ने तुम्हारे आहार के लिये मुझे ही भेजा है । (छाती को देता है)

नायकः—(शङ्खचूड को देखकर दुःख के साथ आपही आप) हाय ! शङ्खचूड ने आकर मेरे मनोरथ को विफल कर दिया ।

गरुडः—(दोनों को देखकर) तुम दोनों के पास वध्यचिन्ह है । इससे मैं नहीं समझ सकता हूं कि इनमें से कौन नाग है ।

शङ्खचूडः—अनुचित स्थान में तुम्हें भ्रम उत्पन्न हुआ है ।

---

* स्थाने—ग ।

आस्तां स्वस्तिकलक्ष्म वक्षसि तनौ नालोक्यते कञ्चुकः
जिह्वे जल्पत एव मे न गणिते नाम त्वया द्वे अपि ? ।
तिग्मस्तीव्रविषाग्निधूमपटलव्याजिह्वारत्नत्विषो

भ्रमः सञ्जातः । रजतभ्रमः शुक्तिकायामेव घटते, न पटे । मालायामेव फणिबुद्धिः, न फणडलौ । एवं नागात् सर्वथा भिन्नाकारे अस्मिन् पुरुषे तव नागभ्रमोऽतीवानुचितः इति भावः । 'स्थाने' इति पाठे तु सोल्लुण्ठनोक्तिरियमवगन्तव्या ।

तदेवानौचित्यं दृष्टान्तमुखेन स्पष्टं सूचयति 'आस्तां' इत्यादिना—वक्षसि महा पुरुषस्यास्य उरःस्थले । स्वस्तिकलक्ष्म स्वस्तिकस्य लक्ष्म चिन्हं ('चिन्हं लक्ष्म च लक्ष्मणम्' इत्यमरः) आस्तां दूरे तिष्ठतु । (वरश्रेष्ठावृतत्वात् वक्षसि चिन्हितं स्वस्तिकं त्वया नो लक्षितं भवेदिति वक्तुं शक्यते इत्यर्थः) तनौ सर्वतः प्रकाशिते शरीरे । कञ्चुकः अयं निर्मोकः ('कञ्चुको वारवाणे स्यात् निर्मोकेऽपि च' इति मेदिनी) ('केंचुलि' इति हिन्दीभाषायां प्रसिद्धः) । नैवालोक्यते काका सर्वाङ्गीणः कञ्चुकः स्पष्टं दृश्यते इति द्योत्यते। जल्पतः भाषणं कुर्वतः एव । मे मम द्वे अपि जिह्वे न गणिते नैव लक्षिते। सर्पा वै द्विजिह्वा भवन्ति। अतः जिह्वायाः द्वयेन भाषमाणस्य मम नागत्वं सर्वथाऽनुमेयमित्यर्थः । नामेति कुत्सितं ते मौढ्यं व्यसनेऽपि हासावहमित्यर्थः । अन्यच्च तीव्रविषाग्निधूमपटलव्याजिह्वारत्नत्विषः तीव्रस्य तीक्ष्णतरस्य । विषाग्निधूमस्य विषधरस्य मम मुखात् निःसरतः विषवह्निधूमस्य । पटलेन समूहेन व्याजिह्वा वक्रीकृताः रत्नानां शिरःस्थितानां मणीनां त्विषः कान्तयः यासां तथाभूताः । सर्पाणां शिरसि मणीनां सद्भावस्तु प्रसिद्ध एव । तथा चोक्तं —

करीन्द्रजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके तेषां तु शक्त्युद्भवमेव भूरि ॥
(कुमारसम्भवस्य १ स० ६ प० सञ्जीविन्यां मल्लिनाथः ।)

छाती में स्वस्तिक चिह्न को भले ही छोड़ दो परन्तु समग्र शरीर पर रहने वाले यह कञ्चुक (केंचुलि) को क्या तुम नहीं देख रहे हो । (जीमूतवाहन की छाती में स्वस्तिक का चिह्न था, यदि उसे गरुड़ ने न देख पाया तो न सही। परन्तु शङ्खचूड़ की केंचुल को तो अवश्य देखा होगा) जब मैं बोल रहा था, तब तुमने दो जीभों को नहीं गिना क्या ? (दो जीभ तो सर्पों की ही होती हैं, मनुष्यों को नहीं) । तीव्र विषाग्नि के धुएँ से मलिन हुई रत्न प्रभा को

नैता दुःसहशोकशूत्कृतमरुत्स्फीताः*फणाः पश्यसि ?॥१८॥

गरुडः । [उभौ निरूप्य शङ्खचूडस्य फणां दृष्ट्वा] । तत् कः खलु मया व्यापादितः ?

शङ्ख । विद्याधरवंशतिलको जीमूतवाहनः । कथमकारुणिकेन त्वया इदमनुष्ठितम् ?

गरुडः । अये अयमसौ विद्याधरकुमारो जीमूतवाहनः !!

मेरौ मन्दरकन्दरासु हिमवत्सानौ महेन्द्राचले

दुस्सहशोकशूत्कृतमरुत्स्फीताः दुस्सहेन सोढुं दुःखावहेन । शोकेन पुरतो व्यापाद्यमानमहापुरुषस्येतस्य मरणजन्यन दुःखेन । यत् शूत्कृत नागजात्युचितं शूशूकरणं । तदुयुक्तेन मरुता श्वासवायुना स्फीताः विकृतप्रान्तभागाः तिस्रः (यद्येका तर्हि अनवधानेन न दृष्टेति वक्तुं शक्यते) एताः फणाः नागोचितान् भोगाख्यान् चिह्नविशेषान् किं न पश्यसि । पश्चस्येवेति भावः । कञ्चुकस्य सर्वाङ्गेषु सद्भावात्, जिह्वाया द्वयेन, विषाग्निधूमेन मलिनीकृतानां तिसृणां फणानाञ्चोपलब्ध्या, अहमेव वासुकिना तवाहारार्थं प्रेषितो नायः, नायमिति भावः । अत्र काकुवक्रोक्तिः । तल्लक्षणं यथा—

अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद्यदि ।

अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्ततो द्विधा ॥ शार्दूलविक्रीडितम्॥१८॥

गरुडो जीमूतवाहनस्य स्तुतिकलापं वर्णयति 'मेरौ' इत्यादि—

अये आश्चर्यम् । अयमेव विद्याधराणां कुमारः जीमूतवाहनः यस्य मेरौ मेरुपर्वते । मन्दरकन्दरासु मन्दराचलस्य गुहासु । हिमवत्सानौ हिमाचलस्य शिखरे ।

धारण करने वाली, दुःसहशोक से सू सू करने के कारण वायु से फूलजाने वाली इन तीनों फणाओं को क्या तुम नहीं देख रहे हो ? (शरीर में केंचुल, दो जीभ तथा फणाओं का होना नाग होने की सूचना दे रहा है) ॥ १८ ॥

गरुडः—(दोनों को अच्छी तरह देख कर शङ्खचूड की फणा देखकर) मैंने किसे मार डाला है ?

शङ्खचूडः—विद्याधरों के वंश के तिलक जीमूतवाहन को । दया—हीन हो तुमने ऐसा क्यों किया !

गरुडः—ऐ ! क्या यही विद्याधर कुमार जीमूतवाहन हैं जिनकी:—

मेरु पर्वत पर, मन्दर कन्दराओं में, हिमालय की उन्नत प्रदेशों में, इन भिन्न भिन्न स्थानों

---

* पीड़ा—ग ।

कैलासस्य शिलातलेषु मलयप्राग्भारदेशेष्वपि ।
*उद्देशेष्वपि तेषु तेषु बहुशो यस्य श्रुतं तन्मया ।
लोकालोकविचारिचारणगणैरुद्गीयमानं यशः ॥ १९ ॥

महेन्द्राचले महेन्द्रपर्वते कैलासस्य शिलातलेषु पर्वतेषु । मलयप्राग्भारदेशेष्वपि मलयाचलस्य प्राग्भारदेशाः उन्नताः ये शिखरप्रदेशाः तेषु अपि ["प्राग्भारः उत्कर्षे परभागे पर्वताग्रभागे च" इति] अत्र मेरुहिमवन्तौ वर्षपर्वतौ । महेन्द्रमलयौ कुलपर्वतौ । यथोक्तं—

हिमवान् हेमकूटश्च निषधो मेरुरेव च । चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्वताः ॥
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥

अन्येषु तेषु तेषु उद्देशेषु स्थानेषु । लोकालोकविचारिचारणगणैः । लोकालोकः 'लोकालोकौ प्रकाशान्धकारौ अत्र स्तः' इति चक्रवालनामा पर्वतविशेषः ['लोकालोकश्चक्रवालः' इत्यमरः । 'लोकालोकश्चक्रवालो लोकान्ताद्रिः पराचलः' इति वैजयन्ती] "लोकालोक इति समाख्या यदनेनाचलेन लोकालोकस्यान्तर्वर्तिनाऽवस्थाप्यते"—इति भागवते । 'सप्तद्वीपवत्या भूमेः प्राकारभूतो गिरिर्लोकालोकः' इत्यमरटीकायां महेश्वरः । रघुवंशेऽपि कालिदासेन पर्वतोऽयं नाम्ना निर्दिष्टः—"प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः"] तस्मिन् विचारिणः गमनशीलाः ये चारणाः यशोगानपरायणाः देवयोनिविशेषाः देवानामाशाकराः लोकतन्त्रनिरीक्षकाः । तेषां गणैः समूहैः उद्गीयमानं उच्चैः स्वरेण गीयमानं । यशः लोकोत्तरा कीर्तिः । मया बहुशः अनेकवारं श्रुतम् । विदितभुवनत्रयवृत्तान्तानां चारणानां चमत्कारि यशः कथमन्येन न गीयते इति सूचयता गरुडेन नायकस्य त्रिभुवनप्रख्यातत्वं सुतरामुपन्यस्तं भवति । शार्दूलविक्रीडितम् ॥ १९ ॥

मैं भी मैंने कीर्ति बहुत बार सुनी है, जिसे लोकालोक पर्वत (१) पर विचरण करने वाले चारण के समूह उच्च स्वर से गाया करते हैं ॥ १९ ॥

* दिक्कुञ्जेषु च—ग ।

(१) पुराणों में वर्णन किया गया है कि यह (भूमण्डल) पृथ्वी एक बड़े भारी पर्वत से घिरी हुई है, जिसके एक तरफ 'लोक' है और दूसरी ओर 'अलोक', एक तरफ प्रकाश रहता है और दूसरी ओर अन्धकार । इसी पर्वत को 'लोकालोक' कहते हैं । इसका 'चक्रवाल' भी नाम है । विशेष वर्णन के लिये संस्कृत टीका देखिये ।

सर्वथा महत्यद्दः पङ्के निमग्नोऽस्मि ।

नायकः । भोः फणिपते ! किमेवमुद्विग्नोऽसि ?

शङ्खचूडः । किमस्थानमिदमावेगस्य ?

स्वशरीरेण शरीरं तार्क्ष्यात् परिरक्षता मदीयमिदम् ।
युक्तं नेतुं भवता पातालतलादपि तलं माम् ॥ २० ॥

गरुडः । अये ! करुणार्द्रचेतसा अनेन महात्मना अस्मदुग्रासगोचर-पतितस्यास्य फणिनः प्राणान् रक्षितुं स्वदेह आहारार्थमुपनीतः। तन्म-

---

भोः फणिपते इति । भोः फणिपते ! शङ्खचूड ! किं केन हेतुना एवं उद्विग्नोऽसि व्याकुलहृदयोऽसि ।

किमिति । किं इदं पुरतस्त्वद्विनाशरूपं वृत्तं आवेगस्य उद्वेगस्य अस्थानं अनुचितं स्थलं वर्तते ? अकारणमित्रे त्वयि पुरतो विनश्यति, यदहं समाकुलोऽस्मीति तत् किमस्वाभाविकम् ?

दुरवस्थायामस्यां निजव्याकुलत्वमेव समर्थयति स्वशरीरेणेत्यादिना—स्वशरीरेण लोकोपकारव्रतिना निजदेहेन इदं मदीयं निस्सारं शरीरं । तार्क्ष्यात् मम सहजशत्रोः गरुडात् । परिपालयता सम्यक् रक्षयता भवता । पातालतलादपि अधुनाऽस्माकं निवासभूतात् अधोभुवनादपि ('अधोभुवनपातालं बलिसद्म रसातलम्' इत्यमरः) तलं निम्नं । नरकमिति यावत् । मां नेतुं प्रापयितुं किं युक्तं किमुचितम् ? नैव युक्तमिति काक्वा प्रकाश्यते । त्वमेव मे अकारणो बन्धुः, ततश्च यदि मां ऊर्ध्वलोकं नयसि, तर्हि सत्यमेव मदीत रक्षणं विहित स्यात् । सम्प्रति नश्वरस्यैतस्य मांसपिण्डस्य कृते लोकानुग्रहसमर्थं स्वशरीरं ददत् त्वं कथं मां निम्नतरं नरकं नयसि । अतो मे सम्भ्रमादिकं समुचितमेवेत्याशयः । आर्या ॥१०॥

अये इति । बोधिसत्त्वः, बोधिः ज्ञानं सत्त्वं स्वभावो यस्य असौ बोधिसत्त्वः । यो हि महात्मा संसारस्यानित्यतां ज्ञात्वा करुणानिविष्टचेताः प्राणिनामुपकारं

सब तरह से मैं इस पापरूपी पङ्क में डूब गया हूं ।

नायकः—ऐ नाग ! ऐसे तुम उद्विग्न क्यों हो ?

शङ्खचूडः—क्या यह आवेग के लिये अनुचित स्थान है ।

अपना शरीर देकर आपने मेरे शरीर को गरुड से बचा लिया है । मुझे पाताल के भी नीचे लोक-नरक-में ले जाना आपको क्या उचित है ? ॥ २० ॥

गरुडः—इस दया से आर्द्रचित्त वाले इस महात्माने मेरे भक्षणार्थ आये हुये नाग के

हदकृत्यमेतन्मया कृतम् । किं बहुना, बोधिसत्त्व एवायं व्यापादितः । तस्य महतः पापस्याग्निप्रवेशाद्ऋते नान्यत् प्रायश्चित्तं पश्यामि । तत्क्व नु खलु वह्निं समासादयामि ? [दिशः पश्यन्] । अये ! अमी केऽपि गृहीताग्नय इत एवागच्छन्ति । तद् यावदेतान् प्रतिपालयामि ।

शङ्ख ! कुमार ! पितरौ ते प्राप्तौ ।

नायकः । [ससम्भ्रमम्] । शङ्खचूड ! समुपविश्यानेनोत्तरीयेणाच्छादितशरीरं कृत्वा धारय माम् । अन्यथा कदाचिदीदृशं सहसैवं मां दृष्ट्वा पितरौ जीवितं जह्याताम् ।

शङ्खचूडः । [पार्श्वपतितमुत्तरीयं गृहीत्वा तथा करोति] ।

[ततः प्रविशति पत्नीवधूसमेतो जीमूतकेतुः] ।

जीमूतकेतुः । [सास्रम्] । हा पुत्र जीमूतवाहन !—

आत्मीयः पर इत्ययं खलु कुतः सत्यं कृपायाः क्रमः ?

तनोति स बोद्धशास्त्रं बोधिसत्त्वनाम्ना व्यपदिश्यते । स एव मया व्यापादितः विनाशितः ।

जीमूतकेतुः पुत्रमरणेन जातं स्वकुलक्षयं प्रदर्शयन्नात्मीयां विक्लवतां सूचयति 'आत्मीयः' इत्यादिना—

अयं आत्मीयः स्वजनः, अयं जनः परः स्वस्माद्भिन्नः इत्ययं कृपायाः दया-

---

प्राणों की रक्षा कर अपने शरीर को (मेरे) भोजन के लिये अर्पित कर दिया है । इसलिये मैंने इनका बहुत बड़ अपकार किया है अधिक कहने से क्या ? बोधिसत्त्व ही को मैंने मार डाला । अतएव इस महापाप का प्रायश्चित्त अग्निमें प्रवेशकर जल मरने के सिवाय और कुछ दूसरा नहीं देख रहा हूं । परन्तु मुझे आग कहां मिल सकती है । (दिशाओं को देखता हुआ) अये ! कई लोग अग्नि को लेकर इधर ही आ रहे हैं । तबतक मैं इनकी प्रतीक्षा करता हूं ।

शङ्खचूडः—कुमार ! आपके माता—पिता आये हैं ।

नायकः—(जल्दी के साथ) शङ्खचूड ! आकर इस चादर से मेरे शरीर को ढंककर मुझे पकड़े रहो । अथवा नहीं तो कदाचित् मुझे इस दशा में देखकर माता पिता अपने प्राण छोड़ दें ।

शङ्खचूडः—(पासही में गिरे हुये चादर को लेकर वैसाही करता है ।) (इसके बाद पत्नी और पुत्रवधू के साथ जीमूतकेतु प्रवेश करता है ।)

जीमूतकेतुः—(रोता हुआ) हा पुत्र जीमूतवाहन !

यह ठीक है कि कृपा करने में इसका विचार नहीं किया जाता कि यह मनुष्य अपना

किं रक्षामि बहून् किमेकमिति ते जाता न चिन्ता कथम् ?
तार्क्ष्यात् त्रातुमहि स्वजीवितपरित्यागं त्वया कुर्वता
येनात्मा पितरौ वधूरिति हतं निःशेषमेतत्कुलम् ॥ २१ ॥

वृद्धा । [मलयवतीमुद्दिश्य] । जादे ! विरम मुहुत्तअं । अविरतनिवडंतवाप्पबिंदूहिं अहिहवीअदि अअं अग्गी । (जाते ! विरम मुहूर्त्तकम् । अविरतनिपतद्बाष्पबिन्दुभिरभिभूयतेऽयमग्निः ।)

[सर्वे परिक्रामन्ति] ।

याः क्रमः प्रकारः कुतः ? [अयं निजः परो वेति गणना लघुचेतसामेव हृदि पदं लभते ॥ अनुग्रहाक्रान्तचित्तानामुदारचरितानां तु वसुधैव कुटुम्बत्वेन परिणमतीति यत् तत् सत्यं तवाप्यवसायं हृदयेनानुमोदयामीत्यर्थः] परन्तु किं एकं नागं अथवा बहून् जीवितरक्षणेन पित्रादीन् अनेकान् रक्षयामीति चिन्ता प्राणदानकाले तव कथं न जाता ? येन हेतुना तार्क्ष्यात् गरुडात् ('भीत्रार्थानांभयहेतुरिति' सूत्रेण अपादानत्वात् पञ्चमी) अहि नागमेकं त्रातुं । स्वजीवितपरित्यागं निजप्राणव्ययं विदधता कुर्वता त्वया । आत्मा स्वदेहः, पितरौ मातापितरौ, वधूः नवपरिणीतेयं दयिता, इत्येवं प्रकारेण निश्शेषं समग्रं एतत् कुलं चक्रवर्तिकुलं हतं नाशितम् । अस्मद्भाग्यदोषेण कुलाङ्कुरत्वेन चिन्तितस्त्वमेव कुलोच्छेदहेतुर्जातः इत्यर्थः । शार्दूलविक्रीडितम् ॥ २१ ॥

जादे इति । अविरतनिपतद्भिः अविरतं निरन्तरं निपतद्भिः अश्रुबिन्दुभिः बाष्पकणैः । अयं तव हस्ते धृतः अग्निः अभिभूयते निर्वाप्यते शान्तो भवतीत्यर्थः । अतः रोदनात् मुहूर्तकमपि क्षणमात्रमपि तावत् विरम ।

सम्बन्धी है या कोई दूसरा है । परन्तु तुम्हें इस बात की चिन्ता क्यों नहीं हुई—तुमने क्यों नहीं विचारा—कि मैं बहुतों की रक्षा करूँ या एक नाग को बचाऊँ (प्राण रखने से कुटुम्ब के कई व्यक्तियों की रक्षा होगी और प्राण देने से केवल एक ही नागकी) । गरुड़ से इस नाग को बचाने के लिये तुमने अपने प्राणों का त्याग कर अपने को, मातापिता को, नई विवाहिता स्त्री को, इस प्रकार समस्त कुल को नष्टकर डाला (तुम्हारे लिये यह पूरा कुल नष्ट हो रहा है) ॥ २१ ॥

वृद्धा—(मलयवती की ओर निर्देश करके) बेटी ! एक क्षण के लिये ठहरो । लगातार आँसू के बूँदों के गिरने से यह अग्नि शान्त (बुझ) हो रही है ।

(सब—जाते हैं) ।

जीमू० । हा पुत्र जीमूतवाहन ।

गरुडः । [श्रुत्वा] । हा जीमूतवाहन ! इति ब्रवीति । तद् व्यक्तम् अस्य पिता । तत् किमेतदोयेनाग्निना आत्मानमुद्दीपयामि ? न शक्नोम्यस्य पुत्रघातान्लज्जया मुखं दर्शयितुम् । अथवा किमग्निहेतोः पर्य्याकुलोऽस्मि ? समीपस्थ एवास्मि जलनिधेः । तद् यावद्विदानीम् ।—

ज्वालाभङ्गैस्त्रिलोकप्रसनरसचलत्कालजिह्वाप्रकल्पैः
सप्तद्भिः सप्त सर्पिष्कणमिव कवलीकर्तुमीशे समुद्रान् ।
स्वैरेवोत्पातवातप्रसरपटुतरैर्धुन्वते पक्षवातै-

प्रखरतरं जाज्वल्यमानोऽयत्नसाध्यो वडवानलः समीपस्थ एव वर्तते इति दर्शयन्नाह ज्वालाभङ्गैरिति—

त्रिलोकीप्रसनरसचलत्कालजिह्वाप्रकल्पैः । त्रयाणां लोकानां समाहारः इति त्रिलोकी त्रिभुवनं । तस्याः प्रसने पातालभूम्याकाशानां कवलीकरणे यो रसः अभिलाषः । तेन चलन्ति इतस्ततः सतृष्णं परिभ्रमन्ति । कालस्य मृत्योः जिह्वा इव जिह्वाप्रभागाः । तेभ्यः ईषन्न्यूनैः ('ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति सूत्रेण कल्पप् प्रत्ययः) । संसारप्रलयोद्यतैः कालजिह्वाग्रैरिवातिभयङ्करैरित्यर्थः । सर्पद्भिः परिचलद्भिः ज्वालातरङ्गैः । सप्त समुद्रान् घृतदुग्धादीन् सर्वान् जलनिधीन् एकीकृत्यस्य पिष्कणमिव घृतबिन्दुमिव । ('घृतमाज्यं हविः सर्पिः' इत्यमरः) कवलीकर्तुं ग्रसितुं ईशे समर्थे (सप्तम्यन्तं पदमेतत्) । (यथा वह्निः घृतस्य बिन्दुमेकं मुहूर्तमात्रेण विनाशयति, तयैवायं वडवानलः चलद्भिः ज्वालातरङ्गैः सप्त समुद्रानपि क्षणात् भस्मसात् कर्तुं शक्नोतीति सरलार्थः) स्वैरेव मेव (गरुडस्येति यावत्) । उत्पातवातप्रसरपटुतरैः उत्पाते प्रलये ये वाताः

जीमूतकेतुः—हा पुत्र ! जीमूतवाहन !

गरुडः—(सुनकर) यह (जीमूतकेतु) 'हा जीमूतवाहन !' ऐसा कह रहा है । इससे यह स्पष्ट है कि यह इसका पिता होगा । तो क्या मैं इस अग्नि से अपने को जला डालूँ ? इस (जीमूतकेतु) के पुत्र को मार कर अब मैं लज्जा के मारे उन्हें मुख दिखाना नहीं चाहता । अथवा—मैं समुद्र के समीप में ही हूं । इसलिये इस समय—

तीनों लोगों को लीलजाने के आनन्द से चलने वाली यमराज की जीभ के अग्रभाग की भांति, फैलने वाली ज्वाला की लहरों से सातों समुद्रों को घी के बूँद के तरह भस्म कर देने वाले तथा प्रलयकाल के वायु के प्रसार से भी अधिक वेगवान् मेरे पंखों की हवा से संदीपित

रस्मिन् कल्पावसानज्वलनभयकरे वाडवाग्नौ पतामि ॥ २२ ॥

[इत्युत्थातुमिच्छति]।

नायकः। भोः पक्षिराज! अलमनेनाध्यवसायेन, नायं प्रतीकारोऽस्य पाप्मनः।

गरुडः। [जानुभ्यां स्थित्वा कृताञ्जलिः]। भो महात्मन्! कस्तर्हि कथ्यताम्।

नायकः। प्रतिपालय क्षणमेकम्। पितरौ मे प्राप्तौ। यावदेतौ प्रणमामि।

गरुडः। एवं क्रियताम्।

एकत्रीभूताः प्रचण्डमरुतः। तेषां प्रसरः ब्रह्माण्डमभिव्याप्य प्रसरणं। तस्मात् पटुतरैः अधिकैः। पक्षवातैः उड्डयने पक्षवेगात् सञ्जातैः वायुभिः। धुक्षिते सुतरां दीपिते 'वर्धिते' इति यावत्। कल्पावसान ज्वलनभयकरे कल्पावसने यो ज्वलनः अग्निः तद्वत् भयकरे भीषणे। अस्मिन् वाडवाग्नौ प्रचण्डतरे वडवानले। पतामि स्वयं स्वं शरीरं पातयामि। एवं वाडवानलस्योत्कर्षातिशयकथनेन पतनसमय एव सद्यो भस्मीभावात् प्रायश्चित्ते कृतार्थता प्रकाश्यते। अत्र वाच्यस्य वडवानलस्यानुगुणा ओजोव्यञ्जकपदावली कविना स्थाने प्रयुक्ता। अनुप्रासालङ्कारः। तल्लक्षणं यथा साहित्यदर्पणे—"अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्"॥ सग्धरावृत्तम् ॥ २२ ॥

किये गये तथा प्रलय की अग्नि की भांति भयङ्कर इस वडवानल में मैं स्वयं गिर जाऊंगा। (दूसरे उपाय से क्या लाभ है, इसी वडवाग्नि में मैं अपने को जला डालूंगा) ॥ २२ ॥

(उड़ना चाहता है)

नायकः—ऐ पक्षियों के राजा गरुड़! ऐसा काम मत कीजिये, इस पाप का यह प्रतीकार नहीं है।

गरुडः—(घुटना टेककर बैठ कर हाथ जोड़कर) ऐ महात्मा! वह कौन है? उसे कहिये।

नायकः—एक क्षण के लिये प्रतीक्षा कीजिये। मेरे माता पिता आ गये इसलिये इन्हें मैं प्रणाम कर लूँ।

गरुडः—ऐसा कीजिये।

जीमूतकेतुः । [दृष्ट्वा सहर्षम्] । देवि ! दिष्ट्या वर्द्धसे । अयमसौ वत्सो जीमूतवाहनो न केवलं म्रियते, प्रत्युत पुरः कृताञ्जलिना गरुडेन शिष्येणेव पर्य्युपास्यमानस्तिष्ठति ।

वृद्धा । महाराअ ! किअत्थम्हि । अक्खदसरीरस्स एव्व पुत्तअस्स मुहंदिट्ठं (महाराज ! कृतार्थोऽस्मि । अक्षतशरीरस्यैव पुत्रकस्य मुखं दृष्टम् ।)

मलयवती । अहं अज्जउत्तं पेक्खिअन्तोवि असंभावणीयं ति करिअ ण पत्तिआमि । (अहमार्य्यपुत्रं प्रेक्षमाणाप्यसम्भावनीयमिति कृत्वा न प्रत्येमि ।)

जीमूतकेतुः । [उपसृत्य] । वत्स ! एह्येहि, परिष्वजस्व माम् ।

नायकः । [उत्थातुमिच्छन् पतितोत्तरीयो मूर्च्छति] ।

शंखचूडः । कुमार ! समाश्वसिहि समाश्वसिहि ।

जीमू । हा वत्स ! कथं मां दृष्ट्वा*पि परित्यज्य गतोऽसि ?

वृद्धा । हा पुत्तअ ! कहं वाआमेत्तकेण वि तुए ण संभाविदम्हि ? । (हा पुत्रक ! कथं वाङ्मात्रेणापि त्वया न सम्भावितास्मि ?)

देवीति । न केवलं, म्रियते जीवितः तिष्ठति । प्रत्युत वैपरीत्येन कृताञ्जलिना गरुडेन पर्युपास्यमानः सेव्यमानः तिष्ठति ।

जीमूतकेतुः—(देखकर हर्ष के साथ) देवि ! तुम भाग्यवती हो । यह पुत्र जीवित ही नहीं है बल्कि सामने ही शिष्य की तरह गरुड़ हाथ जोड़ कर इसकी सेवा कर रहा है ।

वृद्धा—महाराज ! मैं कृतार्थ हो गई । मैंने अपने जीवित पुत्र का मुख देख लिया ।

मलयवती—मैं आर्यपुत्र (पति जीमूतवाहन) को देख कर भी इसे असंभव समझ कर विश्वास नहीं करती हूँ ।

जीमूतकेतुः—(पास जाकर) पुत्र ! आवो, आवो । मुझे आलिङ्गन करो ।

नायकः—(उठना चाहता है किन्तु चद्दर के गिरने के साथ मूर्छित हो जाता है ।)

शङ्खचूड—कुमार ! सचेत हो । सचेत हो ।

जीमूतकेतुः—हा पुत्र ! क्यों मुझे देखकर भी छोड़कर चले गये थे ?

वृद्धा—हाय पुत्र ! क्या तुम्हारे द्वारा वचन से भी मैं पूजनीय नहीं हूँ ?

---

*परिष्वङ्ग—ग ।

मल । हा अज्जउत्त ! कहं गुरुअणो वि दे ण पेक्खिदव्वो ? । (हा आर्य्यपुत्र ! कथं गुरुजनोऽपि ते न प्रेक्षितव्यः ?

[सर्वे मोहं गच्छन्ति] ।

शंख । हा शङ्खचूडहतक ! कथं गर्भे एव न विपन्नोऽसि, येनैवं क्षणे क्षणे मरणातिगं दुःखमनुभवसि ?

गरुडः । सर्वमिदं मम नृशंसस्यासमीक्ष्यकारितायां विजृम्भितम् । तदेवं तावत् करोमि । [पक्षाभ्यां वीजयन्] । भो महात्मन् ! समाश्वसिहि समाश्वसिहि ।

नायकः । [समाश्वस्य] । शङ्खचूड ! समाश्वासय गुरून् ।

शंख । तात ! समाश्वसिहि समाश्वसिहि । अम्ब ! समाश्वसिहि समाश्वसिहि । समाश्वसितो जीमूतवाहनः । किं न पश्यथ । प्रत्युत युष्मानेव समाश्वासयितुमुपविष्टस्तिष्ठति ।

[उभौ समाश्वसितः] ।

हा शङ्खचूडेति । गर्भे एव कथं न विपन्नोऽसि मृतोऽसि । मरणातिगं मरणमतिगच्छतीति तत्, मृत्युमप्यतिक्रम्य विद्यमानं दुःखमनुभवसि ।

सर्वमिति । सर्वं मम नृशंसस्य जनानां प्राणविहिंसकस्य ("नृशंसो घातुकः क्रूरः पापः" इत्यमरः) असमीक्ष्यकारितायाः न समीक्ष्य विचारमन्तरेण कार्यकरणस्य विजृम्भितं फलमित्यर्थः ।

मलयवती—आर्यपुत्र ! गुरुजनों को भी तुम क्यों नहीं देखते हो ?

(सब लोग मूर्छित हो जाते हैं)

शंखचूडः—हे घातक शङ्खचूड । तू गर्भ में ही क्यों नहीं मरगया जिससे इसप्रकार क्षण २ में मरण से भी अधिक दुःख का अनुभव कर रहा है ।

गरुडः—यह सब मेरे ही जैसे पापी मनुष्य के न विचार कर काम करने का फल है । इसलिये मैं ऐसा करता हूँ (अपने पाँखों से पंखा करता हुआ) ऐ महात्मा ! धीरज धरो । धीरज धरो ।

नायकः—(सचेत होकर) शङ्खचूड ! माता—पिता को धीरज बँधावो ।

शङ्खचूडः—तात ! धीरज धरिये, धीरज धरिये । माता ! धीरज धरिये । धीरज धरिये । जीमूतवाहन सचेत हो गये हैं । क्या आप लोग (दोनों) नहीं देखते हैं कि जीमूतवाहन आप ही लोगों के धीरज बंधाने के लिये उठ बैठे हैं ।

(दोनों सचेत होते हैं)

वृद्धा । पुत्त ! कहं पेक्खं ताणं ज्जेव्व अम्हाणं किदंतहदएण अवहारी असि ?(पुत्र कथं प्रेक्षमाणानामेवास्माकं कृतान्तहृतकेनापहियसे ?)

जीमूतकेतुः । देवि ! मैवममङ्गल्यवादिनी भव । म्रियत एवायुष्मान् । तद् वधूः समाश्वास्यताम् ।

वृद्धा । [मुखं वस्त्रेणावृत्य रुदती] । पडिहदममंगलम् । ण रोइस्सम् । मलअवदि ! समस्सस ! वच्छे ! उट्ठेहि उट्ठेहि । वरं एत्ति अवेलं तुमं भत्तुणो मुहं पेक्ख (प्रतिहतममङ्गलम् । न रोदिष्यामि । मलयवति ! समाश्वसिहि। वत्से ! उत्तिष्ठ उत्तिष्ठ । वरमेतस्यां वेलायां त्वं भर्तुर्मुखं प्रेक्षस्व ।)

मलयवती । [समाश्वस्य] । हा अज्जउत्त ! (हा आर्य्यपुत्र !)

वृद्धा । [मलयवत्या मुखं पिधाय] । वच्छे मा ! एव्वं करेहि । पडिहदं क्खु एदं । (वत्से ! मैवं कुरु । प्रतिहतं खल्वेतत् ।)

जीमूतकेतुः [सास्रमात्मगतम्] ।—

विलुप्तशेषाङ्गतया प्रयातान् निराश्रयत्वादिव कण्ठदेशम् ।

पुत्तेति । प्रेक्षमाणानामेवास्माकं त्वामवलोकयत एवास्मान् अनादृत्य । "षष्ठी चानादरे" इत्यनादरे षष्ठी । कृतान्तेन मृत्युना अपहियसे अपनीयसे ।

गरुडेन समक्ष व्यापाद्यमान पुत्रं निरीक्षमाणोऽपि प्राणान् धारयामीत्यहो मे करुणाराहित्यमिति व्यनक्ति जीमूतकेतुः विलुप्तेत्यादिना—

विलुप्तशेषाङ्गतया विलुप्तानि उत्कृत्य भक्षितानि । शेषाणि कण्ठं विहाय इतराणि अङ्गानि अवयवाः यस्य तस्य भावः तया । अन्येषामङ्गानां विरहादिति

वृद्धा—पुत्र ! हम लोगों के देखते हुये ही मृत्यु तुम्हें क्यों ले जा रही है ।

जीमूतकेतुः—देवि ! ऐसा अमंगल शब्द मत कहो । पुत्र अभी आयुष्मान् है (आयु को धारण कर रहा है) । इसलिये वधू को धीरज बँधावो ।

वृद्धा—(मुख को कपड़े से ढककर रोती हुई) अमगल नष्ट हो । न रोऊंगी । मलयवति! धीरज धरो । पुत्री ! उठो । उठो । तुम इस समय अपने पति के मुख को देखो ।

मलयवती—(धीरज धरकर) हा आर्यपुत्र !

वृद्धा—(मलयवती के मुख को बन्द करके) पुत्री ! ऐसा मत करो । अमङ्गल नष्ट हो ।

जीमूतकेतुः—(आँसू बहाता हुआ, आपही आप) समस्त अङ्गों के नाश हो जाने के कारण इसके प्राण मानो आश्रय हीन हो कण्ठ देश में चले आये हैं । कण्ठ ही में प्राण

प्राणांस्त्यजन्तं तनयं निरीक्ष्य कथं न *पापः शतधा व्रजामि ? ॥२३॥

मलयवती । हा अज्जउत्त ! अदिदुक्खरकारिणी क्खु अहं, जा ईरिसं अज्जवत्तं पेक्खंती अज्जवि जीविअ ण परिच्चआमि । (हा आर्य्यपुत्र ! अतिदुष्करकारिणी खल्वहं, या ईदृशमार्यपुत्रं प्रेक्षमाणा अद्यापि जीवितं न परित्यजामि ।)

वृद्धा । [नायकस्याङ्गानि स्पृशन्ती गरुडमुद्दिश्य] । णिसंस ! कहं, दाणिं तुए एदं आपूरिअमाणणवरूवजोव्वणसोहं तं जेव्व पदावदत्थं पुत्तअस्स मे सरीरं किदम् ? (नृशंस ! कथमिदानीं त्वया एतदापूर्यमाणनवरूपयौवनशोभं तदेवैतावदवस्थं पुत्रकस्य मे शरीरं कृतम् ?)

भावः । निराश्रयत्वात् नास्ति आश्रयो येषां तेषां भावः तद्धेतुनेव । निवासार्थं स्थानाभावादिति भावः । कण्ठदेशं प्रयातान् बहिर्निःसरणाय कण्ठं प्राप्तान् प्राणान् । वहन्तं धारयन्तं । तनयं निरीक्ष्य स्वपुत्रं आसन्नमृत्युं विलोक्य । पापः पापसम्पन्नः (†अर्शादित्वात् अच् प्रत्ययः) अहं कथं शतधा न व्रजामि विदीर्णो न भवामि । स्वसमक्षमेव पुत्रं व्यापाद्यमानं पश्यतो मे हृदयस्फाटनमेवोचितमिति भावः । उपजातिः छन्दः ॥ २३ ॥

नृशंसेति । हे नृशंस ! क्रूरहृदय ! आपूर्यमाणनवरूपयौवनशोभं आपूर्यमाणानि नवं रूपं, यौवनशोभाश्च यौवनसुलभाः कान्तयश्च यस्मिन् तथाभूतं (युवावस्थया शोभासमन्वितमित्यर्थः) । मे पुत्रकस्य शरीरं कथं त्वया एतदवस्थं चक्ष्वा निर्भिद्य नष्टप्रायं कृतं विहितम् ?

बस रहे हैं) । उन प्राणों को छोड़ते हुये पुत्र को देखकर मुझ पापी के प्राण सौ टुकड़े क्यों नहीं हो रहे हैं ? (पुत्र को छोड़ते हुये भी देखकर मैं स्वस्थ बना हूं । मेरे हृदय को तो टूक टूक हो जाना चाहिये ।) ॥ २३ ॥

मलयवती—हा आर्यपुत्र ! मैं अत्यन्त अभागिनी हू । मैं तुम्हें इस बुरी अवस्था में देख रही हूं परन्तु तो भी मेरे प्राण नहीं निकलते हैं ।

वृद्धा—(**नायक के अङ्गों को छूती हुई गरुड़ को उद्देश करके**) क्रूर ! नयी जवानी तथा शोभा से युक्त मेरे पुत्र के सुन्दर शरीर को तुमने ऐसा क्यों किया ?

---

*तापात्—ग ।

नायकः । अम्ब ! मा मैवम् । किमनेन कृतम् ? ननु पूर्व्वमप्येतदीदृशमेव परमार्थतः । पश्य,—

मेदोऽस्थिमांसमज्जाऽसृक्सङ्घातेऽस्मिंस्त्वचाऽऽवृते ।
शरीरनाम्नि का शोभा सदा बीभत्सदर्शने ? ॥ २४ ॥

अम्बेति । परमार्थतः तात्त्विकदृष्ट्यावलोकने इदं शरीरं पूर्वमपि ईदृशं बीभत्साकारं वर्तते ।

तामेव सहजातां बीभत्सां दशां प्रदर्शयति जीमूतवाहनो 'मेदः' इत्यादिना—

मेदोस्थिमज्जामांसासृक्सङ्घाते । मेदः वपा, अस्थीनि कङ्कालः, मज्जा अस्थिगतः सारः, मांसः, असृक् रुधिरं, एतेषां सङ्घाते सञ्चये । त्वचावृते उपरि त्वचा चर्मणा आवृते सर्वतः आच्छादिते । सदा बीभत्सदर्शने जुगुप्साव्यञ्जके अस्मिन् शरीरनाम्नि मनुष्यदेहरूपे वस्तुनि । का शोभा ? नैव किञ्चित् सौन्दर्यं प्रतीयते । (मांसमज्जादिभिरन्विते चर्माच्छन्ने शरीरे शोभायाः सत्तैव नास्ति, प्रत्युत दर्शनेन जुगुप्सा स्वयमाविर्भवति) । उक्तं च—

यदि नामास्य कायस्य यदन्तस्तद् बहिर्भवेत् ।
दण्डनादाय लोकोऽयं शुनः काकांश्च वारयेत् ॥
मांसं मेदो रुधिरं रोम नखं देहतो विनैकैकम् ।
बीभत्सं संघाते रमणीयमहो विमोहमाहात्म्यम् ॥

शान्तिशतकेऽपि यथा—

समाश्लिष्यत्युच्चैर्घनपिशितपिण्डं स्तनधिया
मुखं लालाक्लिन्नं पिबति चषकं सासवमिति ।
अमेध्ये क्लेदार्द्रे पथि च रमते स्पर्शरसिको
महामोहान्धाना किमिव रमणीयं न भवति ॥ अनुष्टुप् छन्दः ॥ २४ ॥

नायकः—माता, ऐसा मत कहो, मत कहो । इसने क्या किया है । यह शरीर वास्तव में पहिले भी ऐसा ही था । देखोः—

यह शरीर मेदा, हड्डी, मांस, मज्जा तथा रक्त का समूह है केवल ऊपर से चमड़े से ढका हुआ है । यह सदा बीभत्स है—घृणा उत्पन्न करने वाला है । भला ऐसे शरीर में भी कहाँ शोभा—सुन्दरता—हो सकती है ? ॥ २४ ॥

गरुडः। भो महात्मन्! नरकानलज्वालावलीढमिवात्मानं मन्यमानो दुःखं तिष्ठामि। तदुपदिश्यतां, येन मुच्येऽहमस्मादेनसः।

नायकः। अनुजानातु मां तातः, यावदस्य पापस्य प्रतिपक्षमुपदिशामि।

जीमूतकेतुः। वत्स! एवं क्रियताम्।

नायकः। नतेय! श्रूयताम्।

गरुडः। [जानुभ्यां स्थित्वा कृताञ्जलिः]। आज्ञापय।

नायकः।—

नित्यं प्राणाभिघातात् प्रतिविरम कुरु प्राक्कृते चानुतापं

भोमहात्मन्निति। नरकानलज्वालावलीढ नरकानलानां प्रकृष्टपातकिनां दाहाय प्रचण्डं ज्वलतां नरकाग्नीनां। ज्वालाभिः अवलीढं आस्वाद्यमानं (दह्यमानमित्यर्थः)। आत्मानं स्वदेहं मन्यमानः। [महात्मनस्तव प्राणविनाशात् पापगौरवेण अद्य श्वो वा नरकाग्नौ मे पतनं निश्चितमेव। तच्चिन्तया इदानीमेव स्वशरीरं नरकाग्निकवलितं चिन्तयन्नित्यर्थः]। दुःखं तिष्ठामि कृच्छ्रेण स्थितिं करोमि। एनसः पापात्। ["पापं किल्बिषकल्मषम्। कलुषं वृजिनैनोऽघम्" इत्यमरः]

अनुजानात्विति। पापस्य प्रतिपक्षं प्रतिकूलं पुण्यमिति यावत्।

जीमूतवाहनः पापकर्मणां विनाशाय पुण्याचरणमुपदिशति **नित्यमित्यादिना**—नित्यमनुष्ठीयमानात्। प्राणाभिघातात् प्राणिनां हिंसनात् प्रतिविरम निवर्तस्व। प्रतीपं विरम। [अनुष्ठानक्रमात् व्युत्क्रमणे विरमणक्रमः। प्रथमं हनिष्यामीति बुद्धिः, पश्चादुपक्रमः, पश्चाज्जीवितापनयनमिति क्रमः। विरमणे प्रथमं

गरुड़—ऐ महात्मा! नरक की अग्नि की ज्वाला से भस्मी भूत की तरह अपने को समझकर मैं दुःखी हूँ। मुझे उपदेश दीजिए जिससे मैं इस पाप से रहित हो जाऊँ।

नायकः—पिता जी, मुझे आज्ञा दीजिये। जिससे मैं इस पाप के प्रतिकूल वस्तु का उपदेश कर सकूं।

जीमूतकेतुः—वत्स! ऐसा करो।

नायकः—गरुड़! सुनो।

गरुड़ः—(घुटने के बल बैठकर हाथ जोड़कर) आज्ञा दीजिये।

नायकः—प्रतिदिन प्राणियों की हिंसा से अपने को रोक रखो—रुक जाओ। पहले किये

यत्नात् पुण्यप्रवाहं समुपचिनु दिशन् सर्वसत्त्वेष्वभीतिम् ।
मग्नं येनात्र नैनः फलति *परिमितप्राणिहिंसासमेतद्
†दुर्गाधापारवारेर्लवणपलमिव क्षिप्तमन्तर्हृदस्य ॥ २५ ॥

गरुडः । यदाज्ञापयसि ।—

हिंसाभावः, ततः शस्त्रप्रहाद्यभावः, ततोऽवध्यतावुद्धौ विश्रान्तिरिति प्रक्रियाक्रमेण विरमणमिति प्रतिविरमपदस्य पण्डित्यपूर्णं स्वारस्यमुपदिशन्ति विमर्शिणीकाराः] प्राक्कृते पूर्वं मोहादनुष्ठिते पापकर्मणि । अनुतापं प्रायश्चित्तं कुरु । सर्वसत्त्वेषु प्राणिषु । अभीतिं अभयं दिशन् ददत् । त्वं पुण्यप्रवाहं सन्तानवाहि सुकृतं यत्नात् प्रयत्नमाधाय । समुपचिनु एकत्रीकुरु । येन हेतुना दुर्गाधापारवारेः दुर्गार्धं अतीवागाधं अपारं च वारि जलं यस्मिन् तादृशस्य हृदस्य कासारस्य । अन्तः मध्ये क्षिप्तं निहितं । लवणपलमिव 'पलं कर्षचतुष्टय' मित्यमरवचनात् अल्पपरिमाणवाचकः पलशब्दः । लवणस्याल्पा मात्रा इव । परिमितप्राणिहिंसात्तं परिमितानां अल्पानां प्राणिनां जीवानां हिंसया आत्तं समुत्पादितं (आपूर्वकात् दाधातोः क्तप्रत्ययः) अत एव अल्पप्रयासेन उच्छेदनीयमिति भावः । एतत् एनः पापं (एनः पापापराधयोरिति मेदिनी) अत्र सुकृते मग्नं सत् विरुद्धं फलं नैव फलति । न प्रसूते (यथा अगाधे कासारे क्षिप्तमल्पमात्रं लवणं स्वरूपलोपात् तन्मयतां धत्ते । तथैवाल्पप्रमाणं पापकर्म सुष्ठ्वाचरितेषु पुण्येषु प्रविष्टं क्रमेण तद्रूपतामाधाय स्वरूपं त्यजति, अनिष्टमयं स्वफलं च कदापि नैव प्रसूते इति जीमूतवाहनस्य पुण्यमाहात्म्यवर्णनपुरस्सरः शोभन उपदेशः] चतुर्थचरणे उपमालङ्कारः । स्रग्धरावृत्तम् ॥ २५ ॥

गये कार्य के लिये पश्चात्ताप करो । सब प्राणियों को अभयदान देकर यत्न से पुण्य प्रवाह का संग्रह करो जिससे अथाह तथा विस्तृत तालाब में डाले गये नमक के एक छोटे टुकड़े के तरह परिमित प्राणियों की हिंसा करने से उत्पन्न हुआ यह पाप डूब जाय तथा बुरा फल न फले (अथाह सरोवर में नमक का छोटा टुकड़ा जिस प्रकार डूब जाता है, उसी प्रकार पुण्यप्रवाह में पुराना पाप डूब जायगा । अतः सबको अभयदान देकर पुण्य का संचय करो) ॥ २५ ॥

गरुड़ः—जो आज्ञा दीजिये ।

---

* परिणतं प्राणिहिंसासमुत्थं-ग । † दुर्गाधावारिपूरे-ग ।

अज्ञाननिद्राशयितो भवता प्रतिबोधितः ।
सर्वप्राणिवधादेष विरतोऽद्यप्रभृत्यहम् ॥ २६ ॥

सम्प्रति हि,—

क्वचिद्द्वीपाकारः पुलिनविपुलैर्भोगनिवहैः
कृतावर्त्तभ्रान्तिर्वलयितशरीरः क्वचिदपि ।

एवं प्रबोधितो गरुड उपदेशपरिग्रहं प्रतिज्ञारूपेण प्रकाशयति **अज्ञाननिद्रे-** त्यादिना—

अज्ञाननिद्राशयितः अज्ञानं तत्त्वाग्रहणरूपं । तदेव निद्रा प्रवृत्तिनिवृत्तिविषयेषु विवेकरूपजागररहितत्वेन यत्किञ्चित्कारित्वम् । तया शयितः कर्तव्यविषयेषु सर्वदा विवेकवैधुर्यात् पराङ्मुखः । **अहं भवता** दिव्योपदेशं ददता । **प्रतिबोधितः** ज्ञानाख्यं जागरं प्रापितः । यथा प्रबुद्धः पुरुषः स्वकर्तव्यं साधु भावयति, तथैव ज्ञानोपदेशेनाहं स्वकार्यं बोद्धुं समर्थो जातः इति भावः । **अद्य** प्रभृति एषोऽहं तवोपदेशेन क्षालितमलः सर्वप्राणिवधात् विरतः निवृत्तो जातः ॥ २६ ॥

'अभीतिं दिशन्' इत्युक्तं प्रकारान्तरेण अनुवदति **क्वचिदि**त्यादिना—सम्प्रति हि अधुना । **क्वचित्** कस्मिन्नपि प्रदेशे **पुलिनविपुलैः** पुलिनवत् तीरस्थभूमिवत् **विपुलैः** विशालैः । **भोगनिवहैः** भोगाना शरीराणां ("भोगः सुखेस्त्र्यादिभृतावहेश्च फणकाययोः" इत्यमरः) निवहैः समूहैः । द्वीपाकारः द्वीपस्येवाकारः स्वरूपं येषां तथाभूतः सन् 'समाजः क्रीडतु' इत्यग्रिमेण सम्बन्धः । 'नैश्चल्येन चिरमेकत्र स्थितत्वात् द्वीपानां मध्ये मध्ये सम्भवात् तद्भ्रान्तिकरः' इत्यर्थः। **क्वचिदपि** वलयितशरीरः वलयितानि स्वजातिस्वभावेन कुण्डलीकृतानि शरीराणि येन तादृशः । **कृतावर्तभ्रान्तिः** कृता आवर्तस्य भ्रमसां भ्रमस्य भ्रान्तिः येन तथोक्तः। (समुद्रे कुण्डलीकृतदेहान् नागान् पश्यतां नभश्चराणां जलभ्रमस्य भ्रान्तिः

मैं अज्ञाननिद्रा में सो रहा था। उससे आपने मुझे जगाया है। यह लीजिये, आज से मैंने सब प्राणियों की हिंसा करना छोड़ दिया ॥ २६ ॥

इस समय तो—

इस बड़े समुद्र में नागों का समाज आज से सुख पूर्वक विहार करे। कहीं अपने शरीर को कुण्डलित कर देने से आवर्त (भँवर) की भ्रान्ति उत्पन्न करें और कहीं एक किनारे से

व्रजन् कूलात् कूलं क्वचिदपि च सेतुप्रतिसमः
समाजो नागानां विहरतु महोदन्वति सुखम् ॥ २७ ॥

अपि च,—

स्रस्तानापादलम्बान् तिमिरचयनिभान् केशहस्तान् वहन्त्यः
सिन्दूरेणेव दिग्धैः प्रथमरविकरस्पर्शताम्रैः कपोलैः ।

भविष्यतीत्यर्थः) क्वचिदपि । कूलात् एकस्मात् तटात् कूलं अपरं तीरं व्रजन् । उभयतटयोर्निरन्तरसम्बद्धत्वात् सेतुप्रतिसमः सेतुसदृशः सन् । नागानां समाजः समूहः महोदन्वति महासागरे ("उदन्वानुदधौ च" इति निपातः । "उदन्वानुदधिः सिन्धुः सरस्वान् सगरोऽर्णवः" इत्यमरः) सुखं आनन्देन विहरतु । 'अस्मद्भयेन चिरात् पातालतले निलीना नागा अधुनाऽभयप्रदानात् समुद्रोपरि आगत्य स्वेच्छया कालं यापयन्तु' इति तात्पर्यम् । शिखरिणीवृत्तम् । "रसै रुद्रैश्छिन्ना यमनसलभा गः शिखरिणी" इति वृत्तरत्नाकरे तल्लक्षणम् ॥ २७ ॥

नागानां विहारप्रकारमुपन्यस्य नागयुवतीनां केलिक्रमो लक्ष्यते **स्रस्तानि**-त्यादिना—स्रस्तान् चिरं भयात् सत्कारहीनान् च्युतान् च । पातालतलग्नान् समधिकलम्बायमानत्वात् पातालतले लुठितान् । तिमिरचयनिभान् तिमिरस्य अन्धकारस्य चयः समूहः तत्तुल्यान् (अस्वपदविग्रहत्वादत्र नित्यसमासः) संस्कारविरहादपि स्वाभाविकं कालिमानं धारयतः इति भावः । केशहस्तान् प्रशस्तान् केशान् (प्रशंसायां हस्तशब्दः इति शिवरामः) केशकलापान् वा । तथा चामरः "पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे" ।

"बालस्तु तत्पराः पाशो रचनाभार उच्चयः ।
हस्तः पक्षः कलापश्च केशभूयस्त्ववाचकाः" ॥

वहन्त्यः धारयन्त्यः । (अभयश्रवणेन भवत्कीर्तिवर्णनाबद्धहर्षा रम्यप्रदेशाभिजिगमिषया असंयतानेवालकान् करकमलेन धारयन्त्यः इत्यर्थः) तथा च प्रथमरविकरस्पर्शताम्रैः प्रथमस्य रवेः उदयोन्मुखस्य सवितुः । कराणां किरणानां

दूसरे किनारे तक सेतु की समता धारण करता हुआ विचरण करे (अर्थात् अब निर्भय होकर नागलोग इस समुद्र में स्वच्छन्द विहार करें) ॥ २७ ॥

और भी :—

खुले हुये, पैर तक लटकने वाले, अन्धकार के समूह की तरह काले काले चिकने केशों को धारण करने वाली, प्रातःकाल के सूर्य की किरणों के स्पर्श होने से मानो सिन्दूर से विशे

आयासेनालसाङ्गयोऽप्यवगणिततरुजः कानने चन्दनाना-
मस्मिन् गायन्तु रागादुरगयुवतयः कीर्तिमेतां तवैव ॥ २८ ॥

नायकः । साधु महासत्त्व ! साधु, अनुमोदामहे । सर्वथा दृढसमाधानो भव । [शङ्खचूडं निर्दिश्य] । शङ्खचूड ! त्वयाऽपि स्वगृहमिदानीं गम्यताम् ।

शङ्खचूडः । [निःश्वस्य अधोमुखस्तिष्ठति] ।

नायकः । [निःश्वस्य मातरं पश्यन्] ।—

उत्प्रेक्षमाणा त्वां तार्क्ष्यचञ्चुकोटिविपाटितम् ।

स्पर्शेन सघट्टनया ताम्रैः रक्तवर्णैः । अतएव सिन्दूरेण दिग्धैः उपलिप्तैरिव लक्ष्यमाणैः । कपोलैः उपलक्षिताः ('इत्थंभूतलक्षणे' इति सूत्रेण तृतीयाविभक्तिः) आयासात् आगमनगानसम्भ्रमात् । आलसाङ्ग्यः परिम्लानगात्राः अपि अविगणिततरुजः अनिरूपितपरिश्रमाः ('परिश्रमं तृणाय मन्यमानाः' इति भावः) उरगयुवतयः नागानां तरुण्यः । चन्दनाना अस्मिन् कानने 'युवतिविहारयोग्ये' इति भावः । तवैव करुणाक्रान्तचेतसः भवत एव । सर्वत्र प्रख्याता कीर्तिं रागात् स्नेहप्राचुर्यात् गायन्तु कीर्तयन्तु पुरुषा इव नागस्त्रियोऽपि सुकुमाराङ्गतया चन्दनकानने भवतः कीर्तिगानेन आत्मानं विनोदयन्त्वित्यर्थः । स्वागता ॥ २८ ॥

साध्विति । सर्वथा दृढसमाधानः दृढ अविचलित समाधानं चित्तस्यैकाग्रता यस्य तादृशः । 'अस्यां प्रतिज्ञायां दृढां मतिं कुरु' इत्यर्थः ।

नायकः शङ्खचूडस्य मातुर्दुरवस्थामुत्प्रेक्ष्य ता प्रकटयति—उत्प्रेक्षमाणेत्यादिना—

सा स्वभावतः स्नेहाकुला तव जननी । तार्क्ष्यचञ्चुकोटिविपाटितं तार्क्ष्यस्य

पित किये गये कपोलों से सुशोभित होने वाली, परिश्रम से अलसगात्र होने पर भी क्लेश को न गिनने वाली सर्पों की ये युवतियां चन्दन के इस कानन में प्रेम से तुम्हारी ही कीर्ति को गावें (उपकारी की कीर्ति गाई जाती है । अतएव नागसुन्दरी अब उपकारी जीमूतवाहन का यशोगान करें) ॥ २८ ॥

नायकः—साधु महासत्त्व ! हमलोग इसका अनुमोदन करते हैं । सब तरह से शंका को दूर कर लो । (शङ्खचूडः की ओर निर्देश करके) शङ्खचूड ! अब भी अपने घर जावो ।

शङ्खचूडः—(सांस लेकर नीचे मुख कर खड़ा रहता है)

नायकः—(सांस लेकर माता को देखकर) :—तुम्हारे दुःख से दुःखित होने वाली

त्वद्दुर्दुःखदुःखिता *दुःखमास्ते सा जननी तव ॥ २९ ॥

वृद्धा । [सास्रम्] । धण्णा, क्खु सा जणणी, जा गरुडमुहपडिदस्स अक्खदसरीरस्स जेव्व पुत्तअस्स मुहं पेक्खिस्सदि । (धन्या खलु सा जननी, या गरुडमुखपतितस्याक्षतशरीरस्यैव पुत्रकस्य मुखं प्रक्षिष्यते ।)

शङ्ख । अम्ब ! सत्यमेवैतत्, यदि कुमारः स्वस्थो भविष्यति ।

नायकः । [वेदनां नाटयन्] हहह ! परार्थसम्पादनामृतरसास्वादाक्षिप्तत्वादेतावतीं वेलां मया न लक्षिताः; सम्प्रति तु मां बाधितुमारब्धा मर्मच्छेदिन्यो वेदनाः । [मरणावस्थां नाटयति] ।

पक्षिराजस्य चञ्चवाः कोट्या अग्रेण तीक्ष्णेन अग्रभागेनेत्यर्थः । ["कोट्युत्कर्षाटनीसंख्याश्रीषु" इति हैमः] विपाटितं विदारितं त्वां उत्प्रेक्षमाणा सम्भावयन्ती । त्वद्दुःखदुःखिता त्वद्दुःखेन दुःखिता आकुला सती दुःखं आस्ते कष्टेन कालं नयति । अतः शीघ्रं गत्वा तामाश्वस्तां विधेहीत्यर्थः ॥ २९ ॥

हहह इति । हहहेति निरतिशयखेदे । परार्थसम्पादनामृतरसास्वादाक्षिप्तत्वात् परार्थानां परहितानां सम्पादने यः अमृततुल्यः रसः नितरामानन्दः । तस्य आस्वादः अनुभवः । तेन आक्षिप्तत्वात् मच्चित्तस्य आक्रान्तत्वात् । वेदना व्रणपीडाः एतावतीं वेलां इयन्तं कालमभिव्याप्य ("कालाध्वनोरत्यन्तसंयोगे" इति सूत्रेण द्वितीया) न लक्षिताः विदिताः । सम्प्रति प्रस्तावसरतया मां बाधितुं पीडयितुं आरब्धाः ।

यह तुम्हारी माता तुम्हें गरुड़ की चोंच से फाड़ा गया समझ कर बड़े दुःख में है । (शङ्खचूड़ की माता उसे मरा ही जानती है । अतः वह बड़े कष्ट में है) ॥ २९ ॥

वृद्धा—(आँसू बहाती हुई) वह माता धन्य है जो गरुड़ के मुख से गिरे हुये तथा क्षत रहित अपने पुत्र के मुख को देखेगी ।

शंखचूड़:—माता ! यह सत्य है यदि कुमार चङ्गा हो जाय ।

नायकः—(वेदना का अभिनय करता हुआ) अहह !!! दूसरों के कार्य करने से उत्पन्न अमृत रस के आस्वाद से विभोर होने के कारण अब तक मैंने अपनी वेदना का तनिक भी विचार नहीं किया परन्तु इस समय ये मर्म छेदिनी पीडायें मुझे कष्ट दे रही हैं । (मरणावस्था का अभिनयन करता है ।)

---

*नूनं०-ग ।

जीमूतकेतुः । [ससम्भ्रमम्] । हा वत्स ! किमेवं करोषि ?

वृद्धा । हा ! किं णु क्खु एव्वं वत्तदि ? [सोरस्ताडम्] । परित्ताअह परित्ताअह । एसो क्खु मे पुत्तओ विवज्जइ । (हा ! किं नु खल्वेवं वर्त्तते? परित्रायध्वं परित्रायध्वम् । एष खलु मे पुत्रको विपद्यते ।)

मलयवती । हा अज्जउत्त ! परिच्चइदुकामो विअ लक्खीअसि (हा आर्य्यपुत्र ! परित्यक्तुकाम इव लक्ष्यसे ।)

नायकः । [अञ्जलिं कर्त्तुमिच्छन्] । शङ्खचूड ? समानय मे हस्तौ ।

शङ्खचूडः । [कुर्वन्] । कष्टम् ॥ अनाथीकृतं जगत् ।

नायकः । [अर्द्धोन्मीलितचक्षुः पितरं पश्यन्] । तात ! अम्ब ! अयं मे पश्चिमः प्रणामः ।—

ससम्भ्रमं सम्भ्रमेण भयेन सहितं सभयमित्यर्थः । "सम्भ्रमः साध्वसेऽपि स्यात्" इति मेदिनी ।

हा अज्जउत्त इति । परित्यक्तुकामः—परित्यक्तुं (अस्मानिति शेषः) कामः इच्छा यस्यासौतादृशः । ('लुम्पेदवश्यमः कृत्ये तुकाममनसोरपि' इत्यनेन मकारस्य लोपो विधीयते) ।

अर्धेति । अर्धोन्मीलिताक्षः अर्धे उन्मीलिते उन्मिषिते अक्षिणी नेत्रे येन तथाभूतः । नयने किञ्चिन्मात्रमुन्मील्येत्यर्थः । तात हे पितः, अम्ब हे मातः, अयं पश्चिमः अन्तिमः ("पश्चात्प्रतीच्यां चरमे" इत्यनेकार्थसंग्रहः) मे प्रणामः । मृत्युना कवलीक्रियमाणस्य मम अयमेव अन्तिमः प्रणामः इत्यर्थः ।

जीमूतकेतुः—(जल्दी के साथ) हा पुत्र ! ऐसा क्यों कर रहे हो ।

वृद्धा—हा ! क्या यह ऐसा है । रक्षा कीजिये, रक्षा कीजिये । (छाती पीट कर) यह मेरा पुत्र मर रहा है ।

मलयवती—हा आर्य्यपुत्र ! ऐसा मालूम होरहा है कि तुम हम लोगों को छोड़ रहे हो।

नायकः—(हाथ जोड़ने की इच्छा करता हुआ) शङ्खचूड ! मेरे हाथों को एक साथ जुटा दो ।

शङ्खचूडः—(वैसा करता हुआ) हाय ! संसार अनाथ हो गया ।

नायकः—(आधी खुली हुई आंख से पिता को देखता हुआ) तात ! माता ! यह मेरा अन्तिम प्रणाम है !

गात्राण्यमूनि न वहन्ति *विचेतनानि
श्रोत्रं स्फुटाक्षरपदा न गिरः शृणोति ।
कष्टं निमीलितमिदं सहसैव चक्षु-
र्हा तात ! यान्ति विवशस्य ममासवोऽमी ॥ ३० ॥

अथवा किमनेन प्रलपितेन ["संरक्षता पन्नगमेव पुण्यम्–" इत्यादिं पठित्वा पतति] ।

वृद्धा । हा पुत्त ! हा वच्छ ! हा गुरुअणपच्छल । कहिं सि ? देहि मे पडिवअणं । (हा पुत्र ! हा वत्स ! हा गुरुजनवत्सल ! क्वसि ? देहि मे प्रतिवचनम् ।)

नायको दयनीयामवस्था प्रकाशयन्ननुभूयमानं कष्टातिशयं स्फुटमभिव्यनक्ति गात्राणीत्यादिना—विचेतनानि विगता चेतना वस्तुग्रहणशक्तिः येभ्यः तादृशानि संज्ञाविरहितानीत्यर्थः । अमूनि गात्राणि न वहन्ति स्वं स्वरूपमिति शेषः । [मरणोन्मुखतया अवयवानामनेन जाड्यं प्रकाशितं भवति] । श्रोत्रं मदीयः कर्णः । स्फुटाक्षरपदाः स्फुटानि विशदमुच्चारितानि अक्षराणि येषु तादृशानि पदानि सुप्तिङन्ताख्यानि यासु तथोक्ताः गिरः वचनानि न शृणोति । (अनेन इन्द्रियाणां शक्तिप्रमोषः सूचितः ।) कष्टं खेदे । इदं चक्षुः सहसैव अकस्मादेव । (युवयोः दर्शनस्पृहायामतृप्तायामिति भावः) निमीलित मुद्रितं वर्तते । हा तात ! पितः ! विवशस्य विकलेन्द्रियस्य मम असवः जीवनाधारभूताः प्राणाः अपि । यान्ति शरीरं त्यक्त्वा प्रयान्ति । एवं मरणोद्यतस्य नायकस्याव्यक्तालापादिसाक्षात्कारे पित्रोः दयितायाश्च करुणपरिपोषः किं समुचिततया वर्णयितुं शक्यते ? वसन्ततिलका वृत्तम् । लक्षणोपन्यासस्तु प्रागेव कृतः ॥ ३० ॥

मेरे ये गात्र चेतनाहीन हो गये हैं, अतएव अपने सच्चे रूप को धारण नहीं करते । कान साफ अक्षर तथा पद वाले वचनों को नहीं सुनता (सुनने की शक्ति अब चली गई) । दुःख की बात है कि मेरी यह आँख सहसा बन्द हो रही है । हे तात ! विवश हुये मेरे ये प्राण (शरीर छोड़ कर) चले जा रहे हैं ॥ ३० ॥

अथवा इसतरह से विलाप करने से क्या लाभ ।

('संरक्षता पन्नगमेव पुण्यं' इत्यादि पद्य पढ़कर गिर पड़ता है)

वृद्धाः—हा पुत्र ! हा वत्स ! हा गुरुजनों के प्यारे ! कहाँ हो । मेरे वचनों का उत्तर दो ।

* सचेतनत्वं-ग । † पद्यमिदं चतुर्थेऽङ्के १७४ पृष्ठे विद्यते ।

जीमूतकेतुः । हा वत्स जीमूतवाहन ! सा प्रणयिजनवत्सल ! हा सर्व-गुणनिधे ! क्वासि ? देहि मे प्रतिवचनम् । [हस्तावुत्क्षिप्य] । कष्टं भोः कष्टम् !!—

निराधारं धैर्य्यं कमिव शरणं यातु विनयः ?
क्षमः क्षान्तिं वोढुं क इह ? विरता दानपरता ?
हतं सत्यं सत्यं व्रजतु कृपणा क्वाद्य करुणा ?
जगज्जातं शून्यं त्वयि तनय ! लोकान्तरगते ॥ ३१ ॥

हस्तौ स्वकीयौ करौ उत्क्षिप्य उपरि उन्नीय । प्रलपनस्वभावोऽयमिति ।

महामहिमशालिनि जीमूतवाहने लोकान्तरं प्रयाते सर्वे गुणा अशरणा भविष्यन्तीति । सकरुणं कविना प्रतिपाद्यते **निराधारमि**त्यादिना—हे तनय ! त्वयि विश्वेषां महापुरुषगुणानामेकायतने त्वयि । लोकान्तरगते अस्मान् परित्यज्य भिन्नं लोकं प्राप्ते सति (मृते सतीति यावत्) । धैर्यं कष्टसहिष्णुता । निराधारं नास्ति आधारः आश्रयः यस्य तादृशं भविष्यति । ('न कोऽपि त्वादृशे जगति विद्यते यं धैर्यमाश्रयेत्' इत्यर्थः) । विनयः नम्रता कमिव जनं शरणं आश्रयाय यातु ? इह जगति क्षान्तिं क्षमागुणं वोढुं धारयितुं त्वादृशः कः क्षमः समर्थः । 'विद्यते' इतिशेषः । ("क्षमं शक्ते हिते त्रिषु" इत्यमरः) । न कोऽपि त्वत्समः क्षमाशीलो भविष्यतीति भावः । दानपरता वदान्यता । (दानं एव परं प्रधानं यस्य तस्य भावः) । विरता अद्यारभ्य निवृत्ता । तथा च सत्यं सत्यभाषणं सत्यं नूनं (क्रियाविशेषणमेतत्) हतं नष्टं स्यात् । अद्य कृपणा निराश्रयत्वात् दीनदीना । करुणा अनुकम्पागुणः । क्व व्रजतु ? (त्वत्तुल्याश्रयासत्त्वात् दया कं शरणं गमिष्यति) किं बहुना कृत्स्नं समग्रं जगत् शून्यं निःसारं जातम् । (एवमशरणानामेतेषां गुणानां नान्या गतिरिति शब्दभेदेन प्रतिपादयता कविना नवीकृतस्य विशदश्चमत्कारः प्रदर्शितः) ।

जीमूतकेतुः—हा पुत्र जीमूतवाहन ! हा प्रेमीजनों के प्यारे ! हा सबगुणों के खजाने ! कहाँ हो । मेरे वचनों का उत्तर दो । **(हाथोंको फेककर)** हाय हाय । बड़ा दुःख है ।

हे पुत्र ! तुम्हें दूसरे लोक चले जाने पर (अर्थात् स्वर्गवासी होने पर) धैर्य बिना आधार का हो गया । विनय अब किसके शरण जाय ? अब शान्ति को कौन धारण करने में समर्थ है ? दानशीलता उठ गई । सचमुच सचाई नष्ट हो गई । आज दीन बनकर करुणा कहाँ जाय ? सच तो यह है कि आज यह समग्र संसार सूना हो गया—निःसार हो गया ॥ ३१ ॥

मलयवती । हा अज्जउत्त ! कहं परिच्चइअ गदोसि ? अदिणिग्घिणे मलअवदि ! किं तुए पेक्खिदव्वं ? जा एत्तिअं वेलं जीविआसि । (हा आर्य्यपुत्र ! कथं परित्यज्य गतोऽसि ? अतिनिर्घृणे मलयवति ? किं त्वया प्रेक्षितव्यम् ? या एतावद्वेलां जीविताऽसि ।

शङ्खचूडः । हा कुमार ! कथं प्राणेभ्योऽपि वल्लभं जनं परित्यज्य गम्यते ? तदवश्यमन्वेति त्वां शङ्खचूडः ।

गरुडः । (सोद्वेगम्) कष्टम् ॥ उपरतोऽयं महात्मा । तत् किमिदानीं करोमि ?

वृद्धा । [सालमुर्ध्वमवलोक्य] भअवंतो लोअपाला ! कहं पि अमिदेण सिंचिअ पुत्तअं मे जीआवेहि । (भगवन्तो लोकपालाः ! कथमप्यमृतेन सिक्त्वा पुत्रकं मे जीवयत ।)

मालतीमाधवे महाकवेर्भवभूतेरेतद् पद्यरत्न श्लोकेनामुना विशदां समतां वहतीति तदपि प्रदर्श्यते—

असारं संसारं, परिमुषितरत्नं त्रिभुवनं
निरालोकं लोकं, मरणशरणं बान्धवजनम् ।
अदर्पं कन्दर्पं, जननयननिर्माणमफलं
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः । (पञ्चमेऽङ्के) ॥३१॥

भगवन्त इति । लोकपालाः—अष्टानां दिशामुपदिशां च पालकाः अष्टौ लोकपालाः सन्ति । ते च क्रमेण यथा—

इन्द्रो वह्निः पितृपतिः नैर्ऋतो वरुणो मरुत् ।
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ॥

मलयवतीः—हा आर्यपुत्र ! छोड़कर तुम क्यों चले गये हो ? अत्यन्त निष्ठुर मलयवति ! तुम क्या देखोगी जो अभी इस समय तक जी रही हो ।

शङ्खचूडः—हा कुमार ! प्राणों से भी प्यारे प्रियजनों को छोड़कर तुम कहाँ गए हो ? तुम्हारे पीछे शङ्खचूड अवश्य ही आवेगा । (मैं भी तुम्हारे पीछे मर जाऊँगा) ।

गरुडः—(**उद्वेग के साथ**) हाय कष्ट ! यह महात्मा मर गया । अतएव इस समय मैं क्या करूँ ?

वृद्धाः—(**रोती हुई ऊपर देखकर**) भगवान् लोकपाल ! क्या आप लोग अमृत से सींचकर मेरे पुत्र जिला देंगे ?

गरुड । [सहर्षमात्मगतम्] । अये ! अमृतसङ्कीर्त्तनात् साधु स्मृतम्। मन्ये प्रमृष्टमयशः । तद् यावत् त्रिदशपतिमभ्यर्थ्य तद्विसृष्टेनामृतवर्षेण न केवलं जीमूतवाहनम्, एतानपि पूर्वभक्षितानस्थिशेषानाशीविषान् प्रत्युज्जीवयामि । यदि न ददात्यसौ तदाऽहम्—

पक्षैः पीत्वाऽम्बुनाथः *पटुजवपवनः प्रेर्य्यमाणः समीरैः

अये इति । अमृतेन सिञ्चयत पुत्रकमितिवाक्ये अमृतसङ्कीर्तनात् सुधायाः नामोच्चारणात् साधु स्मृतं स्वकर्तव्यमिति शेषः । सम्भावयामि यत् अयशः बोधिसत्त्वस्य प्राणहिंसनात् जाता अकीर्तिः । प्रमृष्टं प्रक्षालितम् । तद् यावत् त्रिदशपतिं । तिस्रः बालकौमारयौवनानि दशाः अवस्थाः येषां तथाभूताः त्रिदशाः देवाः । अथवा त्र्यधिकाः त्रिरावृत्ता दश परिमाणमेषामिति त्रिदशाः 'संख्ययाऽव्ययासन्नदूराधिकसंख्या संख्येये' इति सूत्रेण बहुव्रीहिसमासः । "बहुव्रीहौ संख्येये डजबहुगणात्" इति सूत्रेण डच् प्रत्ययः । "अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः" इत्यमरः । त्रिदशा देवाः । ते च त्रयस्त्रिंशत्संख्याकाः । यथा शतपथब्राह्मणे—"अष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशदिन्द्रश्चैव प्रजापतिश्च" । तेषां पतिं सुरेन्द्रं । अभ्यर्थ्य प्रार्थनाभिः सन्तोष्य । तद्विसृष्टेन तद्दत्तेन । अमृतवर्षेण सुधावृष्ट्या न केवलं जीमूतवाहनं, एतानपि पूर्वभक्षितान् अस्थिशेषान् कङ्कालमात्रावशिष्टान् । आशीविषान् सर्पान् "आशीस्तालुगता दंष्ट्रा यस्य विद्धो न जीवति" । ("आशीविषो विषधरश्चक्री व्यालः सरीसृपः" इत्यमरः) प्रत्युज्जीवयामि ।

अथवा यदि प्रार्थ्यमानोऽपि देवराजः सुधावर्षणं न करिष्यति तर्हि अहमेवात्मनाऽमृतमुद्धृत्य वृष्टिमृत्सृजामीति गरुडः स्वनिश्चिताध्यवसायप्रकारं प्रदर्शयति पक्षेत्यादिना—

पटुजवपवनः अत्यन्तवेगवानहं समीरैः वायुसदृशाशुगमनसमर्थैः । पक्षैः प्रेर्य-

---

गरुडः—(हर्ष के साथ आप ही आप) अये ! अमृत के नाम लेने से इसने अच्छा स्मरण दिला या । मैं समझता हूं कि मेरा अयश नष्ट हो गया । इसलिये इन्द्र के पास जाकर उनसे प्रार्थना कर उनसे की गई अमृत की वर्षा केवल जीमूतवाहन ही को नहीं बल्कि पहिले भी खाये गये अब सापों को जिला दूंगा । यदि वह (इन्द्र) अमृत नहीं देगा तो मैं:—

शीघ्र उड़नेवाले पंखों से प्रेरित किया गया अत्यन्त वेग से समुद्र का जल पी डालूंगा;

*पटुतरजवना-ग ।

नेत्रार्चिःप्लोषमूर्च्छाविधुरविनिपतत्सानलद्वादशार्कः ।
चञ्च्वा सञ्चूर्ण्य शक्राशनिधनदगदाप्रेतलोकेशदण्डा-
*नन्तःसंमग्नपक्षः क्षणमसृतमयीं वृष्टिमभ्युत्सृजामि ॥ ३२ ॥

माणः उद्यमानः सन् । शीघ्रमेव गत्वेति भावः । अम्बुनार्थं समुद्रं पीत्वा । ['पक्षोत्क्षिप्ताम्बुनाथः पटुजवपवनप्रेर्यमाणे समीरे' इति पाठे तु पक्षोत्क्षिप्ताम्बुनाथः पक्षेण पक्षवातेन उत्क्षिप्तः निरस्तः अम्बुनाथः जलधिर्येन तादृशः । समीरे वायौ पटुजवपवनप्रेर्यमाणे पटुना जवपवनेन वेगोत्पतनजेन वायुना । प्रेर्यमाणे प्रतीपमीर्यमाणे 'यथागतं पलायनं कारिते' इति यावत्] । नेत्रार्चिःप्लोषमूर्च्छा-विधुरविनिपतत्सानलद्वादशार्कः नेत्रयोः अर्चिभिः ज्वालाभिः यः प्लोषः दाहः । तस्य मूर्च्छया आतिशय्येन । विधुराः अधिकतरतेजः संपातात् हीनाः विनिपतन्तः स्वस्थानात् च्यवन्तः । सानलाः साग्नयः द्वादश अर्काः सूर्याः यैन तथोक्तः । (तेजसा तेजस्विनां शमनमिति नेत्रार्चिभिः सूर्याणां प्रशमनमभिहितम् । मम ज्वालावर्षिभ्यां नेत्राभ्यां दग्धा द्वादश सूर्या अपि प्रभाविरहिता भूत्वा सद्यो भूमौ निपतिष्यन्तीति प्रतिपादयन् पक्षिराजः स्वनेत्रार्चिषां प्रचण्डत्वं सूचयति) । अहं च शक्राशनिधनदगदाप्रेतलोकेशदण्डान् । शक्रस्य इन्द्रस्य प्रधानमायुधं अशनिः वज्रम् । धनदस्य कुबेरस्य गदा । प्रेतलोकेशस्य यमराजस्य मुख्यं प्रहरणं दण्डः । एतानि आयुधानि चञ्च्वा सञ्चूर्ण्य निष्पीडय । अन्तः अमृतभाजनमध्ये स्वयं संमग्नपक्षः सम्यक् मग्नौ पक्षौ यस्य एवंभूतः सन् । एवं परनिग्रहं शस्त्रग्रहं च विना अमृतमयीं वृष्टिं सुधावर्षणं अभ्युत्सृजामि पातयामि (अहमिति शेषः) । (यदि देवेन्द्रो मह्यं सुधां न समर्पयति तर्हि समुद्रं पीत्वा पक्षवातेन निरस्य वा, वेगवायुना पवनप्रवाहं नियम्य, नेत्रार्चिभिः समग्रान् दिवाकरान् दग्ध्वा निपात्य च, शक्रादीनामायुधानि चञ्च्वैव चूर्णीकृत्य, पक्षाभ्यां सुधां गृहीत्वा स्वयमेवा-मृतवर्षणं करिष्यामीति सरलार्थः) बन्धस्य विकटत्वात् ओजो नाम गुणः । क्रोधस्थायिभावात्मको रौद्रो रसः । स्रग्धरा वृत्तम् ॥ ३२ ॥

अपने नेत्र की ज्वाला से बारहों सूर्य को मलिन बना पृथ्वीपर गिरा डालूंगा; इन्द्र के वज्र को, कुबेर की गदा को तथा यमराज के दण्ड को अपनी चोंच से चूर चूर कर डालूंगा। (अमृत भोजन के) भीतर अपने पँखों को अच्छी तरह डुबाकर शीघ्रही अमृत की वर्षा कर दूँगा (यदि इन्द्र अमृत न देंगे, तो मैं स्वयं अमृत की वृष्टि करूँगा) ॥ ३२ ॥

*नाजौ निर्जित्य देवान्–ग ।

तदयं गतोऽस्मि ।

[इति साटोपं परिक्रम्य निष्क्रान्तः ।]

जीमूतकेतुः । वत्सशङ्खचूड ! किमद्यापि स्थीयते ? समाहृत्य दारूणि पुत्रस्य मे विरचय चिताम् ; येन वयमप्यनेन सहैव गच्छामः ।

वृद्धा । पुत्त संखचूड ! लहु सज्जेहि । दुक्खं, अम्हेहि विणा भादुओ दे चिट्ठदि । (पुत्र शङ्खचूड ! लघु सज्जय । दुःखमस्माभिर्विना भ्राता ते तिष्ठति ।)

शंखचूडः । [सास्रम्] । यद्आज्ञापयन्ति गुरवः । नन्वयत एवाहं युष्माकम् । [उत्थाय चितारचनां कृत्वा] । तात ! अम्ब ! सज्जीकृतेयं चिता।

जीमूत—कष्टं भोः कष्टम् ।

उष्णीषः स्फुट एष मूर्धनि विभात्यूर्णोर्यमन्तभ्रुवो-
श्चक्षुस्तामरसानुकारि हरिणा वक्षःस्थलं स्पर्धते ।

चक्रवर्तिचिह्नविशेषाणां सद्भावेऽपि मम भाग्यदोषादेव जीमूतवाहनस्येदृशी दयनीया समवस्थेति प्रतिपादयन् जीमूतकेतुः कथयति 'उष्णीष' इति—

मूर्धनि शिरसि । उष्णीषः चक्रवर्तित्वसूचकः चिह्नविशेषः । (उष्णीषबन्धस्थाने ललाटोपरि पट्टबन्धरेखा उष्णीषः कथ्यते । स च तल्लाञ्छितस्य पुरुषस्य भाविचक्रवर्तित्वं सूचयतीति सामुद्रिकशास्त्रकारा आमनन्ति ।) स्फुट एव विशदरूपेण विभाति शोभते । भ्रुवोः अन्तः मध्यभागे । इयं ऊर्णा रोमावर्तः 'लक्ष्यते' इति शेषः । चक्षुः तामरसानुकारि तामरसं रक्तकमलं अनुकरोतीति तामरसानु-

---

इसलिये मैं जाता हू । (**इस तरह से आटोप के साथ परिक्रमा कर जाता है**)

जीमूतकेतुः—वत्स शङ्खचूड ! क्या अब भी हम लोग जीते ही रहेंगे । लकड़ी को लाकर मेरे पुत्र की चिता तैयार करो जिससे हमलोग भी इसी के साथ ही जल मर जाँय ।

वृद्धाः—पुत्र शङ्खचूड ! शीघ्र तैयार करो । हम लोगों के बिना तुम्हारा भाई बड़े दुःखमें होगा ।

शंखचूडः—(**आंसू बहाता हुआ**) जो आप की आज्ञा हो । मैं आप लोगों के आगे ही हूं (आप की आज्ञा पालन करने में सर्वदा तैयार हू) (**उठकर चिता की रचना करता है**) तात ! माता ! चिता तैयार कर दी गई है ।

जीमूतकेतुः—कष्ट है । बड़े दुःख की बात है !

सिर के ऊपर यह उष्णीष का स्पष्ट चिह्न विराजमान है भौंहों की बीच में ऊर्णा (रोम समूह) शोभित है, आँख रक्त कमल की समता धारण करती है, सिंह की छाती से इसकी

चक्राङ्कौ चरणौ तथापि हि कथं हा वत्स मद् दुष्कृतै-
स्त्वं विद्याधरचक्रवर्तिपदवीमप्राप्य विश्राम्यसि ॥ ३३ ॥

जीमू। देवि! किमपरं रुद्यते? तदुत्तिष्ठ, चितामारोहामः।

[सर्वे उत्तिष्ठन्ति]।

मलयवती। [बद्धाञ्जलिरूर्ध्वं पश्यन्ती]। **भअवदि गोरि! तुए आण-त्तं, जहा—"विज्जाहरचक्कवट्टो भट्टा दे भविस्सदि" त्ति, ता कहं मम मन्दभग्गाए किदे तुमंपि अलीअवादिणी संवुत्ता?** (भगवति गौरि! त्वया आज्ञप्तं, यथा—"विद्याधरचक्रवर्त्ती भर्त्ता ते भविष्यति" इति; तत् कथं मम मन्दभाग्यायाः कृते त्वमप्यलीकवादिनी संवृत्ता?)

कारि रक्तोत्पलनिभ अरुण दृश्यते। (अरुणे लोचने पुरुषस्य सौभाग्यातिशयं सूचयतः)। वक्षःस्थलं उरःस्थलं हरिणा विष्णुना स्पर्धते (एतेन उरसि लक्ष्मी-विलासादिकं ध्रुवमनुमीयते)। चरणौ चक्राङ्कौ चक्रेण चिह्नितौ विद्येते। तथापि इत्थं चक्रवर्तिनो निखिलचिह्नसद्भावेऽपि। हा वत्स! त्वं मद्दुष्कृतैः मम पाप-कर्मभिः हेतुभूतैः। विद्याधरचक्रवर्तिपदवीं विद्याधराणां चक्रवर्तिनः सम्राजः पदवीं पदं स्थानमिति यावत्। अप्राप्य अनासाद्य विश्राम्यसि। (चक्रवर्तिनः समग्रै-श्चिह्नैरन्वितस्यापि तव चक्रवर्तिपदस्यानुपलब्धौ मम दुष्कृतान्येव प्रधानं कार-णम्। न किमपि तवेति भावः)। शार्दूलविक्रीडितम् ॥ ३३ ॥

भगवतीति। तत् कथं मम मन्दभाग्यायाः अलीकवादिनी अनृतभाषिणी संवृत्ता। पूर्वं तु त्वं सत्यभाषिणी आसीः, अधुना मद्भाग्यदोषादेव असत्यभा-षिणी संवृत्ता, यतो भर्तुः विद्याधरत्वमेव सिद्धं न पुनः चक्रवर्तित्वमित्यर्थः।

छाती को होंड लगी है, चरणों में चक्र के चिह्न हैं। हे वत्स! चक्रवर्ती के इन सब चिह्नों के रहने पर भी मेरे बुरे कर्मों के कारण तुम विद्याधरों के चक्रवर्ती पद को बिना पाये ही हुये अब तक वर्तमान हो ॥ ३३ ॥

जीमूतकेतुः—देवि! अधिक क्यों रोती हो। अतएव उठो। हम लोग चिता पर चढ़े।

(सब लोग उठते हैं)

मलयवतीः—(हाथ जोड़कर ऊपर देखती हुई) भगवति! गौरि! तुमने आज्ञा दी थी कि "विद्याधरों का चक्रवर्ती तेरा पति होगा"। अतएव मुझ जैसी मन्द भाग्य वाली अभा-गिनी के लिये तुम भी झूठ बोलने लगी?

[ततः प्रविशति ससम्भ्रमा गौरी])

गौरी । महाराज ! जीमूतकेतो ! न खलु न खलु साहसमनुष्ठातव्यम् ।

जीमूतकेतुः । अये ! कथममोघदर्शना गौरी ?

गौरी । [मलयवतीमुद्दिश्य] । वत्से ! कथमहमलीकवादिनी भवेयम्? [नायकमुपसृत्य कमण्डलुजलेनाभ्युक्षन्ती] ।—

निजेन जीवितेनापि जगतामुपकारिणः ।
परितुष्टाऽस्मि ते वत्स ! जीव जीमूतवाहन ! ॥ ३४ ॥

नायकः । [उत्तिष्ठति] ।

जीमू । [सहर्षम्] । देवि ! दिष्ट्या वर्धसे । प्रत्युज्जीवितो वत्सः ।

अये इति । कथं अमोघदर्शना । न मोघं अमोघं ('मोघं निरर्थकम्' इत्यमरः) अवन्ध्यं सफलमिति यावत् । दर्शनं यस्याः तादृशी । भगवती गौरी । कथमेवं जातमिति विस्मयः । दशायामस्यामनुग्रहमवश्यमेव करिष्यतीति जीमूतवाहनस्य प्रहर्षः ।

भगवती गौरी कमण्डलुवारिणा नायकमभ्युक्षन्ती आशीर्वचनमभ्युच्चारयति **निजेनेति**—हे वत्स ! निजेन जीवितेनापि स्वीयैः प्रियैरपि प्राणैः । जगतां सर्वेषां जगद्वासिनां । (न तु सम्बन्धापेक्षया केषाञ्चिदेवेति भावः) उपकारिणः कल्याणकारिणः ते तव । परितुष्टास्मि अतिशयेन प्रीतास्मि । अतः हे जीमूतवाहन ! जीव प्राणिहि । प्रत्यागतजीवनो भवेति गौर्या आशीर्वचनम् ॥ ३४ ॥

(इसके बाद जल्दी के साथ गौरी प्रवेश करती है)

गौरी—महाराज ! जीमूतकेतु ! ऐसा दुःसाहस (अपने को आग में जलाना) मत कीजिये । मत कीजिये ।

जीमूतकेतुः—अयें ! क्या अमोघ दर्शन वाली गौरी ने दर्शन दिया है ?

गौरी—**(मलयवती को निर्देश करके)** पुत्री ! मैं झूठ बोलने वाली कैसे हो सकती हूं ? **(नायक के पास जाकर कमण्डलु के जल से छींटा देती हुई)**

अपने जीवन को भी देकर तुम संसार का उपकार करने वाले हो । हे वत्स जीमूतवाहन ! मैं तुमसे प्रसन्न हूं । तुम जी जाओ ॥ ३४ ॥

नायकः—**(उठता है)**

जीमूतकेतुः—**(हर्ष के साथ)** देवि तुम ! धन्यवाद के पात्र हो । पुत्र जीमूतवाहन जी गया ।

वृद्धा । भअवदीए पसादेण । (भगवत्याः प्रसादेन ।)

[उभौ गौर्य्याः पादयोः पतित्वा नायकमालिङ्गतः]

मलयवती-[सहर्षं]-दिट्ठिआ पज्जुजीविदो अज्जउत्तो (दिष्ट्या प्रत्युज्जीवित आर्यपुत्रः ।) (गौर्याः पादयोः पतति)

नायकः । [गौरीं दृष्ट्वा बद्धाञ्जलिः]। **भगवति ॥—**

अभिलषिताधिकवरदे ! प्रणिपतितजनार्त्तिहारिणि ! शरण्ये ! ।
चरणौ नमाम्यहं ते विद्याधरदेवते ! गौरि ! ॥ ३५ ॥

उत्थितो जीमूतवाहनोऽग्रतो गौरीं दृष्ट्वा बद्धाञ्जलिः प्रणमति **अभिलषिते**-त्यादिना—

अभिलषिताधिकवरदे ! अभिलषितात् प्रार्थितात् अधिकं वरं ददातीति तथाभूते करुणाबाहुल्यात् त्वमात्मनैव मनोरथेभ्योऽप्यधिकं ददासीति भावः । प्रणिपतितजनार्तिहारिणि ! प्रणिपतितानां शरणमागतानां जनानां आर्तिं पीडां हरतीति तच्छीले ! शरण्ये शरणे रक्षणे साध्वी तत्सम्बोधने । (शरणे साध्वी शरण्या इति शरणशब्दात् यत् प्रत्ययः । ततः स्त्रियां टाप्) । भोगमोक्षार्थिनामाश्रयभूते ! विद्याधरदेवते विद्याधराणां देवते कुलदेवताभूते ! हे गौरि ! अहं ते चरणौ नमामि । भक्तिपूर्वकं तव चरणयोर्निपतितोऽहमित्यर्थः । अत्र अभीष्टसिद्धिसम्पादनशरणागतपरिरक्षणाद्यभिप्रायगर्भैर्विशेषणैर्भगवत्या अनुग्रहोऽवश्यंभावीति द्योत्यते । अतः परिकरालङ्कारः । तल्लक्षणं यथा कुवलयानन्दे—

"अलङ्कारः परिकरः साभिप्राये विशेषणे ।
सुधांशुकलितोत्तंसस्तापं हरतु नः शिवः" ॥ आर्या ॥ ३५ ॥

वृद्धा—भगवती की प्रसन्नता से ।

(दोनों गौरी के पौरों पर गिर कर नायक को आलिङ्गन करते हैं)

मलयवती—(हर्ष के साथ) भाग्य से आर्यपुत्र (मेरा पति) जी गये । **(गौरी के पौरों पर गिरती है)**

नायकः—**(गौरी को देखकर हाथ जोड़कर)** भगवति ! तुम मनोरथ से भी अधिक वर देने वाली हो, प्रणाम करने वालों जनों के कष्ट दूर करने वाली हो, शरण देने वाली हो । हे विद्याधरों की कुलदेवता भगवती गौरी ! मैं तुम्हारे चरणों को प्रणाम कर रहा हूं ॥ ३५ ॥

[इति गौर्य्याः पादयोः पतति]।

[सर्वे ऊर्ध्वं पश्यन्ति]।

जीमू। अये! कथमनभ्रा वृष्टिः॥ भगवति! किमेतत्?

गौरी। राजन् जीमूतकेतो! जीमूतवाहनं [प्रत्यञ्जीवयितुमेतांश्चास्थिशेषानुरगपतीन् समुपजातपश्चात्तापेन पक्षिपतिना देवलोकादियमृतवृष्टिः पातिता। [अङ्गुल्या निर्दिश्य]। किं न पश्यति भवान्?—

सम्प्राप्ताखण्डदेहाः स्फुटफणमणिभिर्भासुरैरुत्तमाङ्गै-
र्जिह्वाकोटिद्वयेन क्षितिममृतरसास्वादलोभाल्लिहन्तः।

अथ इति। अनभ्रा नास्ति अभ्रं मेघो यस्यां तादृशी ("अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः" इत्यमरः) वृष्टिः जलवर्षणं कथम्? जलदैराच्छन्नादाकाशात् वारिपतनं तु स्वाभाविकं, परन्तु सम्प्रति मेघाभावेऽपि वृष्टिर्निपततीति कथं पदेन अत्याश्चर्यं सूच्यते।

अमृतवृष्ट्या सहसा प्रत्यागतचेतनानां नागराजानां विस्मायकमाचरणक्रमं वर्णयति कविः 'सम्प्राप्ताखण्डदेहाः' इत्यादिना—सम्प्राप्ताखण्डदेहाः सम्प्राप्तः सम्यक् प्राप्तः सम्यक्रूपेण आसादितः। अखण्डः वर्णाकारकान्त्यादिविपर्यासरहितं यथापूर्वं सम्पूर्णः देहः यैः तथोक्ताः। स्फुटफणिमणिभिः स्फुटाः प्रभाबाहुल्यात् विशदं लक्ष्यमाणाः। फणानां मणयः येषु तादृशैः। अतएव भासुरैः विद्योतिभिः। उत्तमाङ्गैः शिरोभिः उपलक्षिताः। (इत्थभूतलक्षणे तृतीया)। अमृतरसास्वादलोभात् अमृतरसस्य यः आस्वादः लेहनं। तस्य लोभात् स्पृहया। जिह्वाकोटिद्वयेन जिह्वाद्वयाग्रभागेन क्षितिं अमृतकणासिक्तां महीं लिहन्तः सम्प्रति इदानीं आबद्धवेगाः आबद्धः धृतः वेगः पुत्रकलत्रादीनां दर्शनार्थं गमने वेगः यैः तथोक्ताः। अमी

(ऐसा कह कर गौरी के पैरों पर गिरता है)।

(सब ऊपर देखते हैं)

जीमूतकेतुः—अये! यह बिना बादल की वृष्टि कैसी? भगवति! यह क्या है?

गौरी—महाराज जीमूतकेतु! जीमूतवाहन को तथा इन अस्थिशेष सर्पराजों को फिर से जिलाने के लिये पश्चात्ताप करने वाले गरुड स्वर्ग लोक से यह अमृत की वर्षा कर रहे हैं। यही सुधा पृथ्वीतल पर गिर रही है। (अङ्गुली से दिखलाकर) आप नहीं देखते हैं कि—

इस सांपों ने पूरी देह पा ली है, फन की मणियों के कारण उनके मस्तक चमक रहे हैं; अपनी जीभ की दोनों नोकों से अमृत के स्वाद के लोभ से ये पृथ्वी को चाट रहे; हैं मलय

सम्प्रत्याबद्धवेगा मलयगिरिसरिद्वारिपूरा इवामी
वक्रैः प्रस्थानमार्गैर्विषधरपतयस्तोयराशिं विशन्ति ॥ ३६ ॥

[नायकमुद्दिश्य]। वत्स जीमूतवाहन! न त्वं जीवितदानमात्रस्यैव योग्यः, तदयमपरस्ते प्रसादः।—

हंसांसाहतहेमपङ्कजरजः सम्पर्कपङ्कोज्झित-
रुत्पन्नैर्मम मानसादुपनतैस्तोयैर्महापावनैः।
स्वेच्छानिर्मितरत्नकुम्भनिहितैरेषाऽभिषिञ्च स्वयं

विषधरपतयः बृहदाकाराः नागाः। मलयगिरिसरिद्वारिपूरा इव मलयगिरेः मलय-पर्वतात् निःसरन्तीनां सरितां नदीनां वारिपूराः जलप्रवाहाः इव। वक्रैः कुटिलैः। प्रस्थानमार्गैः गमनमार्गैः। स्वजात्युचितान् कुटिलान् मार्गाननुसृत्येति यावत्। तोयराशिं समुद्रं विशन्ति। यथा मलयपर्वतात् प्रवहन्तीनां नदीनां वारिधाराः तटेषु निम्नानुसारेण कुटिलैर्मार्गैर्जलनिधिं प्राप्नुवन्ति, तथा फणमणिभिरुज्ज्वल-मस्तकाः, सुधासिक्तं वसुधामामृतरसलोभेन सतृष्णं लिहन्त एते नागाधिपतयः सवेगं समुद्रं समुपविशन्तीति सरलार्थः। उपमालङ्कारः स्रग्धरा वृत्तम् ॥ ३६ ॥

अतीवहृष्टा गौरी अपरं प्रसादं वितरति हंसांसेत्यादिना—अहं हंसांसाहत-हेमपङ्कजरजःसम्पर्कपङ्कोज्झितैः हंसाना मानसाश्रयिणां कमलवनसंचारिणां। अंसैः स्कन्धैः कण्ठकण्डूयनशमनायेत्येवं आहतानां ताडितानां। हेमपङ्कजानां सुवर्णकमलानां चलनेन गलितं यत् रजः परागः। तस्य सम्पर्के यः पङ्कः आर्द्रीभा-वजनितः तेन उज्झितैः परित्यक्तैः। मम मानसात् अन्तः करणात् उत्पन्नैः। (मानस-पदस्य सरोविशेषवाचित्वं च स्फुरति) परं महापावनैः अतिशयेन पवित्रैः अन्यच्च। स्वेच्छानिर्मितरत्नकुम्भनिहितैः स्वेच्छया संकल्पेन निर्मितेषु रचितेषु रत्नकुम्भेषु

पर्वत से गिरने वाले जलप्रवाह की भाँति ये उरगपति झुंड के झुंड टेढ़े मार्गों से समुद्र में बड़े वेग से प्रवेश कर रहे हैं ॥ ३६ ॥

पुत्र जीमूतवाहन! तुम को केवल जिला देना ही योग्य नहीं है। तुम पर कुछ और प्रसन्नता करनी चाहिये।—

हंसों के कन्धों से हिलाये गये सुवर्ण कमल के पराग के सम्पर्क से उत्पन्न हुई पंकता को न धारण करने वाले (१) मेरे मानस से उत्पन्न होने वाले, स्वेच्छानिर्मित रत्नों के घड़ों में रखे

(१) मानसरोवर के जल में पराग के अधिक गिरने से कीचड़ हो जाया करता है। परन्तु देवी के मानस से उत्पन्न जल में ऐसी कलुषता नहीं है—वह बिलकुल निर्मल है।

त्वां विद्याधरचक्रवर्त्तिनमहं प्रीत्या करोमि क्षणात् ॥ ३७ ॥

अपि च।—

अग्रेसरीभवतु काञ्चनचक्रमेतदेष द्विपश्च धवलो दशनैश्चतुर्भिः।
श्यामो हरिर्मलयवत्यपि चेत्यमूनिरत्नानि ते समवलोकय चक्रवर्त्तिन्! ३८

रत्नमयघटेषु निहितैः स्थापितैः। उपनतैः मदीयेच्छानुसारेण प्राप्तैः। इत्थं अलौकिकैः तोयैः जलैः। स्वयं आत्मना। अभिषिच्य स्नापयित्वा। त्वां प्रीत्या क्षणात् मुहूर्त मात्रेण। विद्याधरचक्रवर्तिनं विद्याधराणां चक्रवर्तिनं सम्राजं करोमि। अयमेव ते इतरविलक्षणः मत्प्रीत्यनुरूपः प्रसादः इत्यर्थः। शार्दूलविक्रीडितं वृत्तम् ॥३७॥

न केवलमभिषेचनमात्रम्, तदङ्गान्यपि सम्पादयामीति प्रतिपादयन्ती तानि निर्दिशति 'अग्रेसरीभवतु' इत्यादिना—

एतत् काञ्चनचक्रं सुवर्णालङ्कृतं चक्रं अग्रेसरी भवतु दीयमानेषु रत्नेषु प्रथमं भवतु। परिपन्थनिराकरणसाधनत्वात् चक्रमेव प्रथमं गृह्णात्वित्यर्थः। धवलः सर्वाङ्गेषूज्वलः। चतुर्भिः दशनैः दन्तैरुपलक्षितः। एष द्विपः द्वाभ्यां पिबतीति द्विपः हस्ती ('सुपि स्थः' इत्यत्र योगविभागात् कः) [बुद्धसम्प्रदाये चतुर्भिर्दशनैरुपेतः श्वेतोगजः मङ्गलरूपतया श्लाघनीयो मन्यते अतएव तस्यैवात्र निर्देशः)। श्यामः श्यामवर्णः। हरिः अश्वः (यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु। शुकाहिकपिभेकेषु हरिर्ना' इत्यनेकार्थवर्गे अमरः) [अश्वानां श्यामस्य मुख्यत्वात् वर्णनिर्देशः] मलयवती च एतानि ते तुभ्यं दत्तानि रत्नानि हे चक्रवर्तिन्! विद्याधराणां राजाधिराज! अवलोकय एतानि सद्यो गृह्णात्वित्यर्थः। [चक्रवर्तिनः सप्तरत्नानि भवन्तीति शास्त्रविदो मन्यन्ते। तानि च यथा—

भार्या पुरोहितश्चैव सेनानी रथकृच्च यः।
पत्यश्वौ कलभश्चेति प्राणिनः सप्त कीर्तिताः ॥

ललितविस्तरेऽपि यथा-तस्येमानि सप्तरत्नानि भवन्ति। तद्यथा चक्ररत्नं हस्ति-

गये परम पवित्र जल से मैं स्वयं तुम्हारा राज्याभिषेक कर प्रसन्नता से अभी तुम्हें विद्याधरों का चक्रवर्ती बनाये देती हूं ॥ ३७ ॥

और भी:—

यह सोने का बना हुआ चक्र सब से पहले ग्रहण करो। चार दन्तों वाला यह सफेद हाथी फिर तुम्हें प्राप्त हो। श्याम रंग घोड़ा तथा मलयवती—इन रत्नों को, हे चक्रवर्ती! देखो तथा ग्रहण करो ॥ ३८ ॥

अपि च—आलोकयन्तामी *मत्प्रचोदिताश्चटुलचूडामणिमरीचि-रचितेन्द्रचापपङ्क्तयो भक्त्यावनतपूर्वकायाः प्रणमन्ति मतङ्गदेवादयो वि-द्याधरपतयः । तदुच्यतां, किं ते भूयः प्रियमुपकरोमि ?

नायकः (जानुभ्यां स्थित्वा) । अतः परमपि प्रियमस्ति ?—

आतोऽयं शङ्खचूडः पतगपतिमुखाद्वैनतेयो विनीत-

रत्नमश्वरत्नं स्त्रीरत्नं मणिरत्नं गृहपतिरत्न परिणायकरत्नमेव सप्तमम् । अत्र ललि-तविस्तरक्रमानुरूपेण प्रथमतश्चत्वार्येव रत्नानि कविना वर्णितानि ।] (तदानीमेवा-भिषिच्य रत्नानि च समर्प्य तदुचितं नाम स्वोक्त्या स्थिरीकरोति ।) वसन्ततिलका वृत्तम् ॥ ३८ ॥

अपि चेति । एते च मत्प्रचोदिताः बुद्धिमाविश्य मया प्रेरिताः । चटुल-चूडामणिमरीचिरचितेन्द्रचापपङ्क्तयः चटुलानां प्रणामत्वरया चञ्चलानां चूडा-मणीनां शिरः प्रसाधनाना मरीचिभिः किरणैः रचिताः इन्द्रचापानां विविधं रञ्जि-तानां इन्द्रधनुषां पङ्क्तयः यैः तथाभूताः । (विद्याधराधिपतीनां शिरःसु स्था-पिताः विविधवर्णाः मणयः प्रभासाङ्कर्येण इन्द्रचापरूपतां धारयन्तीति भावः) भक्त्या पूज्येष्वनुरागेण । अवनतपूर्वकायाः अवनतः प्रणतिव्यापारे नम्रः । पूर्व-कायाः शिरः येषां तथोक्ताः । मतङ्गदेवादयः विद्याधरपतयः त्वां प्रणमन्ति । पूर्वं राज्यापहारादिप्रवृत्तो मतङ्गः त्वां आदौ प्रणमति, अनेन 'प्रधान वैरिणः शमने विहिते अन्येषां का कथा' इति भगवत्याः प्रसादातिशयो द्योत्यते ।

देव्याः प्रसादातिशयमालक्ष्य भक्तिप्रवणो नायकः कृतानां परिगणनया कृता-र्थतां प्रकाशयति **आतोऽयमिति**—

पतगपतिमुखात् गरुडमुखात् अयं शंखचूडः आतः रक्षितः । (स्वामिना आहारार्थं प्रेषितं गरुडस्यास्यगतमपि शङ्खचूडं रक्षितवानस्मीति भावः) । वैन-

---

और भी:—

ये देखो—मेरी प्रेरणा से मतङ्गदेव आदि विद्याधरों के अधिपति चञ्चल चूडामणि की किरणों के कारण इन्द्रचाप की रचना करते हुये (चूडामणि के किरणों से इन्द्र धनुष की शोभा धारण करते हुये) अपने मस्तक को झुकाकर तुम्हें भक्ति के साथ प्रणाम कर रहे हैं ?

नायकः—(घुटने के बल बैठकर) क्या इससे भी अधिक कोई प्रिय वस्तु हो सकती है ।

पक्षिराज के मुखसे शंखचूड़ बचाया गया, है गरुड विनयी बनाया गया है, उसके द्वारा

---

*नारदशकुनिर्मलवालव्यजनहस्ता—ग ।

स्तेन प्राग्भक्षिता ये विषधरपतयो जीवितास्तेऽपि सर्वे ।
मत्प्राणाप्त्या विमुक्ता न गुरुभिरसवश्चक्रवर्त्तित्वमाप्तं
साक्षात् त्वं देवि ! दृष्टा प्रियमपरमतः किं पुनः प्रार्थ्यते यत् ॥ ३९॥

तथाऽपीदमस्तु । [भरतवाक्यम्] ।—

वृष्टिं हृष्टशिखण्डिताण्डवभृतो मुञ्चन्तु काले घनाः

तेयः विनतायाः अपत्यं पुमान् वैनतेयः गरुडः ('स्त्रीभ्यो ढक्' इति ढक् प्रत्ययः) विनीतः स्वतो विनयं प्रापितः । अन्यच्च प्राक् पूर्वं तेन पक्षिराजेन । ये विषधरपतयः नागाः भक्षिताः ते सर्वेऽपि जीविताः पुनरुज्जीवनं प्रापिताः । मत्प्राणाप्त्या मम जीवितस्य लाभेन । गुरुभिः पित्रादिपूज्यजनैः असवः प्राणाः न विमुक्ताः न त्यक्ताः । (मम मरणे तु गुरुजनानां प्राणनाशो निश्चित एव, परन्तु गौर्य्याः प्रसादात् पुनरुज्जीवितोऽहम्, येन तेषां प्राणाः यथावसरं रक्षिताः इति सरलार्थः) पुनश्च चक्रवर्तित्वं सम्राजः दुर्लभं पदं आप्तं लब्धम् । हे देवि ! सूर्यादीनतिक्रम्य द्योतनशीले गौरि, त्वं साक्षात् दृष्टा नेत्रगोचरीकृता । अतः परं निखिलनिःश्रेयसप्रसादात् तव दर्शनात् किमपरं प्रियं वर्तते यत् माया प्रार्थ्यते । 'तव प्रसादात् सिद्धानि मेऽखिलान्यभिलषितानि; न किमपि प्रार्थनीयमवशिष्टं वर्तते' इत्यर्थः । स्रग्धरा वृत्तम् ॥ ३९ ॥

तथापि एतावत् अस्तु कार्यमेतत् सिध्यतु ।

भरतवाक्यम्—'नाटकावसाने निर्वहणसन्धेरङ्गभूता लोकानुग्रहहेतुतया रूपकस्य शुभशंसनात्मिका प्रशस्तिः अवश्यं विधेया' इति नाट्याचार्याणां मतम् । तद्द्योतकं वाक्यं भरतवाक्यम् । "भरतवाक्यं नटवाक्यम् । नाटकाभिनयसमाप्तौ सामाजिकेभ्यो नटेनाशीर्दीयते इत्यर्थः । प्रस्तावनानन्तरं नटवाक्याभावादत्र भरतवाक्यमित्युक्तिः" इत्यभिज्ञानशाकुन्तलटीकायां राघवभट्टः ।

तदेव वाक्यं प्रदर्शयति **वृष्टिमित्यादिना**—हृष्टशिखण्डिताण्डवभृतः हृष्टा-

---

पहले खाये गये सब साँप भी जिला दिये गये हैं, मेरे पुनः जीवित हो जाने से माता पिता ने अपने प्राणों को नहीं छोड़ा है (अर्थात् जीवित ही है), चक्रवर्तीपद मुझे मिल गया है, और अगती ! तुम्हारा यह प्रत्यक्ष दर्शन मिल गया । भला इससे बढ़कर और कौन वस्तु है जिसकी प्रार्थना करूँ ॥ ३९ ॥

तौभी यह हो । (भरतवाक्य)—

मेघ गण उचित समयपर वर्षा करें । मयूरगण प्रसन्न होकर नाचें । पृथ्वी उगे हुये हरे

कुर्वन्तु प्रतिरूढसन्ततहरिच्छस्योत्तरीयां क्षितिम्।
विन्वानाः सुकृतानि वीतविपदो निर्मत्सरैर्मानसै-
र्मोदन्तां *घनबद्धबान्धवसुहृद्गोष्ठीप्रमोदाः प्रजाः ॥ ४० ॥

ना घनागमे विरतिशयमाह्लादिताना। शिखण्डिना शिखण्डः चूडा विद्यते येषां तेषां मयूराणाम्। ("शिखा चूडा शिखण्डस्तु पिच्छबर्हे नपुंसके" इत्यमरः)। ताण्डवानि उद्धतनृत्यानि बिभ्रतीति तथोक्ताः मयूराणां ताण्डवनिर्वाहकाः इति यावत्। प्रतिरूढसंततहरिच्छस्योत्तरीयां प्रतिरूढानि सेकसम्बन्धेन विरूढानि। सन्ततानि अविरलानि। हरिन्ति हरिद्वर्णानि शस्यानि घासा एव उत्तरीयं वस्त्रं यस्याः तथाभूतां क्षितिं पृथ्वीं कुर्वन्तः। (यथेष्टजलसेवनात् महीं शस्यश्यामला कुर्वन्तः इत्यर्थः। सस्यसम्पदा सकलकर्मणां सिद्धिरिति तदुत्पत्तिरेव प्रधानतया आशास्यते।) घनाः अम्बुदा मेघाः काले उपयुक्ते समये वृष्टिं जलवर्षणं मुञ्चन्तु किरन्तु। अपेक्षिते काले गते सति निरन्तरापि वृष्टिर्नैव तादृशीमुपकृतिं विधास्यतीति सस्यसम्पतेः हेतुभूता वृष्टिः काले एव आशास्यते। अन्यच्च. सुकृतानि पुण्यकर्माणि चिन्वानाः पुनः पुनः सम्पादयन्त्यः। वीतविपदः अकालमरणादिविपत्तिहीनाः। घनबद्धबान्धवसुहृद्गोष्ठीप्रमोदाः घनं निबिडं यथा स्यात् तथा बद्धः स्थिरीकृतः। 'अत्यागसहनो बन्धुः सदैवानुगतः सुहृत्' इति लक्षितानां बान्धवानां त्यागमसहिष्णूनां बन्धूनां। सुहृदां च सदैवानुगतानां मित्राणां च। गोष्ठीषु नृत्यगीतादिसमाजेषु प्रमोदः आनन्दः याभिः तथाभूताः (न-केवलं स्वयं मुदिताः, अपि तु मित्रबान्धवैः सह गोष्ठीषु प्रमोदमनुभवन्त्यः इत्यर्थः) प्रजाः सर्वे जनाः ("प्रजा स्यात् सन्ततौ जने" इत्यमरः)। निर्मत्सरैः निर्गतः मत्सरः परवृद्धयसहत्वं,(द्वेषः इति यावत्) येभ्यः तादृशैः मानसैः द्वेषहीनैः चेतोभिः। मोदन्ताम् आनन्देन कालं यापयन्तु। 'महीं शस्यसम्पन्नां कुर्वन्तः नवाम्बुदाः काले जलं वर्षन्तु, विश्वे जनाः सुकृतेषु निरता बीतभया मित्रादीन् प्रसादयन्त आनन्देन कालं नयन्तु' इति संक्षिप्तार्थः। शार्दूलविक्रीडितम् ॥ ४० ॥

भरे शस्यों की चादर सदा ओढा करे। सब विपत्ति नष्ट हो जाय। मत्सर हीन होकर प्रजालोग सुकृतों का संचय किया करें तथा गोष्ठियों में (नाच गान में) अपने बन्धुओं तथा सुहृदों के साथ अत्यन्त आनन्द मनाते हुये सदैव प्रसन्न रहें।

*सन्ततं च-ग।

अपि च—

*शिवमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं सर्वत्र सुखी भवतु लोकः ॥ ॥ ४१ ॥

[इति निष्क्रान्ताः सर्वे] ।

इति पञ्चमोऽङ्कः ।

इत्थं प्रार्थ्य पुनरपि आशास्ते 'शिवमस्तु' इति—

सर्वजगतां सर्वस्य चराचरात्मकस्य त्रैलोक्यस्य । शिवमस्तु कल्याणं भवतु । विश्वप्रपञ्चस्य मङ्गलसम्पादने भवत्या एव शक्तिरिति भावः । भूतगणाः प्राणिनः परहितनिरताः परेषां हितेषु कल्याणसाधनेषु निरताः तदेकपराः भवन्तु । दोषाः

कामः क्रोधो मदो मानः पैशुन्यं परिवादिता ।
लोभाहंकारनैष्ठुर्यदम्भा दोषा दश स्मृताः ॥

इति शिवरामेण लक्षिताः चित्तविकारहेतवो दश दोषाः । नाशं प्रयान्तु सर्वथा विनश्यन्तु । सर्वत्र चतुर्दशभुवनेषु लोकः जनः सुखी सकलार्थसिद्ध्या सुखसम्पन्नो भवतु । इति ॥ ४१ ॥

अश्ववस्वङ्कचन्द्रेऽब्दे फाल्गुनस्य सिते दले ।
सप्तम्यां मङ्गले वारे व्याख्येयं रचिता मया ॥

इति एम० ए० साहित्याचार्यैतिपदवीविभूषितेन श्रीबलदेवोपाध्यायेन विरचितायां भावार्थदीपिकाख्यायां नागानन्दव्याख्यायां पञ्चमोऽङ्कः समाप्तः ।

और भी:—

सब संसार का कल्याण हो । समस्त प्राणी लोग दूसरे के हित करने में सदा लगे रहें । सब (काम क्रोध आदिक दसों) दोष नष्ट हो जाँय सर्वत्र लोग सुखी हों ॥ ४१ ॥

(इस तरह से सब जाते हैं)

इति श्रीबलदेवोपाध्याय एम० ए० साहित्याचार्यकृत-
नागानन्दभाषानुवादे पञ्चमोऽङ्कः समाप्तः ।

समाप्तश्चायं ग्रन्थः ।

---

*ग पुस्तके पद्यमिदं नोपलभ्यते ।